REPRODUCTION OF EARLIE EDITION OF THE
SABDARTHACINTAMANIH

शब्दार्थचिन्तामणिः

SABDARTHACİNTAMANIH

द्वितीय खण्ड

भाग - अ

ब्राह्मावधूत श्रीसुखानन्दनाथः

प्रिन्टवैल

जयपुर- 302 004

Published by
PRINTWELL
S-12 Shopping Complex
Tilak Nagar Jaipur 302 004

Distributed by
RUPA BOOKS PVT LTD
H O S-12 Shopping Complex Tilak Nagar Jaipur 302 004
B O 295-B Bharti Nagar P N Pudur Coimbatore 641 041

ISBN 81 7044-369 5 (Set)

SABADARTH CHINTAMANI

First Published 1860
Reprint 1992

Printed at

Efficient Offset Printers
215 Shahzada Bagh Indl Complex
Phase II Phone 533736 533762
Delhi 110035

च'

च । अ । अन्वाचये ॥ यत्रैकस्य प्राधान्येना ऽपरस्य गौणत्वेनाख्यानं सोन्वाचय' । यथा । भोवटो भिक्षामट गाञ्चानयेति । अत्र भिक्षाटनं प्रधान ततकुर्वाणो यदि गां पश्यसि तदा तामप्यानय नोचेत् भिक्षामेवाटेति ॥ समुच्चये । परस्पर० निरपेक्षस्या नेकस्ये कस्मिन्नन्वये ॥ यथा । ईश्वर गुरुञ्च भजस्वेति । उभयच न समासोऽसामर्थ्यात् ॥ इतरेतरयोगे । अन्योन्यार्थे । मिलितानामन्वये ॥ समाहारे । समूहे ॥ पक्षान्तरे ॥ पादपूरणे ॥ अवधारणे ॥ हेतौ ॥ तुल्ययोगितायाम् ॥ विनियोगे ॥ चनति चिनोति वा । चन शब्दे चिञ् चयने वा । अन्येभ्योपीति ड ॥ दौ चकारावविलम्बसूचकौ भवत' ॥ चण्० यद्यर्थे णित् । समुच्चयादौ त्वननुबन्ध ॥

च । पु । चण्डेशे ॥ कच्छपे ॥ चन्द्रे ॥ चौरे ॥ चवर्गे ॥ त्रि । दुर्जने ॥ निर्बीजे ॥

चकासत् । त्रि । प्रकाशमाने ॥ चकास्ति । चकासृ दीप्तौ । लट. शत्रादेश ॥

चकितम् । न । भयसंभ्रमे ॥ त्रि । शङ्किते ॥ भीते ॥ तस्यलक्षणम् । प्रियाग्रे चकितभीते रस्थानेपि भय महदिति ॥

चकिता । स्त्री । अष्टिसत्वकषोडशाक्षरायावृत्तौ ॥ भात् समतनगौ रष्टच्छेदे स्यादिह चकिता ॥ दुर्जयदनुजश्रेणी दुश्चेष्टाशतचकिता यङ्कजपरिघन्नाता याता साध्वसविभ्रमम् । दीव्यतिदिविषन्माला यस्मिन्नन्दनविपिने गच्छत शरणं कृष्णं भोभीता भवरिपुत ॥

चकोर । पु । स्वनाम्ना प्रसिद्धे पक्षिविशेषे । कौमुदीजीविनि । चन्द्रिकापायिनि ॥ चटक शीतल वृष्य वृष्य कापिञ्जलामिषम् । तद्वच्चकोरज मांस दृष्यञ्च बलपुष्टिदम् ॥ चकति । चकतृप्तौ । कठिचकिभ्यामोरन् ॥

चकोरक । पु । चकोरे ॥ स्वा० कन् ॥

चक्र । पु । कोके । चक्रवाके । चकवा इतिप्रसिद्धे पक्षिणि ॥ न । व्रजे । गणे ॥ सैन्ये ॥ रथाङ्गे । चक्का पैया इतिचभाषा ॥ राष्ट्रे ॥ दम्भान्तरे ॥ कुम्भकारोप करणे । चाक इतिभा

षा ॥ अस्त्रविशेषे । प्रहरणे ॥ पुट भेदे । जलावर्त्ते ॥ ग्रामजाले ॥ तगरपुष्पे ॥ महाभारतप्रसिद्धे व्यूहविशेषे ॥ तैलयन्त्रे ॥ मूलाधार-स्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञाख्येषु शरीरस्थेषु षट्सु ॥ सर्वतोभद्रादौ । देवार्च्चाधारयन्त्रे ॥ मन्त्रदीक्षोपयोगिष्वकडमादिषु ॥ श्रीचक्रे ॥ कौलिकानां हितार्थाय श्रीसदाशिवोक्तेषु महाचक्रादिपञ्चसु ॥ यथा । श्रीश्वर उवाच । चक्रं पञ्चविधं प्रोक्तं श्रीतन्त्रे रुद्रयामले । विधिनापूजिते चक्रे सौख्यमोक्षफलं लभेत् ॥ महाचक्रं चक्रराजं दिव्यचक्रं तथापरम् । वीरचक्रं चतुर्थञ्च पशुचक्रञ्च पञ्चममिति ॥ पञ्चचक्रे सकामानामधिकारः । यथा । राजचक्रं राज्यदं स्यात् महाचक्रन्तु मोक्षदम् । देवत्वदं देवचक्रं वीरचक्रन्तु सिद्धिदम् ॥ पशुचक्रन्तु दारिद्र्यदुःखशोकामयप्रदम् । कापश्येदक्षिणाहीने सर्वचक्रन्तु निष्फलमिति ॥ सकामाश्चैव निष्कामा द्विविधा भुवि मानवाः । चुराशया कामिनो ये तेषां मत्राधिकारिता ॥ * ॥ ब्रह्मज्ञानायतु मोक्तं भैरवीचक्रमुत्तमम् ॥ ब्रह्मज्ञानयुतानान्तु तत्त्वचक्रेऽधिकारिता ॥ यथोक्तं श्रीमहानिर्वाणे । नाचाधिकारः सर्वेषां ब्रह्मज्ञानसाधकान् विना । परब्रह्मोपासका ये ब्रह्मज्ञा ब्रह्मतत्पराः । शुद्धान्तःकरणाः शान्ताः सर्वप्राणिहिते रताः ॥ निर्विकारा निर्विकल्पा दयाशीला दृढव्रताः । सत्यसङ्कल्पका ब्राह्मास्त एवात्राधिकारिणः ॥ ब्रह्मभावेन तत्त्वज्ञा ये पश्यन्ति चराचरम् । तेषां तत्त्वविदां पुंसां तत्त्वचक्रेऽधिकारिता ॥ सर्वं ब्रह्ममयं भावश्चक्रेऽस्मिंस्तत्त्वसञ्ज्ञके । येषामुत्पद्यते देवि त एव तत्त्वचक्रिण इति ॥ छन्दोविशेषे । यथा । कुण्डलकलितनगणमिह निहितयगन्धकुसुमरसविरचयवलयम् । चक्रमुरगपतिवरपरिगणितषोडशकलमतिसुललितभणितम् ॥ सुन्दरि नभसि जलदचयरुचिरे देहिनयनयुगमतिघनचिकुरे । मानमिह हि जहि जलधरसमये किन्तव भवति हृदयमिदमदयेऽइति ॥ क्रियतेऽनेन । घञर्थे क । के कूलादीनामितिदीर्घः ॥ अर्द्धर्चादि ॥

चक्रक । त्रि । तर्कविशेषे ॥ अन्योन्याश्रयमेवावर्त्तितं चक्रकं भवति । स्वापेक्षापेक्ष्यपेक्षानिबन्धनेऽनिष्टप्रसङ्गे । चतुष्काद्यावपि स्वस्य

स्वापेक्षापेक्ष्यपेक्षित्वसम्बन्धाधिकय न् ॥ असमानाश्रयवत् वैविध्यम् ॥ अपिचास्य लक्षण यथा । स्वापेक्ष णीयापेक्षितसापेक्षितत्वनिबन्धनप्र सङ्गत्वमिति । अपेक्षाच प्रमावुत्प त्तौ स्थितौच ग्राह्या । तत्राद्या यथा । एतद्घटज्ञानं यद्येतद्घटज्ञानज न्यज्ञानजन्यज्ञानजन्यस्यात् तदाए तद्घटज्ञानजन्यज्ञानजन्यज्ञानभि न्न स्यात् । द्वितीया यथा । घटोय यद्येतद्घटजन्यजन्यजन्य स्यात्त दा एतद्घट जन्यजन्यभिन्न स्यात् । तृतीया यथा । घटोय यद्येतद्घ टवृत्तिवृत्ति स्यात् तथात्वेनोपलभ्ये तेति । इतितर्कशास्त्रम् ॥

चक्रकारकम् । न । व्याघ्रनखाख्यगन्ध वस्तुनि । करजे ॥ चक्रस्यकारकम् ॥

चक्रकुल्या । स्त्री । पृश्निपर्ण्याम् ॥

चक्रगज । पु । चक्रमर्दे ॥

चक्रगण्डु । पु । वर्त्तुलाकारोपधाने । चातुरे । गालसिङ्ग्याना गोलसिङ्गा ना इतिचभाषा ॥

चक्रगदाधर । पु । परमात्मनि वासुदे वे ॥ मनस्तत्त्व ात्मक चक्र वुद्धितत्त्वा त्मिका गदाम् । धारयन् लोकर चार्थं गुप्तश्चक्रगदाधर ॥ चक्रगदे धरति । धृञ्० । पचाद्यच् ॥ चक्रग दयोर्धरोवा ॥

चक्रगुच्छ । पु । अशोकपादपे ॥

चक्रजीवक । पु । कुलाले । कुम्भकारे ॥ चक्र जीवनमस्य ॥

चक्रदंष्ट्र । पु । शूकरे ॥

चक्रदन्ती । स्त्री । दन्तीवृक्षे ॥

चक्रदन्तीवीजम् । न । जयपाले ॥

चक्रधर । पु । अर्जे । विष्णौ ॥ अहौ । सर्पे ॥ त्रि । चक्रिणि ॥ ग्रामजालि नि ॥ धरति । धृञ्० । अच् । चक्र स्यधर ॥ चक्रधारयतिवा । अच् वा हुलकाण्णिलुक् ॥

चक्रधारणम् । न । अक्षे । रथावयवे काष्ठविशेषे ॥

चक्रधारा । स्त्री । प्रधौ ॥ चक्रस्यधारा ॥

चक्रनख । पु । व्याघ्रनखाभिधेगन्ध द्रव्ये ॥

चक्रनदी । स्त्री । गण्डक्याम् ॥

चक्रनामा । पु । माक्षिकधातौ ॥

चक्रनायक । पु । व्याघ्रनखे ॥

चक्रपक्षाट । पु । दद्रुघ्न ॥

चक्रपरिव्याध । पु । आरग्वधवृक्षे ॥

चक्रपर्णी । स्त्री । पृश्निपर्ण्याम् ॥

चक्रपाणि । पु । विष्णौ । नारायणे ॥ च क्र पाणौ यस्यस । प्रहरणार्थेभ्य परे निष्ठासप्तम्याविति सप्तम्या परत्वम् ॥

चक्रपाद । पु । रथे ॥ गजे । हस्तिनि ॥

चक्रपुष्करिणी । स्त्री । मणिकर्णिकायाम् ॥

चक्रफलम् । न । अस्त्रविशेषे । अङ्गने ॥

चक्रबन्ध । पु । चित्रकाव्यविशेषे ॥

चक्रबन्धु । पु । } रवौ ॥
चक्रबान्धव । पु । }

चक्रभृत् । पु । विष्णौ ॥

चक्रभेदिनी । स्त्री । रात्रौ ॥

चक्रभ्रम । पु । } कुन्दाख्ये शिल्पियन्त्रे । चक्राकारे शस्त्रोत्तेजनयन्त्रे । शाणे ॥
चक्रभ्रमि । स्त्री । }

चक्रमण्डली । पु । अजगरसर्पे ॥

चक्रमर्द । पु । चकवँड इति कसौँदी इतिच भाषाप्रसिद्धे क्षुपविशेषे । दद्रुघ्ने । एडगजे ॥ चक्रमर्दो लघु स्वादु रूक्ष पित्तानिलापहः । हृद्यो हिम. कफश्वासकुष्ठदद्रुकृमीन हरेत् ॥ हन्त्युष्णा तत् फल कुष्ठकण्डु दद्रुविषानिलान् । गुल्मकासकृमि श्वासनाशनकटुक स्मृतम् ॥ चक्र दद्रुम्मर्दनाति । मृदचोदे । कर्मण्यण ॥

चक्रमर्दक । पु । चक्रमर्द ॥ स्वा° कन् ॥

चक्रयानम् । न । असाङ्ग्रामिके रथे । पुष्परथे ॥

चक्रयानकम् । न । चक्रयाने ॥

चक्ररद । पु । शूकरे ॥

चक्रलक्षणा । पु । विष्णौ ॥ रथे ॥

चक्रलक्षणा । स्त्री । गुडूच्याम् ॥

चक्रलताम्र । पु । बदरसालवृक्षे ॥

चक्रला । स्त्री । उच्चटायाम् । मुस्ताविशेषे ॥ चक्र लाति । ला° । आत इति क ॥

चक्रवर्त्ती । पु । समुद्रपरिवृताया सर्वभूमेरीश्वरे । सार्वभौमे ॥ चक्रे भूमण्डले राजमण्डले वर्तितु चक्र सैन्यं वर्त्तयितु सर्वभूमौ चालयितु वा शीलमस्य । सुपीतिणिनि ॥ अवश्य वा चक्रवर्त्तयति । आवश्यके णिनि ॥ वास्तूके ॥ डगणे मध्यगुरौ । ऽ । सख्यायाम् ॥ त्रि । चक्रवर्त्तिनि ॥

चक्रवर्त्तिनी । स्त्री । जन्याम् । जतूकायाम् ॥ अलक्तके ॥ जटामांस्याम् ॥

चक्रवाक । पु । कोकपक्षिणि । चकवा इति भाषा ॥ अस्यमास लघु स्निग्धं बलप्रदमुदाहृतम् ॥ चकशब्देन उच्यते । वचपरिभाषणे । घञ् । न्यङ्क्वादि. ॥

चक्रवाकी । स्त्री । चक्रवाकस्य विहङ्ग्याम् । चकवा इति भाषा ॥ जातेरित्ङीष् ॥

चक्रवाट । पु । क्रियारोहे ॥ शिखातरौ ॥ पर्यन्ते ॥ मेरोर्मस्तकसमीपे लोकपालाश्रयभूताया अष्टादशसहस्त्रयोजनविस्तीर्णायां नेमौ ॥

चक्रवाड । पु । लोकालोकाख्यपर्वते ॥ चक्राकारेण वाडते । वाडृआप्लाव्ये । अच् ॥ न । चक्रवाले । मण्डले ॥ चक्रं भूमण्डलं वलते । वलवेष्टने । कर्मण्यण् । डलयोरैकत्वम् ॥

चक्रवात । पु । वात्यायाम् । ववूरा इति भाषा ॥

चक्रवाल । पु । लोकालोकपर्वते ॥ न । मण्डलाकारेण परिणतसमूहे । मण्डले ॥ चक्राकारेण वलते । वलसंवरणे । अच् । अन्येषामपीतिदीर्घः ॥ यद्वा । भावेघञिवालः । चक्रमिववालोऽस्य ॥ चक्रं भूमण्डलं वलते । वलवेष्टने । कर्मण्यणुवा ॥ चक्रवालमस्याऽस्तीतिवा । अर्शआद्यच् ॥

चक्रवृद्धि । स्त्री । यत्रवृद्धिरूपधनदातुरशक्तोऽधमर्णः सवृद्धिकमिदं दास्यामीतिस्वीकरोति तत्रयावृद्धिः सा । सूदका सूद इतिभाषा ॥ वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृतेति नारद ॥

चक्रव्यूह । पु । युद्धार्थं मण्डलाकारेण सैन्यरचनायाम् ॥

चक्रशल्या । स्त्री । काकतुण्ड्याम् ॥ श्वेतगुञ्जायाम् ॥

चक्रश्रेणी । स्त्री । अजशृङ्ग्याम् ॥

चक्रसंज्ञम् । न । वङ्गे ॥

चक्रसम्वर । पु । बुद्धभेदे । वज्रटीके ॥

चक्रा । स्त्री । नागरमुस्तायाम् ॥ कर्कटशृङ्ग्याम् ॥

चक्राङ्ग । पु । श्वेतगरुति । हंसे ॥ चक्रायणङ्गान्यस्य ॥ रथे ॥ चक्रमङ्गमस्य ॥

चक्राङ्गा । स्त्री । सुदर्शनायां लतायाम् ॥

चक्राङ्गी । स्त्री । कटुरोहिण्याम् ॥ हिलमोचिकायाम् ॥ मञ्जिष्ठायाम् ॥ वृषपर्ण्याम् ॥ कर्कटशृङ्ग्याम् ॥ चक्राकारमङ्गमस्याः । गौरादित्वान् ङीष् ॥ हंस्याम् ॥

चक्राट । पु । विषवैद्ये ॥ धूर्त्ते ॥ दीनारे ॥

चक्राधिवासी । पु । नारङ्गवृक्षे । किर्मीरत्वचि ॥

चक्रावर्त्त । पु । घर्णने ॥

चक्राह्व । पु । चक्रमर्द्दे ॥

चक्रिक । पु । घटिके । घटिकावादके ॥ चक्रंवाद्यत्वेनास्त्यस्य । ठन् ॥

चक्रिका । स्त्री । दुरुयोगे ॥ घुटावर्त्ते ॥ जानुनि ॥ चक्री इतिभाषा प्रसिद्धे द्रव्यस्वरूपे ॥

चक्री । पु । जालिकभिदि ॥ कोके ॥ कुलाले ॥ अहौ ॥ सूचके ॥ वैकुण्ठे । नारायणे ॥ चक्रं मनसस्त्वात्मकं सुदर्शनाख्य मस्यास्ति इनि ॥ चक्रवर्त्तिनि ॥ चक्रमर्द्दे ॥ तिनिशे ॥

व्यालनखे ॥ काके ॥ खरे ॥ त्रि । च क्रविशिष्टे ॥ चक्रमस्यास्ति । अतइ निठनाविति इनि' ॥ चक्रयुक्तरथा दियानारूढे ॥

चक्री । स्त्री । चक्की इतिसर्वजनप्रसि द्धाया चूर्णपेषणयन्त्रम् । जाँता इति भाषा ॥

चक्रीवान् । पु । गर्दभे ॥ चक्रवङ्क्रमणं चक्रम् । तदस्यास्ति । मतुप् । आ सन्दीवदितिसाधु ॥ चक्रीवान्नाम राजापि ॥

चक्रु' । पु । कर्त्तरि ॥ करोति । डुकृ ञ० । कृञश्चेति चकारात्क्रु प्रत्य योधातोर्द्वित्वञ्च ॥

चक्रेश्वरी । स्त्री । जिनानांविद्यादेवी विशेषे ॥ इतिहेमचन्द्र ॥

चषणम् । न । अवदंशे । मद्यपानरो चकभक्ष्यद्रव्ये । चखना इति भाषा ॥

चचा. । पु । वृहस्पतो ॥ उपाध्याये ॥

चक्षुश्रवा' । पु । सर्पे ॥ चक्षुःश्रव क र्णाऽस्य । सान्त. ॥

चक्षुर्वहनम् । न । मेषशृङ्गीवृक्षे ॥

चक्षुष्य' । पु । केतके ॥ पुण्डरीकवृक्षे ॥ शोभाञ्जनवृक्षे ॥ रसाञ्जने ॥ न । सै वीराञ्जने ॥ खर्परीतुत्थे ॥ प्रपैाण्ड रीके । स्थलपद्मे ॥ त्रि । प्रियदर्शने ॥ अभिप्रिते ॥ चक्षुषादर्शनीये ॥ चक्षुषेहितम् । शरीरावयवाद्यत् ॥

चक्षुष्या । स्त्री । कुलत्थिकायाम् ॥ सु भगायाम् ॥ अजशृङ्ग्याम् ॥ अर ण्यकुलत्थिकायाम् ॥ चक्षुषेहिता । यत् । टाप् ॥

चक्षुः । न । लोचने । नयने । नेत्रे । रूपग्राहकमिन्द्रियं । रूपप्रकाशके ॥ उद्भूतरूपं नयनस्यगोचरो द्रव्या- णि तद्वन्ति पृथक्त्वसङ्ख्ये । विभाग- संयोगपरापरत्वस्नेहद्रवत्वं परिमाणा युक्तम् ॥ क्रियां जातिं योग्यवृत्ति- समवायञ्च तादृशम् । गृह्णाति च क्षुः संयोगादालोकोद्भूतरूपयो रि ति कारिकावली ॥ पाणिन्यान सूत्रे अक्षु स्वक्षुषी नैकपाणिनेतिकर्मलो चनम ॥ चष्टेपश्यत्यनेन चष्टेरू पमनुभवत्यनेन वा । चक्षिङ्० । चक्षे शिश्चेत्युसि. । शित्वादनार्द्धधा तुकत्वात् ख्याञ् न ॥ मेषशृङ्गी वृक्षे ॥

चङ्कुर । पु । स्यन्दने । रथे ॥ वृक्षे ॥ न । धोरणे । यानमात्रे ॥ चङ्कति । चकि. सैात्र । मन्दिवाशिमथिचति चङ्क्यङ्किभ्यउरच् ॥

चङ्क्रमणम् । न । अतिशयभ्रमणे । इत स्ततो भ्रमणे ॥ पुन. पुनर्भ्रमणे ॥ अ नतिदेहपीडाकारकचङ्क्रमणस्य गु

या' । आयुर्वलमेधाग्नीन्द्रियशुद्धि-
कारित्वम् ॥ सदोपानद्धृतपादच
क्रमणगुणा । अनारोग्यत्वम् । अ
नायुष्यत्वम् । इन्द्रियदृष्टिनाशित्व
ञ्चेतिराजवल्लभ ॥

चङ्ग । चि । शोभने ॥ दक्षे ॥ इति
मेदिनी ॥

चचेण्डा । स्त्री । फललताविशेषे । वृ
हत् फले ॥

चञ्च । पु । पञ्चाङ्गुले ॥ चञ्चति । च
ञ्चुगतौ । पचाद्यच् ॥

चञ्चत् । चि । देदीप्यमाने ॥

चञ्चत्पुट । पु । तालप्रभेदे ॥ ताले
चञ्चत्पुटेचैव गुरुद्वन्द्वलघुप्लुतम् ॥

चञ्चरी । स्त्री । तिन्तिडीवृते ॥भ्रम
र्याम् ॥

चञ्चरीक । पु । भ्रमरे । षट्पदे ॥
चञ्चति । चञ्चु० । पर्फरीकादित्वात्
साधु ॥ चरति वा । चर० । पर्फरी
कादित्वादीकन् चरेर्नुम्च ॥

चञ्चल । पु । कामुके ॥ अनिले ॥ चि
। अस्थिरे । सदाचलनस्वभावे । लो
ले । तरले ॥ कदाचिन्नचञ्चलासती ।
चञ्चति । चञ्चु० । वाहुलकात् अ
लच् ॥

चञ्चला । स्त्री । लक्ष्म्याम् ॥ तडिति
॥ पिप्पल्याम् ॥ वर्णवृत्तविशेषे । य

था । तूर्यतालपचिराजमेदुरारनाय
केन चामरध्वजेन चापिमण्डितासु
वर्णकेन । वर्णिताऽतिसुन्दरेणपन्न
गेन्द्रपिङ्गलेन चञ्चलाचकोरचारु
लोचने सुमङ्गलेन ॥ यथा । आलि
याति मञ्जुकुञ्जगुञ्जितालिलालिते
न भास्करात्मजाविराजिरम्यतीरका
ननेन । शोभिते स्थले स्थितेन सङ्ग-
ता यदूत्तमेन माधवेन भामिनी
तडिल्लतेव नीरदेनेति ॥ चञ्चनम्
। चञ्चु० । घञ् । चञ्च लाति ।
ला०क ॥

चञ्चा । स्त्री । नलनिर्माणे । नलनि
र्मिते । चाच इतिगौडभाषा ॥ तृ
णनिर्मितपूरुषे । वजूका इतिभाषा
॥ चञ्चति । चञ्चु० । अच् । टाप् ॥
चञ्चेव मनुष्य । लुम्मनुष्य इति
कनोलुप् ॥

चञ्चु । पु । नाडीचशाके ॥ व्यण्ड
के । रक्तैरण्डे ॥ एरण्डसामान्ये ॥
चुद्रचञ्चुवृक्षे ॥ स्त्री । पक्षिणामो
ष्ठे । चोञ्च्याम् । चूच इति भाषा ॥
चञ्चति । चञ्चु० । वाहुलकादु ॥
चिञ्चुकायाम् । चेचूनाडीतिश्रुते ॥ च
ञ्चु शीता सरा रुच्या स्वाद्वी दोषघ्न
यापहा । धातुपुष्टिकरी वल्या मेध्या
पिच्छिलिका स्मृता ॥ पत्रशाकविशे

षे । विजलायाम् । चीरपत्त्रिकायाम् ॥

चञ्चुका । स्त्री । चञ्चौ । पक्षिणामोष्ठे ॥

चञ्चुपत्त्र । पु । सुशाके । विजलायाम् ॥

चञ्चुभृत् । पु । स्त्री । } खगे । पक्षि

चञ्चुमान् । पु । स्त्री । } णि ॥

चञ्चुर । पु । चञ्चुशाके ॥

चञ्चुसूचि । पु । } सुगृहे । पीततु

चञ्चुसूचिक । पु । } ण्डे । बया इतिभा

षा ॥ चञ्चौ । सूचिरस्य । स्वार्थे क ॥

चञ्चू । स्त्री । चञ्च्वाम् । शोभाम् ॥

अद्भुत ॥

चञ्चूक । पु । चेचू इतिप्रसिद्धे शाके ॥

चटक । पु । कलविङ्के । गृहनीडे ।

चिडा इतिभाषा ॥ चटतिभिनत्ति

गृहीतधान्यादिकं मुखेन । चटभेद

ने । पचाद्यच् । तस्मात् स्वार्थेक ॥

चटकका । स्त्री । चटकायाम् । चटकि

कायाम् ॥ उदीचामात.स्थानइति

पक्षेइदादेशाभाव. ॥

चटका । स्त्री । चटकस्त्रियाम् ॥ च

टकश्च चटकाया वा स्त्र्यपत्ये । चि

डिया इतिभाषा ॥ चटकस्य चटका

या वा स्त्र्यपत्यम् । चटकायाऐरक्

स्त्रियामपत्येलुग्वक्तव्यः । तत टाव

न्तात् तद्धितेलुसे लुकृतद्धितलुकी

तिटापोलुकि पुनरजादिलक्षणष्टा

पू सच जातिलक्षणङीषोवाधइति

भाव ॥ नचाऽत्र स्त्र्यपत्याद्वितीकार

प्रकृत चटकायाऐरगितिलिङ्गाद्वना

दिषुनिपातनाद्वातदप्रकृत्से । चिप

कादित्वात्सेत्व मितितुयुक्तम् । पुं

योगलक्षणो जातिलक्षणो वा ङीष्

अजादिपाठाद्वाध्यते ॥ श्यामाख्यप

क्षिणि ॥

चटकाशिरस् । न । पिप्पलीमूले ॥ च

टकाया शिरइव ॥

चटकिका । स्त्री । चटककायाम् ॥ उ

दीचामात स्थानेयकपूर्वायाः इतिप

क्षेइदादेश ॥

चटु । अ । प्रियेवाक्ये ॥

चटु । पुं । चाटौ । प्रियेवाक्ये ॥ व्रति

नामासने ॥ पिचण्डे । उदरे ॥ चट

ति । चट० । मृगय्वादित्वात् कु ॥

चटुल । त्रि । चञ्चले ॥ शोभने ॥ च

टति । वाहुलकादुलच् ॥ मत्वर्थे

सिध्मादित्वाल्लच्वा ॥

चटुला । स्त्री । विद्युति ॥ अजा० टाप् ॥

चटुलोल । त्रि । चाटुलोले । सुचञ्च

ले ॥ इति शारावली ॥

चटूलम् । न । सिद्धपीठविशेषे ॥ यथा

। चटूले दक्षबाहुर्मे भैरवश्चन्द्रशेख

र । व्यक्तरूपा भगवती भवानी त

त्रदेवता । विशेषत. कलियुगे वसा

मिचन्द्रशेखरे । इति ॥

चणक । पु । शस्यविशेषे । हरिमन्थे ॥ चणक शीतलो रूक्ष पित्तरक्तकफापह । लघु कषायो विष्टम्भी वातलो ज्वरनाशन ॥ सचाङ्गारेणसम्भृष्ट स्तैलभृष्टश्च तद्गुण । आर्द्रभृष्टो बलकरो रोचनश्च प्रकीर्त्तित ॥ शुष्कभृष्टोऽतिरूक्ष स्याद्वातकुष्ठप्रकोपन । स्विन्न पित्तकफ हन्यात् सूप क्षोभकरोऽहित ॥ आर्द्रोऽतिकोमलो रुच्य' पित्तरक्तहरो-हिम' ॥ * ॥ हरितार्द्रचणकरन्धनम्नु । सुहरितहरिमन्थ क्षोदभिन्नो नवाग्रै प्रथममुदकसिक्तो वेसवारे प्रसिद्ध । लवणमरिचसङ्गात् तैलहिङ्गुप्रसिक्त शिखरयति विशेषाज्जाठर मन्दवह्निम् ॥ छोलाभिधा-नकफल परिगृह्य शुद्ध तप्ते घृते सुललितक्वथितोषणाभ्याम् । ससा-धित सुरभित शुचिरामठेन जिह्वातले विशति नित्यमतिप्रकामम् ॥ चणयते । चणदाने । कुन् ॥ मुनिविशेषे ॥

चणकरोटिका । स्त्री । चणकमुद्रायाम् ॥ चाणक्यरोटिका रूक्षा श्लेष्मपित्तास्रनुद्गुरु । विष्टम्भिनी न चक्षुष्या तद्गुणा तिलशष्कुली ॥

चणकशाकम् । न । स्वनाम्ना प्रसिद्धे शाके ॥ रुच्य चणकशाक स्याद् दुर्जर कफवातकृत् । अम्ल विष्टम्भजनक पित्तनुद्दन्तशोथहृत् ॥ सुकृत्त चाणक शाक मल्लतक्रेण साधितम् । सहिङ्गुलवणेतप्ते भर्जितरामठान्वितम् ॥ क्षाराम्लभावसहजा स्वणकप्रवाला सम्मर्दितामरिचसैन्धवशृङ्गबेरै' । सन्चूर्णिता कटुकतैलयुते सुपक्वै भृष्टे सुहिङ्गुचणकै परिदत्तवासा ॥

चणकात्मज । पु । वात्स्यायनमुनौ ॥

चणकाम्लम् । न । चणकक्षारे ॥ चणकाम्लकमत्यम्ल दीपन दन्तहर्षकम् । लवणानुरस रुच्य शूलाजीर्णविबन्धनुत ॥

चणकाम्लवा, । न । क्षेत्रस्थफलवच्चणकपत्रशिशिरवारिणि ॥

चणद्रुम । पु । क्षुद्रगोक्षुरे ॥

चणपत्री । पु । रुदन्तीवृक्षे ॥

चणिका । स्त्री । तृणविशेषे । गोदुग्धायाम् ॥

चण्ड । पु । तिन्तिडीवृक्षे ॥ यमकिङ्करे ॥ दैत्यविशेषे ॥ न । तीक्ष्णे ॥ त्रि । अतिकोपने ॥ तीव्रे ॥ ती, क्ष्णावति ॥ चण्डते । चडिकोपे । पचाद्यच् ॥ चमति । चमुअदने । चणति वा । चणदाने । अमन्ताड्ड ॥

चण्डता । स्त्री । उग्रतायाम् ॥ भावे तल् ॥

चण्डनायिका । स्त्री । दुर्गायाम् ॥ अष्टनायिकान्तर्गतनायिकाविशेषे ॥

चण्डमुण्डी । स्त्री । स्थानविशेषे ॥ यथा । चण्डमुण्डी महास्थाने दण्डिनी परमेश्वरीति ॥

चण्डचन्द्रिका । स्त्री । विद्याविशेषे ॥

चण्डवती । स्त्री । चण्डीविशेषे ॥

चण्डवृष्टिप्रताप । पु । दण्डकविशेषे । यथा । यदिह नयुगलं तत सप्त रेखा सदा चण्डवृष्टिप्रतापो भवेद् दण्डकः । यथा । प्रलयघनघटामहारम्भमेघावलीचण्डवृष्टिप्रतापाकुलं गोकुलम् सपदि समवलोक्य सव्येन हस्तेन गोवर्द्धनं नाम शैलं दधल्लीलया । कमलनयन इत्यर्चितिगर्ज्जत्वसन्मुग्धगोपाङ्गनालिङ्गनानन्दितो गलदभिनवधातुधाराविचित्राङ्गरागो मुरारातिरस्तु प्रमोदाय वस्तु इति ॥

चण्डा । स्त्री । धनहरीद्रुमे । चोरनामगन्धद्रव्ये ॥ शङ्खपुष्प्याम् ॥ अष्टनायिकान्तर्गतनायिकाविशेषे ॥ जिनानां शासनदेवताविशेषे ॥ लिङ्गिनीलतायाम् ॥ कपिकच्छाम् ॥ आखुपर्ण्याम् ॥ श्वेतदूर्वायाम् ॥ पद्मावतीनद्याम् ॥ टाप् ॥

चण्डांशु । पु । सूर्य्ये ॥ चण्डा अंशवो यस्य ॥

चण्डात । पु । करवीरे ॥ चण्डमतति । अत० । कर्म्मण्यण् ॥

चण्डातक । पु । न । अर्द्धोरुके । वरस्त्रीणामर्द्धोरुपर्य्यन्तवस्त्रे ॥ चण्डां कोपनां वरस्त्रियमतति । अत० । क्वुन् ॥

चण्डाल । पु । शूद्राद्ब्राह्मण्यामुत्पन्ने । प्लवे । मातङ्गे । दिवाकीर्त्तौ । श्वपचे । अन्त्यामधमे ॥ चण्डते । चण्डि० । पतिचण्डिभ्यामालञ् ॥

चण्डालकन्द । पु । कन्दविशेषे ॥

चण्डालवल्लकी । स्त्री । चण्डालवीणायाम् । चाण्डालवीणायाम् । किङ्गरीतिभाषा ॥ चण्डालस्य वल्लकी ॥

चण्डालिका । स्त्री । किन्नरायाम् ॥ उमायाम् ॥ ओषधीभेदे ॥

चण्डि' । स्त्री । चण्ड्याम् ॥ चण्डति । चण्डि० । सर्वधातुभ्य इन् ॥

चण्डिका । स्त्री । भवान्याम् । चण्ड्याम् ॥ अस्याः स्थानममरेशे ॥ चण्डे कर्त्तरि ण्वुल् । इत्त्वम् ॥

चण्डिकेश्वर । पु । शिवे ॥

चण्डिमा । पु । चण्डत्वे ॥ चण्डस्य भाव । पृथ्० इमनिच् ॥

चण्डिल । पुं । रुद्रे ॥ वास्तूकशाके ॥ ना

पिते ॥

चण्डिला । स्त्री । नदीविशेषे ॥

चण्डी । स्त्री । कात्यायन्याम् । दुर्गायाम् ॥ हिंस्रायांनार्याम् ॥ कोपनायां योषिति ॥ मार्कण्डेयपुराणोक्ते श्रीदेवीमाहात्म्ये ॥ अतिजगती सप्तकत्रयोदशाक्षरावृत्तिविशेषे । यथा । नयुगलसयुगलगैरिति चण्डी ॥ जयति दितिजरिपुताण्डवलीला कुपितकवलककरकालियमौलौ । चरणकमलयुगचापलचण्डी पदनखरुचिजितभोगमणिश्री ॥ चण्डति । चडिकोपे । पचाद्यच् । वल्कादिभ्यश्चेति ङीष ॥

चण्डीकान्त । पु । सदाशिवे ॥ चण्ड्याः कान्त ॥

चण्डीकुसुम । पु । रक्तकरवीरवृक्षे ॥

चण्डीश । पु । शिवे ॥

चण्डु । पु । उन्दुरौ ॥

चतुःपत्री । स्त्री । क्षुद्रपाषाणभेदिनि ॥

चतुःपर्णी । स्त्री । क्षुद्राम्लिकायाम् ॥

चतुःपला । स्त्री । नागबलायाम् ॥

चतुःपुण्ड्र । पु । भिण्डावृक्षे ॥

चतुःशालम् । न । सञ्जवने । अन्योन्याभिमुखगेहचतुष्टयगृहे ॥ चतसृणां शालानां समाहृता । आवन्तो वेति क्लीवत्वम् ॥ पक्षे चतुःशाली ॥

चतुःषष्टि । स्त्री । कलाभेदे । कलानामन्युपविद्यायाम् ॥ सङ्ख्याभेदे । चौसठ इति भाषा ॥ बह्वृचि । ऋग्भेदे ॥ चतुरधिकाषष्टि ॥

चतुःसमम् । न । मिलितचन्दनागुरुकस्तूरीकुङ्कुमरूपे ॥ औषधविशेषे ॥ यथा । लवङ्ग सैन्धव पथ्या यमानीचतुःसमम् । आमशूलविबन्धघ्नं पाचनं भेदिशोषनुत् ॥ अन्यच्च । जातीफलं चित्रकपुष्पसमन्वितञ्च जीरञ्च टङ्कणयुतं चरकेण चोक्तम् । चूर्णानि माक्षिकसितासहितानि लीढ्वा आमातिसारमखिलं गुरु हन्ति शूलमिति ॥

चत्वार । त्रि । सङ्ख्याविशेषे । चार इति भाषा ॥ सङ्ख्येये ॥ यथा । चत्वारो वेदाः । चतस्रः स्त्रियः । चत्वारि फलानि ॥ चतति चत्यते वा । चतेयाचने । चतेरुरन् ॥

चतुर । पु । चक्रगण्डौ ॥ न । हस्तिशालायाम् ॥ त्रि । नेत्रगोचरे ॥ चटुकारे ॥ कार्यकुशले । दक्षे । पटौ । निपुणे ॥ चतति चत्यते वा । चतेः । मन्दिवाशिमथिचति चङ्क्यङ्किभ्य उरच् ॥

चतुरसा । स्त्री । वर्णवृत्तप्रभेदे ॥ यथा । द्विजवरकर्णा विहरसवर्णा भ

वति यद्रासा किलचतुरसा ॥ यथा । जयजयविष्णो त्रिभुवनजिष्णो । अपनयदुःख प्रवितरसौख्यमिति ॥ यथावा । नवरतिशाली यदिवनमाली । विविधविलासे सखिकिमुदासे इति ॥

चतुरक्रम । पु । सप्तधारूपकान्तर्गत रूपकभेदे ॥ द्रुतद्वन्द्वप्लुतद्वन्द्व तथा प्रान्तेगुरुर्भवेत् । द्वाविंशत्याक्षरैर्युक्ता शृङ्गारे चतुरक्रमइतिदामोदरोक्तं ॥

चतुरङ्गम् । न । हस्त्यश्वरथपदातिरूपे सैन्ये ॥ यथा । चतुरङ्गद्युपिवल सुमहत प्रसह्रैम श्रीतिराखायखम् ॥ * ॥ चैारङ्खेलइति सतरञ्जखेल इतिच प्रसिद्धे क्रीडाविशेषे ॥ यथा । युधिष्ठिरउवाच । अष्टकोष्ठगाञ्च या क्रीडा तां मे ब्रूहि तपोधन । प्रकर्षणैवमेनाथचतूराजीयतो भवेत् ॥ व्यासउवाच । अष्टौकोष्ठान्समालिख्य प्रदक्षिणक्रमेणतु । अरुणं पूर्वतः कृत्वा दक्षिणे हरितबलम् ॥ पार्थपश्चिमतः पीतमुत्तरेश्यामलं बलम् । राज्ञोवामेगज कुर्यात् तस्मादश्व ततस्तरिम् ॥ कुर्यात् कौन्तेयपुरतो युद्धे पत्तिचतुष्टयम् । कोणेनौका द्वितीये ऽश्वस्तृतीयेतु गजो वसेत् ॥ तुरीयेतुवसेद्राजा वटिका

पुरतः स्थिता । * । पश्चकोन वटी राजा चतुष्कोणेव कुञ्जर ॥ त्रिकोणातुचलत्यश्व पार्थनौका द्वयेनतु । * । कोष्ठमेक विलङ्घ्याथ सर्वतोयातिभूपति ॥ अग्रएव वटीयाति वलत्यग्रकोणगम् । यथेष्ट कुञ्जरोयाति चतुर्दिक्षु मही‌पते ॥ तिर्यक्तुरङ्गमोयाति लङ्घयित्वात्रिकोष्ठकम् । कोणकोष्ठद्वय लङ्घ्य गजेन्नौकायुधिष्ठिर ॥ * ॥ सिंहासन चतराजी न्वपाकृष्टन्तु षट्पदम् । काककाष्ठ तु हन्नौका नौकाकृष्टप्रकारकम् ॥ * ॥ घाताघाते वटीनौका वल हन्ति युधिष्ठिर । राजा गजो हयश्चापि त्यक्त्वा घात निहन्तिच ॥ अन्यन्त्स्वबल रक्षेत् स्वराजावलमुत्तमम् । अल्पस्यारक्षणात्पार्थहन्तव्य बलमुत्तमम् ॥ नौकायाश्चत्वारिपदानि अश्वस्याष्टौपदानि हस्त्याधिक्य मश्वस्य ॥ मतङ्गजस्य गर्वेणराजा क्रीडतिनिर्भरम् । तस्मात्सर्ववल दत्त्वा रक्षेत् कौन्तेयकुञ्जरम् ॥ सिंहासन चतूराजी यदवस्थानतो भवेत । सर्वसैन्यैर्गजैर्वापि रक्षितव्यौ महीपति ॥ * ॥ अन्यद्राजपद राजा यदाक्रान्तो युधिष्ठिर । तदासिंहासनतस्य भवत्ये न्वपसत्तम ॥ राजाचन्वपति हत्वा

कुर्यात् सिंहासनंयदा। द्विगुणंवाहयेत् पण्य मन्यथैकगुणं भवेत ॥ द्विगुणपण्य दातव्यस्तेन प्रापयेत् ॥ मित्रसिंहासन पार्थ यदारोहति भूपति । तदासिंहासन नाम सर्वं नयति तद्धनम् ॥ यदासिंहासन चतुराजा-षष्ठपदाश्रित । तदाघातेपि हन्तव्यो बलेनापि सुरक्षित ॥ * ॥ विद्यमानेन्द्रपेयत्र स्वकीयेच न्टपचयम्। प्राप्नोतिच तदातस्य चतुराजीयदाभवेत् ॥ न्टपेणैव न्टपहत्वा चतुराजीयदाभवेत् । द्विगुणंवाहयेत् पण्य मन्यथैकगुणं भवेत् ॥ स्वपदस्थ यदा राजा राजानहन्ति पार्थिव । चतुरङ्गे तदाभूपवाहयेच्च चतुर्गुणम् ॥ यदा सिंहासने काले चतुराजी समुत्थिता । चतुराजीभवत्येव नतु सिंहासन न्टप ॥ अत्रेदवीजम्। उभयथाजयेपिपरसिंहासनाधिकारात् परराजवधेशौर्याधिक्यनिष्कण्टकत्वदर्शनात् क्रीडायामपितथा कल्पते ॥ * ॥ राजद्वय यदा हस्ते आत्मनोराशिसंस्थिते । परेणासहतच्चैको बलेनाप्यपहार्यते ॥ राजद्वय यदाहस्ते न स्यादन्यकरेपर । तदा राजाहिराजानं घातेपि त हनिष्यति ॥ न्टपाकृष्टे यदा राजा गमिष्यतियुधिष्ठिर । घाताघातेपि हन्तव्योराजानत्रनरक्षक. ॥ * ॥ कोणं राजपदंत्यक्त्वा वटिकान्तयदाव्रजेत् । घटीनयेत् पदनामतदाकोष्ठबलंचषट् ॥ यदितस्यभवेत् पार्थचतुराजीचषट् पदम् । तदापिच चतूराजीभवत्येवनसंशय. ॥ पदाते षट्पदेपिछे राजावा हस्तिना तथा। षट्पद न भवेत् तस्य अवश्य शृणु पार्थिव॥ सप्तमे कोष्ठकेयास्याद्वटिकादशकेनवै। तदान्योन्यश्च हन्तव्यं सुखाय दुर्वलंबलम् ॥ त्रिवटीकस्य कौन्तेय पुरुषस्य कदाचन । षट्पद न भवत्येव इतिगोतमभाषितम् ॥ * ॥ नौकैकावटिका यस्यविद्यतेखेलनेयदि । गाढावटीतिविख्याता पदतस्यनदृष्यति ॥ गाढा घात्यापद राजपदं कोणपदञ्च तत् । * । हस्तेरक्षेवलनास्ति काककाष्ठतदाभवेत् ॥ वदन्तिराक्षसा' सर्वे तस्य न स्तोभयाजयौ । * । प्रार्थिते पञ्चमेराशि हृतवत्याश्च षट्पदे ॥ अश्वोचत्यास्तदाराजन् चक्षित्वा चालित पदम्। द्विरावृत्त्यागतौ तस्माद्धन्यात् परबलजयी ॥ पार्थसिंहासने काले काककाष्ठ यदाभवेत् । सिंहासन भवत्येव काककाष्ठ न भण्यते ॥ * ॥ उपविष्टश्चयत् स्थाने त-

स्योपरि चतुष्टये । नौकाचतुष्टय यत्र क्रियते यस्य नौकया ॥ नौकाचतुष्टयंतत्र वृत्तनौकेति भण्यते । * । नक्षत्रैर्दैकदा राजन् गजस्याभिमुखं गजम् ॥ यदि कुर्वीत धर्मज्ञ पापग्रस्तो भविष्यति । स्थानाभावे यदा पार्थेव स्तिन हस्तिसम्मुखम् ॥ करिष्यति-महाराजन्निति गौतमभाषितम् । प्राप्ते गजद्वये राजन् हन्तव्योवामतो गजः ॥ इति तिथ्यादितत्त्वे चतुरङ्गक्रीडनम् ॥

चतुरङ्गा । स्त्री । घोटिकावृक्षे ॥

चतुरङ्गिणी । स्त्री । सेनायाम् ॥ रथगजहयपदातयः चत्वारि अङ्गानि यस्याम् सा ॥

चतुरङ्गुलः । पु । धनवहेडा इति प्रसिद्धे आरग्वधवृक्षे ॥ चतस्रोऽङ्गुलयः प्रमाणमस्य पर्वणस्तद्योगात् इत्योपि ॥

चतुरब्दा । स्त्री । चतुर्वर्षवयस्कगवि ॥ चत्वारोऽब्दा वयः प्रमाणमस्याः । कार्षीयष्ठक् । अध्यर्द्धेतिलुक् ॥

चतुरम्लम् । न । कोलदाडिमवृक्षाम्लाऽम्लवेतसे ॥ अम्लवेतसवृक्षाम्लवृहज्जम्बीरनिम्बुकैः । चतुरम्लमिदंप्रोक्तंग्रन्थेभावप्रकाशके ॥

चतुरस्र' । त्रि । चतुष्कोणे ॥ समाश्चतुर्थोऽष्टमस्थाने । समाश्चतुर्विधेनेचतुरस्रसंज्ञे ॥ चतस्रोऽस्रयोऽस्य । सुप्रातसुश्वेत्यजन्तोनिपातित ॥

चतुरात्मा । पु । परमात्मनि परमेश्वरे ॥ सर्गादिषु पृथग्विभूतयश्चतस्र-आत्मान सन्त्यस्य । यथा । ब्रह्मा दक्षादय कालस्तथैवाखिलजन्तव । विभूतयो हरेरेता जगत सृष्टिहेतव इति ॥ विष्णुर्मन्वादय कालः सर्वभूतानि च द्विज । स्थितेर्निमित्तभूतस्य विष्णोरेताविभूतय ॥ रुद्रः कालोन्तकाद्याश्च समस्ताश्चैवजन्तव । चतुर्द्धाप्रलया येता जनार्दनविभूतय ॥ इति विष्णुपुराणम् ॥ यद्वा । रागद्वेषादिरहितत्वात् चतुरंमन आत्माऽस्य स । मनोबुद्ध्यऽहङ्कारचित्तचतुष्टयात्मत्वाद्वा ॥

चतुरानन । पु । ब्रह्मणि । अजयोनौ ॥ यथा । तस्यांसचाम्भोरुहकर्णिकायामवस्थितो लोक मपश्यमान । परिक्रमन् व्योम्नि विवृत्तनेत्रश्चत्वारिलेभेऽनुदिशंमुखानीति । श्रीभागवतम । चत्वारिआननान्यस्य ॥

चतुरूषणम् । न । कणामूलसहिते त्र्यूषणे ॥ त्र्यूषणंसकणामूलं कथितं चतुरूषणम् । व्योषस्येवगुणा प्रोक्ताअधिकाश्चतुरूषणे ॥

चतुर्गति । पु । नारायणे ॥ चतुर्णा

माश्रमाणा वर्णानाञ्च यथोक्तकारि
णा गतिराश्रय ॥ कच्छपे ॥

चतुर्ज्जातकम् । न । त्वगेलापत्रकना
गकेसरेषु ॥ एतच्चरोचन रूक्ष ती
क्ष्णोष्णा मुखगन्धहृत् । लघुपित्ता
ऽग्निकृद्वर्ण्यं कफवात विषापहम् ॥

चतुर्थ । त्रि । तुरीये ॥ चतुर्णां पूरणः
। तस्यपूरणेडट् तस्यथुगागम ॥

चतुर्थक । पु । चतुर्थेह्नि चतुर्थकइति
लक्षणलक्षिते विषमज्वरविशेषे ॥
चतुर्थेह्निभव' । कालप्रयोजनाद्रोग
इति कन् । दिनद्वयन्त्वतिक्रम्य य स्या
त्सह्निचतुर्थकइत्युक्तो । चतुर्थक
श्चतुर्थेह्नीत्यत्रागमदिनग्रहणात्व्या
ख्येयम् ॥

चतुर्थांश । त्रि । चतुर्भागैकभागे ।
तुरीये । पादे ॥

चतुर्थिका । स्त्री । पलपरिमाणे ॥

चतुर्थी । स्त्री । चन्द्रस्यचतुर्थकलाक्रि
यारूपायां तिथौ ॥ तत्रजातस्यफल
यथा । स्वपुत्रमित्रप्रमदाप्रमोदी इ
ताभिलाषी कृपया समेत । विवा
दशीलो विजयी विवादे भवेच्चतु
र्थीप्रभय कठोर इति ॥ ङेभ्याम्भ्य
स् इति चिके ॥ टित्त्वान्ङीप् ॥

चतुर्द्दन्त । पु । ऐरावते । इन्द्रस्यगजे॥
चत्वारोदन्ता, अस्य ॥

चतुर्द्दश । त्रि । चतुर्द्दशानापूरणे ॥
तस्यपूरणेडट् ॥

चतुर्द्दश । त्रि । सङ्ख्याविशेषे १४ ॥
सङ्ख्येये ॥ चत्वारश्च दशच ॥ चतु
रधिकादशवा ॥

चतुर्द्दशभुवनम् । न । पञ्चीकृतेभ्यो
भूतेभ्योजातानि भर्भुव स्वर्म्महोज
नस्तप सत्यमित्येतन्नामकानि उ
पर्युपरिविद्यमानानि सप्त । अतल
वितलसुतलरसातलतलातलमहा
तलपातालनामकानि अधोऽधोवि
द्यमानानिच सप्त । मिलित्वाचतुर्द्द
शभुवनानि भवन्ति ॥ चतुर्द्दशाना
भुवनानासमाहार ॥

चतुर्द्दशलोकम् । न । चतुर्द्दशभुवने ॥

चतुर्द्दशी । स्त्री । चन्द्रस्य चतुर्द्दशकला
क्रियारूपायातिथौ ॥ तत्रोत्पन्नस्य
फलम् । यथा । विरुद्धशाल पुरुष
सरोष श्चौर कठोर परवञ्चकश्च
। परान्नभोक्ता परदारचित्त श्चतुर्द्द
शीचे ज्जननस्य कालेइति ॥ टित्त्वा
न् ङीप् ॥

चतुर्द्दोल । पु । न । चण्डोलइति च
न्दोलइतिचख्याते द्विपदवाह्ये यान
विशेषे ॥ यथा । राज्ञोयद् द्विपद
यान विशेषाख्यमलविदु । चतुर्भि
रुह्यतेयत्तुचतुर्दोलंतदुच्यते इति

॥ अब्जभोज । चतुर्भिर्वाहकै र्दण्डे षड्भि कुम्भै सुसंस्थितै. । स्तम्भैरष्टाभिरुदित चतुर्दोलमनुत्तमम् ॥ * ॥ तद्भेदा जयकल्याणवीरसिंहा यथाक्रमम् । चतुर्विधानां भूपानां चतुर्दोला' प्रकीर्त्तिता' ॥ विंशहस्तमितायामो द्विहस्तपरिणाहवान् । हस्तद्वयोन्नत. प्रोक्तश्चतुर्दोलोजयाख्यया ॥ १ ॥ चतुर्हस्तायतो यस्तु सार्द्धहस्तस्तदन्यथा । चतुर्दोल'समाख्यात'कल्याण स्तावदुन्नत ॥ २ ॥ पञ्चहस्तायतो यस्तु त्रिहस्तपरिणाहवान् । तावदेवोन्नतोवीर स्चतुर्दोलउदाहृतः ॥ ३ ॥ आयामपरिणाहाभ्यांचतुर्हस्तमितोच्छ्रिय । चतुर्दोलोह्ययंसिंहस्तदर्द्धेनोन्नत शुभ. ॥ ४ ॥ * ॥ सर्वोऽथद्विविध' प्रोक्त सच्छदिश्चापिनिश्छदि । आद्यःसमरयात्रासु पर'केलिषुनाप्यये ॥ * ॥ सर्वेषामेवकाष्ठानां दण्ड' स्यादर्ज्जुनारणः । चन्दनेनैवघटना सर्वेषामुपयुज्यते ॥ लोमजंसर्ववस्त्रेषु कनकं सर्वधातुषु । कुम्भश्च पद्मकोषश्चगिरिश्चेति यथाक्रमम् ॥ चैदेशानांमहीन्द्राणां चतुर्दोलेषुविन्यसेत् ॥ दर्पणश्चार्द्धचन्द्रश्च हंसः केकी शुको गज. । अश्वः सिंहश्चत

स्तार्क्ष्यआदित्यादिदशोत्तरान् ॥ मणिनियमस्तु दण्डवत् ॥ * ॥ रक्त शुक्लश्च पीतश्च कृष्ण श्चित्र स्तथारुण' । नील कपिल इत्युक्त' पताकानान्तुसङ्ग्रह. ॥ चतुर्दोल: सपताक शुभयानमितिस्मृत ॥ * ॥ मुक्तास्तवकै र्दशभि र्युक्त' स्याद्राजकेशानाम् । चामरदण्डैर्दशभिर्दिग्जयिनांचतुर्दोल. ॥ चापपत्रस्य पुच्छश्चेत् सर्वोपरि परिन्यसेत् । याणासिद्धिरयंनाम्ना चतुर्दोलो महीभुजाम् ॥ स्तम्भच्छादरहितो निश्छदिरुक्तश्चतुर्दोल । मानं पूर्ववत् ॥ * ॥ स पुन द्विविध' प्रोक्त. सध्वजश्चाथ निर्ध्वज । ध्वजान्षडत्र न्यस्यन्ति षड्वर्गविजयैषिण ॥ तेषां मानन्तु-चत्वार' स्वामिहस्तै कसम्मिताः । कोणेषु पश्चा दग्रेच हस्तद्वयमितौ ध्वजौ ॥ सुवर्णं रजतं युग्मं त्रिविधानांमहीभुजाम् । मणिचामरकुम्भानां खड्गादीनां विनिश्चय ॥ चतुर्दोलध्वजोराज्ञां विज्ञेयो नवदण्डवत् । निर्ध्वजेच चतुर्दोले मानमन्यत-मशृणु ॥ आयामपरिणाहाभ्यां चतुर्हस्तमितोच्छ्रिय' । विजयोनाम विख्यात स्चतुर्दोलो महीभुजाम् ॥ विजयो मङ्गलो भव्यो विलक्षो वैक

चतुर्द्दो

ष्ठित । त्रिविधाना मह्हीन्द्राणा या
नत्रयमुदाहृतम् ॥*॥ अष्टाभिरष्ट
तेयस्तु अष्टदोलमुशन्तिच । सोपा
नद्वितयञ्चात्रविन्नेयंशिल्पिनिर्म्मितम्
॥*॥ भोजस्तु । अष्टाभिर्वाहकै र्ह
स्तै षड्भिस्तु दशभिर्घटै । स्तम्भै
स्तुदशभिर्ज्ञेय महदोल मह्हीभुजा
म् ॥ तद्भेदा जयकल्याणवीरसिंहा
यथा क्रमम् । चतुर्विधानाभूपाना
महदोला प्रकीर्त्तिता ॥ षड्भिर्ह
स्तैर्मितायाम परिणाहस्तुभुज ।
चतुर्हस्तोन्नतो राज्ञामष्टदोल जय
विदु ॥ आयामपरिणाहाभ्या पञ्चह
स्तमितोच्छ्रिय । कल्याणोष्टदो
लोय चतुर्हस्तमितोन्नति ॥ सप्तह
स्तायत कार्यप्रवरे पञ्चहस्तक । प
ञ्चहस्तोन्नतो वीरश्चाष्टदोलो मह्ही
भुजाम् ॥ आयामपरिणाहाभ्यामष्ट
हस्तमितोच्छ्रिय । सिंहनामाष्टदो-
लोयं विज्ञेय षड्भुजोन्नत. ॥*॥
सर्वोयद्विविध प्रोक्तः सच्छदिश्चापि
निश्छदि । काष्ठवस्त्रघटादीनां म
णीनांचामरस्यच ॥ चतुर्दोलवदुन्न
योनियमोन्योपिह्हरिभि. । पूर्ववन्नि
श्छदेमान ध्वजमानमिहोच्यते ॥
दशध्वजा स्तेषु चाष्टौ स्वामिहस्तद
योन्नता. । पञ्चा दशेध्वजैाराज्ञस्तु

चतुर्भं

र्हस्तमितोमतो ॥ मणिचामरपञ्चा
णां निर्णयोनिश्चताकवत् । निश्छेज
स्याष्टदोलोय. शिविकेतिसगद्यते ॥
मणिकुम्भमुखादीनां नियमोनवद
ण्डवत् । इत्यष्टदोलकथनम् ॥*
॥एवद्वादशषोडशवि शतिदोलादि-
का कार्या: ॥ मानसार्द्धद्विगुणितं
सार्द्धत्रिगुणितं युक्तमेतेषाम् । विं
शतिदोलात् परतो भोजमतेसम्म
वेयानम् ॥ ज्ञानंवक्षनुभोज्यंबहुगु
णमेतज्जगाद वै व्यास. ॥*॥ भवि
ष्योत्तरेपि । यदुक्तदेवद् यानंतु
नमानेनयोन्नप । स्वयान कुरुते-
दिव्यसचिरं सुखमश्नुते ॥ स्वयोमयु
क्तयानस्थो भोममाप्नोतिमानव. ।
परयौगिकयानस्थ. क्लेशमाप्नोतिपु
ष्कलम् ॥ योदम्भादथवाऽज्ञानाद्या
न प्रकुरुते ऽन्यथा । तस्यैतानिविन
श्यन्ति आयुर्विद्यायशोधनम् ॥ प्रधा
नयानमाश्रित्यनियमोय समाश्रि
त । नाप्रधानेनिर्णयोस्ति तल्लिङ्गन्तु
मनोज्ञता ॥ इतियुक्तिकल्पतरु ॥
चतुर्धा । अ । चतुष्प्रकारे ॥ यथा । च
तुर्धाविभजति । सख्याया विधार्थधा
॥ एकराशिं चतुर्धाकुरु । अत्राधि
करणविचालेचेतिधा ॥
चतुर्भद्रम् । न । सवलेषु धर्मार्थकाम

मोक्षेषु ॥ चत्वारिभद्राणिश्रेष्ठान्यत्र वृन्दे ॥ यद्वा । चत्वारि भद्राणि । दिक्सङ्ख्ये संज्ञायामितिसमासः ॥

चतुर्भुजः । पु । विष्णौ । माधवे ॥ त्रि । भुजचतुष्टयविशिष्टे ॥ चत्वारोभुजायस्यस ॥ यद्वा । भुङ्क्ते भुनक्ति इति भुजः । चतुर्णां धर्मार्थकाममोक्षाणां भुजः ॥

चतुर्मुखः । पु । ब्रह्मणि । परमेष्ठिनि ॥ औषधविषये रसविशेषे ॥ यथा । रसगन्धकलौहाभ्रं समं कृताज्झितं हेमच । सर्वं खल्लतले क्षिप्त्वा कन्यारसविमर्दितम् ॥ एरण्डपत्रै रावेष्ट्य धान्यराशौ दिनत्रयम् । संस्थाप्य ततउद्धृत्य सर्वरोगेषुयोजयेत् ॥ एतद्रसायनवरं त्रिफलामधुसंयुतम् । तत्राग्निवर्णं खादेत् क्षीपणिलनाशनम् ॥ क्षयमेकादशविधं कासं पञ्चविधं तथा । कुष्ठमष्टादशविधं पाण्डुरोगान् प्रमेहकान् ॥ शूलं श्वासञ्च हिक्कां च मन्दाग्निं चाम्लपित्तकम् । व्रणान सर्वा नाशयेत विसर्पं विद्रधिं तथा ॥ अपस्मारग्रहोन्मादान् सर्वाशांसिश्लगामयान् । क्रमेणसेवितं हन्ति वृक्षमिन्द्राशनिर्यथा ॥ पौष्टिकं बल्यमायुष्यं पुत्रप्रसवकारणम् । चतुर्मुखेणदेवे

नकृष्णात्रेयेणसूचितम् ॥ इतिभैषज्यरत्नाकरतम ॥ चत्वारिमुखानि अस्य ॥

चतुर्मूर्त्तिः । पु । विष्णौ ॥ चतस्रोमूर्त्तयो विराट्सूत्राव्याकृततुरीयात्मानो ऽस्य ॥ सिता पीता रक्ता कृष्णा चेतिचतस्रो मूर्त्तयो ऽस्य वा ॥

चतुर्युगम् । न । चतुर्षु सत्यत्रेताद्वापरकलिसंज्ञकेषु ॥ चतुर्णां युगानां समाहारः । पात्रा दित्वात् स्त्रीत्वम ॥

चतुर्वक्त्रः । पु । ब्रह्मणि । वेधसि ॥

चतुर्वर्गः । पु । धर्मार्थकाममोक्षेषु मिलितेषु ॥ चतुर्णां वर्गः समूहः ॥

चतुर्विद्यः । पुं । चातुर्वैद्ये । चतुर्वेदवेत्तरि ॥

चतुर्विधशरीरम् । न । जरायुजाण्डजस्वेदजोद्भिज्जाख्येषु ॥ चतुर्विधशरीराणि धृत्वा मुक्त्वा सहस्रशः । सुकृतात् मानवो भूत्वा ज्ञानी चेन्मोक्षमाप्नुयात् ॥

चतुर्बीजम् । न । मेथिकादिचतुष्टये ॥ मेथिका चन्द्रसूरश्च कालाजाजी यवानिका । एतच्चतुष्टययुक्तं चतुर्बीजमितिस्मृतम् ॥ तच्चूर्णं भक्षितं नित्यं निहन्तिपवनामयान् । अजीर्णं शूलमाध्मानं पार्श्वशूलं कटिव्यथाम् इतिभावप्रकाशः ॥

चतुर्व्यूहः । पु । विष्णौ । नारायणे ॥

सृष्ट्यादिकार्य्यार्थं चत्वारो व्यूहा वि
भागा वासुदेवसङ्कर्षणप्रद्युम्नानिरु
द्धसञ्ज्ञा मूर्त्तयो यस्य स । यथा । व्यू
ह्यात्मानं चतुर्द्धा वै वासुदेवादिमूर्त्ति
भिः । सृष्ट्यादीन् प्रकरोत्येष वि
श्रुतात्मा जनार्द्दन इति व्यासवचन
म् ॥ तथा च मार्कण्डेयपुराणे मूलका
रणं वासुदेवाख्यं व्यूहमुक्तोक्तम् ।
द्वितीया पृथिवीं मूर्द्ध्ना शेषाख्या धा
रयत्यधः । तामसी सा समाख्याता
तिर्य्यक्त्वं समुपाश्रिता ॥ तृतीया कर्म्म
कुरुते प्रजापालनतत्परा । सत्त्वोद्रि
क्ता तु सा शेया धर्म्मसंस्थानकारिणी ॥
चतुर्थी जलमध्यस्था शेते पन्नगतल्प
गा । रजस्तस्या गुणः सर्गं सा करोति स
दैव हीत्यादि ॥ शरीरपुरुषश्छन्द
पुरुषो वेदपुरुषो महापुरुष इति बह्
वृचोपनिषदुक्ताश्चत्वारः पुरुषा व्यूहा
अस्येति वा ॥ न । साङ्ख्ये मोक्षशा
स्त्रे ॥ तत्र हि हेयं हानं हेयहेतुर्हा
नोपायश्चेति चत्वारो व्यूहाः प्रतिपा
द्या भवन्ति । तत्र त्रिविध दुःखं हे
यम् । तदत्यन्तनिवृत्तिर्हानम् । प्र
कृतिपुरुषसंयोगद्वारा चाविवेको हे
यहेतुः । विवेकख्यातिस्तु हानोपा
य इति ॥ ॥ चिकित्साशास्त्रे ॥ तत्र च
रोग आरोग्यं रोगनिदानं भैषज्यमि

ति चत्वारो व्यूहत्वेनोक्ताः ॥

चतुर्हायणी । स्त्री । चतुर्वर्षीयां गवि ॥
चत्वारो हायना यस्याः । दामहाय
नेति ङीप् । त्रिचतुर्भ्यां हायनस्येति
णत्वम् ॥ त्रि । अन्यत्र ॥

चतुष्कम् । न । चतुस्तम्भमण्डपे । चौख
म्भा इति भाषा ॥ अश्वस्य गतिविशेषे ॥

चतुष्की । स्त्री । मशकहर्य्याम् । मस
हरी इति भाषा ॥ पुष्करिणी वि
शेषे ॥

चतुष्टयम् । त्रि । चतुरवयवसमुदा
ये ॥ यथा चतुष्टयी शब्दानां प्रवृत्ति
रिति । शब्दानामर्थे या प्रवृत्तिः सा
प्रवृत्तिनिमित्तभेदात् प्रकारचतु-
ष्टयवतीत्यर्थः । प्रकारभेदश्च यथा ।
जातिशब्दो गुणशब्दः क्रियाशब्दो य
दृच्छाशब्दश्चेति ॥ चत्वारोऽवयवा
यस्य । सङ्ख्याया अवयवे तयप् । रे
फस्य विसर्गः सत्वे च कृते ह्रस्वात्तादावि
ति मूर्द्धन्य ॥ केन्द्रे ॥

चतुष्पत्री । स्त्री । सुनिषण्णके । चौप
त्ती शाक इति भाषा ॥ चाङ्गेरीसदृ
श. पत्रैश्चतुर्दलइतिख्यात । शाके
जला ऽन्विते देशे चतुष्पत्रीति चो
च्यते ॥ क्षुद्रपाषाणभेदिनि ॥

चतुष्पथ । पु । ब्राह्मणे ॥ न । चतुर्म्मा
र्गसङ्गमे । शृङ्गाटके ॥ चतुर्णां पथां

समाहारः । तद्धितार्थेतिसमासः । ऋक्पूरिति समासान्तः । इदुदुपधस्येति षत्वम् । पथः सङ्ख्येति क्लीवत्वम् । चत्वारः पन्थानो यत्र वा ॥

चतुष्पद । पु । गवादिपशौ ॥ करणविशेषे ॥ तत्र जातस्य फलं यथा । चतुष्पदभवो मर्त्यः सदाचारविवर्जितः । स्वल्पवित्तः क्षीणदेहश्चतुष्पादधनान्वितः इति ॥ राशिविशेषे । मेषवृषसिंहेषु । धनुषोन्त्यार्द्धे । मकरस्य पूर्वार्द्धे ॥ स्त्रीणांकरणभेदे चेति हेमः ॥ चत्वारि पदानि पादा अस्य ॥

चतुष्पदी । स्त्री । पद्ये । चौपदी इति चौपई इति च भाषा ॥ चत्वारः पादा अस्याः । सङ्ख्यासुपूर्वस्येति पादस्यान्तलोपे पादोन्यतरस्यामिति ङीपि भत्वात् पादः पदिति पदादेशः ॥

चतुष्पर्णी । स्त्री । क्षुद्राम्लिकायाम् ॥

चतुष्पथा । स्त्री । नागवल्ल्याम् ॥

चतुष्पाठी । स्त्री । चौपाड इति भाषा प्रसिद्धे छात्राणामध्ययनस्थले ॥ चतुर्णां वेदानां पाठो यस्याम् ॥

चतुष्पाणि । पु । शतधामनि । विष्णौ ॥ चत्वारः पाणयो यस्य ॥ त्रि । चतुर्हस्तान्विते ॥

चतुष्पात्-द् । पुं । गवादिपशौ ॥ चत्वारः पादा अस्य । संख्यासुपूर्वस्येति पादस्यान्तलोपः ॥

चतुष्पुण्ड्र । पु । भिण्डातरौ ।

चतुस्समम् । न । चतुःसमे ॥

चतुस्त्रिंशत् । स्त्री । चतुरधिकायां त्रिंशति । चौंतीस इति भाषा ॥

चतुस्त्रिंशज्जातक । पु । बुद्धविशेषे ॥

चतूराजी । स्त्री । चतुरङ्गक्रीडाङ्गर्गतक्रीडाविशेषे ॥

चत्वरम् । न । स्थण्डिले । यागार्थसंस्कृतभूमौ ॥ अङ्गने ॥ नानाजनावस्थानदेशे । चौतरा इति भाषा ॥ पथां संश्लेषे । चतसृणां रथ्यानां सम्बन्धे ॥ गृहाद्बहिरङ्गने ॥ चत्यते । चतेः । छित्वरछत्वरेति ष्वरच् ॥ चतन्त्यस्मिन्वा ॥

चत्वारिंशत् । स्त्री । चालीस इति प्रसिद्धे सङ्ख्याविशेषे ॥ सङ्ख्येये ॥ चत्वारो दशतः परिमाणमस्य । पङ्क्तिविंशतित्रिंशच्चत्वारिंशदिति निपातनात् प्रकृतेश्चत्वारिन्भावः शत्प्रत्ययः ॥

चत्वालः । पु । होमकुण्डे ॥ दर्भे ॥ चतति । चतेः । छत्वरतिनवेरितिवालच् ॥

चन । अ । असकलार्थे ॥ चनति । चनशब्दे । पचाद्यच् ॥ अप्यर्थे ॥

चनः । न । भक्ते ॥ चाय्यते । चायृपूजानिशामनयोः । चायतेरन्ने ह्रस्वश्चेत्यसुन् प्रत्ययस्तस्य नुट् च ॥

चन्द' । पु । विधौ ॥ शशी चन्दो हिम द्युतिरितिशब्दार्णव. । चन्दति । चदि आह्लादे । पचाद्यच् ॥

चन्दक । पुं । चादा इति गौडेषु प्रसिद्धे मत्स्यविशेषे ॥

चन्दन. । पु । न । मलयजे । गन्धसारे ॥ चन्दनं शीतलं रूक्षं तिक्तमाह्लादनं लघु । श्रमशोषविषश्लेष्मतृष्णापित्तास्रदाहनुत् ॥ श्रेष्ठस्यास्य लक्षणं यथा । स्वादे तिक्तं कषे पीतं छेदे रक्तं तनौ सितम् । ग्रन्थिकोटरसंयुक्तं चन्दनं श्रेष्ठमुच्यते इति ॥ चन्दनानि च सर्वाणि सदृशानि रसादिभिः । गन्धेन तु विशेषोक्तिः पूर्वं श्रेष्ठतमं गुणैः ॥ रक्तचन्दने ॥ यथा । कषायपानयोर्योज्यं चन्दनं रक्तचन्दनमिति ॥ अपि च । कषायलेपयोर्ग्राह्यं चन्दनं रक्तचन्दनमिति ॥ पु । वानरप्रभेदे ॥ न । औषधीभेदे । भद्रकाल्याम् ॥ चन्दयति । चदि आह्लादने । णयन्त । ल्युट् । बहुलमन्यत्रापीति युज्वा ॥

चन्दनगोपी । स्त्री । शारिवाविशेषे ॥

चन्दनधेनु । स्त्री । पतिपुत्रवन्मृतनायुद्देश्यकोत्सृष्टाया श्चन्दनाङ्कितसवत्साया गोर्दाने ॥ यथा । जीवद्भर्तृयानारी पुत्रिणी म्रियते यदि । सवत्सा मङ्कितां धेनुं शाचार्याय प्रदापयेत् ॥ पतिपुत्रवती नारीमित्यते यापि तस्तयोः । हर्षनचोत्सृजेत् पुत्रःपिता यावच्च जीवतीति ॥

चन्दनपुष्पम् । न । लवङ्गे ॥

चन्दनशारिवा । स्त्री । शारिवाविशेषे ॥

चन्दनसार । पुं । वज्रक्षारे ॥

चन्दना । स्त्री । शारिवाविशेषे ॥

चन्दनाचल' । पुं । मलयपर्वते ॥

चन्दनाद्रिः । पुं । पित्तोपशमनाय चन्दनादिसलवासनद्रव्येषु ॥ यथा । चन्दनञ्च तथोशीरं कर्पूरं मञ्जिष्ठाकुष्ठौ । एलार्कचूर्णं गोदुग्धं सर्वैरेतैश्चन्दनाद्य इति ॥

चन्दनाद्रि । पु । मलयपर्वते ॥

चन्दनी । स्त्री । नदीविशेषे ॥

चन्दनीया । स्त्री । गोरोचनायाम् ॥

चन्दिर । पुं । हस्तिनि ॥ चन्द्रे ॥ चन्दति । चदि० । इषिमदिमुदीच्यादिना किरच् ॥

चन्द्रः । पु । चाँद इति प्रसिद्धे हिमांशौ । चन्द्रमसि । सुधांशौ ॥ कर्पूरे ॥ काम्पिल्ले ॥ स्वर्णे ॥ वारिणि ॥ काम्ये । सुन्दरे ॥ मेचके । वर्हचन्द्रके ॥ रक्तरजते । शोणमुक्ताफले ॥ चि । आह्लादजनकद्रव्ये ॥ न । स्वर्णे ॥ शुक्रं ॥ वनवृक्षविशेषे ॥ यथा । हि

नवरगणयुग मुपधाय परिकलयत र सयनगणयुगलमिह गन्धयुगमपि विरत । फणिन्द्रपतिभणितमिति- चन्द्रमिदमितिमृणुत सकलकविकु लहृदयमोदकरमवतनुत ॥ यथा ।अनुपहतकुसुमरसतुल्यमिदमधर दल मम्लतमयवचन मिदमाखिवि फलयसिचल । यदपि यदुरमणपद- मीशमुनिहृदिलुठति तदपितवरति वलितमेत्थ्यवनतटमटतीति ॥ य यमास्य दयम॥ ऽ ॥प्रभेदे ॥ च न्दयति आह्लादयति सकलं जगत् । चदि° । स्फायितस्त्रीतिरक् ॥ पु । द्वीपविशेषे ॥ कीरके ॥ मृगशिरो नक्षत्रे ॥

चन्द्रक. । पु । मेचके । वर्हचन्द्रके । मयूरपिच्छस्थचन्द्राकृतौ ॥ चन्द्र इव प्रतिकृति । इवे प्रतिकृताविति कन् ॥ नखे ॥ चाँदमाच् इति गौडेषु प्रसिद्धे मत्स्ये ॥ न । सितमरिचे । शिग्रुबीजे ॥

चन्द्रकला । स्त्री । चन्द्रस्य षोडशे भागे ॥ हगडवाद्ये ॥ बाचामत्स्ये ॥

चन्द्रकान्त । पु । चन्द्रमणौ । चन्द्रोपले ॥ कैरवे ॥ न । कैरवे ॥ श्रीख ण्डचन्दने ॥ चन्द्र. कान्तो यशस ॥

चन्द्रकान्ता । स्त्री । निशायाम् ॥ ज्यो त्स्नायाम् ॥ चन्द्रस्योषायाम् ॥ चन्द्र: कान्तो यस्या ॥

चन्द्रकान्ति । न । रजते । रूप्ये ॥

चन्द्रकानलम् । न । मैसूर्सिकानी चक्रविशेषे ॥

चन्द्रकावान् । पुं । } मयूरे ॥ मतुप् ॥

चन्द्रकी । पु । } इन् ॥

चन्द्रकुण्ड: । पु । कामरूपस्थे सरोवि शेषे ॥

चन्द्रकूट । पुं । कामरूपस्थे पर्वतवि शेषे ॥

चन्द्रक्षय । पुं । अमायाम् ॥

चन्द्रगुप्त: । पु । श्रीभागवत प्रसिद्धे नृपे ॥

चन्द्रगृहम । न । कर्कराशौ ॥

चन्द्रगोलस्था. । पु । भूमि । दिव्यपितृ षु । स्वधाभुक्षु ॥ चन्द्रगोलेतिष्ठन्ति । सुपिस्थ इति क ॥

चन्द्रगोलिका । स्त्री । ज्योत्स्नायाम् ॥

चन्द्रचञ्चल । पु । चलेशमत्स्ये ॥

चन्द्रचञ्चला । स्त्री । चन्द्रकमत्स्ये ॥

चन्द्रचार । पु । चन्द्रविषयकज्ञाने ॥ तत्रादौ येरवेरुपरि चन्द्रमसन्निकृष्ट न्नितान् प्रत्याह । निम्नमधस्थस्ये न्दोर्भाभि र्भानो' सितभवत्यर्द्धम् । । स्वच्छायया न्यदसित कुम्भस्येवात पस्थस्य ॥ अस्यप्रत्यवबाधां मन्यमा नआह । सलिलमयेशशिनि रवेर्दी

थितयोर्मूर्च्छितासमोनैशम् । च
पयन्ति दर्पणोदरविहिताइव मन्दि
रस्यान्त. ॥ शशिनः पश्चिमदिग्भागा
त् सितवृद्धि किमित्युपलभ्यते इ
त्याह । त्यजतोर्कतलंशशिन पश्चा
द्वलम्बते यथाशौक्ल्यम् । दिनकर
वशात्तथेन्दो प्रकाशतेध प्रभृत्युद
य ॥ प्रतिदिन कथंचन्द्रगोशुक्ल
द्धिर्भवति तदर्थमाह । प्रतिदिवसमे
वमर्कात् स्थानविशेषेण शैक्ल्य परि
वृद्धि । भवति शशिनोऽपराह्णेप
श्चाद्भागे घटस्येव ॥ चन्द्रस्य नक्षत्र
गमनेन शुभाशुभत्वमाह । ऐन्द्रस्य
शीतकिरणो मूलाषाढाद्वयस्यचाया
त । याम्येनवीजजलचरकाननघ्ना
वह्निभयदश्च ॥ दक्षिणपार्श्वेनगत
शशी विशाखानुराधयो पापः । म
ध्येनतु प्रशस्त पितृदेवविशाखयो
श्चापि ॥ चन्द्रस्यनक्षत्रयोगमाह । ष
डनागतानिपैाष्णात् द्वादशरौद्राश्च
मध्ययोगीनि । ज्येष्ठाद्यानि नवर्क्षा
ण्युडुपतिनातीत्ययुज्यन्ते ॥ चन्द्रम
स संस्थानानि दश भवन्ति । यथा ।
नै।लाङ्गलदुष्टलाङ्गलं समो दण्ड
कार्मुक युग पार्श्वशय्याऽऽवर्जितंकु
ण्डाख्यमिति । अथैषां संस्थाना
ना लक्षण फलञ्च क्रमेणाह । उन्न

त मीषच्छृङ्गं तनैास्थानेविशाल
ता चोक्ता । नाविकपीडातस्मिन्
भवति शिवंसर्वलोकस्य ॥ १ ॥ अ
र्द्धोन्नतेचलाङ्गलमितिपीडातदुप-
जीविनां तस्मिन । प्रीतिश्च निर्नि
मित्तं मनुजपतीनां सुभिक्षञ्च ॥ २
॥ दक्षिणविषाणमर्द्धोन्नतंयदादुष्ट
लाङ्गलाख्यंतत् । पाण्ड्यनरेश्वरनि-
धनकृदुद्योगकरंबलानाञ्च ॥ ३ ॥ स
मशशिनि सुभिक्षक्षेमवृष्टय. प्रथम
दिवससदृशा स्युः । ४ । दण्डवदुदि
तेपीडा गवान्नृपश्चोग्रदण्डोच ॥ ५
॥ कार्मुकरूपे युद्धानियत्रतुज्यातते
जयस्तेषाम् । ६ । स्थानंयुगमितिया
म्योत्तरायतंभूमिकम्पाय ॥ १२ ॥
७ ॥ युगमेवयाम्यकोट्यांकिञ्चित्तुङ्ग
स पार्श्वशायीत । विनिहन्तिस र्थ
वाहान् वृष्टेश्चविनिग्रहंकुर्यात् ॥ ८
॥ अभ्युच्छ्रायादेकयदिशशिनोऽवा
क्शृङ्गमवनेच्छृङ्गम् । कावर्जितमित्य
सुभिक्षकारितद्गोधनस्यापि ॥ ९ ॥
अव्युच्छिन्नारेख समन्ततामण्डलेच
कुण्डाख्यम् । अस्मिन्माण्डलिका
ना स्थानत्यागोनरपतीनाम् ॥ १५
। १० ॥ साकान्यलक्षणमाह । प्रो
क्तस्थान भावा दुदगुच्च क्षेमवृद्धिवृ
ष्टिकर । दक्षिणतुङ्गश्चन्द्रो दुर्भिक्ष

भयायमिर्दिष्टं ॥ शृङ्गेणैकेनेन्दु वि
लीनमथवाप्यवाङ्मुखंशृङ्गम् । सम्पू
र्णंवाभिनवदृष्टैको जीविताद्भ्र
श्येत् ॥ १७॥ चन्द्रमसोरूपाणिसफ
लान्याह । सस्थानविधि कथितो रू
पाण्यस्माङ्गवन्तिचन्द्रमसः । स्वल्पो
दुर्भिक्षकरो महान् सुभिक्षावह
प्रोक्तः ॥ मध्यतनु वंज्राख्य' क्षुद्भ
यद सम्भ्रमायराज्ञाश्च । चन्द्रोमृदङ्ग
रूप क्षेमसुभिक्षावहोभवति ॥
ज्ञेयोविशालमूर्त्तिर्नरपतिलक्ष्मीवि
वृद्धयेचन्द्र । स्थूल सुभिक्षकारीप्रिय
धान्यकरस्तुतनुमूर्त्तिं ॥ २० ॥ अथ
चन्द्रस्य कुजादिभिस्ताराग्रहैं शृङ्गे-
भिन्नेफलमाह । प्रत्यन्तान् कुन्नपा
श्चहन्त्युडुपति शृङ्गेकुजेनाहते शस्त्र
क्षुद्भयकृद्यमेन शशिजेनावृष्टिदुर्भि
क्षकृत् । श्रेष्ठान् हन्तिन्नपान्महेन्द्र
गुरुणा शुक्रेणचाल्पान्नपान् शुक्ले
याप्यमिदफल ग्रहकृतकृष्णेयथोक्ता
गमम् ॥ शुक्रभिन्नविम्बस्यचन्द्रमस
फलमाह । भिन्न सितेन मगधान्
यवनान्पुलिन्दान् नेपालभृङ्गिमरुक
च्छसुराष्ट्रमन्द्रान् । पाञ्चालकैकय
कुलूतकपौरुषादान् हन्यादुशीनर
जनानपिसप्तमासान् ॥ जीवभिन्न-
स्याह । गान्धारसौवीरकसिन्धुकीरा

न् धान्यानि शैलान्द्रविडाधिपांश्च
। द्विजांश्च मासान्दश शीतरश्मि'
सन्तापयेद्वाक्पतिनाविभिन्न ॥ भौ
मभिन्नस्याह । उद्युक्तान्सहवाहनैर्न
रपतीस्त्रैगर्त्तकान्मालवान् कौलि
न्दान् गणपुङ्गवानथशिवीनायोध्य
कान्पार्थिवान् । हन्यात कौरव
मत्स्यशुक्त्यधिपतीन् राजन्यमुख्या-
नपि मालेयांशुरसृग्महेतनुगतेषण्
मासमर्यादया ॥ शनिभिन्नस्याह ।
यौधेयान् सचिवान् सकौरवान् प्रा
गीशा नथ चार्जुनायनान् । हन्या-
दर्कजभिन्नमण्डल: शीतांशु र्दशमा
सपीडया ॥ वुधभिन्नस्याह । मगधा
न्मथुरांश्चपीडयेत वेण्णायाश्चतट
शशाङ्कज । अपरत्रकृतयुगंवदे च-
द्भिस्त्राशशिनत्रिनिर्गत: ॥ केतुना
भिन्नस्याह । क्षेमारोग्यसुभिक्षविना
शी शीतांशु शिखिनायदिभिन्न'।
कुर्यादायुधजीविविनाशं चौराणा-
मधिकेनचपीडाम् ॥ २७ ॥ ग्रहण
कालेउल्काहतस्य चन्द्रस्य फलमाह ।
उल्कयायदाशशी ग्रस्तएवहन्यते ॥
हन्यतेतदान्नपो यस्यजन्मनिस्थित'
॥ चन्द्रमसोवर्णलक्षणमाह । भस्म
निभ'परुषो ऽरुणमूर्त्ति.शीतकर -
किरणै:परिहीन' । श्यामतनु'स्फुटि

त. स्फुरणोवाचुट्टमरामयचौरभयात् ॥ प्रालेयकुन्दकुमुदस्फटिकावदातो यत्नादिवाद्रिसुतया परिमृज्य चन्द्रः । उच्चैः कृतो निशि भविष्यति शर्म्मे शिवाय योऽदृश्यत सभविता जगतः शिवाय ॥ अथ पक्षद्वौ ज्ञानोत्र साम्येन शुभाशुभमाह । शुक्लेपक्षे सम्प्रदेशवृद्धिं व्रजन्नवंयातिवृद्धिंप्रजानां । क्षीणेश्रानिसमुत्सृजत्स्वतायांकृष्णेसर्वैतत्फलव्यत्ययेन ॥ यदि कुमुदसखाच्चारगौरः सितश्चिन्नियमात्स्वयमेभिवर्द्धं तेजा । अधिकृतगतिमण्डलांशुयोगी भवतिनृणांविजयाय शीतरश्मिः ॥ ३२ ॥ इति वाराह्यां चतुर्थोऽध्यायः ॥ ४ ॥

चन्द्रदारा । स्त्री । भू० । अश्विन्यादिनक्षत्रेषु ॥ चन्द्रस्यदाराः ॥

चन्द्रनामा । पु । कर्पूरे ॥ चन्द्रस्यनामान्येव नामान्यस्य ॥

चन्द्रपुष्पा । स्त्री । श्वेतकण्टकार्याम् ॥

चन्द्रप्रभ । पु । वृत्ताद्दविशेषे ॥

चन्द्रप्रभा । स्त्री । ज्योत्स्नायाम् ॥ चन्द्रस्य प्रभा ॥ वाकुच्याम् ॥ औषधविशेषे ॥ अत्राहसुखबोध । कृमिरिपुदहनव्योषत्रिफलामरदारुचव्यभूनिम्बम् । मागधिमूलं मुस्तं सशटिवचामाक्षिकञ्चैव ॥ लवणक्षारनिशायुगकुसुम्भगजकणालिविषा ॥ कर्षांशकान्येव समानिकुर्यात् पलाष्टकञ्चाश्मजतो विदध्यात् । निष्कञ्च शुद्धस्य पुरस्य धीमान् पलद्वयं चोक्षरजस्तथैव ॥ सिताचतुष्कं पलमत्रवंश्यानिकुम्भकुम्भश्विसुन्धियुक्तम् । चन्द्रप्रभेयं गुटिकाप्रयोज्याचाशी सिनिर्वाशयतेश्वदेव ॥ भगन्दरपाण्डुरकामलाम्लनिर्वाष्टवञ्के कुरुतेचदीप्तिम् । हन्त्यामयान् पित्तकफानिलोत्थान् माङ्गीगतेममंगते ब्रवेच ॥ ग्रन्थ्यर्बुदे विद्रधिराजयक्ष्मयोर्मेहे भगाख्ये प्रबलेच योज्या । सुमक्रमेचाश्मरिमूत्रकृच्छ्रे शुक्रप्रवाहे प्युदरामयेष ॥ भक्तास्यपूर्वं सततप्रयोज्या तक्रानुपानत्वथमस्तुपानम् । आवीरसोजाङ्गलजोरसोवा पयोऽथवा शीतजलानुपानम् ॥ वलेननागसुरगोजवेन दृष्ट्यासुपर्णं श्रवणेवराह ॥ वलीपलितनिर्मुक्तोवृद्धोऽपि तरुणायते ॥ न पानभोज्येपरिहार्यमस्ति न शीतवातातपमैथुनेषु । शम्भुं समभ्यर्च्य कृतप्रसादेनासावटी चन्द्रमसः प्रसादादिति ॥ कचूरके । कचूर इति भाषा ॥

चन्द्रभस्म । न । कर्पूरे ॥

चन्द्रभाग. । पुं । पर्वतविशेषे ॥ विभक्त

श्चन्द्रमायस्मात् तस्मिन् पर्वतसत्तमे। अतोदेवाश्चन्द्रभागं नामाचक्रुः पुरागिरिमितिकालिकापुराणम् ॥
चन्द्रभागा। स्त्री। कश्मीरदेशप्रसिद्धे नदीविशेषे॥चन्द्रभागयो पर्वतयोरियम्। तत्प्रभवत्वात्। तस्येदमित्यण्। टिड्ढेतिङीपप्राप्त चन्द्रभागादानद्यामिति वक्तव्यादिगबाहुल्यात्भवति। संज्ञापूर्वकत्वाद्वृद्ध्यभावः॥
चन्द्रभागी। स्त्री। चन्द्रभागायाम्॥ वक्तव्यादिण्यश्चेतिङीष्॥
चन्द्रभूति। न। रूप्ये॥
चन्द्रमणि। पु। चन्द्रकान्तमणौ॥
चन्द्रमण्डलम्। न। चन्द्रबिम्बे॥चन्द्रपरिवेशे॥
चन्द्रमल्ली। स्त्री। अष्टापदाम्॥
चन्द्रमाः। पु। विधौ। चन्द्रे॥ चन्द्रं कर्पूरं साहृश्येन माति तुलयति। माङ्माने। चन्द्रमेमोडिश्चेत्यसि॥चन्द्रमाह्लादमिमीते निर्मिमीतेइति वा॥ यद्वा। चन्द्रं रजतमस्तत्वत-दिव मीयते। चन्द्रइतिवामीयते इति दासीभारादित्वात्पादने पूरुषः॥
चन्द्रमौलि। पु। रेरिहाणे। शिवे॥
चन्द्ररेणु। पु। काव्यचौरे॥
चन्द्रर्क्षम्। न। मृगशिरायाम्॥
चन्द्रला। स्त्री। कर्णाटदेशप्रसिद्धायामम्बायाम्॥ तत्स्थाने॥
चन्द्रलेखा। स्त्री। वाकुच्याम्॥ शशिकलायाम्॥ अतिशक्करीसंज्ञकेपञ्चदशाक्षराचृत्तिविशेषे॥ यथा। म्रौम्रौयौचेद्भवेता ससाष्टकैश्चन्द्रलेखा॥ यथा। विच्छेदे ते मुरारे पाण्डुप्रकाशाकृशाङ्गी म्लानच्छायंदुकूलं-मम्लानतेविभ्रतीसा। राधाम्भोदश्यामगर्भेक्षीनायथाचन्द्रलेखा किञ्चासौ त्वां स्मरन्ती धत्ते भुवं जीवयेयमिति॥
चन्द्रलोहकम्। न। रूप्ये॥
चन्द्रवंशः। पु। चन्द्रसन्ताने॥
चन्द्रवर्त्म। न। जगतीसंज्ञकेद्वादशाक्षराचृत्तिविशेषे॥ यथा। चन्द्रवर्त्म निगदन्ति रनभसैः॥ यथा। चन्द्रवर्त्मपिहितं घनतिमिरैः राजवर्त्मरहितं जनगमनैः। इष्टवर्त्मतदलं कुरु सरसे कुञ्जवर्त्मनि हरिस्तवकुतुकीति॥
चन्द्रवल्लरी। स्त्री। सोमवल्ल्याम्॥
चन्द्रवल्ली। स्त्री। प्रसारण्याम्॥ माधवीलतायाम्॥
चन्द्रवशा। स्त्री। भारतवर्षस्थ नदीविशेषे॥

चन्द्रवाला । स्त्री । स्थूलैलायाम् । बहुलायाम् ॥ चन्द्रस्य कर्पूरस्य वालेव कर्पूरगन्धित्वात् ॥

चन्द्रबिन्दुक्रम । पुं । ककपक्षिणि ॥

चन्द्रव्रतम् । न । चान्द्रायणे ॥

चन्द्रशाला । स्त्री । } ज्योत्स्नायाम् ॥ गृहोपरिगृहे । शिरोगृहे ॥
चन्द्रशालिका । स्त्री । }

चन्द्रशुक्ल । पु । अम्बुवीमोपधीविशेषे ॥

चन्द्रशूरम् । न । चंदसुर चालों इति ख्यातौषधौ । चर्मकस्याम् । पशुमेहनकारिकायाम् । चन्द्रहूरे ॥

चन्द्रशेखर । पु । ईश्वरे । शिवे ॥ गिरिविशेषे । यथा । विशेषत कलियुगे दसामि चन्द्रशेखरे । इतिशिववाक्यम् ॥ चन्द्रशेखरोऽस्य ॥ पौष्यराज पुत्रे करवीरपुरनृपे ॥ षोडशभुवकान्तर्गते नवमध्रुवके ॥ चतुःसष्टिभैरवविशेषे ॥

चन्द्रसञ्ज्ञ । पु । कर्पूरे ॥ चन्द्रस्य सञ्ज्ञास्य ॥

चन्द्रसम्भव । पु । बुधे ॥ चन्द्रात्सम्भवो यस्य ॥

चन्द्रसम्भवा । स्त्री । सूक्ष्मैलायाम् ॥ चन्द्रात् सम्भवोयस्याः ॥

चन्द्रहूरम् । न । चन्द्रशूरे । चंदसुर इति भाषा ॥ चन्द्रहूरं हितं हिक्कावातश्लेष्मातिसारिणाम् । असृग्वातगदद्वेषि बलपुष्टिविवर्द्धनम् ॥

चन्द्रहास । पु । असिमात्रे ॥ दशग्रीवकरवाले ॥ चन्द्रइवहास प्रभाऽस्य ॥ चन्द्रंहसतिवा द्युतिमत्त्वात् । हसेहसने । कर्मण्यण् ॥ न । रौप्ये ॥

चन्द्रहासा । स्त्री । गुडूच्याम् ॥ चन्द्रिकाप्रभेदे ॥

चन्द्रा । स्त्री । एलायाम् ॥ विताने ॥

चन्द्रातप । पु । विताने । उल्लोचे । चंदोआ इतिभाषा ॥ ज्योत्स्नायाम् ॥

चन्द्रापीड । पु । शिवे ॥ चन्द्र आपीड शिरोभूषणमस्य ॥

चन्द्रावली । स्त्री । गोपीविशेषे ॥ यथा । राधाचन्द्रावलीमुख्या प्रोक्तानित्यप्रियाव्रजे । कृष्णवन्नित्यसौन्दर्यवैदग्ध्यादिगुणाश्रया इत्युज्ज्वलनीलमणि ॥

चन्द्रिका । स्त्री । कौमुद्याम् । ज्योत्स्नायाम् ॥ चन्द्रोऽस्त्यस्याः । ठन् ॥ ॥ चन्द्रकायतीतितुन इस्वाभावमसञ्ज्ञात् ॥ चन्द्रमाचष्टे चन्द्रयति । तत्करोतीतिण्यन्तात्ण्वुल् वा ॥ स्थूलैलायाम् ॥ चन्द्रकमत्स्ये ॥ कर्णस्फोटायाम् ॥ मल्लिकायाम् ॥ श्वेतकण्टकार्याम् ॥ मेथिकायाम् ॥ इन्द्रो-

च्छायाम् ॥ चन्द्रशूरे ॥ अतिजगती संज्ञकेचयोदशाक्षरावृत्तिविशेषे ॥ यथा । ननततगुरुभिश्चन्द्रिकाश्वर्त्तुभिः । यथा । शरदमलतरचन्द्रिकाक्षालिते दिनकरतनयातीरदेशे हरिः । विहरति रभसाद्वल्लवीभिः समं त्रिदिवयुवतिभिः कोपिदेवा यथा ॥ हरिश्चन्द्रपुरवासिन्यामप्सरायाम् ॥

चन्द्रिकाम्बुजम् । न । सितोत्पले ॥

चन्द्रिकाद्राव । पु । चन्द्रकान्तमणौ ॥

चन्द्रिकापायी । पु । चकोरपक्षिणि ॥

चन्द्री । स्त्री । वाकुच्याम् ॥

चन्द्रेष्टा । स्त्री । उत्पलिन्याम् ॥

चन्द्रोदयः । पुं । शशिप्रकाशे ॥ उल्लोचे ॥ मकरध्वजाख्येरससिन्दूरे ॥ यथा च । पलं मृदुस्वर्णदलं रसेन्द्र पलाष्टकं षोडशगन्धकस्य । शोणैः सुकार्पासभवैः प्रसूनैः सर्वं विमर्द्याथ कुमारिकाद्भिः ॥ तत्काचकुम्भे निहितं सुगाढे मृत्कर्पटैस्तद्दिवसत्रयञ्च । पचेत् क्रमाग्नौ सिकताख्ययन्त्रे ततो रजः पल्लवरागरम्यम् ॥ निगृह्य चैतस्य पलं पलानि चत्वारि कर्पूररजस्तथैव । जातीफलं सोषणमिन्द्रपुष्पं कस्तूरिकाया इह शाणएक ॥ * ॥ चन्द्रोदयोऽयं कथितस्तु भाषो भुक्तो हि वल्लीदलमध्यवर्त्ती । मदोन्मदानां प्रमदाशतानां गर्वाधिकत्वं श्लथयत्यकाण्डे ॥ घृतं घनीभूतमतीव दुग्धं मृदूनि मांसानि समस्तकानि । माषान्नपिष्टानि भवन्ति पथ्यान्यानन्ददायीन्यपराणि चात्र ॥ ॥ वलीपलितनाशनस्तनुभृतां वयःस्तम्भनः समस्तगदखण्डनः प्रचुररोगपञ्चाननः । गृहेषु रसराजयं भवति यस्य चन्द्रोदयः स पञ्चशरदर्पितो मृगदृशां भवेद् दुर्लभः ॥ इति सारकौमुदी सुखबोधश्चेतिराधाकान्तः ॥ चन्द्रस्य चन्द्रइवबा उदयो यस्य ॥

चन्द्रोदया । स्त्री । नेत्ररोगस्यौषधविशेषे ॥ यथा । हरीतकी वचा कुष्ठं पिप्पली मरिचानि च । बिभीतकस्य मज्जा च शङ्खनाभिः मनःशिला ॥ सर्वमेतत्समं कृत्वा छागीक्षीरेणपेषयेत् । * । नाशयेत् तिमिरं कण्डुं पटलान्यर्बुदानि च ॥ अधिकानि च मांसानि यश्च रात्रौ न पश्यति । अपि द्विवार्षिकं पुष्पं मासेनैकेन साधयेत ॥ वर्त्तिश्चन्द्रोदयानाम्ना तथा दृष्टिप्रसादनी ॥ इतिचक्रपाणिदत्तः ॥

चन्द्रोपलः । पु । चन्द्रकान्तमणौ ॥

चपकः । पु । पारदे ॥ मीने ॥ चोर

के ॥ प्रस्तरविशेषे ॥ चवे ॥ राजमाषे ॥ चपनम् । चपसान्त्वने । ल्युट् ॥ प्रच् । चपंखाति । ला० । क ॥ न । ङीषे ॥ क्रियाविशेषणत्वाद्द्रव्ये वर्त्तमानक्लीबम् ॥ त्रि । तरले ॥ चले । क्षणिके ॥ विकले ॥ दुर्विनीते ॥ चपति । चप० । द्या० कल ॥ चोपति । चुपमन्दायांगतौ । चुपेरचोपधाया इति कलप्रत्यय ॥ दोषमनिश्चित्यवधबन्धनादेः कर्त्तरि । चिकुरे ॥

चपला । स्त्री । कमलायाम् । श्रियि ॥ विद्युति ॥ पुंश्चल्याम् ॥ पिप्पल्याम् ॥ विजयायाम् ॥ मदिरायाम् ॥ जिह्वायाम् ॥ आर्याप्रभेदे ॥ यथा । द्वयो द्वितीयतुर्ये।गणौ जकारौ तु चपलासा । यथा । चपलानचेत् कदाचि न्नृणाम्भवे द्भक्तिभावना कृष्णे । धर्मार्थकाममोक्षा स्तदाकरस्थान सन्देह ॥ चपलाट्टाप् ॥

चपेट । पु । विस्तृताङ्गुलिपाणौ । प्रतले । थाप् चपेटा इतिच भाषा ॥ चपति । चप० । अच । एटति । इट गतौ । अच् । चपश्वासौ इटश्च ॥

चपेटा । स्त्री । चपेटे । प्रहस्ते ॥ खण्डकोपाध्याय शिष्याय चपेटां ददातीतिभाष्यम् ॥ टाप् ॥

चपेटिका । स्त्री । चपेटायाम् ॥ चपेटैव । स्वा० क । प्रत्ययस्था दितीत्वम् ॥

चपेटी । स्त्री । भाद्रशुक्लषष्ठ्याम् ॥ भाद्रे चपेटी विख्यातेतिस्कन्दपुराणम् ॥

चमत्कार । पु । विस्मये । चित्तविस्ताररूपे । डमरौ ॥ लोकातीतार्थोक्त्यनेन किमेतदितिज्ञानधाराजननेन चित्तस्य दीर्घप्रायत्वचित्तविस्तार इत्यर्थः । दृष्टहेतुभ्यो ऽसम्भविज्ञानेन हेत्वन्तरानुसन्धाने मनोव्यापार एवचित्तविस्तार इत्यपरे ॥ अपामार्गे ॥ चमत् करणम् । कृ ञ० । घञ् ॥

चमर । पु । मृगविशेषे । व्यजन्याम् ॥ यस्यश्वेतवालैर्देवराजादिव्यजनक्रियते सचमरश्चिघाकृतिर्भवति ॥ दैत्यविशेषे ॥ न । चामरे ॥ चमति चम्यते वा अनेन वा । चमुअदने । अ-र्त्तिकमिभ्रमिचमीत्यरश्चित् ॥

चमरपुच्छ । पु । कोकडे ॥ न । चामरे ॥

चमरिक । पु । कोविदारवृक्षे । रक्तकाञ्चनारे ॥ चमरमस्यास्ति । ठन् ॥

चमरी । स्त्री । मञ्जर्याम् ॥ मृगीभेदे । दीर्घलवायाम् । गिरिप्रियायाम् ॥

चमस । पु । न । दारुजेयज्ञपात्रवि-

शेषे ॥ सोमपानपात्रे ॥ पु । पर्पटे ॥ पिष्टविशेषे ॥ लड्डुके ॥ चमन्त्यस्मिन् । चम्यते भक्ष्यते सोमोऽस्मिन्वा । चमु० । अत्यविचमीत्यसच् ॥

चमसी । स्त्री । मुद्गमसूरादिपिष्टे ॥ चूर्णायच्छक्ष्णमाषाणां चमसी साऽभिधीयते ॥ चम्यते । चमु० । असच् । गौरादित्वान् ङीष् ॥

चमीकर । पु । क्रान्तस्वराख्य आकरविशेषे ॥

चमू । स्त्री । सेनामात्रे ॥ सेनाविशेषे । तत्रेभा ७२९ । रथा ७२९ । अश्वा २१८७ । पदातय ३६४५ । समस्तसङ्ख्यया ७२९० नवत्यधिकशतद्वयाधिकसप्तसहस्रम्भवति ॥ चमति अश्नुते परैश्चम्यते वा । चमु अदने । कृषिचमितनिधनिसर्जिखर्जिभ्यऊरिच्छू ॥

चमूचर । पु । सैनिके ॥ चरेष्ट ॥

चमूजघनम् । न । सेनापश्चाद्भागे ॥

चमूरु । पु । मृगविशेषे ॥ चमति । चमु० । खर्जादित्वादूर' । पृ० अत उत्वम् ॥ यद्वा । चमूजरूयस्य ॥

चम्प । न । कोविदारवृक्षे ॥

चम्पक । पु । चम्पा इति प्रसिद्धे वृक्षे । हेमपुष्पके । दीपपुष्पे ॥ चम्पक कटुकस्तिक्त' कषायो मधुरोहिम. । विषकृमिहर कृच्छ्रकफवातास्रपित्तजित ॥ चम्पयति चम्प्यते वा । चपिगत्याम् । क्वुन् ॥ पनसकोषगाग्रके ॥ न । चाँपाकला इति गौडभाषाप्रसिद्धे कदलीफले ॥ चम्पकवातपित्तघ्न गुरुवीर्यकर तथा । अतिशीत रसे पाके मधुरं कथित वुधैरित्यस्यगुणा ॥ चम्पकस्यपुष्पे ॥ सुहृत्प्राप्तिसिद्धौ ॥ सा यथा । न्यायेन स्वयपरीक्षितमप्यर्थं तावन्नश्रद्धत्ते यावद्गुरुशिष्यसब्रह्मचारिभि स ह न सवाद्यते अत सुहृदां गुरुशिष्यसब्रह्मचारिणा सवादकाना प्राप्ति सुहृत्प्राप्ति सासिद्धिस्तुर्याचम्पकमुच्यते इति साङ्ख्यविद ॥

चम्पककलिका । स्त्री । चम्पककोरके । गन्धमोदिन्याम् ॥

चम्पकमाला । स्त्री । चम्पकपुष्पैर्निर्मितायां मालायाम् ॥ चम्पकली इति प्रसिद्धे स्त्रीणां कण्ठाभरणे ॥ वर्णवृत्तेषु पङ्क्तिच्छन्दोविभेदे ॥ यथा । पादविराजन्नूपुरयुग्मा कुण्डलशोभासङ्गिसुवर्णा । शङ्खवतीहारद्युपूर्णा चम्पकमालाभातिसुवर्णा ॥ यथा । आलिकुलभ्रष्टात्वमधन्या त्वन्तभवद्वन्याग्विकन्या । नन्दकुमारोनिर्गतशङ्क' सम्प्रतिभावी कोपि-

कलङ्क इति ॥

चम्पकचतुर्दशी । स्त्री । ज्येष्ठशुक्लचतुर्दश्याम् ॥

चम्पकरम्भा । स्त्री । सुवर्णकदल्याम् ॥

चम्पकारण्यम् । न । तीर्थविशेषे ॥

चम्पकालु । पु । चापकुडा इतिगौडे सुप्रसिद्धे मत्स्यविशेषे ॥

चम्पकोष । पु । पनसे ॥

चम्पा । स्त्री । कर्णराजस्य भार्यायाम् ॥ तस्यैवपुर्याम् । अधुना भागलपुर इति यस्यप्रसिद्धिरितिराधाकान्त ॥ तीर्थविशेषे ॥

चम्पाधिप । पु । कर्णभूपे ॥

चम्पापुरी । स्त्री । चम्पायां नगर्याम् ॥

चम्पारण्यम् । न । विदेहदेशसमीपस्थे विपिने ॥

चम्पालु । पु । पनसे ॥

चम्पावती । स्त्री । कर्णपुर्याम् ॥

चम्पूः । स्त्री । काव्यविशेषे ॥ तल्लक्षणं यथा । गद्यपद्यमयीवाणीचम्पूरित्यभिधीयते । इत्यलङ्कारस्त्वा ॥

चम्पेश । पु । कर्णाख्यन्टपे ॥

चम्पोपलक्षित । पु । अङ्गदेशे ॥ तद्देशस्थे पुम्भूम्नि ॥

चम्पेली । स्त्री । स्वनाम्ना प्रसिद्धे पुष्पविशेषे । सुमनायाम् ॥

चय । पु । समूहे ॥ वप्रे । प्राकारमूलबन्धने ॥ यदुपरिप्राकारो निरूप्यते प्राकाराधारवेदिकेतियावत् । तथा चार्थशास्त्रम् । खातमुद्धृतमृद्वावप्रं कारयेत् तस्योपरिप्राकारमिति । पगार इतिगौडभाषा ॥ समाहृतौ ॥ परिखोद्धृतमृत्स्तूपे ॥ चीयते । चिञ्चयने । कर्मण्यरच् ॥ प्राकारे ॥ पीठे ॥ इतिहेमचन्द्र ॥

चयनम । न । चिननाइतिख्याते रचनाविशेषे । इष्टकादीनामूर्द्धाधोदेशनिवेशने ॥ चिञो ल्युट् ॥

चर । पु । अक्षद्यूतप्रभेदे ॥ भौमे ॥ जङ्गमे । चले ॥ चले ॥ चारे । गोपनेन राष्ट्रादे शुभाशुभादिज्ञानार्थं राज्ञा नियुक्त पुरुषे । परतत्त्वज्ञानार्थं भ्रमणकर्त्तरि । यथार्हवर्णो । प्रणिधौ ॥ चरति । चरगतौ । पचाद्यच् ॥ कपर्दके ॥ मेषकर्कटतुलामकराख्येषु ॥ न । नक्षत्रविशेषे । वातादितिहरित्रीणि चन्द्राख्यश्च चरचलम् ॥

चरक । पु । चारे ॥ पर्पटे ॥ भक्षकरे । भिक्षौ ॥ मुनिग्रन्थविशेषयो । वैद्यशास्त्रप्रवर्त्तकेमुनौ ॥ तत्कृतेतन्नामके ग्रन्थे ॥ चरति । चर० । शिल्पिसञ्ज्ञयोरपूर्वस्यापीति वुन् ॥

चरट । पु । खञ्जनपक्षिणि ॥

चरण । पु । न । बह्वृचादौ । वेदैकदेशे ॥ शाखाध्येतरि ॥ मूले ॥ गोत्रे ॥ पदे । पादे ॥ न । भ्रमणे ॥ भक्षणे ॥ शीले । आचारे ॥ चरन्त्यनेन । चर० । करणेतिल्युट् ॥

चरणगत । त्रि । प्रणते ॥

चरणग्रन्थि । पु । गुल्फे ॥

चरणयोधी । पु । कुक्कुटे ॥

चरणव्यूह । पु । वेदव्यासकृते चतुर्वेदविवरणग्रन्थे ॥

चरणामिषम् । न । चरणमांसे ॥ चरणानामामिषम् । मुण्डस्य विधिना पाच्यं चरणन्तुप्रलेहितम् । चरणं वा तद्वल्यं वृष्यं पित्तकरं गुरु ॥

चरणायुध । पु । कुक्कुटे ॥ चरणमायुधमस्य ॥

चरम । त्रि । अन्ते । अवसाने । प्रान्ते ॥ पश्चिमे ॥ चरति । चर० । चरेश्चेत्यमच् । प्रथमचरमेतिसर्वनामत्वात् पक्षेजसि शी । चरमे चरमाः ॥

चरमक्ष्माभृत् । पु । अस्ताचले ॥ चरमश्चासौक्ष्माभृच्च ॥

चरमतीर्थकृत् । पु । वर्द्धमानाख्यार्हदिन्द्रे ॥

चरमाचल । पु । अस्ताचले ॥ चरमश्चासावचलश्च ॥

चरमाद्रि । पु । अस्ताचले ॥

चराचरम् । न । विष्टपे । जगति ॥ त्रि । इङ्गे ॥ जङ्गमाजङ्गमे ॥ इष्टे ॥ पु । कपर्दके ॥ चरति । चर० । चरिचलीतिद्वित्वादि ॥

चरि । पु । पशौ ॥ चरति । चर० । खनिकष्यज्यसीत्यादिना इप्रत्यय ॥

चरितम् । न । अनुष्ठिते ॥ चरित्रे ॥ सञ्चारे ॥ व्रतकर्मणि ॥

चरितार्थ । त्रि । प्राप्तप्रयोजने ॥

चरित्रम । न । स्वभावे ॥ चेष्टिते ॥ चर्यतेऽनेन । चर० । अर्त्तिलूधूसूखनसहचरइत्र ॥

चरिष्णु । त्रि । जङ्गमे ॥ चरणशील । चरगतौ । अलङ्कृञितीष्णुच् ॥

चरु । पु । हव्यान्ने । हव्यपाके ॥ टीकायामितिख्याते भाण्डे ॥ चर्यते भक्ष्यते देवैः । चरन्ति भक्षयन्ति देवा इममिति वा । चरगतौ भक्षणे च । भृमृशीतृचरीत्यु ॥ अनवस्रावितान्तरूष्मपाक ओदनश्चरुरितियाज्ञिका ॥ मीमांसकैरपि त्रिवृच्चर्वधिकरणे ओदनपरत्वमेव चरुशब्दस्याभ्युपगतम् ॥ उगशादिभ्योयदितिसूत्रे कैयटस्तु स्थालीवाची चरुशब्दः तात्स्थ्या दोदने भाक्तइत्याह । बिम्बप्रकाशेतु चरुर्भाण्डेहव्यान्ने इत्यनेकार्थेलोक्ता ॥

चक्रवा । पु । चित्रापूपे ॥

चर्चरी । स्त्री । गीतभेदे ॥ अन्वजु के श्रे ॥ चर्चरीगीतभेदेचकेशभित् क रशब्दयोरिति रुद्र ॥ हर्षक्रीडाया मितिसुभूति । कापटिकानासादर वचने तौर्यत्रिकेचेत्यन्ये । वसन्तसम यक्रीडायामित्य्येके ॥ चर्भव्याम् । साटोपवाक्ये ॥ वर्णवृत्तविशेषे ॥ य था । हारयुक्तसुवर्णकङ्कणपाणिशङ्ख विराजिता पादनूपुरसङ्गता सुपयो धरद्वयभूषिता । शोभिता वलयेन पिङ्गलपन्नगाधिपवर्णिता चर्चरी त रुणीव चेतसि चाकसीतिसुसङ्गता ॥ यथा । कोकिलाकलकूजितन शृणो सि सम्प्रतिसादरम् मन्यसे तिमिरा पहारि सुधाकरं नसुधाकरम् । दूर मुज्झसि भूषणं विकलासि चन्दन मारुते कस्य पुण्यफलेन सुन्दरि म न्दिरं न सुखायते इति ॥ चर्च्यते । चर्चपरिभाषणभर्त्सनयो । बाहु लकात् अरन् । गौ० ङीष् ॥

चर्चरीक । पु । महाकाले ॥ केशविन्या से ॥ शाके ॥ चर्च्यते चर्च अध्ययने । पर्फ० इकन्प्रत्ययान्तोनिपातित ॥

चर्चा । स्त्री । चिन्तायाम् ॥ विचारणा याम् ॥ स्थासके । चार्चिक्ये । चन्द नादिनादेहविलेपने । चर्चना इति भाषा ॥ चर्चिकायाम् । दुर्गायाम् ॥ चर्चयनम् । चर्च अध्ययने । चुरादि ण्यन्ताद्भावे चिन्तिपूजिकथिकुम्बिच र्चश्चेत्यङ् । चर्चन वा ॥

चर्चिका । स्त्री । दुर्गायाम् ॥ चर्चाया म् ॥ चर्चैव । स्वा० क ॥

चर्चित । त्रि । दिग्धे । लिप्ते । चन्द नादिनाकृतलेपने । चर्चा चर्चलि या इतिच भाषा ॥ चर्चासञ्जाता ऽस्य । तारकादित्वादितच् ॥

चर्पट । पु । चपेटे ॥ पर्पटे ॥ स्फार विपुले । चिपिटे । चिपटा इति भाषा ॥

चर्पटा । स्त्री । भाद्रशुक्लषष्ठ्याम् । च पेट्याम् ॥

चर्पटी । स्त्री । पिष्टकविशेषे । पो ल्याम् ॥

चर्भट । पु । इर्वारौ ॥

चर्भटी । स्त्री । चर्चर्याम् । हर्षक्रीडा याचि । साटोपवाक्ये ॥

चर्मकषा । स्त्री । गन्धद्रव्यविशेषे । सप्तलायाम् । अरिफेनायाम् ॥ मा सरोहिण्याम् ॥ चर्मणः कषा ॥

चर्मकार । पु । चमार इतिभाषाप्र सिद्धे कारावरे । पादूकृति । च र्मकार्यां तीवराज्जाते । इतिपराशर पद्धति ॥ चर्मकरोति । डुकृञ्० ।

कर्मण्यण् ॥

चर्म्मकारी । स्त्री । चर्मकषायामोषधौ ॥

चर्म्मकीलम् । न । अर्श प्रभेदे ॥ व्यानो गृहीत्वाश्लेष्माणं करोत्यर्शस्त्वचोबहिः । कीलोपमस्थिरखरं चर्म कीलन्तु तद्विदुः ॥

चर्म्मकृत् । पु । चर्मकारे ॥

चर्म्मचटका । स्त्री । अजिनपत्रायाम् । जतुकायाम् । चाम्चिरैया इति भाषा ॥

चर्म्मचटी । स्त्री । गृहमाचिकायाम् । चर्मचटकायाम् ॥

चर्म्मचित्रकम् । न । श्वेतकुष्ठे ॥

चर्म्मजम् । न । रुधिरे ॥ रोमणि ॥

चर्म्मणवती । स्त्री । चम्बल इतिभाषा प्रसिद्धे नदीविशेषे॥ चर्मास्त्यस्याम् । मतुप् । आसन्दीवदिति चर्मणो नलोपाभावोणत्वञ्च निपात्यते ॥

चर्म्मतरङ्ग । पु । वलौ । जरयाश्लथचर्मणि ॥

चर्म्मदण्ड । पु । कशायाम् । कोरड़ा इति भाषा ॥

चर्म्मदूषिका । स्त्री । कोठरोगे ॥

चर्म्मद्रुम । पु । भूर्जवृक्षे ॥

चर्म्म । न । चामइति प्रसिद्धे त्वगिन्द्रिये । अस्रग्धरायाम् । कृत्तौ । अजिने । रोमभूमौ ॥ ढालफरी इतिचर्मसिद्धे फलके ॥ अस्यलक्षणं यथा । शरीरावरक शस्त्रं चर्मइत्यभिधीयते । तत् पुनर्द्विविधं काष्ठचर्म सम्भवभेदतः ॥ शरीरावरकत्वञ्च लघुता दृढता तथा । दुर्भेद्यतेतिकथितश्चर्मणां गुणसङ्ग्रहः ॥ स्वल्पता गुरुता चैवमृदुता सुखभेद्यता । विरुद्धवर्णताचेति चर्मणा दोषसङ्ग्रहः ॥ सितोरक्तस्तथापीत कृष्णइत्यभिलक्षित । ब्रह्मादिजातिभेदेन चर्मणां वर्णनिर्णय ॥ चित्रवर्णस्तु सर्वेषां सर्वदैवोपपद्यते इतिभोज ॥ चरति चर्यते वा ऽनेनवा॥ चर० । मनिन् ॥

चर्म्मनासिका । स्त्री । ताड़न्याम् ॥

चर्म्मपत्रा । स्त्री । चर्मचटकायाम ॥

चर्म्मपादुका । स्त्री । उपानहि ॥

चर्म्मपुट । पु । } इतिसप्तके चर्मपात्रविशेषे ॥
चर्म्मपुटक । पु । }

चर्म्मप्रभेदिका । स्त्री । आरायाम् । चर्मवेधास्त्रप्रभेदे ॥ चर्मणां प्रभेदिका ॥

चर्म्मप्रसेविका । स्त्री । भस्त्रायाम् । अग्निसन्दीपनार्थं चर्मनिर्मिते यन्त्रे । भाती इतिभाषा ॥ चर्मणा प्रसीव्यते । षिवु तन्तुसन्ताने । कृ० वुन् ॥ सञ्ज्ञायामितिण्वुल् वा ॥

चर्म्ममुण्डा । स्त्री । दुर्गायाम् ॥

चर्म्ममुण्डिका। स्त्री। कात्यायन्याम्। चण्डिकायाम्॥

चर्म्मयष्टि। स्त्री। अश्वताडन्याम्। कशायाम्॥ चर्म्मणो यष्टिः॥

चर्म्मरङ्गा। स्त्री। आवर्त्तकीलतायाम्। विभाण्ड्याम्॥

चर्म्मरु। पु। चर्म्मकारे॥ इतित्रिकाण्डशेष॥

चर्म्मसम्भवा। स्त्री। एलायाम्॥

चर्म्मसार। पुं। ⎫ रसे॥ इतिरा

चर्म्माम्भः। न। ⎭ जनिर्घण्टः॥

चर्म्मारः। पुं। चर्म्मकारे॥ चर्म्मक्रियाम् ऋच्छति। ऋच्छे कर्म्मण्यण॥ क्षिकुलप्रभेदे॥ चर्म्मार शुक्लवर्णः स्यात्॥

चर्म्मी। पु। फलकपाणौ। ढलैत इति भाषा॥ भूर्जवृक्षे॥ भृङ्गरीटे॥ कदल्याम्॥ चर्म्मास्यास्ति। व्रीह्निः॥

चर्य्या। स्त्री। ईर्य्यायाम्। नियमाभ्यासे। ध्यानमौनादिकस्य भिक्षुव्रतस्यानुष्ठाने। ईर्य्यापथस्थितौ॥ ईर्य्यते मुनौ शास्त्रोपासनया ज्ञायते इति ईर्या। ईर्य्याया पन्था। ऋक्पूरित्यः। ईर्य्यापथे ध्यानाद्युपाये परिव्राजकादीनांस्थिति तस्यामित्यर्थ॥ आचरणे॥ चरणम्। चर॰। गदमदचरयमश्चानुपसर्गइतियत्॥ यद्वा। परिचर्य्यापरिसर्य्येत्यत्र परीत्यस्य

विवक्षणात् चर्य्येतिसाधुः॥

चर्व्वणम्। न। दन्तैश्चूर्णने। चबावना इतिभाषा॥ चर्व्वअदने। ल्युट्॥

चर्व्वा। पु। तलप्रहारे॥

चर्व्वितः। त्रि। भक्षिते। कृतचर्व्वणे॥ चर्व्व्यतेस्म। चर्व॰। क्तः॥

चर्व्वितपात्रकम्। न। चर्व्वितताम्बूलादित्यागपात्रे। कटकोले। पतद्ग्रहे॥

चर्व्यम्। त्रि। चर्व्वणीये॥

चर्षणि। पु। जने॥ कर्षति। कृष॰। कृषेरादेश्चचइत्यनि॥

चर्षणी। स्त्री। पुंश्चल्याम्॥ कर्षति मनः। कृषविलेखने। कृषेरित्यनिः। कृदिकारादितिङीष॥

चल। पु। कम्पे॥ न। चञ्चले। लोले। तरले॥ अल्पकालस्थायिनि। शरीरे जगति च॥ प्रतिक्षणमन्यथाभावात्॥ नक्षत्रविशेषे। स्वात्यादिन्येश्रुतेस्त्रीणि चन्द्रश्चापि चरं चलम्॥ त्रि। कम्पयुक्ते। चञ्चले॥ चलति चलगतौ। पचाद्यच्॥

चलचञ्चुः। पु। ⎫ चकोरपक्षि-

चलञ्चञ्चु। पु। ⎭ णि॥

चलत्पूर्णिमा। स्त्री। चन्द्रकमत्स्ये॥

चलदङ्गः। पु। ⎫ चेङ्गामाछ इ-

चलदङ्गक। पु। ⎭ तगौड भाषाप्रसिद्धे मत्स्ये॥

चलदल । पु । अश्वत्थवृक्षे ॥ चलानि दलान्यस्य ॥

चलन । पु । पादे ॥ हरिणे ॥ न । भ्रमणे ॥ कम्पे ॥ स्थिरत्वप्रच्युतौ ॥ देशान्तरप्राप्तिहेतुभूते क्रियाविशेषे ॥

चलनशीलम् । चल० चलनशब्दे तियुच् ॥ त्रि । कम्पे । कम्पयुक्ते ॥

चलनकम् । न । चण्डातके ॥

चलनी । स्त्री । वारीभेदे । गजबन्धन्याम् ॥ वस्त्रघर्घर्याम् । वस्त्रवेधिन्याम् ॥

चलपत्र । पुं । पिप्पलवृक्षे ॥ चलानि पत्राण्यस्य ॥

चलसङ्क्रम । पुं । ईश्वरेच्छालोकादृष्टवशात्सप्तद्वाद्याद्विभागस्य ध्रूयते सम्पर्के ॥

चला । स्त्री । लक्ष्म्याम् ॥ चञ्चलत्वा चला त्ववै सर्वं चैव मसशय ॥ सिल्हके ॥ टाप् ॥

चलाचल । त्रि । चञ्चले ॥ चलति । चल० । चरिचल ति द्वित्वादि ॥ पु । काके ॥

चलातङ्क । पु । वातरोगे ॥

चलाभास । पु । मायामयस्य रज्जुसर्पादेर्गमने ॥ चलमिवाभासतेइति तथा ॥

चलित । त्रि । कम्पिते ॥ उच्छलिते । तरलिते ॥ प्रचके ॥ गते ॥ चल्यते स्म । चलकम्पने । क्त ॥

चलु । पु । गण्डूषे ॥ इति हेमचन्द्र ॥

चलुक । पु । प्रसृतौ ॥ भाण्डप्रभेदे ॥

चवर्ग । पु । चादिपञ्चवर्णेषु ॥

चवर्गीय । पु । चवर्गभवेवर्णे ॥ वर्गान्ताच्छेतिछ ॥

चवल । पु । राजमाषे । चौला इति भाषा ॥

चवि । स्त्री । चविकायाम् ॥

चविकम् । न । चव्ये ॥ चर्व्यते । चर्व० । क्वुन् । पृषोदरादि ॥

चविका । स्त्री । चइ इतिगौडभाषाप्रसिद्धे वृक्षे । चव्ये ॥ चविकाट्टाप् ॥

चव्यम् । न । चविकायाम् ॥ कणामूलभव चव्य विशेषाद्गुजापहम् ॥ चर्व्यते । चर्व । यत् । पृ० ॥

चव्यकम् । न । चव्ये ॥

चव्यजा । स्त्री । } गजपिप्पल्याम् ॥
चव्यफलम् । न । }

चव्या । स्त्री । वचायाम् ॥ कार्पास्याम् ॥

चषक । पु न । सुरापानपात्रे । गल्वर्के । सरके ॥ अथचषकोद्देश । यत्पानपात्र भूपानां तज्ज्ञेय चषक बुधै । कानकं राजतञ्चैव स्फाटिकं काचमेवच ॥ वृत्त स्वराष्टदिक्कोणं चतुर्णां पृथिवीभुजाम् । इत्यन्य

सम्मतं तेषां निर्णय पाठसम्मत ॥ स्वमुष्टिसम्मित रत्नै श्चतुर्वर्णैः समन्वितम् । मार्त्तिकवाऽथफालवा सर्वेषामुपयुज्यते । काष्ठज धातुज श्चैवं जाङ्गलादिमहीभुजाम् । यद्व्यत्तोयपानादिपात्रं पृथ्वीभुजा भवेत् ॥ तत्रंतत्रापिनियमइतिभोजस्य निश्चय ॥ * ॥ मधुनि । मद्ये ॥ मद्यभेदे ॥ मद्यभाजने ॥ चष्यतेऽनेन । चषभक्षणे । कुन् ॥

चषति । पु । भक्षणे ॥ वधे ॥

चषाल । पु । यूपकटके॥ यज्ञसमाहितूचर्मं पशुबन्धनार्थं यज्ञभूमौ यत्काष्ठमारोप्यते सयूप तच्छिरसि वलयाकृति डमरुकाकृति वाय काष्ठविकार. सचषाल । यपमस्तेविहितलोहवलयश्च ॥ चषति चष्यतेवा । चष० । सानसिवर्णसिपर्णसीतिचषेराल ॥

चाकचक्यम् । न । } उज्ज्वलताया
चाकचिक्यम् । न । } म् ॥ नहिलोकसिद्धसामग्री प्रातिभासिकरजतोत्पादिका किन्तु विलक्षणैव । तथाहि । काचादिदोषदूषितलोचनस्य पुरोवर्त्तिद्रव्यसयोगादिरूमाकाराच कचक्याकाराच काचिद्रजत कारणं ष्वलिकदेशीतिवेदान्तपरिभाषा ॥

चाकचिच्चा । स्त्री । श्वतवङ्गायाम् ॥

चाक्रायण । पु । ऊषस्त्याख्यर्षौ ॥ चक्रस्यगोत्रापत्यम् । अ० फञ् ॥

चाक्रिक । पु । वहुभिर्मिलित्वास्तुतिकारे । घाण्टिके ॥ चक्रेण समूहेन चरति । चरतीति ठक् ॥ शाकटिके ॥ तैलकारे ॥

चाक्षुष । पु । षष्ठेमनौ ॥ न । रूपे ॥ चक्षुषागृह्यते । अण् ॥ चक्षुरेऽवा । स्वार्थिक प्रज्ञाद्यण् ॥ प्रत्यक्षविशेषे ॥ तत्तुचक्षुरिन्द्रियजन्यज्ञानम् । द्रव्यचाक्षुषप्रति चक्षु संयोग कारणम् । द्रव्यसमवेतचाक्षुषं प्रति चक्षुः संयुक्तसमवाय । द्रव्यसमवेतसमवेतचाक्षुषंप्रति चक्षु सयुक्तसमवेतसमवाय । तथाच भा० प० । द्रव्यग्रहस्तु सयोगात् सयुक्तसमवायत । द्रव्येषु समवेतानां तथातत्समवायत ॥ तत्रापिसमवेतानां शब्दस्यसमवायत । तद्वृत्तीनांसमवेतसमवायेनतुग्रह इति ॥ त्रि । चक्षुर्ग्राह्ये ॥

चाङ्गम् । न । दन्तपटुत्वे ॥

चाङ्गेरी । स्त्री । अम्ललोणिकायाम् ॥ चाङ्गेरीदीपनीरुच्या लघूष्णाकफवातनुत् । पित्तलाम्लाग्रहण्यर्शः कुष्ठातीसारनाशिनी ॥ चाङ्गम् ईरयति

। ईरणेरणे । कर्मण्यण् ॥

चाञ्चल्यम् । न । चञ्चलतायाम् ॥

चाट । पु । चौरे ॥ आर्यमर्यादां भञ्ज मर्यादां वा भिन्दाने ॥ प्रतारके ॥ आदौ विश्वासमुत्पाद्य पश्चात् परधनापहर्त्तरि । प्रच्छन्नापहारिणि तस्करे ॥ योद्धरि कलहप्रिये ॥ चटनम् चाटनम् । चटभेदने । भावे घञ् ॥

चाटकैर । पु । चटकापत्ये ॥ चटकाया चटकस्य वा पुमपत्यम् । चटकायाएरक् । चटकस्येति वाच्यम् ॥

चाटु । पु । न । प्रियवाक्ये । प्रियप्राये । चटौ ॥ चकारच बहुचाटून् प्रौढयोषिद्वरस्योत । क्लीवमपि । चाटु चाऽकृतकसंभ्रम मासां कार्मणत्वमगमद्रमणेष्विति च माघ ॥ चटति । चटभेदने । हृसनिजनीति ञुण ॥ मिथ्याप्रियवाक्ये ॥

चाटुपटु । पु । भण्ड । भाँड इति भाषा ॥

चाटुलोल । वि । चटुलोले । सुचञ्चले ॥

चाटुवटु । पु । भण्डे । विदूषके । क्रीडनीयकपत्ये ॥

चाटूक्ति । स्त्री । सेवायाम् ॥ प्रियवचनायाम् ॥

चाणकीनम । न । चणकोत्पत्तियोग्य क्षेत्रे ॥ चणकानाम् भवन क्षेत्रम् । धान्यानामितिखञ् ॥

चाणक्य । पु । मुनिविशेषे । द्रौमिणे ॥ चणकस्य गोत्रापत्यम् । गर्गादि यञ् ॥ न । तन्निर्मिते राजनीतिशास्त्रे ॥

चाणक्यमूलकम् । न । मूलकप्रभेदे । वालेये । विष्णुगुप्तके ॥

चाणूर । पु । कंसासुरस्य प्रधानमल्ले ॥

चाणूरसूदन । पु । श्रीकृष्णे ॥ चाणूर सूदितवान् । सूदयतेर्नन्द्यादित्वाल्ल्युः ॥

चाण्डाल । पु । चण्डाले । श्वपचे । अन्त्यजे ॥ चण्डाल एव । कुलालवरुड निषादचण्डालमित्रामित्रेभ्यश्छन्दसिसञ्ज्ञायामितिच्छन्दस्यञ् ॥ प्रज्ञाद्यणि लोकेपीतिकेचित् ॥

चाण्डालकि । पु । चण्डालापत्ये ॥

चण्डालवल्लकी । स्त्री । कण्डोलवीणायाम् ॥ चाण्डालस्य वीणा ॥

चाण्डालिका । स्त्री । कण्डोलवीणायाम् ॥ चण्डालिकाशब्दार्थे ॥ चण्डालस्येयम् । तस्येदमित्यण् । टिड्ढेतिङीप् । स्वार्थे कन् ॥ चण्डालेन कृता वा । कुलालादिभ्योवुञ् ॥

चाण्डाली । स्त्री । चण्डालयोषायाम् ॥ लिङ्गिन्याम् ॥

चातक । पु । स्तोकके । सारङ्गे । पपी

ष्टा इतिभाषा ॥ यथा । सर्वसहाप तित मम्बु न चातकानामिति ॥ च तति । चते° । एवुल् ॥

चातकानन्दन । पु । वर्षाकाले ॥

चातुक । पु । शटीति ॥ चातुको म धुरोरूत्तो रक्तपित्तकफ पह । शी तो लघु रुच्यस्य कषायो वातकोपन ॥

चातुर । पु । चक्रगण्डौ ॥ त्रि । नेत्र गोचरे ॥ चाटुकारे ॥ नियन्तरि ॥ चतुरएव । स्वार्थेऽण् ॥ न । शकटे ॥ चतुर्भिरुह्यते । शेषइत्यण् ॥

चातुरकः । त्रि । चतुरार्थे ॥

चातुराश्रम्यम् । न । ब्रह्मचारिगृहस्थ वानप्रस्थसन्यासिषु ॥ चत्वार आश्र माएव । चतु° स्वार्थेष्यञ् ॥ चतुर्णा माश्रमाणांधर्मे ॥

चातुरी । स्त्री । दाक्ष्ये । चतुरतायाम् ॥ यालोकद्वयसाधनीमनुभूतासा चा तुरी चतुरी ॥ चतुरस्येयम् । तस्येद मित्यण् । ङीप् ॥

चातुर्जातकम् । न । चतुर्जातके ॥ स्वार्थे अण् ॥

चातुर्दशिक । त्रि । भूताध्ययनकर्तरि ॥ चतुर्दश्यामधीते । अध्यायिन्यदे शकालादितिठक् ॥

चातुर्भद्रम् । न । नागरातिविषामुस्ता गुडूचीतिचतुष्टये ॥

चातुर्मासी । स्त्री । पूर्णिमाविशेषे ॥ चतुर्षुमासेषुभवा । सञ्ज्ञायामित्य ण् । ङीप् ॥

चातुर्मास्यम् । न । यागविशेषे ॥ चा तुर्मास्ययागस्य चत्वारि पर्वाणि । वै श्वदेवो वरुणप्रघास शाकमेध, शु- नासीरीयश्चेति । चतुर्षुमासेषु भ वन्ति चातुर्मास्यानियज्ञानि । चतु र्मासाण्ण्योयज्ञइति ण्य ॥ आषाढ शुक्लद्वादश्यादिचतुर्मासकर्तव्ये व्रते ॥यथा । आषाढशुक्लद्वादश्या पौर्ण मास्यामथापिवा । चातुर्मास्यव्रतारम्भ कुर्यात् कर्कटसङ्क्रमे ॥ अभावेतु तुलार्कैपिमन्त्रेण नियम व्रती । का र्त्तिके शुक्लद्वादश्यां विधिवत् तत् स मापयेत् ॥ चतुर्द्वीपिव्हितच्चीर्णं चा तुर्मास्य व्रत नर । कार्त्तिक्यां शुक्ल पक्षेतु द्वादश्यांतत् समापयेदिति वाराह ॥

चतुर्मास्यद्वितीया । स्त्री । आषाढफा ल्गुनोर्जेषे या द्वितीया विधुक्षये । चातुर्मास्यद्वितीया सा प्रवदन्तिम हर्षय ॥

चातुर्वर्ण्यम् । न । यज्ञसाधनेषु ब्रह्मक्ष त्रियविट्शूद्रेषु ॥ चत्वारोवर्णाएव । चतुर्वर्णादीनाम्स्वार्थे उपसङ्ख्यान

मितिष्यञ् ॥ देवेषु चत्वारो वर्णा यथा । आदित्या क्षत्रियास्तेषां विश्ञ्च मरुतस्तथा । अश्विनौ च स्मृतौ शूद्रौ तपस्युग्रे समास्थितौ ॥ स्मृतास्त्वाङ्गिरसो देवा ब्राह्मणा इति निश्चय इति ॥

चातुर्वैद्य । पु । चतुर्वेदे ॥ चतुरो वेदानधीते चतुर्वेद । स एव । चतुर्वेदस्योभयपदवृद्धिश्चेति ब्राह्मणादिगणे पाठत् ष्यञ् ॥

चात्वाल । पु । याज्ञिकानां गर्त्तविशेषे ॥ चत्वाल एव । स्वार्थे अण् ॥

चानूर । पु । कंसमल्ले । चाणूरे ॥

चानूरसूदन । पु । श्रीकृष्णे ॥ चानूरं सूदितवान् सूदयति वा । सूदक्षरणे । ल्यु ॥

चान्द्र । पु । चन्द्रकान्तमणौ ॥ शुक्लाद्यमान्ते मासे ॥ कृष्णादिपूर्णिमान्ते च मासे ॥ न । चान्द्रायणे ॥ चन्द्रस्यायम् अण् ॥

चान्द्रकम् । न । शुण्ठ्याम् ॥ इति राजनिर्घण्ट ॥

चान्द्रभागा । स्त्री । } चन्द्रभागायाम् ॥
चान्द्रभागी । स्त्री । }

चान्द्रमस । पु । इन्दुजे ॥ भारतवर्षीयोपद्वीपविशेषे ॥ न । मृगशिरोनक्षत्रे ॥ त्रि । चन्द्रमस्सम्बन्धिनि ॥ चन्द्रमसोऽपत्यम् इदं वा । अण् ॥

चान्द्रमसायन । पु । बुधे । सौम्ये ॥

चान्द्रमास । पु । चन्द्रसम्बन्धिमासे ॥ स तु गौणमुख्यभेदेन द्विविध । तत्राद्य कृष्णप्रतिपदादिपौर्णमास्यन्त । द्वितीय शुक्लप्रतिपदादिदर्शान्त । चान्द्रोऽपि शुक्लपक्षादिः कृष्णादिर्वेति च द्विधेत्युक्ते ॥ तत्र मुख्यचान्द्रे कर्म्माणि । आब्दिकश्राद्धादि सपिण्डीकरणान्तश्राद्धानि चान्द्रायणप्राजापत्यादिव्रतानि दानकर्म नित्यस्नान गृहपुष्करिण्यादिप्रतिष्ठा साधारणतिथिविहितकर्माणि चेति ॥ गौणचान्द्रे कर्माणि । अष्टकादिपार्वणश्राद्ध वारुणीस्नान जन्मतिथिकृत्यं जन्माष्टम्याद्युपवासो दुर्गोत्सवादितिथिनियतपूजा चेति ॥ चान्द्रश्चासौ मासश्च ॥

चान्द्रव्रतम । न । नृपतेर्व्रतविशेषे ॥ यथा ॥ परिपूर्णं यथा चन्द्रं दृष्ट्वा हृष्यन्ति मानवा । तथा प्रकृतयो यस्मिन् स चान्द्रव्रतिको नृपः इति मनु ॥

चान्द्राख्यम । न । आर्द्रके ॥

चान्द्रायणम् । न । व्रतविशेषे । इन्दुव्रते ॥ तच्चतुर्विध भवति । पिपीलिकामध्याख्ययवमध्याख्ययतिचान्द्रायणशिशुचान्द्रायणभेदात् । तथाहि ।

एकैकह्रासयेत् पिण्ड कृष्णेशुक्लेचव र्द्धयेत्। उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणस्मृतम् ॥ त्रिषवण स्नानं कुर्वाण पौर्णमास्या पञ्चदशग्रासानश्नित्वात त कृष्णप्रतिपत्क्रमेण एकैकग्रासंह्रासयेत् । तथाच चतुर्दश्यामेकोग्रास सम्पद्यते । ततोऽमायामुपोष्य शुक्लप्रतिपत्प्रभृतिभिरेकैक वृद्धिनयेत् एव पौर्णमास्या पञ्चदशग्रासा सम्पद्यन्ते । एतत्पिपीलिकामध्याख्य चान्द्रायणम् ॥ १ ॥ एतमेवविधिकृत्स्न माचरेद्यवमध्यमे । शुक्लपक्षादिनियतश्चरंश्चान्द्रायणव्रतम् ॥ एवमेवपिण्डह्रासवृद्धित्रिषवणस्नानात्मकविधान यवमध्याख्ये चान्द्रायणे शुक्लपक्षमादित कृत्वा सयतेन्द्रियश्चान्द्रायणमनुतिष्ठन् आचरेत् । ततश्च शुक्लप्रतिपदमारभ्य एकैकपिण्डवर्द्धयेत् । यथापौर्णमास्यापञ्चदशग्रासा सम्पद्यन्ते । तत कृष्णप्रतिपदमारभ्य एकैकपिण्डह्रासयेत् । यथा अमावास्यायामुपवासोभवति ॥ २ ॥ अष्टावष्टौसमश्नीयात् पिण्डान्मध्यन्दिनेस्थिते । नियतात्मा हविष्याशी यतिचान्द्रायणंचरन् ॥ ३ ॥ चतुरप्रातरश्नीयात्पिण्डान्विप्र समाहित. । चतुरोऽस्तमितेसूर्ये शिशुचान्द्रायणस्मृतमितिमनु ॥ ४ ॥

चान्द्रायणिक । पु । तपस्विविशेषे ॥ चान्द्रायण वर्त्तयति । पारायणतुरायणचान्द्रायणं वर्त्तयतीतिठञ् ॥

चान्द्री । स्त्री । श्वेतकण्टकार्याम् ॥ ज्योत्स्नायाम् ॥

चाप । पु । धनुषि । शरासने ॥ धनूराशौ ॥ पञ्चकलस्य ॥ऽतृतीयप्रभेदे ॥ चापस्य ७ प्रभेदस्य विकार' । अवयवेचप्राण्योषधिवृक्षेभ्यइत्यण् ॥

चापपट । पु । पियालवृक्षे ॥

चापलम् । न । अनवस्थितौ ॥ तल्लक्षणयथा । मात्सर्यद्वेषरागादेश्चापलन्त्वनवस्थितिरिति ॥ अविनीतत्वे । प्रयोजन बिनापि वाक्पारुष्या दिव्यापारयितृत्वे । अविमृश्यकारणरूपे चपलकर्मणि ॥ सञ्चारिभावे ॥ आत्मप्रकाशिनीचेष्टारागा देश्चापलमतमितिलक्षणात् ॥ चपलस्यकर्मभावो वा । यु० अण् ॥

चापल्यम् । न । चपलतायाम् ॥ चाञ्चल्ये । चापले ॥ चपलस्यकर्मभावो वा । गुणवचनत्वात् प्राप्तस्य ष्यञो युवादिपाठप्राप्तेनाणा वाधप्रसङ्गेपि ब्रा० ष्यञ् ॥

चामर । पु । न । चमरीपुच्छनिर्मिते वालव्यजने । प्रकीर्णके । चौर

चौरी इति च भाषा ॥ अस्याः प्रयो-
जनप्रदर्शनार्थमाह । देवै श्चम-
रैः किल वालहेतोः सृष्टा हिमवच्छा-
धरकन्दरेषु । आपीतवर्णाश्च भवन्ति
तासां कृष्णाश्च लाङ्गूलभवा सिताश्च
॥ चमरीणां गुणसम्पदमाह । स्नेहो
मृदुत्वं बहुवालता च वैशद्यमल्पा-
स्थिनिबन्धनत्वम् । शौक्ल्यञ्च तासां
गुणसम्पदुक्ता हिता ऽ ल्पगुणानि न
शोभनानि ॥ चामरदण्डलक्षणमा-
ह । अध्यर्द्धहस्तप्रमितोऽस्य दण्डो ह-
स्तोऽथवारत्निसमोऽथवान्यः । काष्ठाच्छु-
भात् काञ्चनरूप्यगुप्तात् रत्नैश्च सर्वै-
श्च चित्रितश्च राज्ञाम् ॥ वर्णक्रमेण दण्ड-
फ० । अथ छत्रातपत्राङ्कुशवेत्रचापवि-
तानकुन्तध्वजचामराणाम् । आपी-
तरक्तासितमधुकृष्णवर्णा वर्णक्रमेण वि-
तायदण्डा ॥ दण्डादे समपर्वणः फ-
लमाह । मातृभूधनकुलक्षयावहा
रोगमृत्युजननाश्च पर्वभिः । द्व्यादि
भिर्द्विकविवर्द्धितैः क्रमाद्द्वादशान्तवि-
रतैः समैः फलम् ॥ तेषामेव त्र्यादि-
षु विषमेषु द्विकविवर्द्धितेषु फलम् ।
यात्राप्रसिद्धिर्द्विषतां विनाशो ला-
भाः प्रभूता वसुधागमश्च । वृद्धिः पशू-
नामभिवाञ्छितासि स्त्र्यादिष्वयु-
ग्मेषु तदीश्वराणाम् ॥ इति वारा-
ह्यां ७० ध्यायः ॥ विशेषोयुक्तिकल्प-
तरोर्ज्ञेय ॥ दण्डे ॥ अतिशयरीस-
मकपञ्चदशाचारायावृत्ते प्रभेदे । य-
था । शारदत्पयोधरनगेन्द्ररज्जसु-
न्दर चामरध्वजद्वयेन मण्डितं चि-
चामरम् । इन्द्रराजमेतदेवनगाराज-
भाषितं पण्डितावलीविनोदकारि
चारुभाषितम् ॥ यथा । रासलास्य-
गोपकामिनीजनेन खेलता पुष्पपु-
ञ्जमञ्जुकुञ्जमध्यगेन देवकीसुता । तान-
न्दयञ्चाश्चिगोपवालिकाविलासिना
माधवेनजायतां सुखावसन्नवासिने-
ति॥ गुर्वे ऽ न्ते ऽ ॥

चामरपुष्प । पु । न । पूगे ॥ काशे ॥
आम्रे ॥ केतके ॥

चामरा । स्त्री । चामरे ॥ दण्डे ॥ च-
मा० टाप् ॥

चामरी । पु । घोटके । किङ्किणि ॥
इति त्रिकाण्डशेष ॥

चामीकरम् । न । स्वर्णे । कनके ॥ च-
मीकरे आकर विशेषे भवम् । तत्र
भवः इत्यण् ॥ यद्वा । चमनम् चम ०
। इण् जादिभ्य इतीण् । चमाचमे
रिति आके ऽ विवर्धितत्वाद्वृद्धि ।
चामीकरोति । कृष्णोहेस्तिस्टि ॥

चामुण्डा । स्त्री । मातृकाभेदे । चर्म-
मुण्डायाम् । भैरव्याम् ॥ दुर्गायाम् ॥

। गौर्य्याम् ॥ मोक्षकारणीभूतनिर्विकल्पकवृत्तिविशेष अमूसेनां वियदादिसमूहरूपां खण्डयति खण्डयोरैक्यात्मानि आदत्ते स्वात्मसाक्षात्कारेण नाशयति इतिव्युत्पत्ते । पृषोदरादित्वात् सर्वंसुस्थमित्याहु.॥ मया तवात्रोपकृतौ चण्डमुण्डौ महापशू इत्यत्रपशुपदद्विवचनयो स्वारस्येन तूलमूलभेदेनाज्ञानद्वयकथनेन यस्माद्गृहीत्वमुण्डत्वगृहीत्वात्वमुपागता । चामुण्डेति ततोलोके ख्याता देवी भविष्यसीत्यत्रापि तूलमूलाविद्ययोरादानमेव गृहीत्वेति पदेनानूद्य निर्वचनकथनादखण्डब्रह्मविद्यात्वेवचामुण्डापदस्यार्थोवर्णित इतिरहस्यदशारहस्यम् ॥ यद्वा । चमति । चमुअदने । वा० उण् । चामुरदनीय पदार्थ. । सच ब्रह्मातिरिक्त सर्वोपि । अत्ताचराचरग्रहणादित्यधिकरणे तथानिर्णयात् । तखण्डयति उत्खण्डयति नविषयीकुरुते ब्रह्ममात्रविषयिणीतियावत् ॥ अथवा चकारएकाक्षरनिघण्टुरीत्या चन्द्रवाचक आह्लादप्रकाशगुणयोगादिदंज्ञानपरं आनन्दपरोवा तच्चब्रह्मैववक्ति तदासमन्तान्मुण्डयतीति चामुण्डा । मुण्डन नाशाधारपेक्षयान्यूनसत्ताकवस्तुनिरास । शिरश्चर्मापेक्षयान्यूनतादात्म्यवता मेवकेशानांवपने प्रयोगात् ॥ अथवा चाना वृत्तीना मुखानां वा मुण्डमिवशीर्षमिवस्थिता सर्वोत्तमा चरमवृत्तिरूपा ब्रह्मविद्येतियावदिति गौडपादटीकानुवादीभास्करराय ॥

चाम्पिला । स्त्री । नद्याम् । निर्झरिण्याम् ॥

चाम्पेय । पुं । चम्पके ॥ स्वर्णे ॥ किञ्जल्के ॥ नागकेसरे ॥ चम्पाया अपत्यम् । स्त्रीभ्योढक् ॥

चाम्पेयकम् । न । किञ्जल्के ॥

चायनीय । त्रि । पूजनीये ॥

चार । पु । पियालवृक्षे । चिरौजी इति प्रसिद्धे ॥ चार पित्तकफास्रघ्नस्तत्फलं मधुरं गुरु । स्निग्ध सरमरुत् पित्तदाहज्वरतृषापहम् ॥ पियालमज्जा मधुरो वृष्य पित्तानिलापह । हृद्यो ऽतिदुर्जर स्निग्धो विष्टम्भी चामवर्द्धन ॥ गतौ ॥ बन्धे ॥ अवसर्पे । चरे । प्रणिधौ ॥ चाराश्च विचारयेत् तीर्थेष्वात्मनश्चपरस्यच । पाषण्डादीनऽविज्ञातानन्योन्यमपि तरेपिच ॥ * ॥ अमात्य ममान्यश्च मन्त्रपाभाषिस्तमम्बूहकञ्चमेतचार गुणा इतिनीति वाक्यमतम् ॥ * ॥

तल्लक्षणं यथा । विवस्वानिव तेजो
भिर्नभस्वानिव वेगत । राजा चरेज्ज
गत्सर्वं प्राप्नुयाल्लोकसम्मतं ॥ तर्के
ङ्गितज्ञ स्मृतिमान् स्वीयभावाप्र
काशक । क्लेशायासमहोद्य सर्वच
भयवर्ज्जित ॥ सुभक्तो राजसुतथा
कार्य्याणां प्रतिपत्तिमान् । न्मपोनि
युन्याच्चारेणपरराष्ट्र विचक्षणं ॥
कालज्ञो मन्त्रकुशलान् सांवत्सरचि
कित्सकान् । तथान्यानपि युञ्जीत
समर्थान् शुद्धचेतस ॥ अक्षुद्रांश्चस
र्वा ऽलुब्धान दृष्टार्थानतत्त्वभाषिण.
। पाषण्डिनस्तापसादीन पर राष्ट्रेनि
योजयेत् ॥ स्वदेशपरदेशज्ञान् सु
शीलान् सुविचक्षणान । वार्त्तीच-
र्यान् बहूंश्चैव चाराणां विनियोजये
त् ॥ नैकस्य वचने राजा चारस्य प्रत्य
यं वहेत् । द्वयो सम्बन्धमाज्ञायतद्यु
क्त कार्यमाचरेत् ॥ तस्माद्राजाप्रयु
ञ्जीत चारान् बहुमुखान् बहून् । नी
रेतो वामना कुब्जास्तद्विधा ये च का
रव ॥ भिक्षुकश्चारणादासो माला
कार्य्य कलाविद. । अन्त पुरगता
वार्त्ता निर्हरेयुरचिन्तिताम् ॥ प्रकाश
श्चा ऽप्रकाशश्च चारस्तु द्विविधो मत ।
अप्रकाशोयमुद्दिष्ट प्रकाशोदूतसञ्ज्ञ
क ॥ इति युक्तिकल्पतरु ॥ कारागा
रे ॥ न । कृत्रिमविषे ॥ चरणम् । च
रगतौ । घञ् ॥ चरति वा । पचा
द्यच् । चरएव । प्रज्ञाद्यण् ॥

चारक । पु । अश्वादे पालके ॥ सञ्चा
रके ॥ बन्धे ॥ पियालद्रुमे ॥ चारे
॥ स्वार्थे क ॥

चारचक्षु । पु । राजनि ॥ चाराश्चक्षूं
षि यस्य । गाव. पश्यन्ति गन्धेन वेदै
पश्यन्ति वै द्विजा । चारै पश्यन्ति
राजान चक्षुर्भ्यामितरेजना ॥ स्व
परमण्डलकार्य्याकार्य्यविलोकने चारा
श्चक्षूंषि चितिपालानामिति नीतिवा
क्यामृतम् ॥

चारचुञ्चु । त्रि । गतिविशेषैर्वित्ते ॥
चुञ्चुप् ॥

चारटिका । स्त्री । नलीनामगन्धद्रव्ये ॥

चारटी । स्त्री । पद्मचारिण्यामोषधौ
॥ भूम्यामल्याम् ॥ चारयति । चरे
र्ण्यन्तात् अकादिभ्यो ऽटन् । ङीप् ॥

चारण । पु । कीर्त्तिसञ्चारकनटे । कु
शीलवे ॥ चारयति कीर्त्तिम् । चर०
। णिजन्त । नं० ल्यु ॥ देवानां स्तुति
पाठके ॥

चारपथ । पु । राजपथे ॥

चारभट । पु । वीरे ॥

चारवायु । पु । निदाघजे वायौ ॥

चारिणी । स्त्री । करुणीवृक्षे ॥

चारित्रम् । न । स्वभावे । चरित्रे ॥ कुलक्रमागताचारे ॥ चरित्रमेव । स्वार्थेऽण ॥ चरित्रेन । चर० । चरेष्ट्र चरति चित्रल् वा । स्वरभेद ॥

चारित्रा । स्त्री । तिन्तिडीवृक्षे

चारी । स्त्री । नृत्याङ्गविशेषे ॥ विवरणान्तसङ्गीतदामोदरे ॥

चारु । पु । बृहस्पतौ ॥ त्रि । शोभने । रम्ये । मनोज्ञे ॥ चरति चित्ते । चर० । दृसनिजनिचरिचटिभ्यो ञुण् ॥ न । कुङ्कुमे ॥

चारुक । पु । शरबीजे ॥

चारुकेशरा । स्त्री । तरुणीपुष्पे ॥ नागरमुस्तायाम् ॥

चारुगर्भ । पु ।
चारुगुप्त । पु । } श्रीकृष्णपुत्रे ॥

चारुदेष्ण । पु । रुक्मिण्यांश्रीकृष्णतनये ॥

चारुधारा । स्त्री । इन्द्राण्याम् ॥ स्यादिंद्राणी शतावरी चारुधारेति रभस ।

चारुनालकम् । न । रक्तपद्मे ॥

चारुपर्णी । स्त्री । प्रसारण्याम् । गन्धभादालिया इति गौडभाषा ॥

चारुफला । स्त्री । द्राक्षायाम् ॥ चारूणिफलान्यस्याः ॥

चारुमती । स्त्री । रुक्मिण्यां श्रीकृष्णकन्यायाम् ॥

चारुलोचन । पु । हरिणे ॥ त्रि । सुलोचने ॥

चारुवर्द्धना । स्त्री । नार्याम् ॥

चारुबाहु । पु ।
चारुविन्द । पु । } श्रीकृष्णात्मजे ॥

चारुव्रता । स्त्री । मासोपवासिन्याम् ॥

चारुशिला । स्त्री । मणौ ॥

चार्च्चिक । त्रि । चर्चाभिज्ञे ॥ उक्थादित्वात् ठक् ॥

चार्च्चिक्यम् । न । चन्दनादिना देहविलेपने । चर्चायाम् । स्थासके ॥ चर्चेअध्ययने । धात्वर्थनिर्देशे ण्वुल् । चर्चिकैव । स्वार्थेष्यञ ॥

चार्म्म । पु । चर्मावृतरथे ॥ चर्मणापरिवृत । परिवृतोरथइत्यण् ॥

चार्म्मणम् । न । चर्मसमूहे ॥ चर्मणां समूह । भिक्षादिभ्योऽण् ॥

चार्वाक । पु । बौद्धकदेशिनि । आकाशभिन्नभूतचतुष्टयवादिनि तार्किकविशेषे । नास्तिके । बार्हस्पत्ये । लौकायतिके ॥ तस्येदंमतम् । शरीरमेवात्मा । प्रज्वलितगृहात् स्वपुत्रपरित्यज्यापि स्वस्य निर्गमदर्शनात् । स्थूलोहकृशोहमित्यनुभवाच्च ॥ प्रत्यक्षमेकचार्वाका' प्रमाणं मन्यन्ते ॥ अपिच । सर्वथालोकायतमेवशा

कम् । यत्प्रत्यक्षमेवप्रमाणम् । पृथिव्यापस्तेजोवायवस्तत्त्वानि चत्वार्येव । अर्थकामौच पुरुषार्थौ । भूतान्येव चेतयन्ते नास्ति परलोकः । मृत्युरेवापवर्ग इति ॥ दुर्योधनसखे राक्षसविशेषे ॥

चार्वी । स्त्री शोभनायाम् ॥ बुद्धौ ॥ ज्योत्स्नायाम् ॥ धनदभार्यायाम् ॥ दीप्तौ ॥

चालः । पु । छप्पर इति ख्याते पटले । पिटे । छदिषि ॥ चलति । चलगतौ । ज्वलितिकसन्तेभ्यो णः । वृद्धिः ॥

चालकः । पु । गम्भीरवेदिनि । अङ्कुशदुर्धरे हस्तिनि ॥ इतित्रिकाण्डशेषः ॥

चालनम् । न । चालन्याम् । सूक्ष्मच्छिद्रसमोपेत चालनं तितउः स्मृतम् इतिकात्यः ॥ चाल्यतेऽनेनवा । चल० । णयन्त । ल्युट् ॥ धूनने ॥

चालनी । स्त्री । तितउ । बहुच्छिद्रायाम् । चलनी इतिभाषा ॥ चाल्यतेऽनयावा । चलेर्णयन्तात् ल्युट् । ङीप् ॥

चाषः । पुं । स्वर्णचूडे । किकीदिवौ । नीलाङ्गे । पुण्यदर्शने ॥ अशोकस्य विशोकस्य नन्दन पुष्टिवर्द्धन । हेमतुण्ड मणिग्रीव स्वस्तिक चापराजित ॥ अष्टौ चाषस्यनामानि चाषदृष्ट्वातुय पठेत् । अर्थसिद्धिर्भवेत्तस्य मिष्टमन्न वराङ्गनेतिपठन्ति । नीलकण्ठइत्यस्यप्रसिद्धिर्लोके ॥ चाषयति । चषहिंसायाम् । स्वार्थणयन्तात् अच् । चषभक्षणे । हेतुमण्णयन्ताद्वाऽच् ॥

चासः । पुं । इक्षुप्रभेदे ॥ पक्षिविशेषे । चाषे ॥

चिकः । पु । गन्धमूषिके ॥

चिकर्त्तिषु । त्रि । कर्त्तुमिच्छौ ॥ कृतीछेदने । सन्नन्तादुप्रत्ययः ॥

चिकित्सकः । पु । वैद्ये । चिकित्साजीविनि ॥ आयुर्वेदकृताभ्यासः सर्वेषांप्रियदर्शन । आर्यशीलगुणोपेत एषवैद्योविधीयते ॥ चिकित्सति । कितेर्व्याधिप्रतीकारे इतिसन्नन्तात् ण्वुल् ॥

चिकित्सा । स्त्री । रोगवारणे । रुक्प्रतिक्रियायाम् । क्रियायाम् ॥ आसुर्यादिभेदात्सा त्रिधा । यथा । आसुरी मानुषी दैवी चिकित्सा त्रिधामता । रसप्रधानादैवीस्याच्छेदभेदात्मिकासुरी ॥ मानुषी षड्रसायोगजपहोमादिसंस्कृता । कलौचाल्पबलेलोके मानुषीतत्रपूजिता ॥ तस्यालक्षणं यथा । याभिः

क्रियाभि र्जायन्ते शरीरे धातवः समा । साचिकित्सा विकाराणां कर्म तद्भिषजांमतम् ॥ याह्युदीर्णं शमयति नान्यं व्याधिं करोतिच । साक्रिया नतु या व्याधिं हरत्यन्य मुदीरयेत् ॥ अस्याः फलम । क्वचिद्दर्थं क्वचिन्मैत्री क्वचिद्धर्मं क्वचिद्यशः । कर्माभ्यासः क्वचिच्चेति चिकित्सानास्ति निष्फला ॥ अस्याअङ्गानियथा । रोगी दूतो भिषग्दीर्घमायुर्द्रव्यञ्च सेवकः । सदौषधं चिकित्सायामित्यङ्गानि बुधाजगुरिति ॥ गुप्तिज्किद्भ्य इतिकितेर्व्याधिप्रतीकारे निग्रहे अपनयने नाशने सप्रत्ययेचसन् । चिकित्सनम् । अप्रत्ययात् ॥

चिकित्सित । चि । प्रतिकृतामये । कृतप्रतीकारे ॥ न । चिकित्साया म् ॥ भेषजे ॥ चिकित्सा सञ्जाताऽस्य । तारकादित्वादितच् ॥

चिकित्स्य । त्रि । रोगान्नाशयितव्ये ॥ चिकित्सितुंयोग्य । रोगे ॥ यथा । जातमात्र श्चिकित्स्य स्यान्नोपेक्ष्योऽल्पतयागदः । वह्निशत्रुविषैस्तुल्य स्वल्पोपिविकरोत्यसौ ॥ रोगमादौ परीक्षेत तदनन्तरमौषधम् । ततः कर्मभिषक्पश्चाद्ज्ञानपूर्वंसमाचरे दिति ॥

चिकिन । त्रि । चिपिटे । चिक्के ॥ नासिकायानतम् । इनच्पिटच् चिक चिचेति नेरिनच् प्रकृतेश्चिकादेशश्च । तद्योगान्नासिका चिकिना । पुरुषश्चिकिन ॥

चिकिल । पु । पङ्के । चीकड इतिभाषा ॥

चिकीर्षा । स्त्री । कर्त्तुमिच्छायाम् ॥ कृञ्० । अप्रत्ययादित्यः । टाप् ॥

चिकीर्षित म् । न । अभिप्राये ॥ कर्त्तुमीप्सिते ॥

चिकीर्षु । त्रि । कर्त्तुमिच्छौ । करणेच्छाविशिष्टे ॥ कर्त्तुमिच्छति चिकीर्षति । तच्छील । सनाशंसभिक्षउः ॥

चिकुर । पु । कुन्तले । वाले ॥ इत्यमरः ॥ पक्षिविशेषे ॥ शैले । पर्वते ॥ गृहबभ्रौ ॥ सरीसृपे ॥ त्रि । तरले । चञ्चले ॥ चपले । दोषमनिश्चित्यवधवन्धनादेः कर्त्तरि ॥ सह्ये ॥ यथा । तावीक्ष्यलीलाचिकुरा अनङ्गः स्वचापसौन्दर्यमदं मुमोचेति ॥ चिरन्त्यन्तःशब्दं कुरति । कुर शब्दे । इगुपधेतिकः ॥

चिकुरपक्ष । पुं ।
चिकुरपाश । पु । } केशसमूहे ॥
चिकुरहस्त । पु ।

चिकूर । पु । चिकुरे ॥ इतिशब्दभेदः ॥

प्रकाश. ॥

चिक्क । पु । छुच्छुन्दर्याम् ॥ त्रि । नत नासिके । चिपिटे ॥ नासिकायाम नतम् । कप्रत्ययेनेश्चिका देशश्च ॥

चिक्कण' । पु । पूगवृक्षे ॥ न । पूगफले ॥ त्रि । मसृणे । स्निग्धे । चिकना इ ति भाषा ॥ चिक्कनम् । चिक्कगतौ । सं॰ क्विप् । चिक्क कणति । कण शब्दे । मू॰ क ॥ यद्वा । चिक्कनम् । घञ् । चिक्कस्य कणाम् । कण शब्दे । अच् । शकन्ध्वादि' ॥ यद्वा । चेतति । चिती संज्ञाने । चितेः कण कश्च । बाहुलकादगुणः ॥

चिक्कणा । स्त्री । उत्तमायाक्रमि । नैचि क्याम् ॥ पूगफले ॥

चिक्कणी । स्त्री । पूगफले ॥

चिक्कस' । पुं । यवचूर्णे ॥ इति हेम ॥

चिक्का । स्त्री । पूगफले ॥ इतिराजनि र्घण्टः ॥

चिक्रंसा । स्त्री । क्रमितुमिच्छायाम् । जिहीर्षायाम् ॥ क्रमेः सन्नन्ताद प्रत्ययादित्यकारप्रत्यये टाप् । स्नुक्र मोरनात्मनेपदनिमित्तेइतीडागमो न भवति । अथक्रमेर्वृत्त्यादिष्वति- रिक्तार्थे ऽप्यऽनुपसर्गादितिवैकल्पि कस्यात्मनेपदनिमित्तस्यानुपसर्गत्व- स्यैवैर्वाचिकस्य सम्भवात् ॥

चिङ्गट । पु । गर्ला चिङ्गडा इति भाषा चिङ्गडी इति च गौड भाषा प्रसिद्धे मत्स्ये । महाशल्के ॥

चिङ्गटी । स्त्री । घुषाचिङ्गडी इति गौड प्रसिद्धे मत्स्ये ॥

चिङ्गड । पुं । चिङ्गटेमत्स्ये ॥

चिचिण्डः । पु । चिचिण्डे । सुदीर्घ- फले ॥

चिचीषा । स्त्री । चेतुमिच्छयाम् ॥ चिनोतेः सन्नन्ताद प्रत्ययादितिस्त्रि यामकार प्रत्ययः । विभाषाचेरिति विकल्पात् कुत्वाभावः ॥

चिच्छक्ति' । स्त्री । चैतन्ये ॥ यथोक्तंस कलोपशारीरके । चिच्छक्ति' परमे श्वरस्य विमला चैतन्यमेवोच्यत इति । यथोक्तं श्रीदेवीभागवते५ स्कन्धे १९ ऽध्याये । चिच्छक्तिरस्ति परमा त्मनि तेन सोपि व्यक्तो जगत्सुविदि तोभवकृत्यकर्त्ता । कोन्यस्त्वयाचि रचित' प्रभवत्यमुष्मिन् कर्त्तुं विच- र्त्तुमपिसञ्चलितुं स्वशक्त्येति ॥ २८ ॥ हेमात सा चिच्छक्ति. परमात्मन्य स्ति तेन हेतुना सोपि परमात्मा व्य- क्तोनामरूपात्मकोभवति तथाजग त्सुविदितः प्रसिद्धः तथाभवकृत्यक र्त्ता प्रपञ्चसृष्टिस्थितिसंहृतिकर्त्ताभ वति । क पुरुषोऽस्मात् परमात्म

नोऽन्यस्त्वद्विरहितः स्वशक्त्यैवामुष्मिन्प्रपञ्चे कर्त्तुं विहर्त्तुं तथासर्वथितुं प्रभवति नकोपीत्यर्थः । यद्यपि तद्रहितयापि त्वशक्तिरूपा भवत्येव । एतादृशी सर्वसकलकारणा मन्तव्यीयेति भावः । तदुक्तंदक्षिणामूर्त्तिसंहितायाम् । शक्त्याविना शिवेसूक्ष्मे नाम धामनविद्यते इति ॥

चिञ्चा । स्त्री । अम्लिकाऽगमे ॥ चिमिचयव्यक्तं शब्द चिनोति ॥ चिञ्० । अन्येभ्योपीतिड. ॥ फले ॥ चिञ्चाया फलम् । हरीतक्यादित्वात्फलप्रत्ययस्य लुप् ॥

चिञ्चाम्लम् । न । } अम्लशाके ॥
चिञ्चासारः । पु । }

चिञ्चिका । स्त्री । अम्लिकायाम् । अम्ली इति इमली इतिचभाषा ॥

चिञ्चिड । पु । सुदीर्घफले । चचेंडा इति भाषा ॥ चिञ्चडो वातपित्तघ्नो बल्यः पथ्यो रुचिप्रदः । शोषणेतिहितं किञ्चिद्गुणैर्न्यून पटोलतः ॥

चिञ्चुकी । स्त्री । चञ्चवाम् । दीर्घपत्रायाम् । चेंचू नाडीशाके ॥

चिञ्चोटक । पुं । चक्षुलोक्ये । चेंचुको इतिचेंचुड इतिचगौडप्रसिद्धे तृणे ॥

चित् । अ । असाकल्ये । कसकशब्दार्थे ॥ यथा । किञ्चित ॥ चेतति । चितीसंज्ञाने । क्विप् ॥

चित् । स्त्री । चर्मी । वृद्धौ ॥ अजडे । निर्विशेषस्फुरणमात्रे चेतने । स्वत एव प्रकाशमाने ब्रह्मणि ॥ निर्विकल्पकं सर्वावभासकं ज्ञानं प्रत्यगात्मस्वरूपं चिदितिव्याख्यातारः ॥ चिदिहास्तीतिचिन्मात्रमिदंचिन्मयमेवच । चित्त्वं चिदहमेते च लोकाश्चिदितिभावयेत्युपदेशः ॥ चिती० । सं०क्विप् ॥

चितः । त्रि । कृते ॥ चीयतेस्म । चिञ्० । क्त ॥

चिता । स्त्री । चित्यायाम् । मृतार्थेदारुषु । प्रेतदाहार्थे ऽग्न्याधाने ॥ शवदाहार्थे रचनायुक्तकाष्ठेषु ॥ संहतौ ॥ चीयतेस्म । चिञ्चयने । क्तः । टाप् ॥

चिताचूडकम् । न । चितायाम् ॥

चिति । स्त्री । चितायाम् ॥ समूहे । वृन्दे ॥ निर्विषयकसञ्चिद् ॥ बोधादिष्विष्टकासङ्ख्यानार्थाङ्गविशेषे ॥ अग्निस्थानविशेषे ॥ चीयते । चिञ्० । स्त्रियां क्तिन् ॥

चितिका । स्त्री । कटिशृङ्खलायाम् ॥

चित्तम् । न । चेतसि । अनुसन्धानात्मिकायामन्तःकरणवृत्तौ ॥ चित्तं च बुद्ध्यान्तर्भावः विषयपरिच्छित्ति

रूपत्वाविशेषात् । वृत्तेश्चपूर्वाविषय. चित्तस्यपूर्वानुभूत इतिविषयभेदात चित्तस्यक्वचित् पृथङ्निर्देशोप्यस्ति ॥ चैतन्ये ॥ यथा । एवनजायतेचित्तमिति ॥ विज्ञानस्कन्धे ॥ चितौ॰ । भावे क्त. । स्त्रीदितइतीद्गुनिषेध. ॥ चितायाम् ॥ चिताकाष्ठमठीचैत्यंचिताचूडकमिष्यते । चित्तस्येतिचिकायाअशेषात् ॥

चित्तकाल॰ । पु । चित्तपरिच्छेदे ॥ नान्यश्चित्तकालव्यतिरेकेण परिच्छेदक कालोयस्य तथा ॥

चित्तजन्मा । पु । कामदेवे ॥

चित्तदोष । पु । शून्यतायाम् ॥

चित्तनदी । स्त्री । उभयतोवाहिन्याम् ॥ इयं ह्युभयतोवहति कल्याणाय वहति पापायच । तत्र या कैवल्यप्राग्भारा विवेकनिम्ना साकल्याणवहा । यात्वविवेकनिम्ना संसारप्राग्भारा सापापवहा ॥

चित्तप्रसन्नता । स्त्री । हर्षे ॥

चित्तबन्धनम् । न । चित्तबन्धकारके । मूलाज्ञाने ॥ चित्तस्यबन्धनम् ॥

चित्तभञ्जनम् । न । रूपक्रियानुसन्धानराहित्ये ॥

चित्तमोदकः । पु । लड्डुकविशेषे ॥

चित्तल॰ । पु । मृगविशेषे ॥ कसिततिलोद्भवतैलविपक्वं लवणयुतं भवति ङ्गुरसाख्यम् । त्रिकटुकयुक्तनिशार्द्रकमिश्रं बहुगुणचित्तलमांसमनर्घ्यम् ॥ रसे पाकेच मधुरं रक्तपित्तविनाशनम् ॥

चित्तविक्षेप. । पु । योगप्रतिपक्षेषु व्याधिस्त्यानादिषु ॥ चित्तं विक्षिपन्ति योगादपनयन्तीति चित्तविक्षेपाः योगप्रतिपक्षा । तेच नव योगसूत्रेणोक्ता । यथा । व्याधिस्त्यान संशयप्रमादालस्याविरतिभ्रान्तिदर्शना-लब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेन्तराया इति ३० । तत्रसंशयभ्रान्तिदर्शने तावद्वृत्तिरूपतया वृत्तिनिरोधरूपस्य समाधे. साक्षात्प्रतिपक्षौ । व्याध्यादयस्तु सत्त्वृत्तिसहचरिततया तत्प्रतिपक्षा-भवन्ति ॥

चित्तवित् । पुं । विज्ञानात्मवादिनिबौद्धविशेषे ॥ चित्तमेव बाह्याकारशून्य विज्ञानं तदेवात्मेतिविज्ञानवादिनो भ्रान्तिरेव । सुषुप्ते अभिधारात् बेद्यस्यच घटादिश्च इतिरिक्तवेद्यत्वात् ॥

चित्तविप्लव. । पुं । उन्मादे ॥

चित्तविभ्रमः । पु । उन्मादे ॥ चित्तस्यविभ्रमो ऽनवस्थानम् ॥

चित्तसमुन्नति । स्त्री । माने ॥ चित्तस्य सम्यगुन्नति ॥

चित्तहारी । त्रि । मनोरमे ॥

चित्ताभोग । पु । एकस्मिन्विषये मनसो भूयोभूय प्रवृत्तौ । एकस्मिन्विषयेचित्तस्थैर्यें । मनस्कारे ॥ आभोजनम् आभोग । भुजेर्भावे घञ् । चित्तस्य आभोगस्तदेकप्रवणता आभोगपरत्वमितियावत् ॥

चित्ति । स्त्री । प्रज्ञायाम् ॥

चित्तैकाग्र्यम् । न । अन्यार्थनिवृत्तौ ॥

चित्तोक्ति । स्त्री । दैवप्रश्ने ॥

चित्तोत्थम् । न । सप्तमगृहे ॥

चित्तोन्नति । स्त्री । गर्वे ॥

चित्प्रतिविम्ब । पु । जीवे ॥ चित' प्रतिविम्ब ॥

चित्य । पु । अग्नौ ॥ चीयतेऽसावित्यर्थे चित्याग्निचित्ये चेति चिनोते' कर्मणि यप्रत्ययस्तु गागमश्च निपात्यते ॥ न । चितायाम् । मृतकचैत्ये ॥ जिनोक्तसि ॥

चित्या । स्त्री । मृतचितौ । चितायाम् ॥ टाप् ॥

चित्र । पु । यमविशेषे ॥ यथा । वृकोदराय चित्रायेति ॥ कर्वुरवर्णे ॥ अशोकवृक्षे ॥ चित्रकवृक्षे ॥ एरण्डवृक्षे ॥ न । तिलके ॥ आलेख्ये । मूरत इतिभाषा ॥ अद्भुते ॥ कर्वुरे । नानावर्णे ॥ आकाशे ॥ न । अलङ्कारविशेषे ॥ यथा । तच्चित्र यत्रवर्णानां खड्गाद्याकृतिहेतुता । सन्निवेशविशेषेण यत्र न्यस्ता वर्णा खड्गमुरजपद्माद्याकारमुल्लासयन्ति तच्चित्रकाव्यम् ॥ कष्टकाव्यमेतत् ॥ * ॥ अष्टिसप्तकषोडशाक्षरायावृत्तौ ॥ यथा । चित्रसप्तमीरितसमानिकापदद्वयन्तु । यथा । विद्रुमारुणाधरोष्ठशोभिवेणुवाद्यहृष्ट वल्लवीजनाङ्गसङ्गजातमुग्धकण्टकाङ्ग । त्वासदैववासुदेवपुण्यलभ्यपादसेवनन्यपुष्पचित्रकेश त्वाक्षरामिशोपवेशइति ॥ चित्तयायते दु'खविस्मारकत्वात् । चैङ्पालने । आतोऽनुपसर्गेक ॥ चित्रयति वा चित्रचित्री करणे । ण्यन्तात् पचाद्यच् ॥ चिनोति चीयते वा । अमिचमीतिक्त ॥ त्रि । कर्वुराद्भुतयुक्ते ॥

चित्रक । पु । पाठिनि । वह्निसंज्ञके ओषधौ । चीता इति भाषा ॥ चित्रक' कटुक पाके वह्निकृत् पाचनो लघु. । रूक्षोष्णो ग्रहणी कुष्ठशोथार्शं. कृमिकासनुत् ॥ वातश्लेष्महरो ग्राही वातार्श श्लेष्मपित्तहृत् ॥ चित्रं चैत्रक शाक कासमर्दविमर्दितम् । तप्ततैले सवाह्लीके प्राचित

तरक्षसम्भूतम् ॥ चीता इतिभाषा प्रसिद्धे व्याघ्रविशेषे । शूरे । मृगान्तके ॥ एरण्डवृक्षे ॥ न । तिलके ॥ चित्रयति । चित्र० । कुन्शिल्पिसंज्ञयो ॥ यथा । चित्रंबुद्धिर्जायते । चैष्ठ० । काल्लात् स्वार्थेकन् ॥ चित्र करोतिवा । अन्येभ्योऽपीतिडः ॥

चित्रकण्ठः । पुं । कपोते ॥ ॥

चित्रकम्बलः । पुं । गलीचा इतिदुली चा इतिचभाषा प्रसिद्धे कम्बलविशेषे ॥

चित्रकरः । पुं । शूद्रागर्भे विश्वकर्मेर सजाते चितेरा इतिख्याते वर्णसङ्करजातिविशेषे । चित्रकारे । र-ङ्गाजीवे ॥ इतिब्रह्मवैवर्त्त पुराणम् ॥ चित्रकरोति । डुकृञ्० । दिवाविभानिशेतिट ॥

चित्रकर्मा । पुं । तिनिशद्रुमे ॥ त्रि । विविधाद्भुतकर्मणि ॥

चित्रकाय । पुं । व्याघ्रे । वाघ इतिभाषाप्रसिद्धे ॥ चीता इति भाषा प्रसिद्धे चित्रव्याघ्रे ॥ चित्रः कायोऽस्य ॥

चित्रकारः । पुं । चित्रकरे ॥ स्थपतेरपिगान्धिक्यां चित्रकारोव्यजायतेति प०प० ॥ चित्र करोति । डुकृञ्० कर्मण्यण् ॥

चित्रकूटः । पुं । स्वनाम्ना प्रसिद्धे पर्वतविशेषे ॥

चित्रकृत् । पुं । तिनिशद्रुमे ॥ चित्रकारे ॥ चित्रंकरोति । क्विप् ॥

चित्रकोलः । पुं । वाह्मनीतिख्यातेजन्तौ । ज्येष्ठ्याम् । अञ्जने । [illegible] ॥

चित्रगन्धम् । न । हरिताले ॥

चित्रगुप्त । पुं । चतुर्दशयमान्तर्गतयमे ॥ यथा । एकोद्दराय चित्राय चित्रगुप्ताय वैनमः इति ॥ ब्रह्मपाद्मे यमस्यलेखके ॥ यस्योत्पत्त्यादिराचारनिर्णयसन्धादवधार्या ॥

चित्रजल्प । पुं । वाक्यविशेषे ॥ यथा । प्रेष्ठस्यसुहृदालोके गूढरोषाभिजृम्भितः । भूरिभावमयो जल्पोयस्तीव्रोत्कण्ठितान्तिमः ॥ चित्रजल्पोदशाङ्गोयप्रजल्पंपरिजल्पितम् । विजल्पोज्जल्पसंजल्पा अवजल्पोऽभिजल्पितम् ॥ आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्त्तित भिष्युज्ज्वलनीलमणि. ॥

चित्रतण्डुला । स्त्री । विडङ्गे ॥ चित्रास्तण्डुलाअस्याः ॥

चित्रत्वक् । पुं । भूर्जवृक्षे ॥

चित्रदण्डक । पुं । ओलवृक्षे ॥

चित्रदर्शनम् । न । स्मारके ॥ स्मारकं चित्रदर्शनम् ॥

चित्रदेवी । स्त्री । महेन्द्रवारुण्याम् ॥

चित्रनेत्रा । स्त्री । सारिकाविहगे ॥

चित्रपक्षः । पु । तित्तिरिपक्षिणि ॥ चित्तिरोपाद्दतिख्याते पाण्डुसंज्ञकेखगे ॥ चित्रपक्षःकफहरो वातघ्नोग्राहीप्रबुत् ॥

चित्रपट' । पु । छींट इति प्रसिद्धे वस्त्रे ॥

चित्रपत्रिका । स्त्री । द्रोणपुष्प्याम् ॥ कपित्थपर्ण्याम् ॥

चित्रपर्णी । स्त्री । जलपिप्पल्याम् ॥

चित्रपदा । स्त्री । गोधापदीलतायाम् ॥ अनुष्टुप्सप्तकाष्टाक्षराहत्तिविशेषे ॥ यथा । चित्रपदा यदि भौगौ । यथा । यामुनसैकतदेशे गोपवधूजलकेलौ । कंसरिपो र्गतिलीला चित्रपदाजगदव्यात् ॥ सवैया सगैसायामपिदृष्टौ । यथा । सप्तपदा भगणा' परतो गुरुरल्पगतो लघुको जितदेश चित्रपदेति तदा युधि विविक्रमतो धृतवैरिधराधिपकेश । साकथिता भिक्षमकृष्णपिङ्गलनागवरेण्यथाभिनिवेश गौडकुलोज्ज्वलधारयधारय चेतसि हैयग्रवन्नमरेश्वेति ॥

चित्रपर्णिका । स्त्री । चित्रपर्णीप्रभेदे । त्रिपर्ण्याम् । दीर्घपत्रायाम् ॥

चित्रपर्णी । स्त्री । पृश्निपर्ण्याम् ॥ चित्रपर्णीकन्दः । काकमांसिडम्बि ॥ कआस्फोटालतायाम् ॥ जलपिप्पल्याम् ॥ द्रोणपुष्प्याम् ॥ मञ्जिष्ठायाम् ॥

चित्रपादा । स्त्री । सारिकापक्षिणि ॥

चित्रपिच्छक । पु । मयूरे ॥

चित्रपुङ्ख. । पु । शरे ॥

चित्रपर्णी । स्त्री । कल्पनायाम् ॥

चित्रपृष्ठ' । पु । कलविङ्के । चटके ॥

चित्रफल । पु । चितल इति गौडप्रसिद्धे मत्स्ये ॥

चित्रफला । स्त्री । चिर्भिटायाम् ॥ सगेर्वारौ ॥ लिङ्गिन्याम् ॥ वार्त्ताक्याम् ॥ कण्टकार्याम् ॥ फलइत्याख्य इतिगौड प्रसिद्धे मत्स्ये । राजनीते । फलवल्याम् ॥ वृहदिन्द्रवारुण्याम् ॥

चित्रभानु' । पु । अग्नौ । वैश्वानरे ॥ सूर्ये ॥ चित्रकवृक्षे ॥ भैरवे ॥ चित्रा भानवोऽस्य । कुम्भादित्वात् पूर्वपदादितिबलत्वम् ॥ षोडशेवत्सरे ॥ अस्यफलम् । अथकामुकमायाश्च न्याधिदुर्भिक्ष । मध्यचैत्रायते वै चित्रभानौ वरानने ॥

चित्रभेषजा । स्त्री । काकोदुम्बरिकायाम् ॥

चित्रमृग । पु । पृषताख्यमृगे ॥

चित्रमेखल. । पु । मयूरे ॥

चित्रयोधी । पु । अर्जुनवृक्षे ॥

चित्ररथः । पु । सूर्ये ॥ गन्धर्वविशेषे ॥

विद्याधरे ॥

चित्रलः । पु । कर्वुरवर्णे । किर्म्मीरे ॥ त्रि । तद्युक्ते ॥

चित्रलता । स्त्री । मञ्जिष्ठायाम् ॥

चित्रला । स्त्री । गोरक्षीदले ॥

चित्रलेखा । स्त्री । अप्सरोविशेषे । वाणासुरसुताया उषायाः सख्याम् । कुम्भाण्डतनयायाम् ॥ धृतिलक्षका ष्टादशाक्षरपादवृत्तिविशेषे ॥ यथा । मन्दाक्रान्ता मभरनययुता कीर्त्तिता चित्रलेखा ॥ यथा । अङ्केऽमुष्मिन् वसति मृगदृशां साररूपं यदासीदाकृष्येदं व्रजयुवतिसभा वेधसा सा व्यधायि । नैतादृक्चेत् कथमुडुपतिस्ता मन्तरेणाच्युतस्य प्रीततर्षां नयनयुगल भूमिश्चलेखाङ्कितायामिति ॥

चित्रलोचना । स्त्री । सारिकायाम् ॥

चित्रवल्कः । पु । पाठीनमत्स्ये ॥

चित्रवल्लिकः । पु । मदगुमत्स्ये ॥

चित्रवल्ली । स्त्री । मृगेर्वारौ ॥ महेन्द्रवारुण्याम् ॥

चित्रवीर्यः । पु । रक्तैरण्डे ॥

चित्रशिखण्डिजः । पुं । वृहस्पतौ ॥ चित्रशिखण्डी अङ्गिराः ततो जातः । जनी० । पञ्चम्यामिति डः ॥

चित्रशिखण्डी । पु । सप्तर्षिषु ॥ यथा ॥ मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः । वसिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः ॥ चित्रशिखण्डः चूडाविशेषोऽस्त्येषामिति व्युत्पत्त्या प्रत्येकं सप्तापि मरीच्यादयश्चित्रशिखण्डिनः ॥

चित्रशिखण्डिप्रसूतः । पु । वृहस्पतौ ॥

चित्रसर्पः । पु । मालुधाने ॥

चित्रसेनः । पुं । ब्रह्मपादजमसीभाजकायस्थस्य चित्रगुप्तादिपितयाख्यगीतमूर्त्तिविशेषे ॥ अयञ्चमन्यर्थबोधकविवेचक० । यथा । चित्रसेने मया चित्रां भगवेति गुरोर्मयम् । ब्रह्मा सन्तोष्य पुत्रादीन् याचित्वा प्राप्य मर्त्त्यं त ॥ राज्यं चकार स्वस्तुकृत्ति नाकृद्दधोमयः ॥ इत्याचारनिर्णयतन्त्रम् ॥

चित्रा । स्त्री । आखुपर्ण्याम् ॥ गोडुम्बायाम् ॥ सुभद्रायाम् ॥ दन्तिकायाम् ॥ मायायाम् ॥ सर्पविशेषे ॥ नदीविशेषे ॥ अप्सरोविशेषे ॥ मृगेर्वारौ ॥ मक्कदूर्वायाम् ॥ सुतश्रेण्याम् ॥ मञ्जिष्ठायाम् ॥ वैदिककर्मविशेषे ॥ चतुर्दशे नक्षत्रे ॥ अथ जातफलम् । यथा । प्रतापसन्तापितशत्रुपक्षो दक्षो नये चापि विचित्रभाषः । प्रसूतिकाले यदि यस्य चित्रा बुद्धिर्विचित्रा खलु तस्य भावे ॥

शा तथा । चिदाकाशस्य नोत्थानि नैवास्ताम इतिस्थितिः ॥ चित्ताकाश चिदाकाश माकाशञ्च तृतीयकम् । द्वाभ्यां शून्यतरं विद्धि चिदाकाशं महामुने ॥

चिदात्मक. । चि । निर्विशेषस्फुरणमात्रस्वरूपे चिदद्वैते ॥ बाध्यते जाग्रति स्वप्नः सुप्ते जाग्रच्च बाध्यते । चिदद्वैतन्तु न क्वापि बाध्यते वास्तवत्वतः ॥ चितो न बाधकं द्वैत चित्प्रसादेन भासनात् । अबाध्यत्वाद्वास्तवत्व चिदद्वैतस्य सुस्थितम् ॥

चिदाभासः । पुं । बुद्धावात्मप्रतिबिम्बे । जीवे ॥ योऽहि चराचरात्मकेषु शरीरजातेषु नित्यसन्निहित । चिदाभासतेस ॥

चिद्रसमूर्त्तः । चि । स्फुरत्सुखपूरिते ॥

चिद्रूप' । चि । ज्ञानमये ॥ हृदयालै ॥

चिन्तनम् । न । कर्त्तव्याकर्त्तव्यचिन्तायाम् ॥ विचारे ॥ चितिस्मृत्याम् । ल्युट् । अन् ॥ स्मरणे ॥

चिन्तयन् । चि । ध्यायति ॥

चिन्ता । स्त्री । आध्याने । चिन्तने । स्मृत्याम् ॥ आत्मीययोगक्षेमापायालोचनात्मिकायांबुद्धौ ॥ दर्शनसम्भोगयोः प्रकारभावनायाम् ॥ चिताचिन्ताद्वयोर्मध्ये चिन्तानामगरीयसि । चिता दहति निर्जीवं सजीवो दह्यते ऽनया ॥ चिन्तनम् । चिति० । चितिपूजीत्यङ् ॥ चिन्त्यते ऽनया वा ॥ कृतमागत्य घटते विघत्य क्षप्र दातिच । इति चिन्ता न कर्त्तव्या धनस्य च घनस्य च ॥

चिन्तामणि' । पु । वाञ्छितप्रदे मणिविशेषे ॥ तस्मिन् यद्यच्चिन्त्यते तत्तच्चिन्तोपाधिकमेवावभासते न स्वरूपतस्तथा ॥ स्पर्शमणौ ॥ यथाचिन्तामणि स्पृष्टा लोहं काञ्चनतां भजेत् ॥ ब्रह्मणि ॥ आयुरारोग्यमैश्वर्यभोगांश्चैवानुषङ्गिकान् । ददाति ध्यायतां नित्यसर्वकामप्रदो हरिः ॥ मन्त्रविशेषे ॥ यात्रायोगान्तरे ॥ सहजस्थानगो भौमो भाग्यस्थश्च बृहस्पति' । चिन्तामणि समाख्योयं कातु सङ्कल्पपूरक ॥ बुद्धविशेषे ॥

चिन्तावेश्म । न । मन्त्रणागृहे । दार्वटे ॥

चिन्तित । चि । कृतचिन्तने । मनसा विचारिते ॥ यथा । यच्चिन्तितं तदिह दूरतरं प्रयाति यच्चेतसा न गणितं तदिहाभ्युपैति । प्रातर्भवामि वसुधाधिपचक्रवर्त्ती सोऽहं व्रजामि विपिने जटिलस्तपस्वीति ॥

चिन्तिया । स्त्री । चिन्तायाम् ॥

चिन्तोक्ति । स्त्री । चिन्तावचने ॥

चिन्त्य । त्रि । निरूपणीये । चिन्तितुमर्ह । विचारणीये ॥

चिन्त्यमान । त्रि । विचार्यमाणे ॥

चिम । पु । चीनादिदेशजातेऽश्वविशेषे ॥ इति शब्दचन्द्रिका ॥

चिन्मय । त्रि । चैतन्यरूपे ॥ चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः । उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना । रूपस्थानां देवतानां स्त्री पुंसादिककल्पना ॥

चिपिट । पु । चिउरा इति प्रसिद्धे खाद्यभेदे । पृथुके । धान्यचमसे ॥ शालय सतुषा आर्द्रा भृष्टा अस्फुटिताः ततः । कुट्टिता श्चिपिटा प्रोक्तास्ते स्मृताः पृथुका अपि ॥ शालयो यावनाला श्चिपिटा पुष्टिवर्द्धना इति च ॥ अखभक्षविधिनिषेधौ यथा । द्विस्विन्नमन्नं पृथुकं गुडं देशविशेषके । नात्यन्तमस्तं विप्राणां भक्षणे च निवेदने ॥ अभक्ष्यं सततीनाञ्च विधवाब्रह्मचारिणामिति ब्रह्मवैवर्त्तपुराणम् ॥ आर्द्रस्याम्यौषे ॥ त्रि । पिट्टितविस्तृते ॥ चिपटे ॥ नासिकायानते ॥ इनच्पिटच् चिकचिचेति पिटच् प्रत्यय प्रकृतेश्चिरादेशः ॥

चिपिटक । पु । चिपिटे । पृथुके ॥

चिपिटमिव । सज्ञायाम् इवेतिवा कन् ॥

चिपिटा । स्त्री । गुडास्निमोद्भवे ॥

चिप्प । पुं । क्षुद्ररोगविशेषे ॥ यथा । नखमांस मधिष्ठाय वातःपित्तञ्च देहिनाम् । करोति दाहपाकौ चत व्याधिं चिप्प मादिशेदिति ॥

चिमि । पु । शुकखगे ॥ पट्टवृक्षे ॥

चिमिक । पु । शुकपक्षिणि ॥

चिमिचिम । पु । अर्शोव्यथाविशेषे ॥ कण्डूविशेषे । स्पर्शप्रियतायाम् ॥

चिरम् । न । अव्यादि (।ऽ)चिकले ॥ दीर्घकाले ॥ त्रि । तद्वति ॥

चिरकारी । त्रि । चिरक्रिये ॥

चिरकाल । पु । दीर्घकाले । दीर्घरावे ॥

चिरक्रिय । त्रि । दीर्घसूत्रे । अतिविलम्बेन क्रियासम्पादके ॥ चिराक्रिया यस्य ॥

चिरजीवक । पु । जीवकद्रुमे ॥

चिरजीवी । पु । काके ॥ विष्णौ ॥ जीवकवृक्षे ॥ शाल्मलितरौ ॥ अश्वत्थामादिषु ॥ अश्वत्थामा बलि र्व्यासो हनूमांश्च विभीषणः । कृप परशुरामश्च सप्तैते चिरजीविनः ॥ त्रि । बहुकालजीविनि ॥

चिरञ्जीवी । पु । विष्णौ ॥ काके ॥ जी

मर्क इ० ॥ प्राकमिष्ट० ॥ त्रि । चिरजीविनि ॥

चिररुढः । पु । यौवने ॥

चिररुटी । स्त्री । प्राप्तयौवनायांपितृगेहस्थायाम् । सुवासिन्याम् ॥ चिरे अटति पितृगेहाञ्छ्वशुरगेहम् । अट गतौ । अच् । पृषोदरादिः । वयस्थ चरंमद्रतिङीप् ॥ तरुण्याम् । द्वितीयवयःस्थायाम् ॥

चिरतिक्तः । पुं । चिरायता इतिप्रसिद्धे भूनिम्बे । किराततिक्ते ॥

चिरन्तं । त्रि । पुरातने । चिरंतने ॥ चिरेभव । चिरपरुत्परारिभ्यस्त्नो वक्तव्य ॥

चिरन्तन । त्रि । पुरातने ॥ चिरंभवे । सायंचिरमितिट्युट्युलौ । निपातनाम्मान्तत्वम् ॥

चिरपाकी । पु । कपित्थे ॥

चिरपुष्प । पु । वकुलाऽगमे ॥

चिरप्रसूता । स्त्री । बष्कयिण्याम् ॥ चिरप्रसूता । सुप्सुपेतिसमास ॥

चिरम् । अ । बहुकालार्थे । चिराय ॥

चिरमेही । पु । गर्दभे ॥

चिरमेघ । पु । चिल्ले ॥

चिररात्रम् । न । दीर्घकाले ॥

चिररात्राय । अ । दीर्घकाले ॥ चिरा रात्राय । अनुप्रत्ययमवेत्यमाजिति योगविभागादच् । चिररात्रायत्रय ते । अय० । कर्मस्थम् ॥

चिरलोकपितर । पुं भूम्नि । अग्निष्वात्तादिषु ॥ अग्निष्वात्तादयोलोकेपितर श्चिरवासिन ॥

चिरबिल्वः । पु । करञ्जवृक्षे ॥ चिरं बिल्वति । बिलभेदने । वाहुलकात् इवे ॥

चिरसूता । स्त्री । बष्कयिण्याम् ॥

चिरसूतिका । स्त्री । बष्कयिण्याम् ॥

चिरस्य । अ । दीर्घकाले ॥ चिरमस्यति । असु० । यत् । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । अ० ॥

चिरा । स्त्री । बहुकालसाध्यायाम् ॥

चिराटिका । स्त्री । श्वेतपुनर्नवायाम् ॥ पाताली इतिगौडभाषाप्रसिद्धचटिकायाम् ॥

चिरात् । अ । दीर्घकाले ॥

चिरात् । पु । गरुडे ॥

चिरातिक्त । पु । चिरतिक्ते ॥

चिराय । अ । दीर्घकाले ॥ चिरमयते । अय० । कर्मण्यण् ॥

चिरायुः । पु । विबुधे । देवतायाम् ॥ त्रि । चिरजीविनि ॥ चिरमायुर्यस्य ॥ भवति यदि मनुष्यो गुर्वर्थीनश्चिरायुरित्यागम ॥

चिरायय । पुं । अश्वादि (।ऽ) विकर्णे ॥

चिरिः । पु । तोता इतिप्रसिद्धे शुक पक्षिणि ॥

चिरेण । अ । चिरमित्यर्थे ॥

चिर्भटी । स्त्री । कर्कव्याम् ॥

चिर्भिट । पु । न । कर्कटी सस्ये । बेलसेंध इतिसैवकाचरी इतिचभाषा प्रसिद्धायां सुचिभायाम् ॥ चिर्भिटम धुर रूक्षगुरुपित्तकफापहम् अनुष्णा ग्राहि विष्टम्भि पक्वन्तूष्णम्पित्तलम् ॥

चिर्भिटा । स्त्री । चिभड इति भाषा प्रसिद्धे चिर्भिटे ॥

चिलमिलिका । स्त्री । कण्ठीभेदे ॥ खद्योते ॥ विद्युति ॥

चिलमीलिका । स्त्री । चिलमिलिकार्थम् ॥

चिलिचिमः । पु । वाखियागडक इति गौडभाषाप्रसिद्धे मत्स्ये । नलमीने ॥ चिलविलसने । इगुपधात् कि दिति कः । वीप्सायांद्वित्वम् । चि लिचिलिविलास मिमीते । माङ्मा ने । आतइतिकः । पृषोदरादि ॥ चिलिविलासचिनोतिवा । चिञ्० । वाहुलकात् मक् ॥ चेङ्गो इतिगौ डप्रसिद्धे मत्स्ये ॥

चिलिचिलि । पु । विलासे ॥

चिलिचीमः । पु । } वाखियागडक
चिलिचीमि । पु । } इतिगौडप्रसि

द्धे चिलिचिमे ॥

चिलिमिलिका । स्त्री । चिलमिलिकार्थे ॥

चिलिमीनक. । पु । चिलिचिमेमत्स्ये ॥

चिलिमीलिका । स्त्री । चिलमिलिकार्थे ॥

चिलीचिम । पु । } नलमीने । चि
चिलीचिमि । पु । } लिचिमे ॥
चिलीम । पु । }

चिल्ल । पु । आतायिनि । खभ्रान्तौ । चील इति भाषा ॥ चिल्लति । चिल्ल शैथिल्ये भावकरणेच । अच् ॥ क्लि न्ननेत्रे ॥ चि । क्लिन्ननेत्रवति ॥ क्लि न्नेचक्षुषी अस्य । क्लिन्नस्य चिल्पि ल् लश्चास्य चक्षुषीति चिलादेशो लश्च प्रत्यय । चक्षुर्गत क्लेदरोग चिल्लशब्दवाच्य । तद्योगाच्चक्षुस्तद्यो गात् पुरुषोपीतिव्याख्यातार ॥

चिल्लक । पु । लोभे ॥

चिल्लभक्ष्या । स्त्री । हट्टविलासिन्याम् ॥

चिल्लाभ । पु । प्रसह्यचौरे । गाठकटा लुटेरा पिंडार जूवाचोर इत्यादि भाषा ॥

चिल्लि । पु । भ्रूमध्ये ॥

चिल्ली । स्त्री । क्षुद्रवास्तुकशाके । गौ डवास्तुके । बथुआ इति प्रसिद्धे शा के ॥ लोध्रे ॥ झिल्ल्याम् ॥ चिल्लति । चिल्लशैथिल्ये । अच् । गौ० ङीष ॥

चिचिल्लिका । स्त्री । क्षुद्रक्षुपविशेषे । रक्तदलायाम् ॥

चिबु । पु । चिबुके । ओष्ठाधोभागे । ठोडि इति भाषा ॥ चीवति । चीव्यते वा । चीवृआदानसंवरणयोः । मृगय्वादित्वात् कु ॥ चिनोतिशोभां वा । प्राग्वत् ॥

चिबुकम् । न । चिबौ ॥ स्वार्थे कन् ॥ पु । मुचुकुन्दवृक्षे ॥

चिह्नम् । न । लाञ्छने । लक्षणे ॥ पताकायाम् ॥ चह्यतेऽनेन । चहपरिकल्कने । बा०नक् उपधाया इत्त्वञ्च ॥ लक्ष्मादि (।ऽ) त्रिकम् ॥

चिह्नकारी । त्रि । घोरदर्शने ॥ विघातिनि ॥

चिह्नधारिणी । स्त्री । श्यामालतायाम् ॥

चिह्नित. । त्रि । अङ्किते । चिह्नविशिष्टे ॥

चिल्ल. । पु । } चिल्लक । पु । } गंधारी इति पर्वतप्रसिद्धे वृक्षे ॥ चिल्लकोवातनिर्हारी श्लेष्मशोधातुपुष्टिकृत् । आग्नेयो विषवत्स्फल मत्स्यनिषूदनम् ॥

चीडा । स्त्री । चीडागन्ध इति गौड प्रसिद्धेगन्धद्रव्ये । दारुगन्धायाम् ॥

चीत्कार' । पु । भयध्वनौ ॥

चीनः । पुं । देशविशेषे ॥ यथा । का-

शक्तीरन्तुसमारभ्य कामरूपात्तुपश्चिमे । भोटान्तदेशोदेवेशि मानसेशाद्दक्षिणे ॥ मानसेशाद्दक्षपूर्वे चीनदेशः प्रकीर्त्तित इतितन्त्रशास्त्रम् ॥ तद्देशजे मनुष्ये । चीनदेशोद्भवे पूर्वं क्षत्रिये पश्चाद्विच्छिन्नक्रियालोपादिना शूद्रत्वमापन्ने दस्युपदवाच्ये ॥ आगमोक्ते सम्प्रदायविशेषे ॥ अंशुकविशेषे । मखमल इत्याधुनिक भाषाप्रसिद्धे बहुविधाद्भुतवस्त्रे ॥ चीणा इतिप्रसिद्धे व्रीहि विशेषे ॥ चीनक.कङ्गुभेदोऽस्मि समेयः कङ्गुवङ्गुवे ॥ तन्तौ ॥ मृगविशेषे ॥ न । पताकायाम् ॥ सीसके ॥ चिनोति । चिञ्० । बाहुलकान्नक् दीर्घश्च ॥

चीनक । पुं । चीणा इति प्रसिद्धधान्ये । काककङ्गौ ॥ कङ्गुन्याम् ॥ चीनकर्पूरे ॥

चीनकर्पूरः । पुं । चीनाकपूर इति भाषाप्रसिद्धे कर्पूरविशेषे । कृत्रिमे । मेघसारे । धवले ॥

चीनजम् । न । तीक्ष्णलौहे ॥

चीनपिष्टम । न । सिन्दूरे ॥ चीनस्य पिष्टम् ॥ सीसके ॥

चीनवङ्गम् । न । सीसके ॥

चीनाक । पुं । चीनिआकपूर इति प्रसिद्धे कर्पूरविशेषे ॥ चीनाकसंज्ञ

कर्पूरं कफवातघ्नं स्मृतं । कुष्ठक ण्डूविषघ्नं स्यात्तिक्तरसमुत्‌ ॥

चीनाकर्कटी । स्त्री । चित्रकूटदेशप्र-सिद्धायां कर्कट्याम्‌ । राजकर्कट्याम्‌ ॥

चीरम्‌ । न । गोस्तने ॥ वस्त्रविशेषे ॥ रेखाभेदे ॥ लेखनभेदे ॥ चूडायाम्‌ ॥ सीसके ॥ जीर्णवस्त्रखण्डे ॥ चीराणि किं पथि न सन्ति दिशन्ति भिक्षामिति भागवतम्‌ ॥ इत्यस्य चि ॥ चिनोति । चिञ्‌° । शुसिचि मीना दीर्घश्चेतिक्रन्‌ ॥

चीरक । पु । विक्रियालेखे । विकार लेखने ॥

चीरपत्रिका । स्त्री । चञ्चुशाके ॥

चीरपर्ण । पु । शालवृक्षे ॥

चीरभृत्‌ । पु । तापसे ॥

चीरि । स्त्री । नेत्राशुके ॥ इतिशब्द रत्नावली ॥

चीरिका । स्त्री । झिल्ल्याम्‌ । कच्छा याम्‌ ॥

चीरितच्छदा । स्त्री । पालङ्क्यशाके ॥

चीरी । स्त्री । झिल्ल्याम्‌ ॥ कच्छाटि कायाम्‌ ॥ नेत्राशुके ॥ गौ० ङीष्‌ ॥

चीरुकम्‌ । न । चेंउर इति गौड प्र-सिद्धे फले ॥

चीरुका । स्त्री । झिल्ल्याम्‌ ॥ चीति रौति । रुशब्दे । बाहुलकात्‌ कक ॥

चीर्ण । त्रि । शीलिते ॥ सञ्चिते ॥

चीर्णपर्ण । पु । निम्बागमे ॥ खर्ज्जूरी भूरुहे ॥

चील्लिका । स्त्री । झिल्ल्याम्‌ । चीर्याम्‌ । चीलिकायाम्‌ । चील्याम्‌ ॥

चीवरम्‌ । न । भिक्षोर्वस्त्रे ॥ चिनोति । चिञ्‌ चयने । छित्वरच्छत्वरधीव रेत्यादिनाष्वरच्‌ धातोर्दीर्घश्च ॥

चीवरी । पु । वृद्धभिक्षुके ॥ मत्वर्थी यइनि ॥

चुक्कार । पु । सिंहनादे ॥

चुक्र । पु । अम्ले ॥ अम्लवेतसे ॥ न । चूकइति प्रसिद्धे अम्लद्रव्यविशेषे । तिन्तिडीके । वृक्षाम्ले ॥ चूका इति प्रसिद्धे पत्रशाके । अम्लवास्तुके । वृ क्षाम्ले ॥ चुक्रमत्यम्लं गुर्व्वग्नि दी पनपाचनं परम्‌ । शूलगुल्मविबन्धा मवातश्लेष्महरम्‌ परम्‌ ॥ वमिहृष्णा म्यवैरस्यहृत्‌ पीडावह्निमान्द्यहृत्‌ ॥ काञ्जिकप्रभेदे । रसाम्ले । सहस्रवे धे ॥ सन्धानविशेषे ॥ यथा । यन्म स्त्वादिशुचौ भाण्डे सगुडक्षौद्रका ञ्जिकम्‌ । धान्यराशौ त्रिरात्रस्थंशु क्तञ्चुक्रंतदुच्यते ॥ द्विगुणा गुडमध्वा रनालमस्तुक्रमाद्विहेति परिभाषा ॥ चकते ऽनेन चक्यतेवा । चक तृप्तौ प्रतिघाते च । चक्रिरम्योरुच्चो

पधाया इतिरक् ॥

चुक्रकम् । न । चूका इति प्रसिद्धे शाके ॥

चुक्रफलम् । न । वृक्षाम्ले ॥

चुक्रवास्तूकम् । न । चुक्रे । चूका इति भाषा ॥

चुक्रशाकम् । न । शाकविशेषे ॥ चुक्रशाकमतिकोमलशिलापेषित कटुकतैल सयुतम् । सैन्धवैलमरिचान्वित पुनर्भोक्तुरेव रसनारसमयेत् ॥ चुक्रं चुक्रतरं स्वादु वातघ्न पित्तकृत् सरम् । रुच्यं लघुतरं पाकेसहन्नाक सुरोचकम् ॥

चुक्रा । स्त्री । चाङ्गेर्याम् । अम्लोणी इति भाषा ॥

चुक्राम्लम् । न । वृक्षाम्ले ॥

चुक्राम्ला । स्त्री । चाङ्गेर्याम् ॥ चिञ्चायाम् ॥ काञ्जिकप्रभेदे ॥

चुक्रिका । स्त्री । चाङ्गेर्याम् ॥ तिन्तिड्याम् ॥ चकयति । चकव्यथने । चकिद्म्योरुच्चोपधाया इति रक् । चुक्रमिव । इवेप्रतिकृता विति कन् ॥ क्षुद्रचाङ्गेर्याम् ॥

चुक्री । स्त्री । चाङ्गेर्याम् ॥ चुक्रिकायाम् । चूका इति भाषा ॥ चुक्रीत्वम्लतरा स्वाद्वी वातघ्नी कफपित्तकृत । रुच्या लघुतरापाकेऽत्यन्ताक्षेनातिरोचनी ॥ गौरादित्वान् ङीष् ॥

चुचुक । पु । न । चूचुके । कुचानने ॥

चुचू । पु । सुनिषस्राकशाके ॥

चुञ्चु । पु । ब्राह्मणेन वैदेह्ययोषाया मुत्पादिते सङ्करजातौ ॥ मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम् ॥ छुछुन्दर्याम् ॥

चुञ्चुरी । स्त्री । तिन्तिडीबीजैर्द्यूते ॥

चुञ्चुली । स्त्री । चुञ्चुरीक्रीडायाम् । तिन्तिडीकास्थिभिर्द्यूतक्रीडायाम् ॥

चुटा । स्त्री । } कूपे ॥ कूपसमीपाऽ
चुटी । स्त्री । } ल्पजलाशये ॥

चुत । पु । } गुदद्वारे ॥
चुति । स्त्री । }

चुन्दी । स्त्री । कुट्टन्याम् ॥

चुप्प । त्रि । मन्दगमनकर्त्तरि ॥ चोपति । चुपमन्दायांगतौ । चुप. क्विबेतिदृशपादीत्यपाठात् प' ॥

चुबम् । न । मुखे ॥ चुम्बति । चुबिवक्त्रसंयोगे । स्फायितञ्चीतिरक् ॥

चुम्बक । पु । स्वत प्रसिद्धे अयस्कान्ते । लोहकर्षके । कान्तपाषाणे ॥ चुम्बको लेखन शीतो मेदोविषगरापह ॥ घटश्रोद्धविलम्बने ॥ त्रि । बहुग्रन्थैकदेशज्ञे ॥ कामुके । चुम्बनपरे ॥ धूर्त्ते ॥

चुम्बनम् । न । चूमा इति प्रसिद्धे मुखसंयोगे ॥ तस्य स्थानानि यथा ।

मुखे स्तने ललाटे च कण्ठे च नेत्रयो रपि । गण्डेष कर्णयोश्चैव कचोरु भगमूर्द्धसु ॥ चुम्बनस्थान मित्युक्त विशेष कामुकैरिहेति कामशास्त्रम्॥

चुरा । स्त्री । चौर्य्ये ॥

चुरी । स्त्री । उपकूपे । कूपसमीपस्था ल्पजलाधारे । खेल इति भाषा ॥

चुलिआला । स्त्री । मात्रावृत्तप्रभेदे ॥ दोहादलशेषे यदा पञ्चकलो वि भवोहि विराजति । फणिपतिजल्पति किलतद्वा चुलिआलामिह तामनुगायति ॥ यथा । स्मितपटुकपटविलोकिते रपहृतमानसपङ्कजलोचन । दृष्टिपथे भविता सि मम गोपवधूजनशोकविमोचनेति ॥

चुलुक । पु । घनपङ्के ॥ प्रहृतौ ॥ भाण्डप्रभेदे ॥ न । मापमज्जनजले ॥

चुलुकी । पु । शिशुमाराकृतिमत्स्ये ॥

चुलुम्प । पु । वाललालने ॥

चुलुम्पा । स्त्री । छाग्याम् ॥

चुलुम्पी । स्त्री । शिशुमाराकृतिमत्स्ये ॥

चुल्ल । पु । क्लिन्ननेत्रे ॥ त्रि । तद्युक्ते ॥ क्लिन्ने चक्षुषी अस्य । चुल्लेति क्लिन्नस्य चुलादेशो लश्च प्रत्यय । चक्षुर्गत क्लेदरोगश्चुल्लशब्दवाच्य । तद्योगाच्चक्षुस्तद्योगात् पुरुषोपीति व्याख्यातार ॥

चुल्लकी । स्त्री । शिशुमारे ॥ कुण्डी भेदे ॥ कुलान्तरे ॥

चुल्लि । स्त्री । चल्हा इति प्रसिद्ध पाकार्थमग्निस्थाने । अग्न्यन्ते । उद्दाने ॥ चितायाम् ॥ चुल्यते ऽत्र । चुल्ल भावकरणे । इन् ॥ चुयते ऽग्निर्वा । चुदप्रेरणे । वाहुलकात् लिक्॥

चुल्ला । स्त्री । चितायाम् ॥ उद्दाने । चल्हा इति भाषा । कृदिकारादिति ङीष् ॥

चुस्त । पु । न । वृक्षे । मांसपिण्डकविशेषे ॥ स्थालीभृष्टमांसे ॥ पनसादिफलस्यासारभागे ॥

चूचुकम् । न । कुचाग्र । कुचानने । स्तनवृन्ते ॥ चूष्यते । चूषपाने । वाहुलकादुक । पृषोदरादित्वात् षस्य च । चूचुइत्यव्यक्त कायति पीयमानम् । अन्येभ्योपीति ड ॥

चूडक । पु । कूपे ॥ इति त्रिकाण्डशेष ॥

चूडा । स्त्री । वडभ्याम् ॥ शिखायाम् । जुटिकायाम् ॥ वाहुभूषणे ॥ अग्रे ॥ भूषणमात्रे । शिर शिख भूषणेषु चूडेतियादव ॥ मयूरशिखायाम् ॥ कूपे ॥ दशसंस्कारान्तर्गतसंस्कारविशेषे ॥ लभ्वादि (।ऽ) चिकले ॥ चू

चूर्ण	चिया

घ्यते। चुडसमुच्छ्राये। भिदादित्वा दड्दीर्घश्च॥ यद्वा। चुयते। चुट० । भिदादित्वादड् डस्लदीर्घत्वञ्च निपातनात्॥

चूडाकर्म्म। पु। दशसंस्कारान्तर्गतसंस्कारविशेषे। चौले। चूडाकरणे॥

चूडामणि। पु। शिरोरत्ने॥ काकचिञ्चाफले॥ चूडायामणिः॥ उपरागविशेषे॥ यथा। सूर्यवारे रवेर्ग्रासे सोमवारे विधोर्ग्रहे। चूडामणिरिति ख्यातस्तत्रानन्तफलं लभेदिति॥

चूडाम्लम्। न। इत्वाम्ले॥

चूडालम्। न। मस्तके॥ त्रि। चूडायुक्त॥ चूडाऽस्त्यस्य। प्राणिस्थादातोलजन्यतरस्याम्॥

चूडाला। स्त्री। उच्चटायाम्॥ श्वेतगुञ्जायाम्॥ नागरमुस्तायाम्॥ लजन्तात्टाप्॥

चूडावान्। त्रि। चूडायुक्ते॥ पक्षेमतुप्॥

चूत। पु। आम्रवृक्षे। रसाले॥ चोष्यतेऽस्य। चूषपाने। क्त। पृषोदरादि॥ च्योततिरसश्रितिवा। च्युतिरक्षरणे। अच्॥ गुह्यद्वारे॥

चूतक। पु। आम्रे॥ कूपके॥

चूर्ण। पु न। सम्पेषणेनजातेरजसि। चूरण चूर्ण चून चूर इत्यादिभाषाप्रसिद्धे। चोदे॥ तल्लक्षणादि यथा। अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालितम्। तत्स्याच्चूर्णं रजः क्षोदस्तन्मात्राकर्षसंमिता॥ चूर्णे गुडः समो देयः शर्करा द्विगुणा मता। चूर्णेतु भर्जितं हिङ्गु देयं नोत्क्लेदकृद्भवेत॥ लिहेच्चूर्णं द्रवे सर्वं घृताद्यैर्द्विगुणोन्मिते। पिबेच्चतुर्गुणैरेव चूर्णमालोडितद्रवैः॥ चूर्णावलेहगुटिकाकल्कानामनुपानकम्। पित्तवातकफातङ्के त्रिद्व्येकपलमाहरेदिति भावमिश्रः॥ चूर्णौषधस्य पूर्णवीर्यं पक्षचतुष्टयपर्यन्तंतिष्ठति॥ धूलौ॥ चूना इति प्रसिद्धे क्षारविशेषे॥ चूर्ण्यते। चूर्णप्रेरणे। चु०। एरच्॥

चूर्णक। पु। सक्तुषु॥ स्वार्थेके चूर्णशब्दार्थे॥ न। गद्यभेदे॥ यथा। अपादः पदसन्तानो गद्यं तत्तु त्रिधा मतम्। चूर्णकोत्कलिकाप्रायवृत्तगन्धिप्रभेदतः॥ अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः। तत्तु वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत्॥ भवत्युत्कलिकाप्रायं समासाढ्यं दृढाक्षरम्। वृत्तैकदेशसम्बन्धाद्वृत्तगन्धिपुनःस्मृतम्॥ तत्र चूर्णकं यथा। सहि त्रयाणामेव जगतां गतिः परमपुरुषः पुरुषोत्तमो दृप्तदानवभरेण भङ्गुरा

ङ्गीं धरणीमवलोक्य करुणार्द्रहृदय स्सन्नो भारमवतारयितु रामकृष्ण स्वरूपेणांशतो यदुवंशे अवततारे ति ॥ पु । आमलकविशेषे ॥

चूर्णकार । पु । चूनरी इति गौडभा षाप्रसिद्धे नटकन्यायापुण्ड्रकाज्जा- ते वर्णसङ्करजातिविशेषे ॥

चूर्णकुन्तल । पु । शिरस्थे क्षुद्रकुन्तले । अलके ॥ चूर्णस्यकर्पूरादिचोदस्य कुन्तल ॥

चूर्णखण्ड । पु । न । कर्करे । कङ्करइ तिकाकर इतिचभाषा ॥

चूर्णदासी । स्त्री । पिष्टकारिण्याम् । पिसनहारी इतिभाषा ॥

चूर्णपारद । पु । हिङ्गुले ॥

चूर्णशाकाङ्क । पु । गौरसुवर्णशाके॥

चूर्णा । स्त्री । वासयोगे । पटवासादि चोदे । निवासयुक्तिषु । सुगन्धिचू र्णे ॥ चूर्ण्यते । चूर्ण° ॥ घञ् ॥

चूर्णि. । स्त्री । पातञ्जले महाभाष्ये॥ कपर्द्दके ॥ शतसङ्ख्यककपर्द्दकेषु॥ चूर्णस्यकरणम् । तत्करोतीतिणय न्तादच्इ ॥यद्वा।चरणंचोरणवा।इ णिपृश्निपार्ष्णिचूर्णिभूर्णि इतिसाधु॥

चूर्णिका । स्त्री । सक्तुषु ॥

चूर्णित । त्रि । सचलिते ॥ कृत चूर्णे ॥

चूर्णी । स्त्री । महाभाष्ये ॥ कपर्द्दक शते ॥ कृदिकारादिति पक्षेङीष् ॥

चूर्णीकृत् । पु । महाभाष्यकारे । पत ञ्जलौ ॥

चूर्णीकृत । पु । गन्धविशेषे ॥ यथा । गन्धचूर्णं गन्धपत्र चूर्णं सुमनसां त था । प्रशस्तगन्धयुक्तानां पत्रचूर्णा नियानिच ॥ तानि गन्धाह्वयानिस्यु सगन्ध प्रथम स्मृत इति ॥ त्रि । कृ तचूर्णे ॥

चूल. । पु । कपाटाचो भागान्तरे ॥

चूलक । पु । केशे ॥

चूला । स्त्री । गृहोपरिगृहे । चन्द्रशा लायाम् ॥ चूडायाम् ॥

चूलिकम् । न । घृतभृष्टसमितायाम्॥

चूलिका । स्त्री । हस्तिकर्णमूले ॥ चू- ल्यते ऽनया । चूलसमुच्छ्राये । स ञ्ज्ञायामितिण्वुल् ॥ नाटकाङ्गे ॥

चूषा । स्त्री । कक्ष्यायाम् । गजमध्यब न्धनरज्ज्वाम् ॥ चूष्यते पीयते पृष्ठ मांसेनाहृष्यतां नीयते। चूषपाने । कर्मणिघञर्थे क ॥

चेकितान । पु । नृपविशेषे ॥

चेट । पु । दासे ॥ चेटति । चिटपर प्रेष्ये । अच् ॥

चेटक । पु । दासे । भृत्ये ॥ चेट्यते । चिट° । कृञादिभ्योवुन् ॥ उपपति नायकविशेषे । सन्धानचतुरे ॥

चेटि । स्त्री । दास्याम् ॥ चेटति । चिट० । इन् ॥

चेटिका । स्त्री । दास्याम् ॥ स्वार्थेक ॥ करण्याम् ॥

चेटी । स्त्री । दास्याम् ॥ चेटति । चिट० । सर्वधातुभ्यइन् । कृदिकारादिक्तिपक्षे ङीष् ॥ करण्याम् ॥

चेडिका । स्त्री । } चेटिकायाम् । दा
चेडी । स्त्री । } स्याम् ॥

चेत् । अ । यद्यर्थे । पक्षान्तरे ॥ असन्देहे ऽपिसन्देहवचने ॥ यथा । सन्ध्योःसुधाक्यमेव पितरोदेवास्तथे योगिनी प्रीताचेत् परदेवताचयदिचे देहः प्रमाणञ्चिचेत् । आक्षीयं यदिदर्शनं भवति चेदाशाभ्यमो घास्तिचेत्स्वातन्त्र्या अमिकोञ्चिका श्च यदिचेत्स्याम् मेऽथ. सर्वदेति॥ चेतति । चिती संज्ञाने । विच् ॥

चेतक' । त्रि । चेतनकर्त्तरि ॥ चेतयति । चिती० । ण्वुल् ॥

चेतकी । स्त्री । हरीतक्याम् ॥ चिरेणा चेतकीत्येयेतिलस्याश्चयाम् ॥ चेतकी द्विविधा प्रोक्ता श्वेता कृष्णा च वर्णत । षडङ्गुलायता शुक्ला कृष्णा त्वेकाङ्गुलास्मृता ॥ काचिदास्वादनाचेण काचिद्गन्धेनभेदयेत् । काचित्स्पर्शेन दृष्ट्या ऽन्या चतुर्धाभेदयेच्छिवा ॥ चेतकीपादपच्छाया मुपसर्पन्ति ये नराः । भिद्यन्ते तत्क्षणादेव पशुपक्षिमृगादय ॥ चेतकीतु धृता हस्ते यावत्तिष्ठति देहिनः । तावद्भिद्येत वेगैस्तु प्रभावान्नात्रसंशय ॥ नृपादिसुकुमाराणां कृशानां भेषजद्विषाम् । चेतकी परमा शस्ता हिता सुखविरेचिनी ॥ गौरादित्वात् ङीष् ॥

चेतन । त्रि । प्राणिनि ॥ पु । मनुष्ये ॥ आत्मनि । प्राणादिप्रवर्त्तके ॥ रथादौ नियताचेष्टा चेतनेना ऽधिष्ठिते । मद्दृष्टा चेतनत्वेन प्राणादीनांप्रवर्त्तक ॥ चेतति । चिती० । नं० ल्यु ॥

चेतनकी । स्त्री । हरीतक्याम् ॥

चेतना । स्त्री । संविदि । धियि । बुद्धौ ॥ स्वरूपज्ञानमत्र्यञ्जिकायां प्रमाणासाधारणकारणिकायां चित्तवृत्तौ प्रामाण्याख्याम भगवतोविभूतौ ॥ चेतयते ऽनया । चितसञ्चेतने । चु० । ण्यासश्रन्थोयुच् । टाप् ॥ जीवनाख्याम् ॥ चेतनाना मधिष्ठानं मनोदेहश्चसेन्द्रिय । केशलोमनखाग्रान्त मलद्रवगुणैर्विना ॥

चेतनावत् । न । सर्वशरीरे ॥ हृदये ॥

चेतनीया । स्त्री । ऋद्धिनामौषधौ ॥

चेतस् । न । चित्ते ॥ चितौ॰ । असुन् ॥ पु । चैतन्य ॥ साक्षीचेता इति श्रुते ॥

चेतोंशु । पु । जीवे ॥ चेतसश्चैतन्यस्य अंशुरिव ॥

चेतोमुख. । पु । चैतन्यदीप्ताज्ञानवृत्तिप्रधाने प्राज्ञे ॥ स्वप्नादिप्रतिबोधचेत प्रतिद्वारीभूतत्वात् । स्वप्नोजागरितञ्चेति प्रतिबोधशब्दितं चेतस्तत् प्रतिद्वारभूतत्वं द्वारभावेन स्थितत्वम् नहिस्वप्नस्य जागरितस्य वा सुषुप्तद्वारमन्तरेण सम्भवोस्ति तयोस्तत्कार्यत्वात् अत सुषुप्ताभिमानी प्राज्ञ स्थानद्वयकारणत्वात् चेतोमुखव्यपदेशभागित्यर्थ ॥

चेदि । पु । देशविशेषे । चैद्यपुरे । डाहले ॥ पुभूम्नि । तद्देशस्थे । चेद्य ॥

चेदिपति. । पु । उपरिचरवसौ ॥ चेदिराजे ॥ चेदीनां देशविशेषाणां पति. ॥

चेदिराट् । पु । शिशुपाले ॥ चेदिषु राट् यस्य । सं॰ क्विप् ॥ यद्वा । चेदीनांराट् । अन्ये॰क्विप् । इतिकेचित् । वस्तुतस्तु सत्सूद्विषेति क्विप् ॥

चेदिराज. । पु । शिशुपाले ॥ चेदीनां देशविशेषाणांराजा । टच् ॥ उपरिचरवसौ ॥

चेनी । स्त्री । रागिणीविशेषे ॥ इतिहलायुध ॥

चेयम् । त्रि । चेतव्यमात्रे ॥ चेतुयोग्यम् । चिञ्॰ । अर्हेकृत्यतृचश्चेति योग्यतायामचोयत् ॥

चेलम् । न । वस्त्रे ॥ त्रि । अधमे ॥ चिलति चिल्यते वा । चिलवसने । चेलति चेल्यते वा । चेलृगतौ । अच् । घञ्वा ॥

चेलकम् । न । चेलशब्दार्थे ॥ स्वार्थेक ॥

चेलान । पु । चेलना इति गौडप्रसिद्धे कलबलताविशेषे । अल्पप्रमाणके ॥

चेलाल । पु । कलबलताविशेषे । चित्रफले । खतापनवे । सुखाशे ॥

चेलिका । स्त्री । चेबली इति प्रसिद्धे पट्टवस्त्रे ॥ यथा । सेय कृष्णस्य वनिता पीतशाटीपरिच्छदा । रक्तचेलिकयाच्छन्ना शातकुम्भघनस्तनी । इति पाद्मेपातालखण्डम् ॥

चेली । स्त्री । अधमायाम् ॥ गौरादित्वात् ङीष ॥ चेलडितिपचादेटित्वात्ङीपूवा ॥

चेलीम: । पु । वाचियाख्यमीने ॥

चेलुक. । पु । बुद्धभिक्षुशिष्ये । श्रामणेरे ॥

चेष्टक । पु । रतिबन्धविशेषे ॥ यथा । पादमेकं हृदिन्यस्य द्वतरेणैवचेष्ट येत्। कान्तं क्रोडे स्थितांनारींबन्धो यञ्चेष्टकोमत ॥ त्रि। चेष्टाकर्त्तरि ॥
चेष्टा । स्त्री । कायपरिस्पन्दनादिरूपा या क्रियायाम् । प्राणधर्मे ॥
चेष्टानाश. । पु । प्रलये ॥
चेष्टितम् । न । गतौ ॥ चेष्टायाम् ॥ चरित्रे ॥ त्रि । चेष्टान्विते ॥
चैकितान । पु । चिकितानस्यर्षेर पत्ये ॥
चैकितानेय । पु । ब्रह्मदत्ताख्येन्नृषि विशेषे ॥ चिकितानस्यापत्यं चैकि तान.। तदपत्यं युवाचैकितानेय.॥
चैकितायन । पु । दल्भ्यगोत्रापत्य त्वात् दाल्भ्ये ऋषिविशेषे ॥ चिकि तायनस्यापत्यम् । अण्॥
चैतन्यम् । न । चेतनायाम् ॥ ब्रह्मणि । सर्वभूतभौतिकप्रपञ्चाधिष्ठानप्रका शे ॥ चैतन्य परमाणूनां प्रधानस्या पिनेष्यते । ज्ञानक्रियेजगत्कर्त्रीहि दृश्येते चेतनाश्रये ॥ नेष्यतेवैशेषि कै सांख्यैश्चेतिशेष ॥प्रकृतौ ॥ भा वेस्वार्थेवाष्यञ् ॥
चैत्त । पु । विज्ञानस्कन्धातिरिक्तस्क न्धाभावे ॥
चैत्य । पुं । उद्देश्यपादपे । ग्रामादि प्रसिद्धिहेतौ महावृक्षे। देवतरौ । देवावासे ॥जिनबिम्बे॥ जिनसभा तरौ ॥ बुद्धे । न । आयतने ॥ चि ताचिह्ने ॥ बुद्धवेश्मे ॥ जिनसभाया म् ॥ यज्ञस्थाने ॥ जनानां विश्राम स्थाने ॥ देवस्थाने ॥ चित्यामितिच त्येचेतिसाधु । चित्यायाइदम् । तस्येदमित्यण् ॥
चैत्यगृहम् । न । चतुष्पथमण्डपे ॥
चैत्यद्रु । पु । अश्वत्थाऽगमे ॥ प्रख्यात वृक्षे ॥
चैत्यद्रुम । पु । अश्वत्थवृक्षे ॥ प्रसिद्ध द्रुमे ॥ ग्रामादिसमीपे ख्यातवृक्षे ॥
चैत्यमुख । पु । कमण्डलौ ॥
चैत्यवृक्ष । पु । चैत्यद्रुमे ॥
चैत्योपराग । पु । कर्तृत्वादिसर्वप्र पञ्चसम्बन्धे ॥ चैत्येनउपराग ॥
चैत्र । पु । मासविशेषे । चैत्रिके । मधौ ॥ अत्रजातस्यफलम् । सत्का मंशालो विनयो सुवेशो भोगी सु खी स्या न्मधुराम्नभोजी । सत्सङ्ग युक्ता द्विजदेवभक्तो भवेन्मनुष्योम धुमासजन्मा ॥ चैत्रीपौर्णमास्यस्मि न् । विभाषाफाल्गुनीत्यादिनापक्षे ऽण् ॥ अद्रिविशेषे ॥ चित्रागर्भजे बुधपुत्रे सप्तद्वीपाधिपतौ सुरथरा- जस्यपितामहे ॥ बुद्धभिक्षुके ॥ न ।

मृते ॥ देवकुले । देउल इति गौडभाषा ॥ मृतकचैत्ये ॥

चैत्रक. । पु । मधुमासि ॥ न । चित्रकशाकादौ ॥

चैत्ररथम् । न । कुवेरस्योद्याने ॥ मेरोः प्राच्यांयोविष्कम्भशैल स्तस्यमूलोद्याने ॥ चित्ररथेन गन्धर्वेण निर्वृत्तम् । तेननिर्वृत्तमित्यण् ॥

चैत्रावली । स्त्री । चैत्र्यापूर्णिमायाम् । मधूत्सवे । सुवसन्ते ॥

चैत्रिक । पु । चैत्रे । मधुमासि ॥ चैत्रीपौर्णमास्यस्मिन् । विभाषाफाल्गुनी श्रवणाकार्त्तिकी चैत्रीभ्यइतिष्ठञ्क् । ठस्येक ॥

चैत्री । स्त्री । चैत्रपूर्णिमायाम् ॥ चित्रयायुक्ता पौर्णमासी । नक्षत्रेणयुक्ताकालइत्यण् । ततोङीप् ॥

चैद्य । पु । दमघोषात्मजे । शिशुपाले ॥ चेदीनांजनपदानामयम् । वृद्धेत्कोशलाजादाञ्ञ्यङ्इतिञ्यङ् ॥ पुभूम्नि । चेदिदेशोद्भवे । चेदिषु ॥

चैलम् । न । मृदुवस्त्रे ॥ चेलति चेल्यतेवा । चेलृगतौ । अच् घञ्वा । तत प्रज्ञाद्यण् ॥

चोकम् । न । हेमाह्वायामूले ॥

चोक्ष । पु । मीते ॥ त्रि । शुचौ ॥ स्वभावशुचा वरणादिदेशे ॥ दक्षे ॥

अभीक्ष्णे ॥ मनोज्ञे । चोखा इति भाषा ॥

चोचम् । न । वल्के ॥ चर्मणि ॥ गुडत्वचि ॥ त्वक्पत्रे । तेजपातइतिभाषा ॥ प्रशस्तं चोचमस्त्यस्मिन् । अर्शआद्यच् ॥

चोटी । स्त्री । शाट्याम् ॥ इतिहे० ॥

चोड । पु । प्रावरणे ॥ कञ्चुके ॥ पुभूम्नि । देशविशेषे । चोडा' ॥

चोदक । त्रि । प्रेरके ॥ चोदयति । चुदप्रेरणे । हेतुमणिजन्तात् कर्मणिण्वुल् ॥

चोदनम् । न । प्रेरणे ॥

चोदना । स्त्री । विधौ ॥ चोदनाचोपदेशश्च विधिश्चैकार्थवाचिन इतिभट्टोक्तिः ॥ विधिवाक्ये । क्रियायाप्रवर्त्तकेवचने ॥ चोदना नामलिङ्लोट्तव्यदादिशब्दव्यवस्थापितविधिनिषेधरूपयजनादिक्रियाप्रवर्त्तकं वचनमभिधीयते ॥ तर्जनायाम् ॥ प्रवर्त्तनायाम् ॥ प्रेरणायाम् ॥ शब्दभावनायाम् ॥ चोद्यते प्रवर्त्यते ऽनयेति । युच् ॥

चोदनागुड । पु । कन्दुके ॥

चोदित । त्रि । प्रेरिते ॥

चोद्यम् । न । अद्भुते ॥ प्रश्ने ॥ पूर्वपक्षे ॥ चोद्यवा परिहारो वा क्रियता द्वैतभाषया । अद्वैतभाषया चोद्य

नास्ति नापितदुत्तरम् ॥ त्रि । चोदनार्हे । प्रेर्ये । प्रेरणायोग्ये ॥ चोदितुयोग्यः । अर्हेकृत्यतृचश्चेति यत् ॥

चोपनम् । न । शनैर्गमने ॥ मौने ॥ चुपेल्युट् ॥

चोर । पु । स्तेयकर्त्तरि । तस्करे । दस्यौ । प्रच्छन्नापहारिणि ॥ गन्धद्रव्यविशेषे ॥ कृष्णशट्याम् ॥ चोरयति । चुरस्तेये । पचाद्यच् ॥

चोरक । पु । पृक्कायाम् । ग्रन्थिपर्णभेदे । भंडिउरइति नैपालभाषा ॥

चोरघात । पु । राजाकसिविशेषे ॥ चोरंहन्ति । हन० । कृत्यल्युटोबहुलमिन्त्यण् ॥

चोरपुष्पिका । स्त्री । शङ्खिन्याम् ॥ चोरपुष्प्येव । स्वार्थेकन् ॥

चोरपुष्पी । स्त्री । शङ्खिन्याम् । केशिन्याम् । सांखाहूली इतिभाषा ॥ चोरइवपुष्पमस्या रात्रिविकाशित्वात् । पाककर्णेतिङीष् ॥

चोरस्नायु' । स्त्री । काकनासालतायाम् ॥

चोरा । स्त्री । चोरपुष्पाम् ॥

चोरिका । स्त्री । चौर्य्ये ॥

चोरित । त्रि । मुषिते ॥ चोर्यतेस्म । चुर० । क्त. ॥

चोल' । पु । कूर्पासके । स्त्रीणां कञ्चुलिकाख्ये आप्रपदीनकञ्चुके ॥ चोल्यते ऽनेनवा । चुलसमुच्छ्राये । घञ् घोवा ॥ चोलाइति प्रसिद्धेपुंसो वस्त्रविशेषे ॥ अधुना ताञ्जोर इति प्रसिद्धे देशे । द्रविडतैलङ्गयोर्मध्ये चोलदेश प्रकीर्त्तित । लम्बकर्णाश्चते प्रोक्ता स्तद्देशे ऽवान्तरे भवेत् ॥ चीनदेशस्येहृदविशेष ॥ श्मश्रुधारिणि वेदयागानधिकारिणि म्लेच्छविशेषे । पूर्वंमय क्षत्रिय आसीत् सगरोराजास्य धर्मनाश वेशान्यत्वञ्च चकार ॥ न । वसने ॥

चोलक । पु । वाणधारके । कवचे ॥ न । वल्कले ॥

चोलकी । पु । करीरे ॥ नारङ्गे ॥ किष्कुपर्वणि ॥

चोलण्डुक । पु । शिरोवेष्टे ॥

चोलनम् । न । नागरङ्गे ॥ किष्कुपर्वणि ॥ करीरे ॥

चोलहृद । पु । चीनदेशीयसरोविशेषे ॥

चोली । स्त्री । कूर्पासके । अंगिया इतिभाषा ॥ अल्पस्त्रील गौरादित्वान् ङीष् ॥

चोलोण्डुक । पु । शिरोवेष्टे । उष्णीषे ॥

चोष । पु । दाहविशेषे । पार्श्वस्थिता

न्निनेवसन्तापे ॥ चूषणेनेवपीडा याम् ॥

चोष्य. । त्रि । इक्षुदण्डादौ । यद्दन्तै र्निष्पीड्य रसांश निर्गीर्य्य ऽवशिष्ट न्त्यज्यतेत चोष्यमुच्यते ॥

चोस्क । पुं । सिन्धुवारे । हयोत्तमे ॥

चौडम् । न । चूडाकरणकर्मणि ॥ चूडाप्रयोजनमस्य । चूडादिभ्यउपसङ्ख्यानमित्यण् ॥

चौक्ष्यम् । न । जलाशयविशेषे ॥ तज्ज्ले ॥ शिलाकीर्णं स्वय श्वभ्र नीला ञ्जनसमोदकम् । लतावितानसञ्छ न्न चौक्ष्यमित्यभिधीयते ॥ चौक्ष्यव ह्निकर नीर रूक्ष कफहर लघु । मधुर पित्तनुद्रुच्य पाचन विशदस्मृतम् ॥

चौपैया । स्त्री । मात्रावृत्तविशेषे ॥ यथा । चौपैयाहन्त विशन्माच फणिपतिपिङ्गलभणितम् कुरुसततुरङ्गममतिहृदयङ्गममन्तेगुरुमुपनीतम् । यदिदृशवसुरविभिश्छन्दोविद्धि क्रियतेयतिरभिरामम् सपदिस्तवसमये नृपति कवये वितरति ससदि कामम् ॥ यथा । कालियकुलगञ्जन दुरितविभञ्जनसज्जनरञ्जनकारी गोवर्द्धनधारी गोपविहारीवृन्दावनसञ्चारी । हतदुर्ज्जयदानवपालितमानवमुदिताखण्डलपाली सङ्गतगोपालीनिधुवनशाली भवतुमुदे वनमालीति ॥

चौर । पु । पाटच्चरे । तस्करे ॥ चोरपुष्पग्रोपधौ ॥ सुगन्धे ॥ चोरणम् । चुरस्तेये । अप्रत्ययात् । सञ्ज्ञापूर्वकत्वान्नगुण । चुराशीलमस्य । छत्रादिभ्योण ॥ चोरएववा । स्वार्थिक प्रज्ञाद्यण् ॥

चौरा । स्त्री । चोरपुष्पिकायाम् ॥

चौरिका । स्त्री । चौर्य्ये ॥ चोरस्य भाव कर्मवा । मनोज्ञादित्वाद् वुञ् ॥

चौर्य्यम् । न । चौरिकायाम् । स्तैन्ये ॥ चोरस्य कर्म भावोवा । ब्राह्मणादित्वात् ष्यञ् ॥

चौलम् । न । मुण्डनकर्मणि । चूडाकरणे ॥

चौलुक्य । पु । राजर्षिविशेषे ॥ चुलुकस्य गोचापत्यम् । गर्गादित्वात् यञ् ॥ त्रि । चुलुकेन कृते ॥

च्यवन । पु । भार्गवे ऋषिविशेषे ॥ न । पतने ॥

च्युत । त्रि । चरिते । गलिते ॥ च्यवतेस्म । च्युङ्गतौ । क्त ॥ गत्यर्था कर्मकेतिकर्त्तरिक्तो वा ॥ चुटिते ॥

च्युताचार । त्रि । स्खलितव्रते ॥

च्युति । स्त्री । चरणे ॥ यथा । धैर्यच्यु

ति ॥ भगे । योनौ ॥ गुदद्वारे ॥

च्युतोपल । पु । अश्मरले ॥ अश्मपाषाणे ॥

च्युप । पु । वक्त्रे । मुखे ॥ च्यवन्ते भाषन्तेऽनेन । च्युङ० । अनेकार्थत्वा न्नाम्रणे । च्युव किश्चेतिपः ॥

च्योतत् । वि । स्रोतति ॥

च्यौत्न । पु । गन्तरि ॥ अखडजे ॥ क्ली बपुण्ये । च्यवते । च्युङ० । जनिदे च्यादिना तन ॥

छ

छ । पु । छकारे ॥ छेदने ॥ वि । निर्मले ॥ तरले ॥ न । गृहे ॥

छग । पु । छागे । अजे ॥

छगण । पु । न । करीषे । छाणा इति भाषा ॥ इतिहेमचन्द्रः ॥

छगल । पु । छागे ॥ न । नीलवस्त्रे ॥ छायते । छोछेदने । छोगुगम्रस्वश्चेतिकलच् ॥

छगलक । पु । छागे ॥ स्वार्थे क ॥

छगलण्ड । पु । दक्षिणदेशे समुद्रसन्निधौ प्रचण्ड देश्या स्थाने ॥

छगला । स्त्री । वृद्धदारकवृक्षे ॥

छगलान्त्रिका । स्त्री । वृद्धदारकभेषजे ॥ छगलस्येवान्त्रमस्या । गौरादित्वान्ङीष् । कन् । ह्रस्व ॥

छगलान्त्री । स्त्री । वृद्धदारकवृक्षे ॥ वृके ॥ छगलस्येवान्त्रमस्या । गौरादित्वान्ङीष् ॥

छगली । स्त्री । वृद्धदारकभेषजे ॥ छागमातरि ॥

छच्छिका । स्त्री । छाछ इतिप्रसिद्धे तक्रप्रभेदे ॥ छच्छिकासरस्नेन स्याद च्छाप्रचुरवारिका ॥ छच्छिका शीतला लघ्वी पित्तश्रमतृषापहा । वातनुत् कफकृत् सातु दीपनीलवणान्विता ॥ सरस्नेनम् दधि इति सम्बन्ध ॥

छटा । स्त्री । दीप्तौ ॥ परम्परायाम् ॥

छटाफल । पु । गुवाकवृक्षे ॥

छटाभा । स्त्री । विद्युति ॥

छत्र । पु । अतिच्छत्रे । मूलेनपर्णेणाच छत्राकारेवृक्षे । छातारियाविष छातनाविष खरविष इतिच गौडभाषा ॥ भूतृणे ॥

छत्रम् । न । आतपत्रे । छाता इति छत्री इतिचभाषा ॥ अथास्यलक्षणम् । निचितन्तु हंसपक्षैः कृकवाकुमयूरसारसानांवा । दौकूलेन नवेनतु समन्ततश्छादित शुक्लम् ॥ मुक्ताफलै रुपचित प्रलम्बमालाविलस्फटिकमूलम् ॥ षड्हस्तशुद्धहैम नवपर्वनगै कदण्डन्तु ॥ दण्डार्द्धविस्तृतं तत्

समाहृतं रत्नभूषितमुद्ग्रम् । नृप ते सदातपत्रं कल्याणपरं विजयदं च ॥ युवराजनृपतिपत्न्योः सेनापतिदण्डनायकानाञ्च । दण्डोर्द्धपञ्च हस्तं समपञ्चकृतोर्द्धं विस्तारं ॥ अन्येषां मुख्यानां प्रसादपट्टैर्विभूषित शिरस्कम् । व्यालम्बिरत्नमालं छत्रं कार्यन्तु मायूरम् ॥ अन्येषान्तु नराणां शीतातपवारणन्तु चतुरस्रम् । समवृत्तदण्डयुक्तं छत्रं कार्यन्तु विप्राणाम् ॥ ६ ॥ इति वाराह्यामेकसप्ततितमोऽध्याय ॥ ७१ ॥ विशेषो युक्तिकल्पतरौ द्रष्टव्य ॥ छादयति छाद्यतेऽनेनवा । छद् अपवारणे । गत्यन्त । ष्ट्रन् । इस्मन्त्रन्क्विषु चेतिह्रस्व ॥ पत्रपात्रपवित्रेत्यादिलिङ्गानुशासनात् पुस्त्वमपिबोध्यम ॥

छत्रक । पु । मत्स्यरङ्गखगे ॥ अतिच्छत्रे । रांगाकुलियाखडा इति गौड भाषा ॥ ईश्वरगृहविशेषे ॥ न । छत्रार्थे ॥

छत्रगुच्छ । पु । गुण्डतृणे ॥

छत्रचक्रम् । न । राज्ञां शुभाशुभ ज्ञानबोधके समयामृतोक्ते चक्रविशेषे ॥

छत्रधर । पु । } छत्रधारके । वा
छत्रधार । पु । } चाकरे । छाताधा

र इति भाषा ॥

छत्रपत्रम् । न । स्थलपद्मे ॥ पु । भूर्जवृक्षे ॥

छत्रपुष्पक । पु । तिलकवृक्षे ॥

छत्रभङ्ग । पु । नृपक्षये । नृपनाशे ॥ स्वातन्त्र्ये ॥ वैधव्ये ॥

छत्रवृक्ष । पु । मुचुकुन्दे । पुष्पवृक्ष विशेषे ॥

छत्रा । स्त्री । मधुरिकायाम् । मिसौ ॥ अतिच्छत्रे ॥ धान्याके ॥ शिलीन्ध्रे ॥ छत्रमस्या अस्ति । अच् । छत्राकारस्तवकत्वात् ॥ मञ्जिष्ठायाम् ॥ टाप् ॥

छत्राक । पु । जालवर्बुरकेवृक्षे ॥ न । शिलीन्ध्रे ॥

छत्राकी । स्त्री । रास्नायाम् ॥ छत्र मकति । अककुटिलायांगतौ । कर्मण्यण् ॥

छत्रातिच्छत्र । पु । छत्रातिच्छत्रायाम् । छत्रवत्तृणे । छत्राकारे जलोद्भवे सुगन्धाख्यतृणविशेषे ॥

छत्राधान्यम् । न । धन्याके ॥

छत्रिका । स्त्री । हिलीरे । शिलीन्ध्रे ॥

छत्री । त्रि । छत्रवति ॥ मल्ल वैद्दनि ॥ पु । नापिते ॥

छत्वर । पु । गृहे ॥ कुञ्ज ॥ छादयति छद० । छित्वरच्छत्वरेत्यादिना

त्वरच् । ह्रस्वतकारो निपातनात् ॥

छद । पु । पत्रे । पलाशे ॥ गरुति । पक्षे ॥ ग्रन्थिपर्णे ॥ तमालवृक्षे ॥ छद्यते ऽनेन । छद० । णिजभावे पुंसिसंज्ञायामितिघ । छाद्यते ऽनेन वा । छादेर्घे इति ह्रस्व ॥

छदनम् । न । पत्रे । पर्णे ॥ पक्षे ॥ पिधाने ॥ तेजपात इति प्रसिद्धे तमालपत्रे ॥ छद्यते ऽनेन । छद० । आधृषाद्वेति णिजभावपक्षे करणेल्युट् ॥

छदपत्र. । पु । भूर्जपत्रवृक्षे ॥

छदि । पु । छदिषि । छप्पर इति छान इति भाषाप्रसिद्धे ॥

छदिस् । स्त्री । पटले । छान इति भाषा ॥ छादयति छाद्यते ऽनेन वा । छद० । इसु० । अर्चिशुचीतिइसि । इस्मन्त्रिति ह्रस्व ॥ छदि स्त्रियामेवेतिलिङ्गानुशासनसूत्रम् ॥

छद्मजित । त्रि । व्याजलब्धे ॥ छद्मना मिषेण जितो लब्ध ॥

छद्मतापस । पु । वैडालव्रतिके ॥

छद्म । न । कपटे । व्याजे । शाठ्ये ॥ अपदेशे ॥ स्वरूपाच्छादने ॥ छाद्यतेनेन । छद० णु० । मनिन् । इस्मन्त्रन्क्विषु चेतिह्रस्व ॥

छद्मिका । स्त्री । गुडूच्याम् ॥

छद्वर: । पुं० । छप्परे ॥

छन्द । पु । वशे ॥ अभिप्राये ॥ विषभेदे ॥ इच्छायाम् ॥ यथा । छन्द कामं कर्मपापं भय स्यात् कर्मणा फलम् । अनर्थरूप वितथ मद्देशे वीक्ष्यते नहि ॥ कर्मशब्देन धर्माधर्मो वुच्येते ॥ छन्द्यते छन्दन वा । छदि संवरणे इच्छायामपि । घञ् ॥

छन्दपर्णं । पु । मायामये संसारवृक्षे ॥ छन्दांसि छादनात् तत्त्ववस्तुप्रावरणात् संसारवृक्षरक्षणाद्वा कर्मकाण्डानि ऋग्यजुः सामलक्षणानि । तानि पर्णानीव पर्णानियस्य । यथा वृक्षस्य परिरक्षणार्थानिपर्णानि भवन्ति तथा संसारवृक्षस्य परिरक्षणार्थानि कर्मकाण्डानि । धर्माधर्मतद्धेतुफलार्थत्वात् छन्दसाम् ॥

छन्दस्सुत् । पु । गरुडे । वैनतेये ॥ छन्दोभि स्तावयत्येषोषि । ष्टुञ्० क्विपतुक् ॥

छन्दस् । न । वेदे ॥ स्वैराचारे ॥ अभिलाषे ॥ नियताक्षरपादरूपेगायत्र्यनुष्टुबादौ । गायत्र्युष्णिगनुष्टुबृहतीपङ्क्ति त्रिष्टुबजगतीषु सप्तसु ॥ पद्ये ॥ पद्यस्यलक्षण यथा । पद्यं चतुष्पदी तच्च वृत्तजातिरितिद्विधा । वृत्त मक्षरसङ्ख्यातं जातिर्मात्राकृता भवेत् ॥ सममर्द्धसमवृत्तं विषम

श्चेतितविधा। समं समचतुष्पादं भवत्यर्द्धसमपुन ॥ आदिस्तृतीयवच्च स्यपादस्तुर्यो द्वितीयवत्। भिन्नचिह्नचतुष्पाद विषमं परिकीर्त्तितम् ॥ एषामर्थ। अक्षरसङ्ख्यातमक्षरगणनया परिप्राप्त वृत्तमुच्यते। मात्राकृता मात्रागणनयानिर्णीता जाति जातिसञ्ज्ञका भवति॥ सम समचतुष्पादम्। अर्द्धसमवस्यप्रथम. पाद तृतीयेन पादेन तुल्य.। चतुर्थ पादो द्वितीयेन पादेन तुल्य। विषमं पृथक्लक्षणचतुष्पादम्। इति॥ तत्तुनानाविधम्। तस्य पिङ्गलादयो बहवोग्रन्था सन्ति॥ छन्दसां लक्षणोदाहरणानि तत्तत् स्थाने द्रष्टव्यानि॥ चन्दनम् चन्द्यते ऽनेनवा। चदिआह्लादने दीप्तौच। चन्देरादेश्चछइत्यसुन्॥

छन्दस्य। त्रि। इच्छयाकृते॥ छन्दसा निर्मित। छन्दसोनिर्मित इति यत्॥

छन्दोग। पु। सामगे। सामवेदज्ञे ब्राह्मणे॥ छन्दोगायति। गैशब्दे। गा पोष्टगिति टक्॥

छन्दोगपरिशिष्टम्। न। कात्यायनमुनिकृते सामवेदिनां कर्मबोधके गोभिलसूत्राणां परिशेषशास्त्रे॥

छन्दोभङ्ग। पु। छन्दस पतने॥ अपि माघं मघं कुर्याच्छन्दोभङ्गं त्यजेद्गिराम्॥

छन्दोविचिति। स्त्री। श्रुतच्छन्दसां प्रत्यायके शास्त्रे॥

छन्नम्। न। निर्जनस्थाने। रहसि॥ छद्यतेस्म। छद्०। क्त। आगमशास्त्रानित्यत्वान्नेट्॥ त्रि। छादिते। ढका इतिभाषा॥ छाद्यतेस्म। छद्०। णिजन्त। वादान्तत्यादिना साधु॥

छमण्ड'। त्रि। मृतपितृके। छोरा छोरीइतिछोकरा छोकरी इतिचभाषा इत्युणादिकोष.॥

छर्द्दम्। न। वमने॥

छर्द्दन। पु। अलम्बुषराक्षसे॥ निम्बवृक्षे॥ मदनवृक्षे॥ न। वमने॥

छर्द्दापनिका। स्त्री। वर्कव्याम्॥

छर्द्दि। स्त्री। वमनरोगे। वमथौ॥ छादयन्नाननंवेगै रर्दयन्नङ्गभञ्जनैः। निरुच्यते छर्द्दिरिति दोषोवक्त्रं प्रधावित॥ छर्द्दयति। छर्द्दीसन्दीपने। णिजन्तादचइ॥ कास श्वासो ज्वरो हिक्का तृष्णा वैचित्त्यमेवच। हृद्रोगस्तमकश्चेतिज्ञेयाश्छर्द्देरुपद्रवा॥

छर्द्दिका। स्त्री। वत्सादिकायाम्। छर्द्दिघ्नि॥ विष्णुक्रान्तायाम्॥

छर्द्दिकारिपु। पु। चुद्रैलायाम्॥ त्रि

। छर्दिघ्ने ॥

छर्दिघ्न । पु । अरिष्टे । निम्बे । मात्रके ॥

छर्दि० । स्त्री । वमौ । वमने ॥ छर्दति । छृदीसन्दीपने । अर्चिशुचीत्यादिना इसि ॥

छर्दी । स्त्री । वमने ॥ आमाशयोत्क्लेशभवाहि सर्वाश्छर्द्योमता लङ्घनमेवतस्मात् । विधीयते मारुतजां विनातु संशोधनं वा कफपित्तहारी तिवैद्यकम् ॥ छर्दिकारादिश्लिन इति ङीष् ॥

छलम् । न । स्खलिते । कूटयुद्धादिना युद्धमर्यादायाश्चलने ॥ छद्मनि । शाठ्ये । व्याजे । स्वरूपाच्छादने ॥ तात्पर्यान्तरेण प्रयुक्तस्य शब्दस्याऽर्थान्तरेणाश्रयने ॥ तथाचाक्षपादप्रणीतसूत्रम् । वचनविघातोऽर्थविकल्पोपपत्त्या छलम् । ५० ॥ अर्थस्यवाभिमतस्य योविकल्पोविरुद्ध कल्पो ऽर्थान्तरकल्पनेतियावत् तदुपपत्त्या युक्तिविशेषेण योवचनस्य वाक्यस्य विघातो दूषणं तच्छलमित्यर्थः । वक्तृतात्पर्या ऽविषयार्थकल्पनेन दूषणाभिधानमिति फलितम् । तात्पर्याविषयत्वम् विशेष्ये विशेषणे संसर्गेवा ॥ यथा । नेपालादागतोऽयं नवकम्बलवत्त्वादित्यत्र नवसंख्यापरत्वकल्पनया ऽसिद्ध्यभिधानम् । प्रमेय धर्मत्वादित्यत्र पुद्गलत्वांशकल्पनया भागासिद्ध्यभिधानम् । वह्निमान् धूमादित्यत्र धूमावयवे व्यभिचाराभिधानम् ॥ तत्त्रिविध वाक्छल सामान्यच्छल मुपचारच्छलञ्च ॥ ५१ ॥ छानम् । छोछेदने । दृषादित्वात्कल' ॥

छलना । स्त्री । परप्रतारणायाम् ॥

छलित । पु । स्खलिते । छले ॥

छल्ली । स्त्री । विरुधि ॥ सन्ताने ॥ वल्कले । छाल इति भाषा ॥ कुसुमविशेषे ॥

छवि । स्त्री । शोभायाम् ॥ रुचि ॥ छ्यति असारम् । छो० । कृविघृष्वि-च्छवी त्यादिनाक्रिन्नन्तोनिपातित ॥ छिनत्ति तमो वा । छिदिरद्वैधी करणे ॥

छा । पु । शावके ॥ इत्येकाक्षर ॥

छा । स्त्री । छादने ॥

छाग । पु । वस्ते । छागलके । अजे । वर्करे । वकरा इतिभाषा ॥ तत्पर्यायोक्तायुक्तिकल्पतरौ भोजराजेन । मध्यचार्यो विभेदेन नराणां तु गणत्रयम् । तेषांशुभाय निर्दिष्ट पशुवस्तुत्रयवलौ ॥ येकृष्णा. शुचयश्छागा पशवोऽन्ये तथैवच । देवजातिनिवस

छाग

सृज्यास्ते सर्वार्थोपसिद्धये ॥ येपीता हरितावापिनरजाते बद्दीरिता । ये शुक्लाश्चमहान्तोवारक्ताजाते शुभप्रदा ॥ येमेघाद्यथवा ग्रामाद्विमन्य प्रयच्छति । वधएवफलं तस्य नान्यत् किञ्चित् फलभवेदिति ॥ अस्यमासगुणा । छागमास लघुस्निग्ध स्वादुपाक त्रिदोषनुत् । नातिशीत मदाहिस्यात् स्वादुपीनसनाशनम् ॥ परवलकरच्चंहणा वीर्यवर्द्धनम् ॥ अजायाअप्रसूताया मांस पीनसनाशनम् । शुष्ककासे ऽरुचैशो षे हितमग्नेश्चदीपनम् ॥ अजासुतस्वबालस्य मास लघुतरस्मृतम् । हृद्यज्वरहर श्रेष्ठसुस्वादुवलद भृशम् ॥ मासनिष्कासितागडस्य छागस्य कफकृत्स । स्रोत शुद्धिकर वल्य मांसद वातपित्तनुत् ॥ वृद्धस्य वातलरूक्ष तथा व्याधिमृतस्यच । उर्द्ध्वजत्रुविकारघ्नछागमुण्डरुचिप्रदमिति॥ *॥ अथछागलक्षणम् । छागशुभाशुभलक्षण मभिधास्ये नवदशाष्टदन्तास्ते । धन्या स्थाप्यावेश्मनि सन्त्याज्यासप्तदन्तास्ते ॥ दक्षिणपार्श्वेमण्डल मसित शुक्लस्य शुभफलं भवति । ऋष्यनिभ कृष्णलोहितवर्णानामश्वेतमति शुभदम् ॥ स्तनवदवलम्वतेय

छाग

कण्ठे ऽजाना मणि सविज्ञेय । एकमणि शुभफलकृद् धन्यतमा द्वित्रिमणयोये ॥ मुण्डा सर्वेशुभदा सर्वसिता सर्वे कृष्णदेहाश्च । अर्द्धासिता सितार्द्धा धन्या कपिलार्द्धकृष्णाश्च ॥*॥ अथचतुर्णा कुट्टककुट्टिकजटिलवामननाना क्रमेण लक्षण करोति। विचरति यूथस्याग्रे प्रथमं वाम्भोवगाहते योऽज । सशुभ सितमूर्द्धा वा मूर्द्धनि वा कृत्तिकायस्य ॥ सपृषतकण्ठशिरावा तिलपृष्ठनिभस्तताम्रदृक्शस्त । कृष्णचरण सितोवा कृष्णोवा श्वेतचरणोय ॥ य कृष्णाण्डश्वेतो मध्ये कृष्णेन भवतिपट्टेन । योवाचरति सशब्द मन्दञ्च सशोभनश्छाग ॥ कृष्णशिरोक्तपादो योवाप्राक्पाण्डुरोऽपरेनील । सभवति शुभकृच्छाम श्लोकश्चाप्यत्र गर्गोक्त ॥ तमाह । कुट्टक कुट्टिकश्चैव जटिलो वामनस्तथा । तेचत्वार श्रिय पुत्रा नालक्ष्मीके वसन्तिवै ॥*॥ अथाऽप्रशस्तानां लक्षणम् ॥ अथाऽप्रशस्ता खरतुल्यनादा प्रदीप्तपुच्छा कुनखा विवर्णा । निकृत्तकर्णाद्विपमस्तकाश्च भवन्ति तेषासिततालुजिह्वा ॥*॥ अथ शुभलक्षणानि । वर्णी प्रशस्तै र्मणिभि' प्रयुक्ता

मुण्डाश्च ये ताम्रविलोचनाश्च। ते पूजिता वेश्मनि मानवाना सौख्यानि कुर्वन्ति यश श्रियश्चेति ॥ पुरोडाशे ॥ न। छागीदुग्धे ॥ छ्यति। छो०। छायते छिद्यते वा। छापूछिभ्य किदिति गन् ॥ त्रि। छाग च्छाग्यो.सम्बन्धिनि ॥ मत्स्यविशेषे ॥ यथा। श्वेतं सुपाकं समदीर्घवृत्तमिति प्रशस्तकं छागलकं वदन्ति। गले त्रिकवाट किसलस्पृष्टे कपाट सुपथ्यो रुचिदोषलप्रद इति ॥

छागण। पु। करीषाग्नौ। गोठेकी आग इतिभाषा ॥

छागभोजी। पु। वृके ॥ त्रि। छागभक्षके ॥

छागरथ:। पु। अग्नौ ॥ छागोरथेऽस्य ॥

छागल। पु। छागे ॥ छागलएव। प्रज्ञाद्यण् ॥ आत्रेये ऋषिविशेषे ॥ छगलस्या पत्यम्। विकर्णशुङ्गच्छगलादिष्यण् ॥

छागलक'। पु। अजे। स्तुभे। वर्करे। छागे ॥ स्वार्थेक' ॥

छागलाद्यम्। न। भैषज्यरत्नावल्युक्ते भिषजोक्तविशेषे ॥

छागलान्त्रिका। स्त्री। वृद्धदारकवृक्षे ॥

छागलान्त्री। स्त्री। वृके ॥

छागवाहन। पु। अग्नौ ॥

छागिका। स्त्री। छाग्याम् ॥ स्वार्थेक:। केण इति ह्रस्व ॥

छागी। स्त्री। अजायाम्। छागमातरि ॥ छागात् जातेरितिङीष् ॥

छागीदुग्धम्। न। अजाक्षीरे ॥ छागं कषायं मधुर शीत ग्राहि पयो लघु। रक्तपित्तातिसारघ्न क्षयकासज्वरापहम् ॥ अजानांलघुकायत्वात्नानाद्रव्यनिषेवणात। नात्यम्बुपानाद्व्यायामात् सर्वव्याधिहरंपय ॥

छात। त्रि। छिन्ने ॥ दुर्बले ॥ छायतेस्म। छो० क्त। छ्यतिस्यवा। गत्यर्थेतिक्त। शाछोरन्यतरस्यामितीत्वा भाव ॥

छात्र। पु। अन्तेवासिनि। शिष्ये ॥ गुरुदोषाच्छादन छत्रम्। तच्छील मस्य। छत्रादिभ्योण ॥ न। मधुप्रभेदे ॥ वरटा, कपिला पीता प्रायोहिमवतोवने। कुर्वन्ति छत्रकाकारंतज्जछात्रमधुस्मृतम् ॥ छात्रकपिलपीतस्यात् पिच्छिलशीतलगुरु। स्वादुपाक कृमिश्वित्ररक्तपित्तप्रमेहजित् ॥ भ्रमतृण्मोहविषहृत्तर्पणगुणाधिकम् ॥

छात्रकम्। न। छात्रेमधुनि ॥ यथा। छत्राकारन्तुपटल सरघा पीतपिङ्गला। या कुर्वन्तितदुत्पन्नमधुच्छा

चवमीरितम् ॥ श्विन्नमेच्छ्रमिन्नञ्च विद्याच्छाब गुणोत्तरम् ॥

छागखण्ड । पु । पदार्थविदि । श्लोका यपदवेत्तरि ॥

छात्रदर्शनम् । न । हैयङ्गवीने ॥ इति शब्दचन्द्रिका ॥ शिष्यावलोकने ॥

छात्रादिनिलय' । पु । मठे ॥ छात्रो ऽन्तेवासी आदिर्येषां परिव्राजकचप णकादीनाम् तेषांनिलय ॥

छादनम् । न । दले । पत्रे ॥ आच्छादने ॥ अन्तर्द्धाने ॥ पु । नीलाम्लान वृक्षे ॥

छादित' । त्रि । संवृते । आच्छादिते ॥ यथा । घनतरघनवृन्दैश्छादितौ पुष्पवन्तौ विश्वद्गुट ॥ छाद्यतेस्म । छद् ण्वादान्तःतपचेसाधु ॥

छादिषेयम् । न । तृणे ॥ छदिषे इदम् । छदिरुपधिवलेर्ढञ् ॥

छाद्मिकः । त्रि । कापटिके । व्याजेन व्यवहर्त्तरि ॥ छद्मना चरति । ठक् ॥

छान्दस । पु । श्रोत्रिये । वेदाध्ययन कर्त्तरि । वेदवेत्तरि ॥ छन्दोधीते वेत्तिवा । पचे तदधीतेतद्वेदेत्यण् ॥ छन्दसो व्याख्यानस्तत्र भवोवा । छन्दसोयदणौ विच्चण् । यतितु छन्दस्य' ॥ त्रि । छन्दस्सम्बन्धिनि ॥

छान्दोग्यम् । न । छन्दोगानां धर्मे आम्नाये समूहेच ॥ चरणेभ्योधर्मवदिति छन्दोगौक्थिकेतिञ्य ॥ सामवेदो पनिषदि ॥

छाया । स्त्री । आतपाभावे । आवानु गायाम् । श्यामायाम् ॥ प्रतिबिम्बे ॥ अर्कयोषिति । सत्त्वाप्रतिकृतौ ॥ पालने ॥ उत्कोचे ॥ कान्तौ ॥ स च्छोभायाम् ॥ पङ्क्तौ ॥ तमसि ॥ अतिधृतिसप्तकोनविंशाचरा दत्ति विशेषे ॥ यथा । भवेत् सैवच्छाया तयुगगयुतास्यादृश्चादशान्ते यदा ॥ सैव मेघविस्फूर्जितैवेत्यर्थ । यथा । अभीष्टजुष्टोयो वितरति लसद्दो श्चारुशाखोज्ज्वल स्फुरन्नानारत्नस्त वकिततनु शिखाशुकालम्बित । न यस्माश्छिच्छाया सुपमतवतास्ता रतीशातप स्तनोतिप्रोत्ताप स जग दवतात्क सारिकल्पद्रुम ॥ इति । छो० । श्याच्छयेतिण । आतोयुक् ॥ यदा । माच्छासंसिभ्योय ॥ साहृश्ये ॥

छायाकर । त्रि । छत्रधारे । छाताधार इतिभाषा ॥

छायातनय । पु । शनैश्चरे ॥ छायाया स्तनय ॥

छायातरु । पु । स्थिरच्छायवृक्षे ॥

छायात्मज । पु । शनिग्रहे ॥

छायापथ । पु । आकाशे ॥ देवपथे ।

नभ सरिति ॥ स्वातीपथे ॥ छाया पथोनाम ज्योतिश्चक्रमध्यवर्त्तीकश्चि त्तिरश्चीनोऽवकाश इति मल्लिनाथ ॥

छायापुत्र । पु । मन्दे । शनौ ॥

छायापुरुष । पु । आकाशे दृष्टव्ये नि जच्छायारूपे पुरुषे ॥ तदवलोकन विधिर्योगप्रदीपिकायां द्रष्टव्य ॥

छायाभृत । पु । चन्द्रे ॥

छायामित्रम् । न । आतपत्रे । छत्रे ॥

छायामृगधर । पु । विधौ । चन्द्रे ॥

छायावृक्ष । पु । छायाप्रधाने वृक्षे ॥ शाकपार्थिवादि ॥

छायासुत । पु । शनौ ॥

छि । पु । गर्हायाम् ॥ इत्येकाक्षर-कोष ॥

छिक्कनी । स्त्री । चवक्षार । नकछिक नीतिख्यातौषधौ ॥ छिक्कनी कटुका रुच्या तीक्ष्णोष्णा वह्निपित्तकृत् । वा तरक्तहरी कुष्ठकृमिवातकफापहा ॥

छिक्कर । पु । मृगविशेषे ॥ मांसं छि क्करज कृत्स्नमाज्ये तप्ते सुभृष्टकम् । दधिसैन्धवहिङ्ग्वाढ्यं सुधूपेनाति धू पितम् ॥ कषाय मधुर स्वादु कफ पित्तानिलापहम् । विपाके कटुक प्रो क्तं विशेषेणाग्निवर्द्धनम् ॥

छिक्का । स्त्री चुते ॥ छींक इति भाषा ॥

छिक्किका । स्त्री । छिक्कन्याम् ॥

छित । त्रि । लूने ॥ छायते स्म । छो० । क्त । शाछोरन्यतरस्यामितीत्त्वम् ॥

छित्ति । स्त्री । छेदे ॥ छिदे ॥ छिद्यते छेदन वा । छिदिर्० । स्त्रियांक्तिन् ॥ पु । करज वृक्षे ॥

छित्वर । त्रि । धूर्त्ते ॥ वैरिणि ॥ न । छेदनद्रव्ये ॥ छिनत्ति । छिदिर्० । छित्वरच्छत्वरेत्यादिना ष्वरच निपातनाद्गुकारस्यत करोगुणाभावश्च ॥

छिद् । त्रि । छेदनकर्त्तरि ॥ छिनत्ति । छिदिर्० । क्विप् ॥

छिदकम् । न । वज्रे ॥

छिदा । स्त्री । छेदने । द्वैधीकरणे ॥ छिदिर्० । षिद्भिदादिभ्योऽङ् । टाप् ॥

छिदि । स्त्री । कुठारे ॥ शस्त्रे ॥ छिन त्ति । छिदिर्० । इन् ॥ कृगृशृपृकुटी त्यादिना इ किद्वा ॥

छिदिर । पु । पावके ॥ रज्जौ ॥ कर वाले ॥ परश्वधे ॥ छिनत्ति । छिदि र्० । इषिमदिमुदिखिदिच्छिदी त्यादिनाकिरच् ॥

छिदुर । त्रि । वैरिणि ॥ धूर्त्ते ॥ न । छेदनद्रव्ये ॥ छेदके ॥ छिनत्ति त च्छीलः । छिदिर्० । विदिभिदि च्छिदे कुरच् ॥

छिद्र । न । दूषणे ॥ रन्ध्रे ॥ निम्नं

छिद्रानुसार्येरे. ॥ अवकाशे ॥ गर्त्ते ॥ अष्टमभवने ॥ छिद्रयते । छिद्रभेदने । घञ् । यद्वा । छिद्यते । छिद्रि° । स्फायितञ्चीतिरक् ॥

छिद्रवैदेही । स्त्री । गजपिप्पल्याम् ॥

छिद्रान्तः । पु । नले । पोटगले ॥

छिद्राफलम् । न । मायाफले ॥

छिद्रित । त्रि । विद्धे । कृतच्छिद्रे । वेधिते । वींधा इति भाषा ॥ छिद्रतेस्म । छिद्र° अदन्त । क्त ॥

छिन्न' । त्रि । कृत्ते । छाते । लूने । कृतच्छेदने । काटा चीरा फाडा इति भाषा ॥ छिद्यतेस्म । छिदिर् ° । क्त ॥

छिन्नग्रन्थिनिका । स्त्री । त्रिपर्णिकायाम् ॥

छिन्नद्वैध । त्रि । अवधादिपरिपाकेण निष्पन्नसर्वसंशये ॥

छिन्नपत्री । स्त्री । अम्बष्ठायाम् ॥

छिन्नमस्ता । स्त्री । महाविद्याप्रभेदे । प्रचण्डचण्डिकायाम् ॥ छिन्नमस्तस्या ॥ त्रि । छिन्नमस्तके ॥

छिन्नरुह । पु । तिलकवृक्षे ॥

छिन्नरुहा । स्त्री । अमृतायाम् । गुडूच्याम् ॥ छिन्नारोहति । रुह° । इगुपधेतिक । ङ्यापोरितिह्रस्व ॥ शल्लक्याम् ॥ स्वर्णकेतक्याम ॥

छिन्नवेशिका । स्त्री । पाठायाम् ॥

छिन्ना । स्त्री । छिन्नमस्तायां देव्याम् ॥ गुडूच्याम् ॥ इक्ष्वर्याम् । पुंश्चल्याम् ॥ क्तान्ताच्छिदेष्टाप् ॥

छिन्नोद्भवा । स्त्री । गुडूच्याम् । गिलोय इतिविख्यातायाम् ॥

छिलिहिण्ट । पु । पातालगरुड्यामोषधौ ॥ छिलिहिण्ट परवृष्य कफघ्न पवनापह ॥ छिलिहिण्डोपि ॥

छुच्छुका । स्त्री । छुच्छुन्दर्याम् ॥

छुच्छुन्दरी । स्त्री । गन्धमुष्याम् । छुछूंदर इतिभाषा ॥

छुद्दम् । न । प्रतीकरणे ॥ रश्मौ ॥

छुप । पु । क्षुपे ॥ स्पर्शने ॥

छुरणम् । न । विलेपने ॥

छुरा । स्त्री । सुधायाम् । चूर्णे । लेपनद्रव्ये । चूना इति भाषा ॥

छुरिका । स्त्री । शस्त्रविशेषे । असिपुत्र्याम् ॥ छुरति । छुरच्छेदने । क्षुन् ॥ इगुपधेतिके कन् वा । इत्वम् ॥

छुरित । त्रि । खचिते ॥ रञ्जिते ॥ लिप्ते ॥

छुरी । स्त्री । छुरिकायाम् ॥

छूरिकापत्री । स्त्री । श्वेतायाम् ॥

छूरी । स्त्री । छुरिकायाम् ॥ इतिभरत ॥

छेक । त्रि । गृह्यके । गृहाश्रिते मृगे पक्षिणिच ॥ नागरे । विदग्धे ॥ छ

ति छायते वा। छो०। वा० डे कन्॥
छेका। स्त्री। मत्तायाम्॥
छेकानुप्रास। पु। अलङ्कारविशेषे॥ सोनेकस्य सकृत् पूर्वं। अनेकस्य अर्थोद्व्यञ्जनस्य सकृदेकवार साट्टश्य छेकानुप्रास। उदाहरण यथा। त तो ऽनयापरिस्पन्दमन्दीकृतवपु श्री। दभेकामपरित्यामकामिनीग ण्डपाण्डुताम्॥
छेकोक्ति। स्त्री। वक्रोक्तौ॥ छेकाया उक्ति॥
छेत्ता। त्रि। छेदनकर्त्तरि॥ छिनत्ति। छिदर्०। तृच्॥
छेदः। पु। खण्डे॥ छेदने॥ छेदनम् छिद्यते वा। छिदिर्०। घञ्॥
छेदनम्। न। भिदि॥ कल्पने। वर्द्धने। कर्त्तने। अवयव द्विधाकरणे। छाँगना काटना इति भाषा॥ छिदिर्०। ल्युट्॥
छेदनीय। पु। कतकवृक्षे॥ त्रि। छेद्ये॥ छेदितु योग्य। अर्हे कृत्यतृच श्चेति अनीयर्॥
छेदवत्। त्रि। विच्छेदयुक्ते॥
छेदि। त्रि। छेत्तरि॥ छिनत्ति। छिदिर्०। कृपिभिदच्छिदिविदिच्छिदि कीर्त्तिभ्यश्चेति इन्॥
छेदितः। त्रि। छिन्ने॥
छेद्य। त्रि। छेदनीये॥ परिच्छेद्ये॥ ॥ छेत्तु शक्य। शकिलिङ् चेति श क्या ऽर्थे कृत्य॥
छेमण्ड। पु। पितृहीने। छोंडा छोरा इत्यादिभाषा॥ इत्यप्यादिकोष॥
छेलक। पु। छागे॥
छेलिका। स्त्री। आज्ञायाम्। छाग्याम्॥
छलु। पु। सोमराज्याम्॥
छेदिक। पु। वेतसे॥ छिन्नमरुह त्वात् छेदनिच्यमर्हति छेदादिभ्यो नित्यमितिठञ्॥
छोटिका। स्त्री। तर्ज्जन्यङ्गुष्ठशब्दनो। अङ्गुलिध्वनो॥
छोटी। पु। कैवर्त्ते। जालिके॥
छोरणम्। न। परित्यागे। छोडना इति भाषा॥ इतित्रिकाण्डशेष॥
छोलङ्ग। पु। मातुलुङ्गे। टावानेबु इतिगौड भाषा॥
छोहारा। स्त्री। द्वीपान्तरखर्जूरिकायाम्॥ खर्जूरी गोस्तनाकारा पर द्वीपादिहागता। जायते पश्चिमे दे शे सा छोहारेतिकीर्त्यते॥

ज

•••०•••

ज। पु। जकारे॥ मृत्युञ्जये॥ जन्मा

म् ॥ तातमाचे ॥ जनार्दने ॥ वेगे ॥ भुक्तौ ॥ विषे ॥ गुरुमध्यगे(।ऽ।) ॥ त्रि। वेगिते ॥ जेतरि ॥ जायते। जनी॰। अन्येभ्योपिदृश्यतइतिड ॥

जकुट । पु । मलयाचले ॥ शुनि ॥ ॥ न । वार्त्ताकुपुष्पे ॥

जक्षणम् । न । भक्षणे ॥

जग्धि । स्त्री । भोजने ॥

जगच्चक्षु । पु । सूर्ये ॥

जगत् । पु । वायौ ॥ त्रि । जङ्गमे ॥ न । विश्वस्मिन् । लोके । सचराचरे प्रपञ्चभूते भोगोपयोगिपरिकरसहिते मायामये जन्तुचक्रे ॥ यथा । न निरूपयितु मनघा विस्पष्ट भासते यथा । सामायेतीन्द्रजालादौलोका सम्प्रतिपेदिरे ॥ स्पष्टं भातिज गच्चेदमशक्यं तन्निरूपणम् । माया मय जगत्तस्मादीक्षस्वापक्षपाततः ॥ यथा। यदुपते क्वगता मथुरापुरी रघुपते क्वगतोत्तरकोशला । इति विचिन्त्य कुरुष्व मनःस्थिरं न सदिद जगदित्यवधारयेति रूपसनातनगोस्वामिनौ ॥ गच्छति । गम्लृ गतौ । द्युतिगमिजुहोतीनांद्वेचेति क्विपि द्वित्वे गमःक्वाविति मलोपे तुकि जगत् जगतौ । यद्वातुवर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्चेति व्युत्पादितं तदा उभिदचामिति नुमि जगन्ति जगन्ता विन्ध्यादिबोध्यम् ॥ साम विशेषे ॥

जगती । स्त्री । भुवने । लोके । जगति ॥ क्ष्मायाम् ॥ जने ॥ जम्बूवप्रे ॥ वास्तुविशेषे ॥ छन्दोविशेषे । द्वादशाक्षरायांवृत्तौ ॥ गच्छति । गम्लृ॰। वर्त्तमाने पृषदिति साधु । शतृवद्भावादुगितश्चेतिङीप् ॥ यद्वा । द्युतिगमिजुहोतीनां द्वेचेति क्विप् । गमःक्वाविति मलोपे तुक् ॥

जगतीधर । पु । भूधरे ॥ जगत्या धर ॥

जगत्कर्त्ता । पु । ब्रह्मणि ॥ जगत. कर्त्ता ॥

जगत्पति । पुं । परमेश्वरे । हिताहितोपदेशकवेदमयत्वेन सर्वस्य जगतः पालयितरि ॥ जगतां पति ॥

जगत्प्रभु । । पु । नारायणे ॥ जगत् जङ्गमाजङ्गमम् तस्यप्रभु स्वामी ॥ वुद्धे ॥

जगत्प्राण । पु । समीरणे । वायौ ॥ जगतां प्राण ॥

जगत्साक्षी । पु । सूर्ये ॥ जगतांसाक्षी॥

जगदम्बा । स्त्री । जगज्जनन्याम् । गौर्याम् । पार्वत्याम् ॥ जगताम्अम्बा ॥

जगदम्बिका । स्त्री । दुर्गायाम् ॥

जगद्धात्री । स्त्री । दुर्गाप्रभेदे ॥

जगदाधार' । पु । वायौ ॥ काले ॥ त्रि । जगतामाश्रये ॥ जगताम् आधार.॥

जगदीश । पु । विष्णौ ॥ जगतामीश'॥

जगद्गौरी । स्त्री । मनसादेव्याम् ॥

जगद्बल । पु । वायौ ॥ जगतो बलयेन॥

जगद्योनि. । पु । सदाशिवे ॥ विधातरि ॥ विष्णौ ॥ स्त्री । प्रकृतौ ॥ भूमौ ॥ जगतो योनि ॥

जगद्रूपम् । न । नामरूपात्मके विश्वस्मिन् ॥ अस्ति भाति प्रियरूप नाम चेत्यंशपञ्चकम् । आद्य त्रय ब्रह्मरूप जगद्रूप ततो द्वयम् ॥

जगद्वहा । स्त्री । धरित्र्याम् ॥

जगद्विनाश । पु गान्ते ॥ जगता विनाशो यस्मिन् जगच्चा विनाश ॥

जगनु । पु । जन्तौ ॥ वैश्वानरे ॥

जगन्नाथ' । पु । विष्णौ ॥ पुरुषोत्तमक्षेत्रे। उड्यानपीठस्थे भैरवे ॥ उड्यानेविमलाक्षेत्रे जगन्नाथस्तु भैरवश्च-त्यागमशास्त्रम्॥ शालग्रामो हरेर्मूर्त्तिर्जगन्नाथश्च भारतम् । कलौ देश सहस्त्रान्तेयथैवत्यक्षाक्षरे पदमिति ब्रह्मवैवर्त्तम् ॥ वैशाखस्यामले पक्षे अष्टम्या पुष्ययोगत । कृता प्रतिष्ठा भोविप्रा शोभने गुरुवासरे ॥ कृता ब्रह्मणातिशेष. ॥ महापवित्र क्षिहरे

निवेदित नियोजयेद् य पितृदेवकर्मसु । तृप्यन्ति तस्य पितर सुराश्च प्रयान्तिलोक मधुसूदनस्येति महाप्रसादमाहात्म्यस्य वचनम् ॥

जगन्निवास । पु । जगतामाधारे सर्वाश्रये परात्मनि ॥ जगतांनिवास ॥

जगन्नु' । पु । जगन्वर्थे ॥

जगर । पु । कवचे । सन्नाहे ॥ जगता गह्यते । प्रातिपदिकाद्धात्वर्थे इति णिच् । बाहुलकादर । आगर्त्ति । अच् । पृषोदरादिर्वा ॥

जगल । पु । मदनद्रुमे ॥ मेदके । सुराकल्के ॥ पिष्टमद्ये ॥ त्रि । धूर्त्ते । कितवे ॥ भृश गलति गल्यते वा । गलअदने । यङ्लुगन्तात् अच् । सन्नापूर्वकत्वाद्दीर्घो ऽकित इति न दीर्घ ॥

जग्धम् । त्रि । भुक्ते । भक्षिते ॥ अद्यतेस्म । अद० । क्त । अदोजग्धिर्ल्यप्तिकितीतिजग्धि । इकारउच्चारणार्थ । धत्वम् । झरोझरिसवर्णे ॥

जग्धतृण । त्रि । भक्षिततृणे ॥ जग्धं तृणमनेन ॥

जग्धि । स्त्री । विघसे । भोजने । जेमने ॥ अदनम् । अद० । स्त्रियांक्तिन् । अदोजग्धिर्ल्यप्तिकिति ॥

जघनम् । न । स्त्रिय श्रोणिपुरोभागे

॥ कटौ ॥ हन्यते । हन्ते. शरीराव यवेदेशेत्यत् ॥ यद्वा । वक्रं हन्ति । यङ्लुगन्तादच् । अनित्यमागमशा-स्त्रमित्यभ्यासस्यनुगतोनुनासिका न्तस्येतिनुक्न ॥

जघनकूपौ । पु । कुकुन्दरयोः ॥ द्विव चनान्तोयमिति हलायुध ॥

जघनचपला । स्त्री । मात्रावृत्तभ्यायौ प्रभेदे ॥ यथा । प्राक्प्रतिपादितम र्द्धं प्रथमेचरमेदलेतुचपलाया । स च्याश्रयेत सोक्ता विशुद्धधीभि र्जघ नचपला ॥ यथा । कृष्ण शृङ्गारपटु यौवनमदचञ्चल सुललिताङ्ग । आसीद्व्रजाङ्गनाना मनोहरोजघ नचपलानामिति ॥

जघनेफला । स्त्री । काकोदुम्बरिका याम् । कठूम्बरी इति भाषा ॥ जघ नेफलमस्याः । अमूर्द्धेतिसप्तम्या' अ लुक् ॥

जघन्य । त्रि । चरमे ॥ गर्हिते ॥ ध-मोर्थकामा समभेवसेव्या योह्येक सक्त सजनोजघन्य ॥ अल्पे ॥ पु । शूद्रे ॥ न । मेहने । शिश्ने ॥ अश्ले षा शतभिषा आर्द्रा स्वाति ज्येष्ठा भरणी षणुनक्षत्रेषु ॥ जघनेभव । दिगादित्वात् यत् शरीरावयवत्वा द्वा ॥ यद्वा । कुटिलं हन्यते । हन्ते यङ्लुगन्तादचोयत् । अनित्यमागम शास्त्रमिति नुगतो ऽनुनासिकान्त-स्येति ननुक् ॥ जघनमिववा ।-शा०य. ॥

जघन्यज । पु । स्त्री । वृषले । शूद्रे ॥ त्रि । कनिष्ठे ॥ जघन्येऽवरकाले जा त । सप्तम्यांजनेर्ड ॥ जघन्यात् त्या ज्यात् जात' । जनी० । पञ्चम्यामजा ताविति ड ॥

जघन्यभम् । न । जघन्यसंज्ञकेषु ष ट्सु नक्षत्रेषु ॥ जघन्यञ्चतत्भञ्च ॥

जघ्नि । पु । हननयोग्यास्त्रे ॥

जघ्नु । त्रि । घातके । हन्तरि ॥ हन्ति । हन० । कुर्भ्रश्चेतिचकारात् अन्य तोपि कुर्द्वातोर्द्वित्वञ्च ॥

जङ्गम । त्रि । स्थावरेतरे । चरे । च रिष्णौ ॥ वक्रंगच्छति । गत्यर्थानां नित्यंकौटिल्यइति यङ्भृशार्थेवा । पचाद्यच् ॥

जङ्गमकुटी । स्त्री । छत्रे ॥ वारित्रा-याम् ॥

जङ्गमगुल्म । पु । प्रचारिपदातिसमू हे । गल इति भाषा ॥

जङ्गमेतर । त्रि । स्थावरे ॥

जङ्गल । पु । न । पिशिते ॥ त्रि । नि जनस्थाने ॥ वनप्रधानदेशे ॥

जङ्गाल । पु । सेतौ ॥ रोधविशेषे ।

जगत्याहृत्सिख्याते ॥ इति जटाधरः ॥

जङ्घम् । न । विषे ॥ इति चिकाण्डशेष ॥

जङ्घन्यमान । त्रि । अतिशयेन हन्यमाने । भृशपीड्यमाने ॥

जङ्घा । स्त्री । प्रसृतायाम् । गुल्फोर्द्ध जान्वधोभागे । टङ्गायाम् । टाँग जाघ इतिच भाषा ॥ जायन्ते रोमाण्यस्याम् । जनी० । अच् । तस्य जङ्घश्च ॥ यद्वा । जङ्घन्यते कुटिलं गच्छति । हन्तेर्यङ्लुगन्तात् अन्येभ्योपीति ड' ॥ टाप् ॥

जङ्घाकरिक । चि । धावके । जाङ्घिके । जङ्घाजीविनि ॥ जङ्घासाध्यस्वादुप्रचारात् गतिर्जङ्घा । सैवकरो राजदेयो भागः आकरः श्रेष्ठो वा । जङ्घाकरो ऽस्यास्ति । अतइनिठनाविठन् ॥ जङ्घैव करीहस्ती यस्येति वा । कन् ॥

जङ्घाचाणम् । न । जङ्घासन्नाहे । मङ्चुणे ॥

जङ्घाल । त्रि । वेगिनि । अति जवे ॥ अतिशयिता जङ्घास्य ॥ सिध्मादित्वात् लच ॥ पशुविशेषाणागणे ॥ हरिणैणाकुरङ्गर्ष्यपृषतन्यङ्कुशम्बरा । राजीवोपिच मुण्डीचेत्याद्या जङ्घालसञ्ज्ञका ॥ हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः । कुरङ्गईषत्ताम्रः स्याद्धरिणाकृतिकोमहान् ॥ ऋष्यो नीलाण्डको लोके स रोभ इतिकीर्त्तितः । पृषतश्चन्द्रबिन्दुः स्याद्धरिणात्किञ्चिदल्पकः । न्यङ्कुर्बहुविषाणोथशम्बरोगवयान् महान् । राजीवस्तुमृगोज्ञेयोराजीभिः परितोवृतः ॥ योसृग भृङ्गहीन स्यात् समुण्डीति निगद्यते ॥ जङ्घाला' प्रायशः सर्वेपित्तश्लेष्महरा' स्मृता' । किञ्चिद्वातकराश्चापिलघवोवलवर्द्धना ॥

जङ्घिल: । चि । जङ्घाले ॥ अतिशयिते जङ्घेअस्य । पिच्छादित्वात् इलच् ॥

जज' । पु । योधे ॥ जजति । जज्युद्धे । पचाद्यच् ॥

जञ्जपूक । त्रि । वाचाले ॥ पुन पुन भृशंवा गर्हितं जपति तच्छील । यजजपदशायड इत्यूक

जञ्जभ्यमान । त्रि । गात्रविनामेन विदारितमुखेपुरुषे ॥ इति कर्ममीमांसा ॥

जटा । स्त्री । केशविकारे । लग्नकचे । व्रतिनां शिखायाम् । सटायाम् ॥ जायते जन्यतेवा । जनेष्टन् लोपश्चेति टन् धातोरन्त्यस्य लोपश्च ॥ मूले । शिफायाम् । जड इति भाषा ॥ मांस्याम् ॥ वेदपाठविशेषे ॥ सामगा-

नोपकरणे ॥ रुद्रजटायाम् । श्रताध योम् ॥ जटति । जटसङ्घाते । क्वुन् । टाप् ॥ जटाऽस्त्यस्याः । अर्शआद्यच् ॥
जटाजूट । पु । जटासमूहे ॥ जटा नां-जूटोबन्धः ॥
जटाज्वाल । पु । प्रदीपे ॥
जटाटङ्क । पु । शिवे ॥ जटायाटङ्को-यस्य ॥
जटाटीर । महादेवे । शिवे ॥
जटाधर । पु । महेश्वरे ॥ बुद्धभेदे ॥ धरति । धृञ्० । पचाद्यच् । जटानांधर ॥ त्रि । जटाधारिणि ॥ जटाधरः सन् जुहुधीह पावकम् ॥
जटामांसी । स्त्री । नलदे । मांसाम् । सुगन्धिद्रव्यविशेषे ॥
जटायु । पुं । अरुणपुत्रे सम्पाते क नीयसि दशरथसखे गृध्रविशेषे ॥ ॥ जटायाति प्राप्नोति । या० । मृ० कु ॥ गुग्गुलौ ॥
जटायुध । पु । गुग्गुलौ ॥
जटायुष । पु । जटायौ ॥ गुग्गुलौ ॥ जटाआयुरस्य ॥
जटाल । पु । कचूरे ॥ गुग्गुलौ ॥ मुष्कके ॥ वटे ॥ त्रि । जटाधरे । जटावति ॥ जटाऽस्त्यस्य । प्राणिस्थाद्दा-तोलजन्यतरस्याम् ॥
जटाला । स्त्री । जटामांस्याम् ॥ टाप्॥ ।
जाटावान् । त्रि । जटिले ॥
जटावती । स्त्री । जटामांस्याम् ॥
जटावल्ली । स्त्री । गन्धमांस्याम् ॥ रुद्रजटायाम् ॥
जटि । पु । प्लक्षद्रुमे ॥ जटायाम् ॥ समूहे । जटति । जट० सर्वधातुभ्य इन् ॥
जटित । त्रि । खचिते ॥
जटी । पु । प्लक्षागमे । पाकरि इति भाषा ॥ सर्जविशेषे ॥ त्रि । जटायुते ॥ मत्वर्थे व्री० इनि ॥
जटिल । पु । जटावति ब्रह्मचारिप्रभेदे ॥ सिंहे । केशरिणि ॥ त्रि । जटायुक्ते ॥ यथा । यच्चिन्तितं तदिह दूरतर प्रयाति यच्चेतसा नगणितं तदिहाभ्युपैति । प्रातर्भवामि वसुधाधिपचक्रवर्त्ती सोऽहं व्रजामि विपिने-जटिलस्तपस्वीति ॥ जटाऽस्त्यस्य । पि० इलच् ॥
जटिला । स्त्री । जटामांस्याम् ॥ पिप्पल्याम् ॥ वचायाम् ॥ दमनकवृक्षे ॥ राधिकाश्वश्र्वाम् ॥ टाप् ॥
जटी । स्त्री । प्लक्षवृक्षे ॥ जटामांस्याम् ॥ कृदिकारादिति ङीष् ॥
जटुल । पु । पिप्रौ । देहस्थेकृष्णलच्छ्मणि । जडुल इति भाषा ॥ जटति । जट० । बाहुलकादुलच् ॥

जठर । पु । न । कुक्षौ ॥ त्रि । वृद्धे ॥ कर्कशे । कठिने ॥ जायतेऽस्मिन् जन्तुर्मलो वा । जनेररष्टचेत्यर । पृषोदरादि ॥

जठरनुत् । पु । आरग्वधे ॥

जठरामय । पु । जलोदररोगे ॥

जड । पु । स्वनाम्ना प्रसिद्धे पुरुषे ॥ यथा । इष्टवाऽनिष्टवा सुखदुःखवा नवेत्ति योमोहात् । परवशग सभवेदिह नाम्नाजडसंज्ञक पुरुषइति ॥ वेदग्रहणासमर्थे । मूर्खे ॥ न । वारिणि ॥ सीसके ॥ त्रि । हिमग्रस्ते ॥ मूके ॥ अप्रज्ञे । वुद्धिविकले ॥ अचिदात्मघटादीनां यत्स्वरूपंजडहितत् ॥ अनुग्रमे ॥ जलति घनीभवति । जलघातने । अच् । डलयोरेकत्वम् ॥

जडक्रिय । त्रि । चिरक्रिये । दीर्घसूत्रिणि ॥ जडाक्रियाऽस्य ॥

जडता । स्त्री । जाड्ये । सैमिष्ये । अपाटवे ॥ विरहदुःखेनजीवनमात्रस्थितौ ॥

जडभरत । पु । ऋषभपुत्रे । राजि ॥ यस्मान्नेदं भारतं वर्षमभूत् ॥

जडा । स्त्री । शूकशिम्व्याम् ॥ भूम्यामलक्याम् । अजायाम् ॥ जडयति । तत्करोतीतिणिजन्तात् अच् । टाप् ॥

जडिमा । पु । जडतायाम् ॥ यथा । इष्टाऽनिष्टापरिज्ञान यत्र प्रश्ने ष्वऽनुत्तरम् । दर्शनश्रवणाभावो जडिमा सोऽभिधीयते ॥ जडस्यभाव । इमनिच् ॥

जडुल । पु । जटुले ॥ जलति । जल । वा० उलच् । डलयोरैक्यम् ॥

जतु । न । अलक्ते । लाक्षायाम् ॥ जायते । जनी० । फलिपाटीत्यु तोऽन्तादेशश्च ॥

जतुकम् । न । हिङ्गुनि ॥ लाक्षायाम् ॥ जटुले ॥ जन्निव । इवेप्रतिकृताविति कन् ॥

जतुका । स्त्री । अजिनपत्रायाम् । चर्मचटिकायाम् ॥ गन्धद्रव्यविशेषे । जन्याम् ॥ पर्पट्याम् ॥ मालवदेशप्रसिद्धे लताविशेषे । तिर्यक्फलायाम् । निशान्धायाम् । जनेष्टायाम् ॥ कन्नन्तात टाप् ॥

जतुकारी । स्त्री । जतुकालतायाम् ॥

जतुकृत् । स्त्री । जय म । चक्रवर्त्तिन्याम । गन्धद्रव्यविशेषे । चक्रवत इति २ ।षा ॥ जतुकरोति । क्विप् ॥

जतुकृष्णा । स्त्री । पर्प्पट्याम् ॥

जतुणी । स्त्री । चर्मचटिकायाम् ॥

जतुत्रक । पु । नये । कृतोपकरणभेदे । पाशकगुटिकायाम् ॥

जतुमणि । पु । क्षुद्ररोगविशेषे ॥ यथा । समममुत्सन्नमरुजं मण्डलकफर क्तजम् । सहजं लक्ष्म चैकेषां लक्ष्यो जतुमणिश्च सः ॥ इति निदानम् ॥

जतुरस । पु । अलक्तके ॥

जतूका । स्त्री । अजिनपत्रायाम् ॥ जनीवृक्षे । चकवत इति भाषाप्रसिद्धे ॥ जायते आरोग्यमनया । जनी० । जतूकादयश्चेति निपातनात् क्वचिद्दिकिङिच्यपि नलोपः ॥

जत्रु । न । स्कन्धकक्षयोः सन्धौ । कण्ठस्याधोभागे स्थितयोरस्थ्नोः ॥ कक्षयोर्वक्षसः सन्धौ जत्रुणी समुदाहृते ॥ जायते बाहुरस्मात् । जनी० । जत्वादित्वात् रुप्रत्ययो नकारस्य तकारश्च ॥

जत्वश्मकम् । न । शिलाजतुनि ॥

जन । पु । लोके ॥ पृथग्जने । पामरे ॥ आत्मीयविवेकहीने ॥ महर्लोकोर्द्ध्वलोके ॥ जनोऽष्टकोऽव्यवच्छिन्नपितृजङ्गजनाश्रय ॥ जननं जन, जन्म । भावेघञ् । जनिवध्योश्चेति न वृद्धिः ॥ समुद्रस्य दैत्यविशेषेषु ॥ मार्कण्डेये मुनौ ॥

जनक । पु । पितरि ॥ मिथिलाधिपे विदेहे ॥ कारणे ॥ जनयति । जनी प्रादुर्भावे । ण्वुल् । जनिवध्यो

श्चेति न वृद्धिः ॥ त्रि । उत्पादयितरि ॥

जनकतनया । स्त्री ।
जनकनन्दिनी । स्त्री । } सीतायाम् ॥

जनकराजकूप । पु । तीर्थविशेषे ॥

जनकसुता । स्त्री । जानक्याम् ॥

जनकात्मजा । स्त्री । श्रीरामपत्न्याम् । सीतायाम् ॥ जनकस्य आत्मजा ॥

जनकारी । पु । अलक्तके ॥ नाम्नोऽयम् ॥ इति राजनिर्घण्टः ॥

जनङ्गम । पु । चण्डाले ॥ अधार्मिकान् जनान् गच्छति । जनेभ्यो गच्छतिवा । गमश्चेति खच् मुमागमः ॥

जनता । स्त्री । जनानां समूहे ॥ ग्रामजनबन्धुभ्यस्तल् । तलन्तं स्त्रियाम् ॥ जनत्वे ॥ भावे तल् ॥

जननम् । न । वंशे ॥ जन्मनि ॥ जन्यते । जनी० जनजनने वा । ल्युट् । कर्मणि ल्युट् ॥ दीक्षयाध्वरेच जमान स्य जन्मनि ॥ पुनर्वा एतमृत्विजो गर्भं कुर्वन्ति ये दीक्षयन्तीत्यादिश्रुते । मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने । तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनादिति मनुस्मृतेश्च ॥

जननि । स्त्री । जनीनामगन्धद्रव्ये ॥

जननी । स्त्री । मातरि । प्रसवाम् ॥ दयायाम् ॥ कटुकायाम् ॥ मञ्जिष्ठायाम् ॥ अलक्तके ॥ जटामांस्याम् ॥

जनीनामगन्धद्रव्ये ॥ जनयति । ज नी॰ कृत्यल्युटो बहुलमितिल्युट्। टित्वात् ङीप् ॥

जनपद । पु । देशे । नीवृति ॥ जन.प पद्यं यस्तु यत्र ॥ जने ॥

जनपदी । पु । जनपदस्वामिनि ॥

जनप्रवाद । पु । कैालीने । वचनीय तायाम् । लोकापवादे ॥

जनप्रिय' । पु । धान्यके ॥ शोभाञ्जने ॥ त्रि । जनानां प्रीतिविषये ॥

जनमेजय । पु । परीक्षितराजस्य पुत्रे । पारीक्षिते ॥ पुरुराजपुत्रे ॥ जनमे जयति । एजन्तादेजेः कर्त्तरिखश् । जनशमुमागम. ॥

जनयिता । पु । ताते । पितरि ॥ जनय ति । जनी । तृच् ॥

जनयित्री । स्त्री । जनन्याम् । मातरि ॥ तृजन्तात् । ऋन्नेभ्योङीप् ॥

जनरव' । पु । लोकवादे ॥ यथा । परी वाद सत्यो भवति वितथोवापि म हतां तथा प्युच्चैर्धाम्नां हरतिमहि मान जनरव । तुलोत्तीर्णस्यापि प्र कटनिहताशेषतमसो रवेस्तादृक्- तेजो नहिभवति कन्यां गतवत ॥ इति वल्लभसेन ॥

जनलोक' । पु । महर्लोको परिभुवने । महर्लोकः स्थितेहूर्ध्वं मेककोटि प्रमाणत । कोटिद्वयेन संख्यातो जनोभूर्लोकतोजने ॥ निवसन्त्यम ला यत्रमानसा ब्रह्मणा सुताः । सन न्दनाद्या योगीन्द्रा सर्वेतेपूर्ध्वरेत स इतिकाशीखण्डम् ॥

जनवल्लभ । पु । श्वेतरोहितवृक्षे ॥ त्रि । लोकप्रिये ॥

जनवाद. । पु । जनप्रवादे ॥

जनवार्त्ता । स्त्री । लोकानां किंवद न्त्याम् ॥

जनश्रुति । स्त्री । सत्यानृतसाधारण लोकप्रसिद्धौ । किंवदन्त्याम् ॥ जने भ्य श्रूयते । श्रुश्रवणे । क्तिन् ॥

जनस्थानम् । न । दण्डकारण्ये ॥ दण्ड कारण्यस्थाश्रिके स्थानविशेषे ॥

जनातिग' । त्रि । लोकातिशयिनि ॥ जनमतिगच्छति । गम॰ । अन्यत्रा पीतिड ॥

जनान्त । पु । देशे । जिला इति पार स्य भाषा ॥ इति धनञ्जय' ॥

जनान्तिकम् । न । अप्रकाशे । अगोच रे ॥ त्रिपताकाकरेणाऽन्यानपवार्य न्तिये कथाम् । अन्योन्यामन्त्रणं यत् स्या ज्जनानातज्जनान्तिकम् ॥

जनार्द्दन । पु । नारायणे । विष्णौ ॥ सर्वैं साधुभिर्जनै. स्वाभिलषिताभ्युद यनि श्रेयससिद्धये अर्द्यते याच्यते

इति व्युत्पत्तौ अर्द्दतेर्यो आथीत् ख्रु ल्युटो बहुलमितिकर्मणिल्युट् ॥ यद्वा । जनन जन जन्म । तमर्द्दय ति इति जनार्द्दन । अर्द्दहिंसायाम् । नन्द्यादित्वाल्ल्यु ॥ जना समुद्र स्थादैत्यभेदा तेषामर्द्दन इतिवा॥ जनान् दुर्जनान अर्द्दयति छिनत्ती तिवा ॥

जनाश्रन । पु । वृके ॥

जनाश्रय । पु । मण्डपे ॥ जनानाले काना माश्रय. ॥

जनि । स्त्री । उत्पत्तौ । अभूतप्रादुर्भा वे ॥ नाऽसतो जन्मनायोग सत सत्त्वान्नचेष्यते । कूटस्थेविक्रियाना स्ति तस्माद् ज्ञानतोजनि ॥ जनन म् । जनी०। जनिघसिभ्यामिण् । ज निवध्योश्चेति वृद्धिनिषेध ॥

जनित । त्रि । उत्पादिते ॥

जनित्व । पु । पितरि ॥ जायतेऽस्मा त् । जनी०। जनिदेख्यादिना जने रित्वन् । जनित्वौ मातापितरौ ॥

जनित्वा । स्त्री । मातरि ॥ टाप् ॥

जनिनीलिका । स्त्री । महानील्याम् ॥

जनिमा । पु । जन्मनि ॥ जायते । ज नी०। जनिमृङ् भ्यामिमनिच् ॥

जनी । स्त्री । सीमन्तिन्याम् ॥ वध्वाम् । स्नुषायाम् ॥ जायते गर्भो वधूवा ऽस्याम् ॥ उत्पत्तौ ॥ ओषधीभेदे । जतूकायाम् ॥ जायते आरोग्यमन या । जनी०। जनिघसिभ्यामितीण् । जनिवध्योश्चेति नवृद्धि । कृदिका रादितिङीष ॥

जनुः । न । जन्मनि ॥ जननम् । जनी० । जनेरुसि ॥

जनू । स्त्री । जनने । जन्मनि ॥

जनेष्ट । पु । मुद्गरवृक्षे ॥

जनेष्टा । स्त्री । जतुकायाम् ॥ जातीपु ष्पे ॥ वृद्धिनामौषधौ ॥ हरिद्रायाम् ॥

जनोदाहरणम् । न । यशसि ॥

जनौ । पु । जनरक्षके ॥ जनान् अव ति । अव० । ज्वोरित्यूठ् । वृद्धि । ग्लौवत् ॥

जन्तु । पु । प्राणिनि । जननशीले ॥ अविद्यादि हृदयग्रन्थिभिर्युते ससारि णि । वस्तुस्वरूपादर्शिनि ब्रह्मादिस्त म्बपर्यन्ते प्राणिजाते ॥ जायते । ज नी० । कमिमनिजनीति तु ॥

जन्तुकम्बु । पु । कृमिशङ्खे ॥

जन्तुका । स्त्री । नाडीहिङ्गुनि । राम ठ्याम् ॥ लाक्षायाम् ॥

जन्तुघ्न । पु । वीजपूरे ॥ न । विडङ्गे ॥ हिङ्गुनि ॥ त्रि । जन्तुघातिनि ॥

जन्तुघ्नी । स्त्री । विडङ्गे ॥

जन्तुनाशनम् । न । हिङ्गुनि ॥ विडङ्गे ॥

जन्म | जन्मी

जन्तुपादप । पु । कोषाम्रवृक्षे ॥

जन्तुफल । पु । उदुम्बरे ॥ जन्तव फलेऽस्य ।

जन्तुमारी । स्त्री । निम्बूके ॥

जन्तुका । स्त्री । काश्मल्ये ॥

जन्तुहन्त्री । स्त्री । विडङ्गे ॥

जन्म । पु । न । जन्मनि ॥ जननम् । इ
  षुयुधीति बाहुलकात् जनेर्मक् ॥

जन्मकील । पु । हरौ ॥

जन्मद । पु । पितरि ॥

जन्मदा । स्त्री । मातरि ॥

जन्म । न । आद्यक्षणसम्बन्धे । उत्पत्तौ
  । जनने । शुभाशुभकर्मवशात् पौन
  पुन्येनतत्तद्विविधयोनिषूद्भवे । गर्भ
  वासयोनिद्वारनिस्सरणरूपे विग्रह
  भेदग्रहणे ॥ वासना कर्म विद्याच यय
  जन्मप्रयोजकम् ॥ उक्तञ्च सारकलि
  कायाम् । गर्भात् कोटिगुणं दुःख
  योनियन्त्रनिपीडने । सम्मूर्च्छितस्य
  जठराज्जायमानस्यदेहिन ॥ जाय
  मान पुरीषासृङ्मूत्रशुक्राविलान
  न । प्राजापत्येन वातेन पीड्यमाना
  स्थिबन्धन ॥ अधोमुखो वैक्रियतेप्र
  बलैः सूतिमारुतै. । क्लेशान्निष्क्रा
  न्तिमायातिजठरान्मातु रातुर इति
  ॥ प्रेत्यभावे ॥ सच अपूर्वदेहेन्द्रि
  यादिसम्बन्ध । निकायविशिष्टाभिर
  पूर्वाभिर्देहेन्द्रिय मनो ऽहङ्कारबुद्धि

वेदनाभि पुरुषस्याभिसम्बन्धो जन्म
  । नतु पुरुषस्य परिणाम तस्यापरि
  णामित्वात् । जन्मात्र नासत सत्त्व
  किन्तु देहेन सयुति । प्रादुर्भावो
  जनेरर्थ सतएवसयुज्यतेइत्युक्त ॥
  प्रथमताराथाम् ॥ जननम जायते-
  वा । जनी० । मनिन् ॥

जन्मबन्धविनिर्मुक्त । त्रि । जन्मात्मके
  न बन्धेन विशेषेणात्यन्तिकस्य क्षयेण
  न निरवशेषंत्यक्ते ॥

जन्ममास । पु । जन्मनोमासे ॥ आर
  भ्य जन्मदिवस यावत् त्रिंशद्दिनभवे
  त् । जन्ममास' स विज्ञेयो वर्जित
  सर्वकर्मसु ॥

जन्मर्क्षम् । न । जन्मनो नक्षत्रे ॥

जन्मवर्त्म । न । योनौ । भगे ॥ जन्म
  नोवर्त्म ॥

जन्मान्तरम् । न । परलोके । भवान्त-
  रे । अमुत्र ॥

जन्माष्टमी । स्त्री । श्रीकृष्णस्य जन्मति
  थौ ॥ सातुमुख्यचान्द्रेण श्रावणस्य
  कृष्णाष्टमी । गौणचान्द्रेण भाद्रस्य कृ
  ष्णाष्टमी ॥ अथ भाद्रपदे मासि कृ
  ष्णाष्टम्यां कलौयुगे । अष्टाविंशति
  मे जात कृष्णोऽसौदेवकी सुत ॥

जन्मी । पु । प्राणिनि ॥ जन्मो ऽस्या
  स्ति । अस्त्यर्थे ॥ जन्मा ऽस्त्यस्य वा ।

त्री० इति ॥

जन्मेजय । पु । जनमेजये राज्ञि ॥ जन्मनैवाभिमुखेन शत्रूनेजितवान् यतः । एजृकम्पनेधातोर्हि जन्मेज यइतिश्रुतइतिनिरुक्तिः ॥ शकन्ध्वादित्वात् पररूपम् ॥

जन्य । पु । जनके ॥ न । हट्टे ॥ परीवादे । कौलीने ॥ युधि । सङ्ग्रामे ॥ त्रि । उत्पाद्ये ॥ जनकस्य स्वभावोऽपि जन्येतिष्ठति निश्चितम् । यथा श्रीकृष्णपादाङ्कं कालीयवशमस्तके ॥ नवोढाज्ञातिमित्रभृत्येषु ॥ नववरस्यज्ञातिमित्रभृत्येषु ॥ वरस्निग्धे । जामातृवत्सले ॥ देहे ॥ जननम् । जनेर्यक् ॥ जायते वा । भव्यगेये तिसाधु ॥ यद्वा । जायते जनयति वा । अचोयत् तकिशसिचतियति जनिभ्योयद्वाच्य । जनेर्यद्विधि स्वरा र्थः । कृत्यल्युटोबहुलमिति यद्रूपसिद्धे । नचवृद्धिप्रसङ्गः जनिवध्योश्चे तिनिषेधात् ॥ जनस्यजल्प मतजन हलादितियत् ॥ यद्वा । जनीवधू वहतिप्रापयति । संज्ञायामितिसाधु ॥

जन्या । स्त्री । मातृवयस्यायाम् ॥ मुदि । प्रीतौ ॥ जायतेऽस्याम् । जनयति वा । यदन्तात यदन्ताद्वा टाप् ॥

जन्यु । पु । प्राणिनि ॥ अग्नौ ॥ धातरि । परमेष्ठिनि ॥ जायते । जनी० । यजिमनिशुन्धिदसिजनिभ्योयुच् ॥

जप । पु । श्रुतिमन्त्राद्यावृत्तौ ॥ जप स्तद्वाचस्य ध्येयसम्मुखीकरण मुने । मानसस्यान्त सञ्जल्परूपस्य उपांशु सञ्चकस्यच स्वसवेद्यलघुध्वनेर्भाष्य स्यच श्रूयमाणस्यमन्त्रस्य ध्येयसम्मुखीकरणायावर्त्तने ॥ मन्त्रार्थाज्ञाने जपस्य फलाजनकत्वमुक्तं तन्त्रशास्त्रे । यथा । यथापशुर्भारवाही न तस्य भजते फलम् । तथैवार्थानभिज्ञो न जपस्यफलमश्नुतइति ॥ स्वाध्याये ॥ जपनम् जप्यतेवा । जपमानसेच । व्यधजपोरनुपसर्गे इत्यप् ॥

जपनम् । न । जपे ॥

जपपरायण । पु । जपनशीले । जपासक्ते ॥

जपा । स्त्री । जवावृक्षे ॥ जपासङ्ग्राहि स्त्री कोश्या त्रिसन्ध्याफलदाऽऽतजित् ॥ जपति । जप० । पचाद्यच् । टाप् ॥

जप्यम् । त्रि । अघमर्षणादौ ॥ जप्यते । जप० । पोरदुपधादितियत् ॥

जप्येश्वर । पु । सिद्धस्थानविशेषे ॥ यथा । जप्येश्वरे महास्थानेशङ्करीच त्रिशूलिनी । त्रिशूलीशङ्करस्तत्रसर्व पापविमोचक इति ॥

जबाला । स्त्री । सत्यकामस्यर्षेर्मातरि ॥

जमज. । त्रि । यमजे ॥

जमदग्नि । पु । परशुरामपितरि । ऋचीकमुनिपुत्रे भृगुवंशजे यमदग्नि मुनौ ॥

जमनम् । न । भोजने ॥ जमुअदने । ल्युट् ॥

जम्पती । पु । सङ्ख्या जायापत्यो ॥ जाया च पतिश्च राजदन्तादिगणे पाठात् जायाशब्दस्य जमभावोऽपि पाठ्यते ॥ नित्यंद्विवचनान्त ॥

जम्बाल । पु । शैवाले ॥ पङ्के ॥ जमति । जमु० । बाहुलकादालन् ॥ यद्वा । जम्भअदने इति धातु । भावे घञ् । जम्बलाति । लादाने । आतोनुपे तिक । पृ० ॥

जम्बालिनी । स्त्री । नद्याम् । शैवलिन्याम् ॥

जम्बीर । पु । जंभोरी इति जमटु इति च पर्वतीय भाषा प्रसिद्धे दन्तशठे । जम्बीरे । जम्भले ॥ जम्बीरं मुष्णं गुर्वम्लं वातश्लेष्मविबन्धनुत् । शूलश्वासकफक्लेशच्छर्दितृष्णामदे षजित् ॥ आस्यवैरस्यहृत्पीडा वह्निमान्द्यकृमीन् हरेत् । स्वल्पजम्बीरिकातद्वत्तृष्णाच्छर्दिनिवारिणी ॥ प्रस्थपुष्पे । मरुवा इतिख्याते ॥ अर्जके ॥ सितार्जके ॥ जम्यते । जमु० । गम्भीरा इयश्चेति ईरन्नन्त साधु. ॥ यद्वा । जम्यते । विच् । वीरयति । वीरविक्रान्तौ । अच् । जम् चासौ वीरश्च ॥

जम्बु । स्त्री । जामन इति प्रसिद्धे वृक्षे । सुरभिपत्रायाम् । नीलफलायाम् ॥ मेरुसरिति ॥ जम्बुद्वीपे ॥ जम्बुद्वीपक्षितेर्नाभिस्तद्वृक्षं लक्षयोजनम् । क्षाराब्धिना परिवृत परिक्षेण तायता ॥ न । जम्बूफले । जाम्बवे ॥ जमति । जमु० । कन्दद्दन् भूजम्बू इत्यादिना कु प्रत्ययो वुगागमश्च निपातित । बाहुलकात् ह्रस्व ॥ फलेलु जम्ब्वाः फलम् । जम्ब्वा वेत्यणोऽभावे ओरञ् । फलेलुक् । ह्रस्वो नपुंसके ॥

जम्बुक । पु । जम्बूकार्थेषु ॥ गोलापजाम इति गौडभाषाप्रसिद्धे वृक्षे ॥ श्योनाकप्रभेदे ॥ जमति । जमु० । मृगय्वादयश्चेतिसाधु ॥ शृगाले ॥

जम्बुद्वीप । पु । न । भूमेः सप्तद्वीपान्तर्गते द्वीपविशेषे । जम्बूद्वीपे ॥

जम्बुमार्ग. । पु । तीर्थविशेषे ॥

जम्बुल । पु । जम्बूले ॥

जम्बुवनजम् । न । श्वेतजवापुष्पे ॥

जम्बू । स्त्री । सेवतरङ्गिण्याम् ॥ - नागदमन्याम् ॥ जामन इति प्रसिद्धे वृक्षे । राजफलायाम् । सुरभिपत्राया

म् ॥ सा बृहत्क्षुद्रभेदेन द्विविधा। तत्र बृहत्त्या पर्य्याया'। महाजम्बू महापत्रा राजजम्बू' वृहत्फला फलेन्द्र नन्द महाफला सुरभिपत्रा चेत ॥ विष्टम्भित्व रोचनत्व गुरुत्व च्च फलेगुणाः ॥ क्षुद्राया पर्य्याया। सूक्ष्मकृष्णफला दीर्घपत्रा मध्यमा॥ अचैववनजम्बूपर्य्याया। भूमिजम्बू काकजम्बू नादेयी शीतपल्लवा सूक्ष्मपत्रा जलजम्बुका ॥फलगुणाः। जम्बू सङ्ग्राहिणी रूचा कफपित्ता स्रदाहनुत् ॥ जम्ब्वा फले। जम्बुनि। जाम्बवे ॥ जम्बूद्वीपे ॥ जमति। जमु०। अन्दूद्दनभू जम्बूकफेलूकर्कन्धूदिधिषू रित्युणादि सूत्रेण कूप्रत्ययोनुगागमश्चनिपातित ॥ जायते वा। जनेर्वा तै। तेनैवनिपातितौ॥ फलेतु जम्ब्वा फलम्। जम्ब्वा वेत्यणोऽभावपचे ओरञ्। तस्य लुप्चेतिलुप्। लुपियुक्तवल् ॥ जम्बुद्वीपे ॥

जम्बूक। पु। फेरवे। शृगाले॥ नीचे ॥ पश्चिमाशापतौ। वरुणे॥ गुणापजामनद्रति प्रसिद्धे फलवृक्षे॥ श्योनाकप्रभेदे। जमति। जमु०। उलूकादित्वात् साधु'॥

जम्बूका। स्त्री। काकलीद्राक्षायाम्। निर्वीजायाम्। रसाधिकायाम्॥

जम्बूद्वीपम्। न। पु। भूमेः सप्तद्वीपान्तर्गते द्वीपविशेषे ॥ यथा। भूमेरर्द्धं चारसिन्धोरुदक्स्थ जम्बूद्वीपं प्राहुराचार्यवर्याः। अर्द्धेऽन्यस्मिन् द्वीपषट्कस्ययाम्ये चारक्षीराद्यम्बुधीनांनिवेशः ॥ इतिसिद्धान्तशिरोमणि ॥ पुराणमतेनतु। अयद्वीप. पद्मकोषमध्यवर्त्तिकोषद्रवलक्षयोजनविस्तीर्णं पद्मपत्रमिवसमवर्त्तुललक्षयोजनविस्तृतलवणसमुद्रेण वेष्टित। यस्मिन् प्रत्येकनवसहस्रयोजनायामानि नववर्षाणितेषांव षीणामष्टौ सीमापर्वता सन्तीति ॥

जम्बूल। पु। जम्बूविटपे॥ केतकीवृक्षे। क्रकचच्छदे॥ न। वरपक्षीयस्त्रीणापरिहासवचने ॥

जम्बूलमालिका। स्त्री। कन्यावरयोर्मुखचन्द्रिकायाम् ॥ जम्बूलानांवरपक्षीयस्त्री परिहासवचनानांमालिका श्रेणी॥ इतिहरिवंशटीकाया-नीलकण्ठ'॥

जम्भ। पु। दैत्यविशेषे॥ दन्ते॥ जम्बीरे ॥ भक्षणे॥ अंशे॥ तूणे॥ हनौ॥ जम्भयति। जभीगात्रविनामे। पचाद्यच्। रधिजभोरचीति नुम् ॥

जम्भक । पु । जम्भार्थेषु ॥ जभी० । खलु लट्चाविति गवुल् । नुम् ॥ स्वार्थे कोवा ॥

जम्भका । स्त्री । जृम्भायाम् ॥

जम्भग । पु । राक्षसविशेषे ॥

जम्भद्विट् । पु । इन्द्रे ॥

जम्भभेदी । पु । हरिहये । इन्द्रे ॥ जम्भमसुरंभेत्तु शीलमस्य । सुप्यजातावितिणिनि ॥

जम्भर । पुं । जम्बीरे ॥

जम्भल । पुं । जम्बीरे ॥ वुद्धदेवताविशेषे ॥ जम्भयति । जभी० । वृषादित्वात्कल । रधिजभोरितिनुम् ॥

जम्भला । स्त्री । राक्षसीविशेषे ॥ यथा समुद्रस्योत्तरेतीरे जम्भला नाम राक्षसी । तस्याः स्मरणमात्रेण विशल्यागर्भिणी भवेदिति ॥

जम्भा । स्त्री । जृम्भायाम् ॥ इतिराजनिर्घंटः ॥

जम्भारि । पु । इन्द्रे ॥ वह्नौ ॥ वज्रे ॥ जम्भस्यारिः ॥

जम्भी । पु । जम्बीरे ॥ इतिशब्दचन्द्रिका ॥

जम्भीर । पु । जंभारी इति ख्याते जम्बीरद्रुमे ॥ जम्भयति । जभी० गम्भीरादित्वात् ईरन् । रधिजभोरितिनुम् ॥

जय । पु । अग्निमन्थे ॥ जयन्ते ॥ युधिष्ठिरे ॥ शत्रुपराङ्मुखीकरणे । विजये । उत्कर्षप्राप्तौ । पराजितापेक्षयोत्कर्षलक्षणे । जीत इति भाषा ॥ जयोरन्ध्र प्रहारिणाम् ॥ वीररसे ॥ नारायणस्य पार्षदविशेषे ॥ इक्ष्वाकुवंशजे विजयनन्दनराजे ॥ दक्षिणद्वारगृहे ॥ अष्टाविंशतितमे वत्सरे ॥ क्षत्रियास्तदा वैश्याशद्राश्चनटनर्त्तका । पीडितास्ते वरारोहेजये सर्वेनसंशय ॥ जयनम् जीयतेऽनेनवा । जि० । एरच् ॥ जयतिवा । पचाद्यच् ॥ शास्त्रविशेषे ॥ यथोक्तं ब्रह्मचारिकाण्डे भविष्यपुराणे । अष्टादशपुराणानि रामस्यचरितं तथा । विष्णुधर्मादिशास्त्राणिशिवधर्माश्चभारत ॥ कार्ष्णंचपञ्चमोवेदो यन्महाभारतंस्मृतम् । सौराश्चधर्माराजेन्द्रमानवोक्तामहीपते ॥ जयेतिनाम एतेषांप्रवदन्तिमनीषिण इति ॥

जयकोलाहल । पु । पाशकभेदे ॥ जयस्य कोलाहलो यस्मिन्नत्र ॥ जयध्वनौ ॥

जयढक्का । स्त्री । जीतकाडङ्का इति भाषा प्रसिद्धे वाद्यविशेषे ॥

जयदत्त । पु । इन्द्रपुत्रे । पाकशासनौ ॥

जयद्रथ । पु । सिन्धुराजे ॥

जेयनम् । न । तुरङ्गादिसन्नाहे ॥ जये ॥ जिजये । ल्युट् ॥

जयनी । स्त्री । इन्द्रसुतायाम् ॥

जयन्त । पु । इन्द्रपुत्रे । पाकशासनौ ॥ भीमे ॥ चन्द्रे ॥ शिवे । शम्भौ ॥ ॥ कृष्णानुजे ॥ ध्रुवकविशेषे ॥ तल्लक्षणं यथा । आदिताले जयन्त स्यात् शृङ्गाररससंयुत । षड्सख्याचरपद आयुर्वृद्धिकर परइतिदामोदर ॥ जयति । जि॰ तॄभूवहिवसीत्यादिनाझच् । झोन्त ॥ तीर्थविशेषे ॥

जयन्तिका । स्त्री । हरिद्रायाम् ॥ जायती त्वगितिच प्रसिद्धद्रव्ये ॥

जयन्ती । स्त्री । जयायाम् । तर्कार्याम् ॥ नादेय्याम् ॥ अस्यागुणा । मदगन्धयुक्तत्वम् । तिक्तत्वम् । कटुत्वम । उष्णत्वम् । कृमिभूतनाशित्वम् । कण्ठविशोधनत्वम् । तत्कृष्णारसायनी । इतिराजनिर्घण्ट ॥ उमायाम् । गौर्याम् ॥ इन्द्रपुत्र्याम् ॥ पताकायाम ॥ जीवन्त्याम् ॥ योगविशेषे ॥ यथा । जय पुण्यञ्चकुरुतेजयन्तीमितितांविदु । रोहिणी सहिताकृष्णा मासेच श्रावणे ऽष्टमी ॥ अर्द्धरात्रादधश्चोर्द्ध्वंकलयापियदाभवेत् । जयन्तीनामसा प्रोक्ता सर्वपापप्रणाशिनी ॥ यात्रायोगविशेषे ॥ यथा । यत्र स्वोच्चगतश्चन्द्रो लग्नादेकादशे स्थित । जयन्तानामयोगोय शत्रुपक्षविनाशकृत् ॥ जयति । जि॰ । तॄभूवहिवसि भासि साधि गडि मण्डि जिनन्दिभ्यश्चेति झच् सच षित् । झोन्त । षित्त्वात् ङीष् ॥

जयपत्रम् । न । डिक्री इति डिगरी इतिच इङ्ग्रेजभाषा प्रसिद्धे विजयपत्रे । विवादविषयकजयबोधकलिपौ ॥ यथा । यदृत्त व्यवहारात्तु पूर्वपक्षोत्तरादिकम् । क्रिया ऽवधारणोपेत जयपत्रे ऽखिल लिखेत् ॥ पूर्वोत्तर क्रियायुक्त निर्णयान्त यदा नृप । प्रदद्याज्जयिने लेख्य जयपत्र तदुच्यते इति ॥ अश्वमेधीययज्ञघोटककपालबद्धाया लिपौ ॥ यथा । त्रैलोक्यविजयीरामो रावणान्तकर प्रभु । तदीक्षितो वाजिमेधे तस्याय प्रोक्षित पशु ॥ पालितो लक्ष्मणेनैव सुलक्षणविलक्षित । सम्पूज्यश्चपरित्याज्य सर्वैरितिचसत्कृताम् ॥ इतिवाशिष्ठरामायणम् ॥

जयपाल । पु । दन्तीबीजे । सारके । जमालगोटा इति भाषा ॥ त्रिधातरि ॥ विष्णौ ॥ नृपे ॥ इतिशब्दरत्नावली ॥

जयपुत्रक । पु । पाशकविशेषे ॥

जयमङ्गल । पु । ज्वरघ्ने औषधविशेषे ॥ राजवाह्ये हस्तिनि ॥ ध्रुवकविशेषे ॥ यथा । चतुर्विंशतिवर्णाङ्घ्रि' कथितोजयमङ्गलः । शृङ्गारवीरयोरेव ताले चाँचपुटेष्वसदृति ॥

जयवाहिनी । स्त्री । शच्याम् । इन्द्राण्याम् ॥ वाचधारा मन्हेन्द्राणी चेन्द्राणी जयवाहिनीतिरभस. ॥ जयवाहिनी तिपाठान्तरम् ॥ मा.श्लेष्याम् ॥ जय सैन्ये ॥ जयस्य वाहिनी ॥

जयशेखर । पु । स्वर्त्तमूलत्रिकोणोच्च स्थानगोयदिगीष्पति । जयशेखर-योगोय नानाऽभितफलप्रद इ तिवर्णिते याचायोगे ॥

जया । स्त्री । जयन्त्याम् ॥ तिथिविशेषे । चवोदश्यष्टमीचैव तृतीयाचजया स्मृता ॥ पथ्यायाम् । हरीतक्याम् ॥ उमायाम् । दुर्गायाम् ॥ व्युत्पत्ति र्यथा । जय कल्याणवचनो ह्याकारोदातृवाचक. । जयंददातियानित्य साजयापरि कीर्त्तितेति ब्रह्म वैवर्त्तपुराणम् ॥ दुर्गायाःसख्याम् ॥ बुद्धशक्तिविशेषे । तारायाम् ॥ गणिकारिकायाम् । अग्निमन्थद्रुचे ॥ विजयायाम् । भङ्गायाम् ॥ पताकाविशेषे ॥ नीलदूर्वायाम् ॥ शास्त्रादृचे

॥ जयति । जि० । पचाद्यच् । टाप् ॥

जयारव । पु । वन्दिनांजयजयेतिशब्दे ॥

जयावहा । स्त्री । भद्रदन्तीदृचे ॥

जयाश्रया । स्त्री । जरडीतृणे ॥

जयाह्वा । स्त्री । भद्रदन्तीदृचे ॥

जयी । त्रि । जययुक्त । विजयिनि ॥ जेतुंशीलमस्य । प्रजोरिनिरित्यधिकारे जिहृचिविश्रीख्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्चेति इनि ॥

जय्य' । त्रि । जेतुंशक्ये ॥ जिजये जि-अभिभवेवा । शकिलिङ्चेति शक्तार्थेयत् । गुण । चय्यजय्यौशक्यार्थे इति यान्तादेश' ॥

जरठ । त्रि । कर्कशे ॥ पाण्डौ ॥ कठिने ॥ जीर्णे ॥ जीर्यति । जृष्वयोहानौ । वाहुलकादठ. ॥ पु । जरायामितिविश्व ॥

जरडी । स्त्री । तृणविशेषे । गण्डाटिकायाम् । सुनालायाम् ॥

जरण । पुं । न । जीरके ॥ श्वजाज्याम् । कृष्णजीरके ॥ हिङ्गुनि ॥ सौवर्चले ॥ कुष्ठौषधौ ॥ पु । कासमर्दे ॥ जरयति । जृष्० । नंद्यादित्वाल्ल्यु ॥

जरणाद्रुम. । पुं । अश्वकर्णदृचे ॥

जरणा । स्त्री । कृष्णजीरके ॥

जरन । त्रि । जरातुरे । दृद्धे ॥ पुराण

ने ॥ जीर्य्यति । जॄष्० । जीर्य्यतेर तृन् ॥

जरती । स्त्री । जीर्णायाम् । वृद्धायाम् ॥ उगितश्चेतिङीप् ॥

जरत्कार । पु । जरत्कारुमुनौ ॥

जरत्कारु । पु । मुनिविशेषे । यायावरे ॥ इति त्रिकाण्डशेष ॥

जरत्कारु. । स्त्री । मनसादेव्याम् ॥

जरत्कारुप्रिया । स्त्री । मनसादेव्याम् ॥

जरद्गव । पु । वृद्धोक्षे ॥ जरन् चासौगौश्च । पूर्वकालैकेतिसमास । गोरतद्धितलुकीतिटच् ॥ गृध्रविशेषे ॥

जरन्त । पु । महिषे ॥ त्रि । वृद्धे ॥ जीर्य्यति । जॄष्० । जॄविशिभ्यांझच् ॥

जरसान । पु । पुरुषे ॥ जीर्य्यते । जॄष्० । छन्दस्यसानच्शुजॄभ्यामित्यसानच् ॥

जरा । स्त्री । विस्रसायाम । वय. कृतश्लथमांसाद्यवस्थाविशेषे । प्रज्ञाशक्तिते जोनिरोधपरपरिभवादिरूपायां वलिपलितादिलक्षणायां वयोहानौ ॥ सातुकालकन्या । यथा । कालकन्या जरा साक्षात् लोकस्तां नाभिनन्दति । स्वसार जगृहे मृत्यु क्षयाय जगनेश्वर ॥ इति श्रीभागवतम् ॥ एषां भेदप्रभेदेन चतुष्षष्टिकजस्मृता । मृत्युकन्यासुताश्चैव जरा तस्याश्चकन्यका ॥ जराच भ्रा

तृभि सार्द्धं भ्रम्यद्भ्रमति भूतलम् । एते चोपायवेत्तारं न गच्छन्ति च सम्मतम् ॥ पलायन्तेच तंदृष्ट्वा वैनतेय मिवोरगा ॥ चक्षुर्जलञ्च व्यायाम पादाधस्तैलसेवनम् । कर्णते लमूर्द्धितैलं जराव्याधिविनाशनम् ॥ वसन्ते भ्रमण वह्निसेवा ऽस्वप्नकरोतिय । बालाञ्चसेवते काले जरा तं नोपगच्छति ॥ खातशीतोदकस्नायी सेवते चन्दनद्रवम् । नोपयाति जरातञ्च निदाघे ऽनिलसेविनम् ॥ प्रावृड्ष्णोदक स्नायीघनतोय नसेवते । समयेच समाहारी जरातं नोपगच्छति ॥ शरद्रौद्र न गृह्णाति भ्रमणं तन्नवर्जयेत् । खातस्नायी समाहारी जरात नोपतिष्ठते ॥ खातस्नायीचहेमन्ते कालेवह्निं निषेवते । भुङ्क्ते नवान्नमुष्णञ्चजरात नोपगच्छति ॥ शिशिरे ऽशुकवह्निंच नवोष्णान्नञ्चसेवते । य एवोष्णोदकस्नायी जरातनोपगच्छति ॥ सद्योमास नवान्नञ्च बालस्त्रींक्षीरभोजनम् । घृतञ्चसेवते योहि जरा त नोपगच्छति ॥ भुङ्क्ते सदन्नं क्षुत्काले तृष्णायांपीयते जलम् ॥ । नित्य भुङ्क्तेचताम्बूल जरा त नोपगच्छति ॥ दधिहैय

क्षीनञ्च नवनीत तथागुडम् । नित्यं भुङ्क्ते सयमीयो जरातंनैव गच्छति ॥ शुष्कमास स्त्रियो वृद्धा वालार्क स्तरुण दधि । त सेवमानंजरा याति प्रहृष्टाभ्राह्मभि सच ॥ रात्रौ येदधिसेवन्ते पुंश्चलीञ्च रजस्वलाम् । तमुपैति जरा हृष्टाभ्राह्मभि स हसुन्दरि इतिब्रह्म वैवर्त्तपुराणे ब्रह्मखण्डम् ॥ अस्याऔषधं यथा । पलाशचूर्णं समधु गव्याज्यमस्तका न्वितम् । सविडङ्गं पीतमार्य नरकुर्यान्महामतिम् ॥ मासैकेन भवा देव जरामरणवर्जित ॥ पलाशवीज सप्ततिलम च्चन्वित समम् । स माहं भक्षित रुद्र जरां नयति सत्त्वयमिति गारुडे १९६ अध्याय ॥ कौरिकादश्च ॥ राक्षसीविशेषे ॥ यथा । अन्यस्यामपिभार्यायां शकले दवइर्याय्यात् । तेमात्रावहिर्हत सृष्टे जरयाचाभिसन्धिते ॥ जीवं त्स्यनया । जृष्० । षिद्भिदादिभ्योङ् । ऋदृशो ङिगुण ।टाप् ॥ याचभार्याविरूपा चौकाशला कलहप्रिया । वचनोत्त रवक्ती च साजरान जराजरेति चा वाक्यम् ॥

जरातुर । त्रि । जर्जरे । जरारोगग्रस्ते ॥

जरापुष्ट । पु । जरासन्धे ॥

जराभीरु. । पुं । मदने । कामदेवे ॥ त्रि । जराभयशीले ॥

जरायणि. । पु । जरासन्धे ॥

जरायु । पु । उल्वे । गर्भाशये । गर्भावरणचर्मणि ॥ येनवेष्टितो गर्भं कुक्षौतिष्ठतिसजरायु ॥ यातुचर्माकृतिः सूक्ष्माजरायु सानिगद्यतेइति भगवतीगीतोक्ते. ॥ जटायौ पक्षिराजे ॥ जरामेति । क्विब्जरये श्रिया इतिञुण् ॥

जरायुजः । त्रि । मनुष्यपश्वादौ ॥ पशवश्च मृगाश्चैव व्यालाश्चोभयतोदत । रक्षांसिच पिशाचाश्च मनुष्याश्च जरायुजा इति मनु ॥ यातुचर्माकृति सूक्ष्मा जरायु सानिगद्यते । शुक्रशोणितयोर्योग स्तस्मिन्सञ्जायतेयत । तत्रगर्भोभवेद्यस्मात्तेनप्रोक्तोजरायुजइति श्रीभागवतेभगवतीगीता ॥ जरायोर्जात. । पञ्चम्यामितिजनेर्ड' ॥

जरासन्ध । पु । चन्द्रवंशीयेन्नृपविशेषे । मागधभूपे । वार्हद्रथौ ॥ अन्यस्यामपि भार्यायां शकले द्वे इर्यायात् । तेमात्रावहिर्हत सृष्टे जरया चाभिसन्धिते ॥ जीवजीवेति क्रीडन्त्याजरासन्धोऽभवत्सुत इति भागवम् ॥ जरयासन्धितोयस्मात् जरासन्धस

तस्मृत ॥

जरासन्धजित् । पु । भीमसेने ॥

जरी । चि । वृद्धे ॥ इतिहेमचन्द्र ॥

जल्हयम् । न । मांसे ॥ श्वथमांसे ॥

जीर्यति । जृष्० । जृज्म्भ्या मृथन् ॥ पु । असुरविशेषइतिवेदभाष्यम्॥

जर्ज्जरम । न । शैवले ॥ शक्रध्वजे ॥ चि । जरातुरे ॥ जीर्णे ॥ जर्जति । जर्जप रिभाषणभर्त्सनयो । वाहुलका दर ॥

जर्ज्जरीक । चि । वहुच्छिद्रद्रव्ये ॥ जरातुरे ॥ जर्जति । जर्ज० । पफरीका दयश्चेति साधु ॥

जर्ण । पु । चन्द्रे ॥ वृक्षे ॥ जीर्यति । जृष० । क्लृट्जृसीतिनन् ॥ चि । जार्णे ॥

जर्त्तिक । पु । जट्ट इतिप्रसिद्धे वाह्लीक देशस्थेशूद्रे ॥ यथा । शाकल नामनगर मापगानामनिम्नगा । जर्त्तिका नामवाह्लीका स्तेषावृत्तं सुनिन्दित मितिभारतेकर्णपर्व ॥

जर्त्तिल । पु । अरण्यतिले ॥ जर्त्तिल काप्यतेसङ्किरण्य प्रभवस्तिल ॥

जर्त्तु । पु । योनैा ॥ मतङ्गजे ॥ जायते । जनी० । जनेस्तुरच्च । तु इत्यविभक्तिकोनिर्द्देश । तुप्रत्ययोरेपश्चान्तादेश ॥

जल । चि । जडे ॥ न । गोकल्कने ॥ ह्रीवेरे ॥ नीरे । अम्बुनि । तोये ॥ ॥ पञ्चभूतान्तर्गतभूतविशेषएतत् ॥ अस्योत्पत्त्यादयो निरूप्यन्ते ॥ रूपमाचाद्धि कुर्वाणात् तेजसोदैवचोदितात् । रसमाचमभूत् तस्मादम्भो जिह्वारसग्रह ॥ वर्णे शुक्लोरसस्पर्शौ जलेमधुरशीतलैा । स्नेहस्तचद्रवत्वन्तुसांसिद्धिकमुदाहृतम् ॥ नित्यतादिप्रथमवत् किन्तुदेहमयोनिजम् । इन्द्रियरसनसिन्धुर्हिमादिर्विषयोमत इतिकारिकावली ॥ जलंचतुर्विध प्राहु रन्तरीक्षोद्भव वुधा । धाराज कारकञ्चैव तैाषार हैममित्यपि ॥ हेमन्ते सारस तोय ताडाग वाहित स्मृतम् । हेमन्तविहितं तोय शिशिरेपिप्रशस्यते ॥ वसन्तग्रीष्मयो कैापं वाप्यं वानेभरजलम् । नदेयं वारिनादेयवसन्तग्रीष्मयो वुधै । विषवद्गन्दच्छायापचाद्यैर्दूषितयत ॥ औद्भिद वान्तरीक्षवा कैापंवा प्रावृषिस्मृतम् । शस्त शरद्विनादेय नीर सगूढकपरम् ॥ दिवारविकरैर्जुष्ट निशिशीतकरांशुभि । चेयमशूदकनाम स्निग्धदोषचयापहम् ॥ अनभिष्यन्दि निर्द्दोषमान्तरीक्षजलोपमम् । वल्य रसायन मेध्य शीत लघु सुधासमम् ॥ अन्यच्च

।शरदि स्वच्छमुदयादगस्त्यस्याखिलहितम्॥ वृद्धसुश्रुतस्तु। पौषे वारि सरोजातं माघे तत्तु तडागजम्। फाल्गुने कूपसम्भूतं चैत्रे चौण्ड्यं हितं मतम्॥ वैशाखे नैर्झरं नीरं ज्येष्ठे शस्तं तथौद्भिदम्। आषाढे शस्यते कौप श्रावणे दिव्यमेव च॥ भाद्रे कौप पय शस्तं माश्विने चौण्ड्यमेव च। कार्त्तिके मार्गशीर्षे च जलमात्रं प्रशस्यते॥ पानविधिस्तु। अत्यम्बुपानान्न विपच्यतेऽन्नमनम्बुपानाच्च स एव दोष। तस्मान्नरो वह्निविवर्द्धनाय मुहुर्मुहुर्वारि पिबेदभूरि॥ अल्पाम्बुपानविषयस्तु। अरोचके प्रतिश्याये मन्देऽग्नौ श्वयथौ क्षये। मुखप्रसेके जठरे कुष्ठे नेत्रामयेज्वरे॥ व्रणे च मधुमेहे च पिबेत् पानीयमल्पकम्॥ पानावश्यकत्वन्तु। जीवनं जीविनां जीवो जगत्सर्वन्तु तन्मयम्। अतोऽत्यन्ततरास्तु नो न कश्चिद्वारि वारयेत्॥ अन्नेनापि विना जन्तु प्राणान् धारयते चिरम्। तोयाभावे पिपासार्त्तः क्षणात् प्राणैर्विमुच्यते॥ हारीतोऽप्याह। तृष्णा गरीयसी घोरा सद्यः प्राणविनाशिनी। तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणम्॥ तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति। अतः सर्वास्ववस्थासु न क्वचिद्वारि वारयेत्॥ प्रशस्तजलन्तु। अगन्धमव्यक्तरसं सुशीतं तर्षनाशनम्। अच्छं लघु च हृद्यञ्च तोयं गुणवदुच्यते॥ निन्द्यं जलम्। पिच्छिलं क्रिमिलं क्लिन्नं पर्णशैवालकर्द्दमैः। विवर्णं विरसं सान्द्रं दुर्गन्धं न हितं जलम्॥ अतिनिन्द्यं जलम्। कलुषं छन्नमम्भोजपर्णनीलतृणादिभिः। दुर्दर्शजमसंस्पृष्टं सोरचान्द्रमसांशुभिः॥ अनार्त्तवं वार्षिकमपि प्रथमं तच्च भूमिगम्। व्यापन्नं परिहर्त्तव्यं सर्वदोषप्रकोपनम्॥ तत्कुर्यात् स्नानपानाभ्यां तृष्णाध्मानोदरज्वरान्। कासाग्निमान्द्याभिष्यन्दकण्डूगण्डादिकांस्तथा॥ दुष्टोदकविशोधनकरणोपायस्तु। निन्दितञ्चापि पानीयं क्वथितं सूर्यतापितम्। सुवर्णरजतं लोहं पाषाणं सिकतां मृदम्॥ भृशं सन्ताप्य निर्वाप्य सप्तधा साधितं तथा। कर्पूरजातीपुन्नागपाटलादिसुवासितम्॥ शुचि सान्द्रपटस्रावं क्षुद्रजन्तुविवर्जितम्। स्वच्छं कनकमुक्ताद्यैः शुद्धं स्याद्दोषवर्जितम्॥ पर्णमूलविसग्रन्थिमुक्ताकनकशैवलैः। गोमेदेन च वस्त्रेण कुर्यादम्बुप्रसादनम्॥ जलस्य पाकाव

धिस्तु । आमलकजीवेति आमला च तद्द्वेमाच्चं मूतशीतलञ्च । तद्द्वे माजन्तुमूतंकटुष्ण पय प्रपाकेऽपरं वकाख्या ॥ विशेष पानीये द्रष्टव्य ॥ पूर्वाषाढाख्ये नक्षत्रे ॥ जलति । ज लअपवारणे । पचाद्यच् ॥ ईशाने चा पिपूर्वस्मिन्पश्चिमेचतयोत्तरे । शि विरञ्जलं भद्रमन्यत्राशुभमेवच ॥

जलकण्टक । पु । शृङ्गाटके ॥ कुम्भीरे ॥

जलकपि । पुं । शिशुमारे ॥

जलकपोत । पु । जलपारावते ॥

जलकरङ्क । पु । नारिकेलफले ॥ अम्बुजे ॥ शङ्खे ॥ जललतायाम् ॥ मेघे ॥

जलकल्क । पुं । जम्बाले ॥

जलकाक । पु । जलकौवा इति प्रसिद्धे दात्यूहे पक्षिणि । पानीकौडि इतिगौडभाषा ॥ स्निग्धंगुरुहिमह र्षमांसजलपक्षिणाम्तु वातहरम् ॥

जलकाङ्क्ष । पुं । हस्तिनि ॥

जलकाङ्क्षी । पु । हस्तिनि ॥ त्रि । जला ऽभिलाषिणि ॥

जलकान्तार । पुं । वरुणे ॥

जलकामुक । पु । कुटुम्बिनीवृक्षे ॥

जलकिराट । पुं । ग्राहे ॥

जलकुक्कुट । पुं । कारण्डवखगे । मद्गौ ॥

जलकुक्कुटी । स्त्री । गङ्गाचिल्लायाम् ॥

जलकुक्कुभ । पु । कोयष्टिखगे । कौंडा

पाखी इति गौडभाषा ॥

जलकुन्तल । पुं । शैवाले ॥

जलकुब्जक । पु । पङ्कारे ॥

जलकूपी । स्त्री । कूपमर्ते ॥ पुष्करिण्याम् ॥

जलकूर्म्म । पु । शिशुमारे ॥

जलकेश । पु । शैवाले ॥

जलक्रीडा । स्त्री । नद्यादौवयस्यादिभि सहजलनि क्षेपादिरूपायां खेलायाम् । व्याक्युक्याम् । करपविकायाम् ॥ परितापिषु वासरेषु पयं सटलेखाश्रितमांससौम्यकम् । सुविशोधितनक्रमीनजाल व्यवगाहेत जल सुहृत्समेत ॥

जलगुल्म । पु । जलावर्ते ॥ कच्छपे । कमठे ॥ जलचत्वरे ॥

जलज्ञ । पु । ओषधिविशेषे । महाकाले ॥

जलचत्वरम् । न । चहरइतिख्याते जलगुल्मे । चातरजल इति गौडभाषा ॥

जलचर । पुं । ग्राहादियादसि ॥ जले चरति । चर० । चरेष्टः ॥

जलचारी । पु । मत्स्ये ॥ त्रि । जलचरमात्रे ॥

जलज । पु । हिज्जलवृक्षे ॥ शैवले ॥ वानीरवृक्षे ॥ शङ्खे ॥ कुपीलौ ॥

किंमीनीतु जलजावल्याद्रुं मकर ध्वजेति प्रसिद्धराशिषु ॥ मत्स्य ॥ न । पद्मे ॥ शङ्खे ॥ चारविशेषे ।लो कारे ॥ त्रि । जलजाते ॥ जलेजात । जनो० । ड ॥

जलजन्त । पु । यादसि ॥ जलानां जन्तुः ॥

जलजन्तुका । स्त्री । जलौकायाम् ॥

जलजन्म । न । पद्मे ॥ जले जन्मास्य ॥

जलजम्बूका । स्त्री । क्षुद्रजम्बाम् । भु जिजामन वनजामन इतिभाषा ॥

जलजिह्व । पुं । नक्रे ॥

जलडिम्ब । पु । शम्बूके । संखुला इति भाषा ॥

जलतण्डुलीय । पु । कञ्चटे ॥

जलतापिक । पु । इल्लीशमत्स्ये ॥ का कचीमत्स्ये ॥

जलतापी । पु । जलतापिके ॥

जलताल । पु । इल्लीशे ॥

जलतिक्तिका । स्त्री । शल्लकीवृक्षे ॥

जलत्रा । स्त्री । छत्रे । अङ्गमर्द्धाम् ॥

जलद । पु । मुस्तके ॥ मेघे ॥ त्रि । ज लदानकर्त्तरि ॥ जलंददाति । दु दाञ् । आतोनुपेतिकः ॥

जलदागमः । पुं वर्षाकाले ॥

जलदाशन । पु । शालवृक्षे ॥

जलदुर्गम् । न । जलदुर्गे ॥

जलद्राणी । स्त्री । शालिञ्च्याम् ॥

जलद्रोणी । स्त्री । नौकाया सेकभाज ने । अवगाहे ॥

जलधर । पु । मेघे ॥ मुस्तके ॥ तिनि शवृक्षे ॥ समुद्रे ॥ त्रि । जलधारिणि ॥ जलस्यधर ॥

जलधरमाला । स्त्री । मेघपङ्क्तौ ॥ जग तीसंज्ञकछन्दश्चाधरावृत्तभेदे । मो भसौमेज्जलधरमालाव्यधक्रौ ॥ या भक्तानांकलिदुरितोत्तप्तानां ताप च्छेदेजलधरमालानव्या । भव्याका-रादिनकरपुत्रीकूले केलीलोलाह रितनुरव्यात् साव ॥

जलधरमालाकाल । पु । वर्षाकाले ॥

जलधि । पु । समुद्रे । रसमात्राया अविशेषात् क्षारोदादिसप्तसु ॥ तेच । क्षारोदेक्षुरसोदसुरोदघृतो दक्षीरोददधिमण्डोदशुद्धोदा. सप्त द्वीपपरिखा इवाभ्यन्तरद्वीपसमाना एकैकश्येन यथानुपूर्वं सप्तस्वपिव हिर्द्वीपेषु पृथक् परितउपकल्पिता ॥ जलानिधीयन्तेऽत्र । डुधाञ् । कर्म ण्यधिकरणेचेतिकि । आकारलोप ॥ दशशङ्खसङ्ख्यायाम् । शतकोटि कोटिषु १०००००००००००००००॥

जलधिगा । स्त्री । नद्याम् । सरिति ॥ जलधि गच्छति । गम्लृ० । ड. ॥

जलधिजा । स्त्री । लक्ष्म्याम् ॥ जलधौ जाता । सप्तम्या अनेडे ॥ त्रि । अब्धिजमात्रे ॥

जलधेनु । स्त्री । दानार्थकृत्रिमधेनौ ॥

जलनकुल । पु । उद्रे । जलमार्जारे । उद्बिलाव इति भाषा । धाडिया इति गौडभाषा ॥

जलनिधि । पु । उदन्वति । समुद्रे ॥ जलानि नितरां धीयन्तेऽत्र । कर्मण्यधिकरणेचेतिधाञः कि । जलानां निधिरितिवा । नेरुपसर्गस्योपसर्गान्तर निवृत्त्यर्थमुपादानम् ॥

जलनिर्गम । पु । भ्रमे । अम्बुमार्गे ॥ प्राकारगृहभित्त्यादिषु जलानि सरणाजालके ॥ नद्यादावधस्थस्यजलस्योर्द्ध्वनिस्सरणे ॥ निर्गमनम् । गमॢ० । ग्रहवृदृनिश्चिगमश्चेत्यप् ॥ निर्गम्यतेऽनेनवा करणे खनोघश्चेतिघ । जलानां निर्गम ॥

जलनीलिका । स्त्री । शैवाले ॥ स्वार्थेकन् । ह्रस्व ॥

जलनीली । स्त्री । शैवाले ॥ जलनीलयति । नीलवर्णे । णिच् । कर्मण्यण् ॥

जलन्धर । पु । असुरविशेषे ॥

जलपति । पु । वरुणे । दैत्यदेवे ॥ समुद्रे ॥

जलपवित्रम् । न । संन्यासिनांचिद्रवद्वस्त्रखण्डे ॥ तत्तुवितस्तिमात्रं शुक्लवस्त्रं सर्वदाचमनादौ जलशोधनार्थंच तुम्बोत्तरादौ द्विकोणादौरवा भवति ॥

जलपारावत । पु । कोपिनि । जलकपोते ॥

जलपित्तम् । न । वह्नौ ॥ जलानां पित्तमिव दाहकत्वात् ॥

जलपिप्पली । स्त्री । जलपीपर इति भाषाप्रसिद्धे पिप्पलीविशेषे । लाङ्गल्याम् । शारदाम् ॥ जलपिप्पलिका हृद्या चक्षुष्या शुक्रला लघु । संग्राहिणी हिमा रूक्षा रक्तदाहव्रणापहा ॥ कटुपाकरसा रुच्या कषाया वह्निवर्द्धिनी ॥ जलस्य पिप्पलीव ॥

जलपृष्ठजम् । न । शैवाले ॥

जलप्रायम् । न । अनूपे ॥ जलप्रायदेश ॥

जलप्रिय । पु । चातके ॥ मत्स्ये ॥

जलप्लव । पु । उद्रे । जलनकुले ॥

जलफलम् । न । शृङ्गाटके ॥

जलबन्धक । पु । जलमध्यगे स्रोतोभेदकरे दारुशिलादौ । विदारके । कूपके ॥

जलबन्धु । पु । मीने ॥

जलबुद्बुदम् । न । जलविम्बे । बुल्बुला बुद्बुदा इतिच भाषा ॥ यथा ।

मानुष्ये कदलीस्तम्भनिःसारे सारमा गंणम् । यः करोति स वैमूढो जलबुद्बुदसन्निभे ॥

जलब्राह्मी । स्त्री । हिलमोच्याम् ॥

जलभू । पु । मेघे ॥ जलपिप्पल्याम् ॥

जलमक्षिका । स्त्री । वारिकृमौ ॥

जलमद्गु । पु । मत्स्यरङ्गविहङ्गमे ॥

जलमधूक । पु । जलमहुआ इतिख्याते मधूकवृक्षप्रभेदे । दीर्घपत्रे । मङ्गल्ये ॥

जलमसिः । पु । मेघे ॥ इतिहारावली॥

जलमार्गः । पु । प्रणालके । प्रणाल्याम् । पनाला पनारा इतिच ख्याते ॥

जलमार्जार । पु । जलनकुले ॥

जलमुक्-ग् । पु । धूमयोनौ । मेघे ॥ जल मुञ्चति । मुचृमोचने । क्विप् ॥

जलमूर्त्ति । पु । शिवे ॥ जलं मूर्त्तिर्यस्य ॥ स्त्री । करकायाम् ॥ जलस्य मूर्त्तिः ॥

जलमोदम् । न । उशीरे ॥

जलयन्त्रम् । न । फुहारा इतिख्याते धारायन्त्रे ॥

जलयन्त्रगृहम् । न । जलमध्यकृतगृहे । जलभवने । जलमहल इति भाषा ॥ समुद्रगृहे । फुहारेकाघरइतिभाषा ॥

जलयन्त्रनिकेतनम् । न । जलयन्त्र गृहे ॥

जलयन्त्रमन्दिरम् । न । समुद्रगृहे । फुहारेकाघरइतिभाषा ॥

जलरङ्क । पुं ।
जलरङ्कु । पु । } दात्यूहपक्षिणि ॥
जलरङ्ग । पु ।

जलरण्ड । पु । जलकणे ॥ इतिहेम ॥

जलरसः । पु । लवणे ॥

जलरुण्ड । पु । जलावर्त्ते ॥ पयोरेणौ ॥ भुजङ्गमे ॥ इतिमेदिनी ॥

जलरुट् ह् । पु । पद्मे ॥

जलरुहम् । न । पद्मे ॥ जले रोहति । रुह० । इगुपधेतिकः ॥

जलरूपः । पु । मकरे ॥ इतित्रिकाण्डशेष ॥

जललता । स्त्री । तरङ्गे ॥ इतिहारावली ॥

जलवरालः । पु । जलवसन्नामख्याते । मोगे ॥ पानीवसन्त इतिगौडभाषा ॥

जलवल्कल । पु । कुम्भिकायाम् ॥

जलवल्ली । स्त्री । शृङ्गाटके ॥

जलवानीरः । पु । अम्बुवेतसे ॥ जले जातोवानीरः । शाकपार्थिवादि ॥

जलवायस । पु । मद्गुपक्षिणि ॥

जलवालक । पु । विन्ध्यपर्वते ॥

जलवालिका । स्त्री । विद्युति ॥

जलवास । पु । विष्णुकन्दे ॥ न । उशीरे ॥

जलवाह । पु । मेघ ॥ जलवहति । वहे कर्मण्यण् ॥

जलवाहक । पु । महिषे । कुलापे ॥ जलस्य वाहक ॥

जलविडाल । पु । जलनकुले ॥

जलविन्दुजा । स्त्री । यावनालीशर्करायाम् ॥

जलविल्व । पु । कर्कटे ॥ पन्वाङ्ग ॥ जलचत्वरे । चातरजल इति गौड भाषा । चहर इतिभाषा ॥

जलविषुवम् । न । आश्विनचित्रिते । तुलासङ्क्रान्तौ ॥ ज्योतिर्विदां चक्र विशेषे ॥

जलविहङ्गम । पु । सलिलकुक्कुटकारण्डवकलहंसादिषु ॥

जलवृश्चिक । पु । चिङ्गटमत्स्ये ॥

जलवेतस । पु । परिव्याधे । वानीरवृक्षे ॥ जलेजातोवेतस । शाकपार्थिवादि । जलजोवेतस शीतस ङ्ग्राहीवातकोपन ॥

जलव्यध । पु । कङ्कचोटमत्स्ये ॥

जलव्याल । पु । अलगर्द्दसर्पे । अलाध इतिभाषा ॥ जलस्थो व्याल ॥ क्रूरकर्म्माणि जलजन्तौ ॥

जलशय । पु । विष्णौ ॥ शेते ऽस्मिन् । पुसीतिशीङोघ । जलेशय शय्याऽस्य ॥

जलशयन । पु । विष्णौ ॥ जलेशयनं यस्य ॥

जलशायी । पु । नारायणे ॥

जलशुक्ति । स्त्री । शम्बूके ॥

जलशूकम् । न । शैवाले ॥

जलशूकर । पु । कुम्भीरे ॥

जलसर्पिणी । स्त्री । जलौकायाम् ॥

जलसूचि । पु । कङ्कचोटमत्स्ये ॥ शृङ्गाटके ॥ शिशुमारे ॥ काके ॥ स्त्री । जलौकायाम् ॥

जलस्तम्भनम् । न । मन्त्रादिना जल गतिवारणे ॥

जलस्था । स्त्री । गण्डदूर्वायाम् ॥

जलहम् । न । स्वल्पजलयन्त्रगृहे ॥

जलहरणम् । न । मात्रावृत्तप्रभेदे ॥ यथा । लघुगुरुकनियमगत मिह फणिपतिमत मवगत मतिसुखनिगदपदम् दशवसुभुवनैर्यति रिह यदि भवतिहि रसिकजन हृदयविहितम दम् । वसुविमलचतुष्कलगणकृत गुणिगणचरणविरामाहितसगणम् क्वचिदपि गुरुसहित भवति कविहित छन्द सुन्दरि जलहरणम् ॥ यथा ॥ उपगम्य निभृततर मभिनवजलधर सुभमसुदर्शनचक्रधरम्- सखिकथयहृदयकज मुरगराज्भुज ममलकमलदलनयनवरम् । अति

कुटिलकठिनशठ मपनय मवि शठ दर्शन मपि न ददासि चिरा दधि राङ्गलनासदृशीमवयौवनकान्ति र चिरमिन्दुचिरतरा ॥

जलहस्ती । पु । ग्राहाख्ययादसि ॥

जलहास । पु । समुद्रफेने । फेने ॥ इ लिचिकापडशेष ॥

जलाकाश । पु । जलस्याकाशे ॥ यथा । घटावच्छिन्नजले नीरं यत् तत्र प्रति विम्बित । साभ्रनक्षत्र आकाशो ज लाकाशउदीर्यते ॥

जलाची । स्त्री । जलपिप्पल्याम् ॥

जलाखु । पु । जलप्रवे ॥

जलाञ्चलम् । न । स्वतोवारिनिर्गमे ॥ शैवाले ॥

जलाटन । पु । लोहपृष्ठे । कङ्कखगे ॥

जलाटनी । स्त्री । जलौकायाम् ॥

जलाटक । पु । नक्रराजे । घांगर-इतिभाषा ॥ न । पोताधाने ॥

जलात्मिका । स्त्री । जलौकायाम् ॥

जलाधार' । पु । तडागादिजलाशये ॥ जलमाने । आध्रियतेऽस्मिन् । धृङ् अवस्थाने । अध्यायन्यायोद्यावेत्यत्र अवहाराधारावायानामुपसंख्यानाद् घञ् । जलस्य आधारः ॥

जलाधिदैवत । पु । न । वरुणे ॥ न । पूर्वाषाढानक्षत्रे ॥

जलाम्बिका । स्त्री । कूपे ॥

जलायुका । स्त्री । जलौकायाम् ॥ जल मस्या आयु इत्यर्थे पृषोदरादित्वा त् साधु ॥

जलार्णव । पु । वर्षाकाले ॥ जलस मुद्रे ॥

जलार्द्र. । पु । आर्द्रवस्त्रे ॥

जलार्द्रा । स्त्री । यान्त्रिकानां जलनिक्षेपे । धुविचे ॥ धुवित्रं तालवृन्तं स्या दुत्क्षेपव्यजनञ्चतत् । जलेनार्द्रं ज लार्द्रास्यादिति वैजयन्ती ॥ क्लिन्न-वस्त्रे ॥

जलालु । पु । पानीयालौ ॥

जलालुकम् । न । पद्मकन्दे ॥

जलालुका । स्त्री । जलौकायाम् ॥

जलालूकम् । न । शालूके । पद्मादिक न्दे । मृणालमूले ॥

जलालोका । स्त्री । जलौकायाम् ॥

जलावर्त्त । पुं । अम्भसाम्भ्रमे । जल-गुल्मे ॥

जलाशय । पु । तडागादिजलाधारे ॥ शृङ्गाटके ॥ समुद्रे ॥ न । उशीरे ॥ लामज्जके ॥ त्रि । जडाशये ॥ जल माशयो हृदय मस्य ॥ जलमाशेते तिष्ठत्यनया । पुसीतिघ ॥ जलेना शेते वा । अच् ॥

जलाशया । स्त्री । गुण्डालातृणे ॥

जलाश्रय । पु । वृत्तगुण्डतृणे ॥

जलाश्रया । स्त्री । शूलीतृणे ॥ जला-
कायाम् ॥

जलाष्ठीला । स्त्री । पुष्करिण्याम् ॥

जलाह्वयम् । न । उत्पले ॥

जलूका । स्त्री । जलौकायाम् ॥

जलेचर । पु । हंसमद्गुबकादिजलच
रपक्षिणि ॥ जले चरति । चरेष्ट ।
तत्पुरुषेकृतीत्यलुक् ॥

जलेच्छया । स्त्री । हस्तिशुण्डावृक्षे ॥

जलेजातम् । न । पद्मे ॥

जलेन्द्र । पु । वरुणे ॥ जम्भले । पूर्वेय
क्षे ॥ महोदधौ ॥ जलाना मिन्द्र ॥

जलेन्धन । पु । वाडवाग्नौ ॥ न । सौ
रविद्युदादितेजसि ॥

जलेरुहा । स्त्री । कुटुम्बिनीवृक्षे ॥

जलेवाह । पु । डुबा इति गोताखोर
इतिचख्याते जातिविशेषे ॥ यथा । ज
लेवाहा नथाहूय वरुणस्य न्ययोज
यत् । तत्कृत्वा परमं यत्न माप् राम
रत्न न तत् । इति पाद्मे पातालख
ण्डम् ॥

जलेशय । पु । मत्स्ये ॥ जले शेते । शी
ङ् । अधिकरणेशेतेरित्यच् । शय
वासेष्वित्यलुक् ॥

जलेश्वर । पु । वरुणे ॥ समुद्रे ॥ जला
नामीश्वर ॥

जलौका । स्त्री । जलौकायाम् ॥

जलोच्छ्वास । पु । परीवाहे । प्रवृद्धजल
स्य निर्गममार्गे । समधिकजलस्य सर्व
तो वहने वा । समधिकजलस्योपाये
निष्कासने वा ॥ जलानि उच्छ्वसन्त्ये
भि । श्वसप्राणने । हलश्चेति घञ् ॥
जलानामुच्छ्वसनं वा । भावे घञ् ॥

जलोदरम् । न । जठरामये ॥ तस्य
निदानादि यथा । य. स्नेहपीतो-
ऽप्यनुवासितो वा वान्तो विरिक्तो
ऽप्यथवा निरूढः । पिबेज्जलं शीतल
माशु तस्य स्रोतांसि दुष्यन्ति हि त
द्वहानि ॥ स्नेहोपलिप्तेष्वथवापि तेषु
दकोदरं पूर्ववदभ्युपैति । स्निग्धं म-
हत् तत्परिवृत्तनाभिसमाततं पू-
र्णमिवाम्बुनाच ॥ यथादृतिः क्षुभ्य
ति कम्पते च शब्दायते चापि दकोद
रं तत् । जन्मनैवोदरं सर्वं प्रायः कृ
च्छ्रतमं मतम् । बलिनस्तदजाताम्बु
यत्नसाध्यं नवोत्थितमिति ॥

जलोद्धतगति । स्त्री । द्वादशाक्षराया
जगत्या प्रभेदे ॥ यथा । जसौ जस
युतौ जलोद्धतगति । यथा । यदीय
हलतो विलोक्य विपदं कलिन्दत
नया जलोद्धतगति । विलासविपिनं
विवेश सहसा करोतु कुशलं हली
स जगताम् ॥

जलौका

जलोद्भवा। स्त्री। लघुब्राह्म्याम् ॥

जलोद्भूता। स्त्री। गुण्डालायुपे ॥

जलोरगी। स्त्री। जलौकायाम् ॥

जलौकाः। स्त्री। जलौकायाम् ॥ जल मोक स्थान मस्या। ओकस् सान्त म् प्रसिद्धम् ॥

जलौकस। स्त्री। भूम्नि। रक्तपायाम्॥ जलमोक स्थानमासाम्। सान्तोय वहुवचनान्त इत्यमर ॥ जलोरगी जलौकातु जलौकाच जलौकसीति संसारावर्त्ता वहुवचन प्रायिक मिति वदन्ति ॥

जलौकस। पु। रक्तपायाम् ॥ जलमोकोऽस्यास्ति। अर्श्आद्यच्। जलौकसे नेव रक्ताकृष्टि निपुणेन वेश्याजनेनेति वासदत्ता ॥

जलौका। स्त्री। जलोरग्याम्। रक्तपायाम् ॥ * ॥ अथातो जलौकावचारणीयमध्यायं व्याख्यास्याम ॥ * ॥ नृपाढ्यवालस्थविरभीरुदुर्ब्बलनारीसुकुमाराणामनुग्रहार्थं परमसुकुमारोऽय शोणितावसेचनोपायोऽभिहितो जलौकस। तत्र वातपित्तकफदुष्टशोणित यथासंख्य शृङ्गजलौकालाबुभिरवसेचयेत् स्निग्धशीतरूक्षत्वात् सर्व्वाणिसर्व्वैर्व्वा ॥ * ॥ भवन्ति चात्र ॥ उष्णं समधुरं स्निग्धं गवां शृङ्गं प्रकीर्त्तितम्। तस्माद्वातोपसृष्टे तु हितं तदवसेचने ॥ शीताधिवासा मधुरा जलौका वारिसम्भवा तस्मात् पित्तोपसृष्टे तु हिता सात्ववसेचने ॥ अलाबुकटुकरूक्ष तीक्ष्णञ्च परिकीर्त्तितम्। तस्माच्छ्लेष्मोपसृष्टे तु हिततदवसेचने ॥ * ॥ तच प्रच्छितेतनुवस्त्रपटलावनद्धेन शृङ्गेण शोणित मवसेचयेदाचूषणात्। सान्तर्दीपयाऽलाब्वा ॥ * ॥ अथ जलायुका वक्ष्यन्ते। जलमासामायुरितिजलायुकाजलमासामोक इति जलौकस। ता द्वादश तासां सविषा षट्। तावत्यएव निर्विषा। तत्र सविषा। कृष्णा कर्बुरा अलगर्द्दा इन्द्रायुधा सामुद्रिका गोचन्दना चेति। तास्वञ्जनचूर्णवर्णा पृथुशिरा कृष्णा। वर्म्मिमत्स्यवदायता छिन्नोन्नतकुक्षि कर्बुरा। रोमशा महापार्श्वा कृष्णमुख्यलगर्द्दा। इन्द्रायुधवदूर्द्ध्वराजिभि श्चिता इन्द्रायुधा। ईषदसितपीतिका विचित्रपुष्पाकृतिचित्रा सामुद्रिका। गोवृषणवदधोभागे द्विधाभूताकृतिरणुमुखी गोचन्दनेति। ताभिर्दष्टे पुरुषे दंशे श्वयथुरतिमात्र कण्डूमूर्च्छा ज्वरोदाहश्छर्द्दिर्मद. सदनमि-

ति लिङ्गानि भवन्ति। तत्र महागद पानालेपननस्यकर्म्मादिषूपयोज्य। इन्द्रायुधादष्ट मसाध्यमित्येता सविषा सचिकित्सिताव्याख्याता ॥ * ॥ अथ निर्विषा। कपिला पिङ्गला शङ्कुमुखी मूषिका पुण्डरीकमुखी सावरिकाचेति ॥ * ॥ तत्र मन शिलारञ्जिताभ्यामिव पार्श्वाभ्या पृष्ठे स्निग्धामुद्गवर्णा कपिला। किञ्चिद्रक्ता दृत्तकाया पिङ्गाऽऽशुगाच पिङ्गला। यकृद्वर्णा शीघ्रपायिनी दीर्घतीक्ष्णमुखा शङ्कुमुखी। मूषिकाकृतिवर्णाऽनिष्टगन्धा च मूषिका। मुद्गवर्णा पुण्डरीकतुल्यमुखी पुण्डरीकमुखी। स्निग्धपद्मपत्रवर्णाष्टादशाङ्गुलप्रमाणा सावरिका सच पश्वर्थे ॥ इत्यविषाव्याख्याता ॥ तासां यवनपाण्ड्यसह्यपौतनादीनिक्षेत्राणि। तेषु महाशरीरा बलवन्त्य शीघ्रपायिन्यो महाशना निर्विषाश्च विशेषेण भवन्ति ॥ तत्र सविषमत्स्यकीटदर्दुरमूत्रपुरीषकोथजाता कलुषेष्वम्भःसु च सविषा। पद्मोत्पलनलिनकुमुदसौगन्धिककुवलयपुण्डरीकशैवालकोथजाता विमलेष्वम्भःसु च निर्विषा ॥ * ॥ भवति चात्र ॥ क्षेत्रेषु विचरन्त्येता

सलिलेषु सुगन्धिषु। न च सङ्कीर्णचारिण्यो न च पङ्केशया सुखा ॥ * ॥ तासा ग्रहणमार्द्रचर्म्मणान्यैर्वा प्रयोगैर्गृह्णीयात्। अथैनानवे महति घटे सरस्तडागोदकपङ्कमावाप्य निदध्यात्। भक्ष्यार्थं चासामुपहरेच्छैवल वल्लूरमौदकाश्च कन्दाश्चूर्णीकृत्य निदध्यात्। स्वापार्थं तृणमौदकानिच पत्राणि। त्र्यहात् त्र्यहाच्चान्यज्जल भक्ष्यच दद्यात् सप्त रात्रात् सप्तरात्राच्चघटमन्य सङ्क्रामयेत् ॥ * ॥ भवतिचात्र ॥ स्थूलमध्या परिक्लिष्टा पृथ्व्यो मन्दविचेष्टिता। अग्राहिण्योऽल्पपायिन्य सविषाश्च न पूजिता ॥ अथ जलौकोऽवसेकसाध्यव्याधितमुपवेश्य सन्निवेश्य वा विरूक्ष्य चास्य तमवकाश मृद्गोमयचूर्णैर्यद्यरुज स्यात्। गृहीताश्च ता सर्षपरजनीकल्कोदकप्रदिग्धगात्री सलिलशरावमध्ये मुहूर्त्त स्थिता विगतक्लमा ज्ञात्वा ता भिरोग ग्राहयेत्। श्लक्ष्णशुक्लार्द्रपिचुप्रोतावच्छन्नाकृत्वा मुखमपावृणुयात्। अगृह्णन्त्यै क्षीरबिन्दु शोणितबिन्दुवा दद्यात् शस्त्रपदानि वा कुर्व्वीत यद्येवमपि न गृह्णीयात्तदान्याग्राहयेत्। यदाच निविशतेऽश्वखुरवदाननकृत्वोन्नम्यच स्कन्धतदा जानीयाद्गृ

जलौका | जप

स्रातीति गरुत्मन्तीं चार्द्रवस्त्रावच्छन्नां धारयेत्सेचयेच्च । दशे तोदकण्डू-प्रादुर्भावैर्जानीयाच्छुद्धमियमादत्त इतिशुद्धमाददानामपनयेत् । अथ शोणितगन्धेन न मुञ्चेन्मुखं मस्या सैन्धवचूर्णेनावकिरेत् । अथपतितां तण्डुलकण्डन प्रदिग्धगात्रीं तैलल वणाभ्यक्तमुखींवामहस्ताङ्गुष्ठाङ्गुली भ्यांगृहीतपुच्छां दक्षिणहस्ताङ्गुष्ठा ङ्गुलिभ्यांशनै शनैरनुलोम मनुमा र्जयेत् तां मुखादामयेत् यथावत्स म्यग्वान्तलिङ्गानीति । सम्यग्वान्ता स लिलसरकन्यस्ता भोक्तुकामा सती चरेत् । या सीदति न चेष्टतेसा दु र्वान्ता तां पुनः सम्यग्वामयेत् । दु र्वान्तायाव्याधिरसाध्यइन्द्रमदोनाम गदो भवति । अथ सुवान्तां तां पूर्वव त्सन्निदध्यात् शोणितस्य च योगा योगानवेक्ष्य जलौकोव्रणान्मधुनाव घट्टयेच्छीताभिरद्भिश्च परिषेचये त्बध्नीत वा व्रणं कषायमधुरस्निग्ध शीतैश्च प्रदेहैः प्रदिह्यादिति । भव तिचात्र ॥ चेत्राधिग्रहण जाती पोष ण सावचारणा । जलौकसाञ्च यो वे त्ति तत्साध्यान्स जयेद्गदान् ॥ इति सुश्रुते सूत्रस्थाने * १३ ऽध्याय ॥ जलमोका ऽस्याः । ओकउच्च.के

इतिनिपातनादोकोऽन्त' । टाप् ॥

जल्प । पु । विजिगीषुवचने । स्वपक्ष स्थापनपरपक्षदूषणवत्यां विजिगी षुकथायाम् ॥ यथोक्तोपपन्न च्छल जातिनिग्रहस्थानसाधनोपा लम्भोज ल्प । न्यायसूत्राम् १ । ४२ ॥ यथो क्तेषु यदुपपन्न तेनोपपन्नइत्यर्थः । मध्यमपदलोपीसमास ॥ भावघो ॥ वादे ॥ जल्पनम् । जल्पव्यक्तायां वा चि । घञ् ॥

जल्पक' । त्रि । वहुभाषिणि ॥ जल्पति । जल्प० वुन् ॥

जल्पन् । त्रि । व्याहरति ॥

जल्पनम् । न । कथने ॥ किं मिथ्यायत जल्पनेन सततरेवक्रारामंवद ॥ त्रि । वहुभाषिणि ॥ जल्पति । जल्प०। नं द्यादित्वाल्ल्यु ॥

जल्पाक. । त्रि । वाचाले । वहुकुत्सि तभाषिणि ॥ जल्पति । जल्प०। तच्छी ल । जल्पभिक्षेतिषाकन् । षित्वात् स्त्रिया जल्पाकी ॥

जल्पित । त्रि । उक्ते । कथिते ॥ जल्प्य तेस्म । जल्प० । क्त. ॥ न । कथने ॥

जव । पु । वेगे ॥ त्रि । वेगवति ॥ जु इति सौत्रोधातु । जवनम् । ऋदो रप् ॥ न । सवेगगतिवचने ॥ वेगा ख्यगुणे ॥

जवन॰ । पु ॥ वेगिहये ॥ जवशील॰ । जु इति सौत्रो गतौ वेगे च । जुचङ्क्रम्येतियुच् ॥ इउनान इति जन प्रसिद्धे देशे ॥ म्लेच्छजातिविशेषे । जवनदेशोद्भवे प्रथमतः क्षत्रिये पश्चाद्विहितक्रियालोपादिना शूद्रत्वमापन्ने दस्युपदवाच्ये ॥ सगरोऽस्य सर्वशिरोमुण्डनं सर्वधर्मवहिष्कृतत्वञ्च चकार ॥ श्रीकारीमृगे ॥ घोटके ॥ न । वेगे । स्यदे ॥ त्रि । वेगिनि ॥

जवनालम् । न । जुन्हरी जुवार इतिच प्रसिद्धे धान्ये ॥

जवनिका । स्त्री । कनात चिक सिरकी इत्यादिभाषाप्रसिद्धे व्यवधायकवस्त्रादौ । प्रतिसीरायाम् । तिरस्करिण्याम् । व्यवधानपट्याम् ॥ जवन्यस्याम् । जु॰ । ल्युट । कन् ॥

जवनी । स्त्री । अपथ्याम् ॥ औषधीभेदे ॥

जवसम् न । घासे ॥ इतिशब्दरत्नावली ॥

जवा । स्त्री । ओड्रपुष्पे ॥ ओडहुले ॥ जवति । जु॰ । अच् । टाप् ॥ मरुप्रसिद्धे चतुर्जन्तुविशेषे ॥

जवादि । न । सुगन्धिद्रव्यविशेषे । गन्धराजे । कृत्रिमे । मृगधर्मजे ॥ जवादि नीरसं स्निग्ध मीषत्पिङ्गं सुगन्धदम् । आतपेबहुलामोद रासांयोग्यन्तन्मतमितिलक्षणाम् ॥

जवाधिक॰ । पु । जवने । वेगाधिकहये ॥ जवेन अधिक॰ ॥ त्रि । अतिशयवेगवति ॥

जवापुष्पम् । न । ओड्रपुष्पे ॥ जवाऽपुष्पमस्य ॥

जवी । त्रि । वेगवति ॥ जवोऽस्यास्ति । इनि ॥ उष्ट्रे ॥ घोटके ॥

जविष्ठः । त्रि । अतिवेगवति ॥ अतिशयेन जववान् । अतिशायने इष्ठन् । विन्मतोर्लुगिति मतुपोलुक् ॥

जवीय । त्रि । अयवत्तरे ॥ मत्वन्तादीयसुनि मतुपोलुक् ॥

जसुरि । पु । वज्रे ॥ जस्यति । जसुमोक्षणे । जसिसहोरुरिन् । जसुरये श्रान्ताय जसुरिक्षुधित मितिवेदभाष्यम् ॥

जहक॰ । पु । काले ॥ शाले ॥ निर्मोहे ॥ निर्मोके ॥ जहाति । ओहाक्॰ । जहातेर्द्वेचेतिकुन् ॥ त्रि । त्यागिनि ॥

जहदजहल्लक्षणा । स्त्री । अर्थान्तरपरित्यागेनांशान्तरलक्षणायाम् । भागत्यागलक्षणायाम् । वाच्यार्थैकदेशपरित्यागेनैकदेशवृत्तौ ॥ यथा । सोयदेवदत्त इतिवाक्ये सशब्दायशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेन अविरुद्धदेवदत्तेन सह लक्ष्य लक्षणाभाव

सम्बन्धइति ॥

जहल्लक्षणा । स्त्री । वाच्यार्थमशेषत परित्यज्य तत्सम्बन्धिन्यर्थान्तरेप्र-वृत्तिरूपायां लक्षणायाम् ॥ यथा । गङ्गायां घोष प्रतिवसतीति वाक्ये गङ्गाघोषयो राधाराधेयभावलक्ष णस्य वाक्यार्थस्या ऽशेषतोविरुद्ध-त्वात् वाच्यार्थमशेष परित्यज्य तत् सम्बन्धितीरलक्षणाया युक्तत्वात् ज हल्लक्षणासङ्गच्छते ॥

जहत्स्वार्था । स्त्री । जहल्लक्षणायाम् ॥ जहत्स्वार्थातुतत्रैव यत्ररूढिर्विरो धिनीत्युक्तेः ॥

जहा । स्त्री । मुण्डितिकायाम् ॥

जहानक । पु । प्रलये ॥ इतिहैमचन्द्रः ॥

जहुः । पु । अपत्ये ॥ यथा । मृगजहु ना मृगापत्येनेति श्रीधरस्वामी ॥

जह्नु । पु । चन्द्रवंशोद्भवेकुरुराजपुत्रे ॥ गङ्गाऽऽगमनकाले येन गङ्गा पीता पुनर्भगीरथप्रार्थनया जरु भित्त्वा वहिर्निर्गमिता तेनसाजाह्नवीति ख्याति मागता ॥ विष्णौ ॥ जनान् सञ्चारसमये ऽपह्नु तेऽपनयति । ह्नु ङ् अपनयने । क्विप् ॥ जहात्यवि दुष भक्तं न् नयति परमिति वा ॥ यद्वा । जहाति । ओहाक् त्यागे । जहातेर्द्वे ऽन्त्यलोपश्चेतिनु ॥

जह्नुतनया । स्त्री । गङ्गायाम् ॥ अत्रोरा अर्षेसतनया ॥

जह्नु सप्तमी । स्त्री । वैशाखसितसप्त म्याम् ॥ शुक्लपक्षस्य सप्तम्या वैशाखे जह्नुपुत्रिकाम् । प्रपूजयेत् सुखार्थो य स्वर्गमोक्षफलायचेच्छ्युतर नामा ख्यातन्त्रे ११ पटल ॥

जह्नुसुता । स्त्री । गङ्गायाम् ॥

जा । स्त्री । यातरि । भर्त्तुर्भ्रातृभार्या याम् ॥ इत्येकाक्षरकोषः ॥

जागत । पु । प्रगाथविशेषे ॥ जगती आदिरस्य । सोस्यादिरितिच्छन्दस. प्रगाथेष्विष्यण् ॥ न । जगतीछन्द सि ॥ स्वार्थे ऽण् ॥

जागर । पु । जागरणे । अन्त करणस्य कृतस्वविकाशे ॥ जागृनिद्राक्षये । भा वे घञ् ॥ जाग्रोविचीतिगुण ॥

जागरणम् । न । जागरे । निद्राभावे ॥ प्रमितिर्जागरेजाग्रद् भ्रम स्वप्नोऽथ मूढता । पानादिजन्यासुप्ति स्यादे वजागरण त्रिधा ॥ जागृ० । ल्युट् ॥

जागरा । स्त्री । जागर्यायाम् ॥ जागरण म् । स्त्रियामधिकारे जागर्त्तेरकारो वा । जाग्रोविचिणल्ङित्स्विति गुण ॥

जागरितम् । न । इन्द्रियैरर्थोपलब्धौ ॥ स्वप्नदर्शनहेतुककर्मक्षये जागरित

मागच्छन् स्वोपाध्यन्तःकरणेन्द्रिय-सश्चिवस्तत्तदिन्द्रियविषयाननुमेया श्चस्थूलान् व्यावहारिकान् पदार्था ननुभवति तदिदमस्य जागरितमि त्युक्तम् ॥ जागृ० । क्त' ॥

जागरितस्थान । पु । व्यष्ट्युपहित चैतन्ये विश्वशब्दवाच्ये ॥ जागरित-स्थानमस्य ॥

जागरितान्तम् । न । जागरितमध्ये जा गरितविषये ॥

जागरिता । त्रि । सजागरे । जागरूके ॥ जागरणशील । जागृ० । तृन ॥

जागरी । त्रि । जागरूके ॥ जागरमस्या स्ति । इनि ॥

जागरूक । त्रि । अप्रमत्ते । सजागरे । जागरितरि । जागरणशीले ॥ जाग र्त्तितच्छीलः । जागृ० । जागरूकश्च तिजागर्त्तेरूक' ॥

जागर्त्ति । स्त्री । जागरणे ॥ स्त्रियां-क्तिन् ॥

जागर्य्या । स्त्री । जागरे ॥ जागरणम् । जागर्त्तेरकारोवेति पक्षेश । यक् । जाग्रोविचिण्णीतिगुण ॥

जागुडम् । न । कुङ्कुमे ॥ पु । देशवि शेषे ॥ तत्रत्यकुङ्कुममत्यन्तशोभते ।

जागृत् । पु । जागरणे ॥ जागृ० । क्वि पतुकौ ॥

जागृवान् । त्रि । जागरूके ॥

जागृवि' । पुं । अग्नौ ॥ नृपे ॥ जागर्ति । जागृ० । कृगृशृदृजागृभ्यः क्विन् ॥

जाग्रत् । त्रि । जागरणविशिष्टे ॥ स्त्री । जागरितावस्थायाम् ॥ यथा । श्रो त्रादिज्ञानेन्द्रियैः शब्दादिविषयं य त्तु ज्ञायते सा जाग्रदवस्था । साश्चि वा । यथा । प्रमितिर्जागरे जाग्रत् भ्रमः स्वप्नोऽयमूढता । यानादिज न्यासुप्ति स्यादेव जागरणं त्रिधा ॥ जाग्रति । जागृ० । शतृ ॥

जाग्रिया । स्त्री । जागरणे ॥ जागरणम् । जागृ० । जागर्त्तेरकारोवेतिपक्षेश' । यक् । गुणात् परत्वेन रिङ्कादेशइति धातु पारायणम् ॥

जाघनी । स्त्री । जरौ ॥ इतित्रिकाण्ड शेष ॥

जाङ्गल । पु । कपिञ्जले पक्षिणि ॥ स्वनामाख्याते निर्जलदेशे ॥ आ काशशुभ्र उच्चश्च स्वल्पपानीयपाद प । शमीकरीरविल्वार्कपीलुकर्क न्धुसङ्कुल ॥ हरिणैणर्ष्यपृषतगोक र्णखरसङ्कुल । सुस्वादुफलवान् दे शो वातलो जाङ्गल स्मृत ॥ * ॥ मा सवर्गेऽत्र जङ्गला बिलस्थाश्च गुहा शया. । तथा प्रसहगा ज्ञेया विष्कि रा प्रतुदा अपि ॥ प्रसहा अथचरा

न्या भवौजाङ्गलजातय ॥ जाङ्गला मधुराह्ला स्तुवरा लघवस्तथा । वल्यास्तंहणा हृष्या दीपना दोषहारिणः ॥ सूक्तां भिम्लयास्त्वग रहितदिने तया । बाधिर्यं मरुचि ।छर्दि प्रमेह मुखजान् गदान् । स्त्रीपद गलगण्डञ्च नाशयन्त्यनिलामयान् ॥ जङ्गलेभव. । तत्रभवइत्यण् ॥ न । पलले । मांसे ॥*॥ पानीयविशेषे ॥ यथा । अल्पोदकोल्पवृक्षश्च पित्तरक्तभयान्वित । ख्यातस्तोजाङ्गलो देशस्तत्रत्य जाङ्गलजलम् ॥ जङ्गलं सलिलं रुच लवणं लघुपित्तनुत् । वह्निकृत् कफकृत् पथ्य विकारान् हरतेवहून् ॥ जालिनीफले ॥ त्रि । जङ्गलोत्पन्ने ॥

जाङ्गलदेश । पु । कुरुदेशसमीपस्थदेशे ॥ यथा । अल्पोदकतृणोयस्तुप्रवात प्रचुरातप । सज्ञेयो जाङ्गलोदेशो बहुधान्यादिसंयुत इति ॥ जाङ्गलश्चासौदेशश्च ॥

जाङ्गलि । पु । विषवैद्ये ॥

जाङ्गली । स्त्री । शूकशिम्ब्याम् । जागुली इति पर्वतीयभाषा ॥ विषविद्यायाम् ॥

जाङ्गुलम् । न । जालिनीफले ॥

जाङ्गुलिक । पु । विषवैद्ये ॥ जाङ्गुली विषविद्या तामधीते वेदवा । वसन्तादिस्वाट्ठक् ॥ जाङ्गुल्यादीव्यति वा । तेनदीव्यतीतिठक् ॥ परीक्षित सम्प्रीयात् जाङ्गुलीभि र्भिषग्वृत ॥

जाङ्गुली । स्त्री । विषविद्यायाम् ॥ जाङ्गुलीविषघ्नोमन्त्र इति कश्चित् ॥

जाङ्घिक । पुं । उष्ट्रे ॥ अंशकारीदृष्ये ॥ जङ्घाजीविनि । धावके । जङ्घाकरिके ॥ जङ्घाभ्यांजीवति । वेतनादिभ्योजीवतीतिठञ् ॥

जाजी । त्रि । योधिनि ॥ जजति । जज युद्धे । ताच्छील्येणिनि ॥

जाज्वल्यमान । त्रि । देदीप्यमाने ॥ भृशंज्वलति । ज्वलदीप्तौ । धातोरेकाच इति यङ् । ततोलट.शान आदेश ॥

जाटलि । पु । स्त्री । वृक्षविशेषे ॥ जटनम् । जटसङ्घाते । घञ् । जाट लाति । लादाने । बाहुलकात् डि ॥

जाठर । पुं । उदरस्थेऽग्नौ ॥ जठरे भव । तत्रभवइत्यण् ॥

जाडार । पु । जडात्मजे ॥ जडस्यापत्यम् । आरगुदीचामित्यारक् ॥

जाड्यम् । न । जडतायाम् । स्तम्भे ॥ जडस्यभाव: । ष्यञ् ॥

जाड्यारि । पु । जम्बीरे ॥

जात । त्रि । उत्पन्ने । स्वकृतधर्माधर्मादि

यशाल्लब्धशरीरेन्द्रियसम्बन्धे॥ यथा। एकयोनौ सकृज्जातः कोयं बोद्धुं न शक्नुयात्। अनन्तयोनिष्वऽसकृज्जायमानस्य का कथा॥ न। व्यक्तौ॥ ओघे। सङ्घे॥ जन्मनि॥ जायतेऽनेन। जनीप्रादुर्भावे। क्तिच् क्तौचेतिक्त। जनसनेत्यात्वम्॥

जातकम्। न। जातस्य शुभाशुभनिर्णायके होराग्रन्थे। बृहज्जातकादौ॥ जातकर्माख्यमङ्गले॥ चि। जाते॥

जातकर्म्म। न। जातस्य कर्त्तव्येमन्त्रवत् सर्पिःप्राशनादिरूपे जननसंस्कारे॥ प्राङ्नाभिवर्द्धनात् पुंसोजातकर्म्मविधीयते। मन्त्रवत् प्राशनं चास्य हिरण्यमधुसर्पिषामितिमनुः॥ जातस्य कर्म। जातकर्मवा॥

जातमात्र चि। सद्योजाते॥ जातएव॥

जातरूपम्। न। स्वर्णे॥ धुस्तूरे॥ आकरजे स्वर्णे॥ चि। प्रशस्तरूपे॥ जातरूपं यस्य। यद्वा। प्रशस्तं जातम्। प्रशंसाया रूपप्॥

जातवेदाः। पुं। पुनः पुनर्हवींषि भोक्तरि। हुताशने॥ विद्यते लभ्यते। विद्लृलाभे। असुन्॥ जातं वेदोधनं यस्मात्॥ जातेजाते सर्वप्रपञ्चे स्वस्मिन्नध्यस्तत्वेन ये विद्यते। विद्सत्तायाम्। जातं वेत्ति वेदयते

वा। विद्चेतनादौ। असुन्॥ जातानि भुवनानि चराचराणि सर्वज्ञत्वेन स्वस्मादुत्पन्नत्वेनच वेत्तिवा। जातानिसर्वकारणत्वेन य विदन्ति वा॥ चित्रकौषधौ॥

जातापत्या। स्त्री। प्रसूतायाम्॥ जातमपत्यं यस्याः॥

जाति। स्त्री। गोत्रे॥ जन्मनि॥ चुल्याम्। अग्निकायाम्॥ आमलक्याम्॥ सामान्ये। ब्राह्मणक्षत्रियवैश्यशूद्रात्मके॥ छन्दसि॥ जातीफले॥ मालत्याम्। चवेली इति भाषा॥ श्वेताजातिस्तथापीता मोच्यते स्वर्णजातिका। जातीयुगं तिक्तं सुष्णं तुवरं लघु दोषजित्। शिरोक्षिमुखदन्तार्त्तिविषकुष्ठव्रणास्रजित्॥ काम्पिल्ले॥ * ॥ समानप्रसवात्मिका जातिः॥ २। १३४। इति न्यायसूत्रम्॥ अस्यार्थः। समानं समानाकारकं प्रसवो बुद्धिजननम् आत्मा स्वरूपंयस्याः सा। तथाच समानाकारबुद्धिजननयोग्यत्वमर्थः। समानाकारबुद्धिजननयोग्यधर्मविशेषो नित्यानेकसमवेतत्वरूपार्थेऽप्यपिवदन्ति। इदन्तुबोध्यम्। एवंसत्याकृत्यविषयको गवादिपदात्-शाब्दबोधः। अनुभवेपि तथैवकार्ये

कारणाभावकल्पनात् गोपदस्य गो
त्वविशिष्टे शक्तिरेवस्यादिति ॥ नि
त्यत्वे सत्यनेकसमवेतत्वं जाति
त्व मितिन्यायसिद्धान्तमुक्तावलि-
॥ * ॥ गोत्वादौ ॥ तस्य लक्षणं यथा
। आकृतिग्रहणा जाति र्लिङ्गानाञ्च न
सर्वभाक् । सकृदाख्यातनिर्ग्राह्या
गोत्रञ्च चरणैः सह ॥ अस्यार्थः । आ
क्रियते व्यज्यतेऽनयेति आकृतिः सं
स्थानम् । गृह्यतेऽनेनेति ग्रहणं ज्ञा
नम् । आकृत्या ग्रहणं यस्याः सा आ
कृतिग्रहणा । जातिराकृतिग्रहणा भ
वति । संस्थानव्यङ्ग्येत्यर्थः । तेन
मनुष्यगोमृगहंसादीनां पृथक् पृथ
क् संस्थानैर्व्यज्यमाना मनुष्यत्वगो
त्वमृगत्वहंसत्वादि र्जातिः ॥ एवं
ब्राह्मणक्षत्रियवैश्यशूद्राणां पृथक्
संस्थानाभावत् ब्राह्मणत्वादेर्जाति
त्वं नायातमिति लक्षणान्तरमाह ।
लिङ्गानाञ्च न सर्वभागिति । या
सर्वाणि लिङ्गानि नभजते सा च जा
तिरित्यर्थः । स्त्रीपुंसयोरपत्यान्ता
द्विचतुष्षट्पदोरगाः । जातिभेदाः
पुमाख्याश्चेत्यमरसिंहेजातिभेदा
नां स्त्रीपुंसयोरेवेतिनियमे ब्राह्मणा
दीनां सर्वलिङ्गभाजित्वा भावा
ज्जातित्वम् । किन्तु अजातलिङ्गस्य

जनस्य हंसं दृष्टवतोपि तस्य सं
स्थानेन हंसत्वंव्यक्तितु नशक्यते इ
ति हंसस्यापिजातित्वं नायातमिति
पूर्वलक्षणस्य दोषः । एवं देवदत्ता
दिसंज्ञाशब्दस्यापि सर्वलिङ्गभाजित्वा
भावाज्जातित्वापत्तिरिति द्वितीय-
लक्षणस्य दोषः । इतिदोषद्वयमपाक
र्त्तुं द्वयोर्लक्षणयोर्विशेषणमाह । स
कृदाख्यातनिर्ग्राह्येति । सकृदेकवार
माख्यातेन उपदेशेन निः निश्चये
न ग्राह्या ग्रहीतुं शक्या इत्यर्थः ।
तेन हंसोऽयमित्युपदेशे हंसदृष्ट
वतस्तस्य संस्थानेन हंसत्वं व्यक्तितु
मशक्यतएवेति पूर्वलक्षणस्य नदोषः
। एवं देवदत्तादिसंज्ञाशब्दस्यैक-
स्मिन्नुपदेशेपि अन्यस्मिन् ज्ञाना-
भावात् जातित्वं न स्यादिति परल
क्षणस्यापि न दोषः । गार्ग्यः पुरुषः
गार्गी स्त्री गार्ग्यं कुलमिति स
र्वलिङ्गभाजित्वात् संस्थानव्यङ्ग्य
त्वाभावाच्च गार्ग्यादीनां जातित्वा
नुपपत्तौ तृतीयलक्षणमाह । गो
त्रञ्चेति । पुत्रपौत्रप्रभृतिकमपत्यं
गोत्रमिति पूर्वाचार्यपरिभाषितगो
त्रमिहगृह्यते गार्गीवात्सीत्यादि ।
चतुर्थलक्षणमाह । चरणैः सहेति
। चरणञ्च जातिरित्यर्थः । चरणाः

न्दोवेदैकदेशवाचीकठादिरूप स च अध्ययनक्रियासम्बन्धेन प्रवृत्तत्वात् क्रियावाचकएव नतुजातिवाचक । तेनास्य जातिसञ्ज्ञार्थं चरणे सङ्ग्रहः कृतम् गार्ग्यादीनां यञन्तत्वेनतिङी पिसिद्धेपि जातिसंज्ञाफलन्तु गार्गी भार्यायस्यासौ गार्गीभार्य इत्यादौ जातेश्चेति पुंवद्भावनिषेध । गार्गी चासौ भार्याचेति गार्ग्यभार्या इत्यादौ पुंवत्कर्मधारयेतिपुन पुंवद्भाव ॥ * ॥ प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः । असर्वलिङ्गांबह्वर्थां तां जातिं कवयोविदुः ॥ गोत्रञ्च चरणानिचेत्यपरस्य जातिलक्षणम्- । यथापूर्वं जातिलक्षणा तथा कुमारी भार्येति भवितव्यम् । यथोत्तर तथाकुमारभार्य इति इतिभाष्यम् ॥ जननम् जनयति वा । जनि० । स्त्रि यांक्तिन् । जनसनेत्यात्वम् ॥ * ॥ साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जाति । साधर्म्यवैधर्म्याभ्यामिति स.व धारणोनिर्देश । तेन व्याप्तिनिरपेक्षाभ्यां साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थान दूषणाभिधान जातिरित्यर्थं ॥ षड्जादिसप्तसु ॥ काव्यालङ्कारप्रभेदे ॥ घटत्वादिरूपाजातिर्हि घटादिशब्द प्रवृत्तौनिमित्तम् ॥

जातिकोषम् । न । जातीफले । जायफल इतिभाषा ॥

जातिकोषी । स्त्री । जातीपत्त्याम् । जाविन्नी इतिभाषा ॥

जातिधर्म्म । पु । ब्राह्मणत्वादिनिबन्धने अध्ययनाध्यापनादौ ॥ जातेर्धर्मे ॥

जातिफलम् । न । जातिकोषे ॥

जातिब्राह्मण । पु । तपश्रुतविहीने विप्रे ॥ यथा । तपश्रुतञ्च योनिश्च एतद्ब्राह्मणकारणम् । तपश्रुताभ्यां योहीनो जातिब्राह्मणएवस इति ॥ जात्याजन्मना ब्राह्मण ॥

जातिभ्रंशकरम् । न । नवविधपातकान्तर्गते पातकविशेषे ॥ यथा । ब्राह्मणस्य रुज. कृत्या घ्रातिरघ्रेयमद्ययो । जैह्म्यञ्च मैथुनपुंसि जातिभ्रंशकरस्मृतमिति ॥

जातिवैरम् । न । स्वाभाविकशत्रुत्वे ॥ तत्पञ्चविधम् । स्त्रीकृतम् १ यथा श्रीकृष्णशिशुपालयो ॥ वास्तुजम् २ यथा कौरवपाण्डवानाम् ॥ वाग्जम् ३ यथा द्रोणद्रुपदयो ॥ सापत्नम् ४ यथा मूषिकनकुलयो ॥ अपराधजम् ५ यथा पूजनीब्रह्मदत्तयो । इतिमहाभारतम् ॥

जातिशस्यम् । न । } जातीफले ॥
जातिसारम् । न । }

जातिस्मर । पु । तीर्थविशेषे ॥ त्रि । पूर्वजन्मजातिस्मरणवति ॥

जाती । स्त्री । सुमनायाम् । सुमनसि । मालत्याम् । चमेली इतिभाषा॥ तत्पुष्पे ॥ क्तिन्नन्तात् क्तिजन्ताद्वा ङीष् ॥ जात्या पुष्पम् । पुष्पमूलेषु बहुलमित्यनुदात्तादेरञो ऽ सस्य लुक् ॥

जातीकोशम् । न । जायफल इतिप्रसिद्धे जातीफले ॥

जातीपत्री । स्त्री । सुमन पत्रिकायाम् । जावित्री इतिभाषा ॥ जातीपत्री लघु स्वादु कटुष्णा रुचिवर्णकृत् । कफकासवमिश्वासतृष्णाकृमिविषापहा ॥

जातीफलम् । न । जातीकोषे ॥ जातीफलरसेतिक्तं तीक्ष्णोष्णं रोचनं लघु । कटुकं दीपनं ग्राहि स्वर्यं श्लेष्मानिलापहम् ॥ निहन्ति मुखवैरस्य मलदौर्गन्ध्यकृष्णता । कृमिकासवमिश्वासशोषपीनसहृद्रुज ॥ जात्याः फलम् । ज तीलताया फलवा ॥

जातीय । त्रि । जातौभवे ॥ वृद्धाच्छः ॥ प्रकारार्थबोधके तद्धितप्रत्ययविशेषे ॥ यथा । तार्किकप्रकारः । तार्किकजातीय । प्रकारवचनेजातीयर् ॥

जातीरसम् । न । बोले ॥

जातु । अ । कदाचिदर्थे ॥ यथा । जातु जनो नैति सुखं कर्मवाहुल्यात् कर्मणैव याति सुखं मानपुरस्तात् । मानरत ब्रह्मरत येन निमीर्तं द्वारभय मारभय तेनविगीतमिति ॥ ॥ शब्दे ॥ विगर्हणे ॥ अविकल्पे ॥ निषेधे ॥ आयति । ऐश्वर्ये । बाहुलकात् क्तुन ॥

जातुकम् । न । हिङ्गुनि ॥ इतिशब्दचन्द्रिका ॥

जातुधान । पुं । राक्षसे ॥ जातु कदाचित्रन्ध्रप्राप्य धामं सन्निधानमस्य ॥

जातुषम् । त्रि । लाक्षानिर्मिते ॥ जतुनोविकारः । त्रपुजतुनो षुगित्यण् ॥

जातूकर्ण्य । पु । ऋषिविशेषे ॥ वैद्यशास्त्रप्रवर्तके मुनिविशेषे ॥

जातेष्टि । स्त्री । वैश्वानर द्वादशकपालनिर्वपेत् पुत्रेजातइतिजातकर्माङ्गविहितायामिष्ट्याम् ॥

जातोक्ष । पु । दम्यवत्से । युवद्वषे ॥ जातश्चा सा वुक्षाचा । अचतुरेति साधु ॥ उत्पन्न उक्षाजातोक्ष इत्यमर । अत्रउत्पन्नो ऽ छदम्यभावप्रासवलीवर्दभावोऽर्थ ॥

जात्य । त्रि । श्रेष्ठे । कुलीने ॥ कान्ते

॥ जातीभव॰ । यत् ॥

जात्यन्ध । त्रि । जन्मान्धे ॥

जात्याभास । त्रि । मायोत्पन्ने रज्जुस र्पादौ ॥ अजातिसत् जातिवदाभासते इतिविग्रह ॥

जात्युत्तरम् । न । असदुत्तरे ॥

जानकी । स्त्री । सीतायाम ॥

जानपद. । पु । जने ॥ देशे ॥ त्रि । जनपदोत्पन्ने ॥ जनपदे भव. । उत्सादित्वादञ् ॥

जानपदी । स्त्री । जनपदोत्पन्नवृत्तौ ॥ जानपदात् वृत्तौ वाच्यायां जानपदकुण्डेत्यादिना ङीष् ॥ अजन्तत्वे न टिड्ढेतिङीप्याद्युदात्त॰ ॥ जनपदप्रभवायाम् ॥

जानान॰ । त्रि । ज्ञानवति ॥

जानु । न । ऊरुजङ्घयोर्मध्यभागे । अष्ठीवति । घोँटु इति भाषा ॥ जायते । जनी॰। दृसनिजनीतिञुण् । जनिवध्योश्चेति नप्रवर्त्तते अनुबन्धद्वयसामर्थ्यात् ॥

जानुकम् । न । जानुनि ॥ स्वार्थेयावादिभ्य॰कन् ॥

जानुकारक । पु । रवे पार्श्वगविशेषे ॥

जाप । पु । जपे ॥ जपेर्भावेघञ् ॥

जापक॰ । त्रि । जपकर्त्तरि ॥ जपति । जपमानसे । ण्वुल् ॥

जापनम् । न । निरसने ॥ निर्वर्त्तने ॥

जाबाल । पु । सत्यकामेमुनौ ॥ जबालाया अपत्यम् । अण् ॥

जाबालि॰ । पु । मुनिविशेषे ॥

जामदग्न्य । पु । जमदग्निसुते । परशुरामे ॥ जमदग्नेर्गोत्रापत्यम् । गर्गादिभ्योयञ् इत्यनन्तरापत्येपि गोत्रत्वरूपाध्यारोपात् यञ् । अनन्तरविवक्षायान्तु ऋष्यन्धकेत्यऽणि जामदग्न इतिबोध्यम् ॥

जामलम् । न । तन्त्रशास्त्रविशेषे । यामले ॥

जामाता । पु । दुहितृपत्यौ ॥ सूर्यावर्त्ते । सुलचिया इति गौडप्रसिद्धे शाके ॥ धवे । वल्लभे ॥ जाया माति मिमीते मिनोति वा । मा॰ । माङ्॰ । डुमिञ्॰ वा । नप्तृनेष्ट्रितिसाधु ॥

जामि. । स्त्री । स्वसरि । भगिन्याम् ॥ कुलस्त्रियाम् ॥ दुहितरि ॥ स्नुषायाम् ॥ शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम् । न शोचन्ति तु यत्रैता वर्द्धते तद्धिसर्वदेतिमनु । गृहपतिर्सवर्द्धनीयसन्निहितसपिण्डस्त्रियोजामयइतिकुल्लूकभट्ट ॥ जायति जायतेवा । जैत्वये । बाहुलकान्मिः ॥ यद्वा । जमति । जमु अदने । बाहुलकादिण् दीर्घश्च

॥ कर्मंधीअजादिभ्यश्रतीभ् वेति-स्वामी ॥

जामिता । स्त्री । कालस्ये ॥

जामा । स्त्री । कुलयोषायाम् ॥ स्वसरि ॥ ङीष् ॥

जामेय । पु । भागिनेये ॥ जाम्याअपत्यम् । स्त्रीभ्योढक् ॥

जाम्बवम् । न । जम्बूफले ॥ जम्बाःफलम् । जम्ब्वावेत्यण् । तस्यविधानाल्लुक् ॥ सुवर्णे ॥ कपिविशेषे ॥ नगरविशेषे ॥

जाम्बवान् । पु । ब्रह्मणःपुत्रे । रामायणादिप्रसिद्धपराक्रमे ऋक्षराजे ॥-

जाम्बवता । स्त्री । जाम्बवतोदुहितरि श्रीकृष्णपत्न्याम् ॥ नागदमन्याम् ॥

जाम्बवी । स्त्री । नागदमन्याम् ॥

जाम्बुवान् । पुं । जाम्बवति ॥

जाम्बूनदम् । न । स्वर्णे ॥ धुस्तूरे ॥ काञ्चनविशेषे ॥ यथा जाम्बूनदेनाम्ब सदृशं लोहमस्तिचेत् । तथा चकुधर्मेणसमयोन्य सन्नोभवेदिति॥ समय आचार. ॥ जम्बूरसस्य नद्यांभवम् । तत्रभवइत्यण् ॥ तीरस्थस्य द्रुमप्राप्य सुखवायुविशोषिता । जाम्बूनदाख्यं भवति सुवर्णं सिद्धभूषणम् ॥ तद्रसं जम्बूरसम् ॥ यथा । मेरु मन्दरपर्वतस्थजम्बूफलाना मम्बुध निपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जम्बूनाम नदी इत्याद्युक्तं वर्तति । तस्या उभयोःकूलयो र्मृत्तिका जम्बूरसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं-नाम स्वर्णं भवति ॥ इति श्रीभागवतम् ॥

जम्बूनदेश्वरी । स्त्री । देवीविशेषे ॥ तत्स्थाने ॥

जायकम् । न । कालीयके । पीतवर्णे सुगन्धिकाष्ठप्रभेदे । कालिया इति गौडभाषा ॥ जयति मन्यान्तरम् । जिअभिभवे । ण्वुल् ॥

जायमान । पु । उपनीते ॥

जाया । स्त्री । विधिनाविवाहितायां स्त्रियाम् । पत्न्याम् । द्वितीयायाम् ॥ जायतेऽस्याम् । जनी० । जनेर्यक् । येविभाषेत्यात्वम् । पतिर्भार्यां संप्रविश्य गर्भोभूत्वेह जायते । जायाया स्तद्धि जायात्वं यदस्यां जायते पुनः ॥ तस्मात् ससमभवने ॥

जायाघ्न । त्रि । तिलकालकादिचिह्न- ॥ जायांहन्ति । हन० । अमनुष्यकर्तृके चेतिटक् ॥ ङीपि जायाघ्नी ॥

जायाजीवः । पुं । नटे ॥ जायया जीवति । जीव० । इगुपधेतिकः ॥

जायानुजीवी । पु । नटे ॥ बकपक्षिणि ॥ वेश्यापतौ ॥ दुःस्थे ॥

जायापती । पु । द्विवचनान्त । सद्देहाख्या भार्याभर्त्तारौ ॥ जायाच पतिश्च । रा जदन्तादिषु निपातनात् पूर्वनिपात ॥

आयु । पु । औषधे ॥ जयति रोगान् । जि० । कृवापाजिमिस्वदिसाध्यशू भ्यउण् इत्युण् ॥

जार । पु । उपपतौ ॥ जरयति । जृष्० । दारजारौकर्त्तरिणि लुक्चेति घञ् । जीर्यतेऽनेनेति करणेवा घञ् ॥

जारज । त्रि । विजन्मनि । अनियुक्ता सुते ॥ जारात् जात । जनी०ड ॥

जारणी । स्त्री । स्थूलजीरके ॥

जारद्गवी । स्त्री । मध्यममार्गे नक्षत्रविशेषाणां संज्ञाविशेषे ॥ यथा । ज्येष्ठानुराधाविशाखावीथीजारद्गवीमता । एतास्तुवीथयस्तिस्रो मध्यमोमार्ग उच्यतइति ॥

जारित । त्रि । शोषिते ॥

जारी । स्त्री । औषधीभेदे । जाडी इतिगौडभाषा ॥

जालक्य । पु । त्रिगुणादचित्यराकयत्ने ॥

जाल: । पु । नीपवृक्षे ॥ न । गवाक्षे । जाली इतिभाषा ॥ आनाये । सूत्रादिनिर्मिते मत्स्यादिजन्तुरोधकवस्तुनि ॥ क्षारके । पक्ष्यादिधारणार्थे पाशे ॥ दम्भे ॥ वृन्दे । गवे ॥ इन्द्रजाले ॥ जलेक्षिप्यते । शेषदृत्यण् ॥ जलतिघनीभवति । जलघातने । ज्वलितीतिवा ॥ यद्वा । जालयति । जलसंवरणे । चु० । पचाद्यच् ॥

जालक । पु । गवाक्षे ॥ न । क्षारके ॥ दम्भे ॥ कुलाये ॥ आनाये ॥ न । स्त्री । मोचकफले ॥ नवकलिकावृन्दे । क्षारके ॥ समूहे ॥

जालकार । त्रि । जालकर्त्तरि ॥

जालकारक. । पु । मर्कटके । लूतायाम् ॥ त्रि । जालकर्त्तरि ॥ जालस्कारक ॥

जालकिनी । स्त्री । मेष्याम् ॥

जालगर्द्दभ । पु । रोगविशेषे ॥ तल्लक्षणं यथा । विसर्पवत् सर्पति यः शोथस्तनुरपाकवान् । दाहज्वरकरपित्तात् सशेयोजालगर्द्दभइति ॥

जालगोणिका । स्त्री । कलशाकायाम् ॥

जालजीवी । पु । धीवरे ॥

जालन्धर । पु । पीठविशेषे ॥ त्रिगर्त्तदेशे ॥ पुभूम्नि । जालन्धरा ॥ तद्देशस्थेषु । त्रिगर्त्तेषु ॥

जालपात् । पु । हंसे ॥

जालपाद । पु । शरारिप्रभृतिपक्षिविशेषेषु ॥ जालाकारपादस्त्वादेषाम् ॥

जालप्राया । स्त्री । योद्धूणां लोहमय्या

मङ्गरश्चिषयाम् ॥

जालवर्बूरकः । पुं । वर्बूरवृक्षविशेषे । छ त्राके ॥ जालवर्बूरको रूक्षो वातरो गकफापहः । पिच्छदाहकर प्रोक्त्या. काषायस्वग्रकीर्त्तित. ॥

जालवान् । त्रि । मायाविनि ॥

जालिकः । पु । वागुरिके । जालजीविनि ॥ लूतायाम् ॥ कैवर्त्ते ॥ त्रि । ग्रामजालिनि ॥ जालेन चरति । पर्पादिभ्यष्ठन् । ङीपि जालिकी ॥

जालिका । स्त्री । वस्त्रविशेषे ॥ स्त्रीणां मुखावरणवस्त्रे ॥ गिरिसारे ॥ जलौकायाम् ॥ विधवायाम् ॥ भटानांलौहरचिताङ्गरक्षिण्याम् । लोहसनाहे ॥ च्वारके ॥

जालिनी । स्त्री । चित्रार्थगृहे । चित्रशालायाम् ॥ कोषातक्याम् ॥ राजकोशातक्याम् । तोरञी इति यस्या. प्रसिद्धि. ॥

जाली । स्त्री । पटोलिकायाम् । तोरञी इति प्रसिद्धलतायाम् ॥ पटोले ॥ जलति । जल० । ज्वलितीतिण । जातेरिति गौरादित्वाद्वाङीष् ॥

जाल्म । पु । पामरे ॥ क्रूरे ॥ असमीक्ष्यकारिणि ॥ जालयति जाल्यते वा । जल अपवारणे । प्राकुवकानम, । नेडुणिकृति ॥ जालं करोतिवा ॥

जावाल' । पु । सत्यकामेमुनौ ॥ जवालाया अपत्यम् । अण् ॥ अजाजीवे । छागजीविनि । गडरिया इतिभाषा ॥ जवमलतिआलाति वा । अल० । अण् कोवा । जवालोऽजः तस्यायम् । अण् ॥

जापकम् । न । कालीयनामगन्धद्रव्ये ॥ इतिसारसुन्दरी ॥

जाषी । पु । ध्रुवकप्रभेदे ॥ जाषीति नाम्नाध्रुवको द्वाविंशत्यक्षरान्वित । सन्निपातेन तालेन शृङ्गारेऽभीष्टदैरसे ॥ नाम्नः शब्दोयम् ॥

जाहक । पु । घोङ्घ खगे । घोँघ इति भाषा ॥ मार्जारे ॥ खट्वायाम् ॥ काकच्याम् । जलौकायाम् ॥ गात्रसङ्कोचिनिप्राणिविशेषे । कामरूपिणि । विलवासे ॥

जाह्नवी । स्त्री । गङ्गायाम् । त्रिपथगायाम् ॥ जानुद्वारा पुराद्दत्ता जह्नु' सम्प्रीयकोपत । तस्यकन्या स्वरूपा च जाह्नवी तेनकीर्त्तितेतिब्रह्मवैवर्त्तपुराणम् ॥ जह्नो रपत्य स्त्री । अण् ङीप् ॥

जाह्नवीय । त्रि । गाङ्गे ॥ जाह्नव्याअयम् । तस्येदमित्यर्थे वृद्धाच्छ. ॥

जि. । पु । पिशाचे ॥ त्रि । जेतरि ॥ इत्येकाक्षरकोषः ॥

जिगत्नु । पु । प्राणेषु ॥ जिगंसति । गत्नु० । गमे सन्वच्चेतिकत्नु । अनुदात्तोपदेशे त्यादिना मलोप ॥

जिगमिषा । स्त्री । गमनेच्छायाम् । गन्तुमिच्छायाम् ॥

जिगमिषु । त्रि । गन्तुमिच्छौ ॥

जिगीषा । स्त्री । जेतुमिच्छायाम् । जयस्पृहायाम् ॥ जेतुमिच्छति जिगीषति । जिगीषतीति जिगीषा । अप्रत्ययात् । टाप् ॥ व्यवसाये ॥ प्रकर्षे ॥

जिगीषु । त्रि । जयेच्छौ । जेतुमिच्छौ । नित्योत्साहवति ॥

जिघत्सा । स्त्री । क्षुधायाम् । बुभुक्षायाम् ॥ अत्तुमिच्छा घस्तुमिच्छावा । अदे सन्नन्तादप्रत्यय । लुङ्सनो र्घस्लृ इतिघस्लादेश ॥

जिघत्सु । त्रि । क्षुधार्त्ते । बुभुक्षिते ॥ अत्तुमिच्छु । अदे सनि लुङ्सनोर्घस्लृ । तत सनाशंसेच्छ्यु ॥

जिघांसक । त्रि । हननेच्छुके ॥

जिघांसा । स्त्री । हननेच्छायाम् ॥ हन्तुमिच्छेत्यर्थ ॥

जिघांसु । पु । शत्रौ ॥ त्रि । हन्तुमिच्छौ ॥ हन्ते सन्नन्तादुप्रत्यय । अभ्यासाच्चेतिकुत्वम् । अज्झनगमासनीतिदीर्घ ॥

जिघृक्षा । स्त्री । गृहीतुमिच्छायाम् ॥

जिघृक्षु । त्रि । गृहीतुमिच्छौ ॥ गृहे सन्नन्तादु ॥

जिघ्र । त्रि । घ्राणकर्त्तरि ॥

जिङ्गिनी । स्त्री । वृक्षविशेषे । प्रमोदिन्याम । झिङ्गिन्याम् ॥ जिङ्गनीमधुरासोष्णा कषाया योनिशोधिनी । कटुका व्रणहृद्रोगवातातीसारहृत्पटु ॥

जिङ्गी । स्त्री । मञ्जिष्ठायाम् ॥ जिङ्गति । जिगिगतौ । पचाद्यच् । गौरादित्वान् ङीष् ॥

जिजीविषा । स्त्री । जीवितुमिच्छायाम् ॥

जिजीविषु । त्रि । जीवितुमिच्छौ ॥

जिज्ञासनीय । त्रि । जिज्ञासितव्ये । जिज्ञास्ये ॥

जिज्ञासा । स्त्री । ज्ञातुमिच्छायाम् ॥

जिज्ञासित । त्रि । ज्ञातुमिष्टे ॥ विचारिते ॥ कृतजिज्ञासे ॥

जिज्ञासु । त्रि । मुमुक्षौ । आत्मज्ञानार्थिनि ॥ ज्ञातुमिच्छौ ॥ बहुश्रुत स्वल्पभाषी जिज्ञासुर्मानवानपीति तत्त्वम् ॥

जित । त्रि । प्राप्तपराजये । परिभूते । पराजिते ॥ यथा । नहि जितै र्जेतुरग्रे स्थातु मुचितम् ॥ भजते विदे

श अधिकेनजित सदनुप्रवेश अथ वा कुशल ॥ लब्धे । स्वायत्तीकृते । वशीकृते ॥ पु । अर्हदुपासकविशेषे ॥
जितकाम । त्रि । सदाशिवे ॥ जित कामोयेन ॥
जितकाशि । त्रि । दृढमुष्टौ ॥ इतिभरत भारतेनोक्तकष्ट. ॥
जितकाशी । त्रि । जिताहवे । जयिनि ॥ जितेनजयेन काशते प्रकाशते । काशृदीप्तौ । शीले णिनिः ॥
जितक्रोध । पु । शिवे ॥ विष्णौ ॥ जित क्रोधो येन ॥ जितक्रोध कर्म त त्हिंसुरारीन् ध्नंति माधव. । वेदमा र्गस्थापनार्थं नतु कोपवशात् प्रभु ॥ भृगुपाद्घातेनापिक्रोधानत्पन्नो ॥ त्रि । जितामर्षे ॥
जितनेमि । पु । आश्वत्थे । अश्वत्थनि र्मितेदण्डे ॥ त्रि । जितनेमिके ॥
जितशत्रु । पु । दत्ताहत्पितरि ॥ त्रि । कृतशत्रुपराजये ॥
जितसङ्गदोष. । त्रि । प्रियाप्रियसन्नि धावपि रागद्वेषविवर्जिते ॥ जिता. सङ्गजनिता दोषा येन ॥
जितात्मा । त्रि । जितेन्द्रिये ॥ जितआ त्मायेन ॥
जितारि न्त्र । पु । हरौ ॥ जिता अभिना वाह्या आभ्यन्तराश्च येन ॥ त्रि ॥ कृ

तशत्रुपराजये ॥
जितारि । पु । बुद्धे ॥ सम्भवार्हत्पितरि ॥ त्रि । जितशत्रौ ॥ जिताअरयोयेन ॥
जिताष्टमी । स्त्री । जीमूताष्टम्याम् ॥
जिताहव. । पु । जितकाशिनि ॥
जितुम. । पु । मिथुनराशौ ॥
जितेन्द्रियः । त्रि । स्ववशीकृतसर्वबाह्ये न्द्रिये । शान्ते ॥ यथा । श्रुत्वा स्पृष्ट्वा च दृष्ट्वाच भुक्त्वा घ्रात्वाच यो नर. । न हृष्यति ग्लायतिवा सविज्ञेयो जितेन्द्रिय' ॥ जितानि वशीकृतानि इन्द्रियाणि श्रोत्रादीनियेन ॥ हसन्ते ॥ पु । कामवृक्षाख्ये क्षुपविशेषे ॥
जितेन्द्रियाह्वः । पु । काकड्डिङ्गचे ॥
जित्तम. । त्रि । जयशीलानांमध्ये उ त्तमे ॥
जित्यः । पु । हलौ । इलहले । कृष्टस मीकरणार्थं स्थूलकाष्ठे ॥ विभूषवि नीयजित्या मुञ्चकल्कचविष्णु इति निपातनात्क्यप् ॥
जित्वा । पु । जयिनि ॥ जयति । जि० । शीङ्क्रुशीत्यादिनाक्वनिप् ॥
जित्वर । त्रि । जेतरि ॥ जयशीलः । इण्नशजिसर्त्तिभ्य क्वरप् ॥
जित्वरी । स्त्री । काशिकापुर्याम् ॥ टि ड्ढेतिङीप् ॥ जयशीलायाम् ॥
जिन । पु । अर्हति ॥ बुद्धे ॥ विष्णौ ॥

-अतिवृद्धे ॥ विश्वाद्विभवादिभ्रि मुनि भिश्रेषि ॥ त्रि । जिह्वरे ॥ अवति । जि० । स्वग्निमजिष्टीच्छ्यमिभ्यो मक् ॥

जिनसद्म । न । जिनगृहे । जैनमठे । विहारे ॥

जिनसुत । पु । बुद्धे ॥ बुद्धोनाम्नाजिन सुत' कीकटेषु भविष्यति । इति श्रीभागवतम् ॥

जिनेन्द्र । पु । बुद्धे ॥ जिनानामिन्द्र'॥

जिरि । पुं । काले । समये ॥ पचिचि॥ जीवैरिति जीर्यते वा । कृष्०। जी र्यते जिनरश्चव इति जिनप्रत्ययो रात्रसवरादि श्र । बाहुलकाद जिरि जिष्टीर्षेण ॥

जिष्णु' । पु । वासवे ॥ अर्जुने ॥ विष्णौ ॥ अर्के ॥ वसुषु ॥ त्रि । जित्वरे ॥ जयति । जयनशीलोवा । जियते ऽभिभवेवा । ग्लाजिस्थश्चेतिग्स्नु ॥

जिहीर्षा । स्त्री । हर्तुमिच्छायाम् ॥ कृञ्०। अप्रत्ययादित्य ॥

जिह्म । त्रि । कुटिले ॥ मन्दे ॥ न । तग रपादपे ॥ जहाति त्यज्यतेवा । ओहा क्०। जहाते.सन्वदालोपश्चेतिमन् ॥

जिह्मग । पु । सर्पे ॥ मदने ॥ त्रि । म न्दगे ॥ जिह्मकुटिलगच्छति। गम्लृ०, अन्येभ्योपीतिड' ॥

जिह्मता । स्त्री । सङ्कोचे ॥

जिह्माशय' । त्रि । कपटबद्धौ ॥

जिह्ममोहन' । पु । भेके ॥

जिह्मशल्य । पु । खदिरे ॥

जिह्मित. । त्रि । घूर्णित ॥

जिह्व । पु । न । तगरमूले ॥

जिह्वल. । त्रि । लुब्धे । लोलुपे ॥ यथा । आकृष्या परआहे भुञ्जते ये च जिह्वला । पतन्ति नरके घोरे लु नपिण्डो दकक्रिया ॥

जिह्वा । स्त्री । रसनायाम् । रसज्ञाने न्द्रिये ॥ तस्या परीक्षा यथा । शाकपत्रप्रभारूक्षा स्फुटिता रसना ऽनिलात् । रक्ता श्यामा भवेत् पित्ता लिप्ता श्वी धवला कफात् ॥ परिदग्धा खरस्पर्शा कृष्णा दोषत्रये ऽधिके । सैव दोषद्वयाधिक्ये दोष लिङ्गयवलक्षेति भावमिश्र' ॥ लेढि लिहन्त्यनयावा । लिह०। शेवयह्व जिह्वेतिसाधु ॥

जिह्वानिर्लेखनम् । न । जिह्वामार्जने । जीभी कर्नी इति भाषा ॥ जिह्वा मार्जनद्रव्ये । जीभी इति भाषा ॥ तत्तु दशाङ्गुल कोमल कुर्यात् स्वर्ण रूप्यताम्र लोहनिर्मित जिह्वामला पकर्षणे प्रशस्तम् । तस्यगुणा । वक्त्रवै रस्यजिह्वाश्रितमलनाशित्वम् । आ

रोग्यक्षयिकारित्त्वञ्चेतिराजवल्लभ ॥
जिह्वाप । पु । शुनि ॥ मार्जारा ॥ व्याघ्रे ॥ द्वीपिनि । चित्रव्याघ्रे ॥ भल्लूके ॥ सिंहे ॥ जिह्वयापिबति । पा० । क ॥
जिह्वामलम् । न । कुलुके ॥
जिह्वामूलीय । पु । कखाभ्यां प्रागर्द्ध विसर्गसदृशे (ꭗ) विसर्गप्रभेदे ॥ जिह्वामूलेभव । जिह्वामूलाङ्गुलेश्छः ॥
जिह्वारद' । पु । खगे ॥
जिह्वालिट् । पु । कुक्कुरे ॥ मार्जारे ॥ जिह्वयालेढि । लिह० । क्विप् ॥
जिह्वाशल्य । पु । खदिरवृक्षे ॥
जिह्वास्वाद । पु । लेहने ॥ आस्वदनम् । स्वद० । घञ । जिह्वयाआस्वाद' ॥
जीन । त्रि । वृद्धे ॥ जिनातिस्म । ज्या० । गत्यर्थेतिक्त । ग्रहिज्येतिसम्प्रसारणम् ॥ हलइतिदीर्घ । ल्वादिभ्यश्चेतिनत्वम् ॥ चर्मपुटे ॥
जीमूत । पु । अद्रौ ॥ भृतिकरेइति मेदिनी ॥ भृतिकरेइतिहेम ॥ देवताडे ॥ जीमूतइव ॥ पयोधरे ॥ वासवे घोषके ॥ मुस्तके ॥ जयति नभ जीयतेऽनिलेनवा । जि० । जेमूट्चोदात्तइतिक्त । जैर्दीर्घश्च ॥ जीवस्योदकस्यमूत पटवन्धोयस्येति वा । पृ० ॥ जीवनं जल मूत बद्धमनेन । मूङ् बन्धने । कर्मणि क्त । पृषोदरादित्वात् वनशब्दलोप ॥ ज्यानजी । ज्या० । स० क्विप् । जियावयोशान्यामूतोव दृइति वा ॥ जीवन मुश्चति वा । पृ० ॥
जीमूतक । पु । देवदाल्याम् ॥
जीमूतकट । पु । पर्वते ॥
जीमूतमूलम् । न । शट्याम् ॥
जीमूतवाहन । पु । इन्द्रे ॥ जीमूतावाहनमस्य ॥ धर्मरत्ननामकस्मृतिसङ्ग्रहकर्त्तरि ॥
जीमूतवाही । पु । धूमे ॥
जीमूताष्टमी । स्त्री । गौणाश्विनकृष्णाष्टम्याम् ॥
जीर' । पु । जीरके ॥ खड्गे ॥ अणौ ॥ जुवति । जु वेगे । जोरीचेतिरक ॥ जिनाति वा । ज्या० । ज्यश्चेतिरग्वा ॥
जीरक । पु । अजाज्याम् । जीराइति भाषा ॥ जीरात् सज्ञायामितिकन् ॥ अस्यगुणायथा । जीरकत्रितयं रूक्ष कटूष्णदीपनं लघु । सङ्ग्राहि पित्तलंमेध्य गर्भाशयविशुद्धिकृत् ॥ ज्वरघ्न पाचन बल्यं वृष्य रुच्य कफापहम् । चक्षुष्य पवनाध्मानगुल्मच्छर्द्यतिसारह्नदिति भावप्रकाश ॥
जीरण । पु । जीरके ॥
जीरिका । स्त्री । वंशपत्रीतृणे ॥
जीर्ण । पु । जीरके ॥ न । शैलजे ॥ त्रि ।

वृद्धे । जर्जरे ॥ पुरातने ॥ परिपक्वे ॥ जीर्य्यतिस्म । जॄष्० । गत्यर्थेतिक्त । ऋृतइत् । निष्ठानत्वम् ॥

जीर्णज्वर । पु । पुरातनज्वरे ॥ अस्य सामान्यलक्षणं यथा । योद्वादशभ्यो दिवसेभ्य ऊर्द्ध्वं दोषत्रय स्तद्द्विगुणे भ्यऊर्द्धम् । न्हणां तनौ तिष्ठति मन्द वेगो भिषग्भिरुक्तोज्वर एष जीर्ण-इति ॥

जीर्णदारु । न । विधारा इति प्रसिद्धे वृद्धदारकभेदे । सुपुष्पिकायाम् ॥

जीर्णपत्र । पु । पट्टिकालोध्रे ॥

जीर्णपत्रिका । स्त्री । वंशपत्रीतृणे ॥

जीर्णपर्ण । पु । कदम्बे ॥ न । पुरातन पत्रे ॥ त्रि । तद्वति ॥

जीर्णफञ्जी । स्त्री । जीर्णदारुणि ॥

जीर्णवज्रम् । न । वैक्रान्तमणौ ॥

जीर्णवस्त्रम् । न । पटच्चरे । मलवस्त्रे॥ जीर्णञ्च तद्वस्त्रञ्च ॥ त्रि । तद्युक्ते ॥

जीर्णबुध्र । पु । पट्टिकालोध्रे ॥ कैव-र्त्तीमुस्तके ॥

जीर्णबुध्रकम् । न । परिपेले ॥

जीर्णा । स्त्री । स्थूलजीरके ॥

जीर्णास्थिमृत्तिका । स्त्री । अर्कोद्यर्थे कृत्रिममृद्विशेषे ॥ यथा । अथवक्ष्ये तुजीर्णास्थिमृत्तिकाकरणं प्रिये । शिवालतुस्थले कुर्याद्दीर्घं गर्त्तं म नोहरम् ॥ निक्षिपेत् तत्रनानास्थ्य स्थिच द्विचतुष्पदाम् । सर्जिक्षार म हाक्षार मूलक्षार लवणानिच ॥ ग न्धकोप्यजल क्षेप्य नानामूत्राणि त त्रच । एव कृत्वा मासषट्क दद्यात् पाषाणमृत्तिकाम् ॥ कङ्कास्थ्यूर्द्ध्वं त दूर्द्ध्वन्तु कुर्यात्पक्वेष्टका शुभाम् । त्रि वर्षाज्जायते सर्वमेकीभूत दृषत्स मम् ॥ ततोनिष्कास्य तच्चूर्णं कृत्वा पात्राणि निर्म्मेमेत् । प्रशस्त भोजन तत्र सूचये दन्नदूषणम् ॥ महावि षस्य सयोगात् तस्य भङ्ग प्रजायते । दूषीविषादिसंयोगात् पात्रे स्फो टाभवन्तिहि ॥ तत्रचिह्न क्षुद्रविष पात्र कृष्ण प्रजायते । एवज्ञात्वा त च दद्यान्नकदाचिद्विषादिकमितिरा वण ॥

जीर्णि । स्त्री । ज्यानौ । जीर्णत्वे ॥ जरणम् । जॄष्वयोहानौ । क्तिन् । ऋ ल्वादिभ्य क्तिन्निष्ठावत् । रदाभ्यामि तिनत्वम् ॥

जीर्णोद्धार । पु । भग्नमन्दिरादे स स्कारे ॥

जीर्य्यत् । त्रि । वयोहानिप्राप्नुवति ॥

जीर्व्वि । पु । कुठारे । परशौ ॥ जॄष० । जॄशस्तॄ जागृभ्य क्विन् ॥

जीव । पुं । प्राणिनि ॥ दृस्तौ ॥ वृच

भेदे ॥ वृहस्पतौ ॥ असुधारणे ॥ कर्णे ॥ मनुष्यादिकीटपर्य्यन्ते प्राणिमात्रे । कार्यकरणसङ्घाते ॥ अनेकान्तवादिनां जीवास्तिकायसञ्ज्ञया परिभाषिते जीवपदार्थे ॥ त्रिविधश्चासौ अनादिसिद्धमुक्तबद्धभेदात् । अत्रानादिसिद्धो ऽर्हन् जीवास्तिकायाख्य. । अयमेतमोहादिबन्धोमुक्तः । मोहाद्यावृतस्तु बद्ध इति ॥ * ॥ उपाधिप्रविष्टे ब्रह्मणि । वाङ्मन प्राणकरणग्रामानुप्रविष्टे । घटावच्छिन्नाकाशवत् शरीरचितयावच्छिन्ने चैतन्ये ॥ दर्पणस्थमुखप्रतिविम्बवत् बुद्धिस्थे-चैतन्यप्रतिविम्बे ॥ साभासाहङ्कारे । चित्प्रतिविम्बे ॥ प्राणादिकलापस्य धारयितरि ॥ प्राणान् क्षेत्रज्ञरूपेण धारयन् जीव उच्यते ॥ लिङ्गदेहे ॥ एवं पञ्चविध लिङ्ग त्रिवृत् षोडश विस्तृतम् । एष चेतनया युक्तो जीव इत्यभिधीयते ॥ इति श्रीभागवतम् ॥ पञ्चविधं पञ्चतन्मात्रात्मकम् । । त्रिवृत् त्रिगुणम् । षोडशविकारात्मना विस्तृतमित्यर्थ ॥ * ॥ विज्ञानमयकोषावच्छिन्नश्चिदात्मा कर्त्तृत्वभोक्तृत्वाद्यभिमानित्वेन इहलोकपरलोकगामी व्यावहारिको जीव उच्यते ॥ वालाग्रशतभागस्य शत धा कल्पितस्य च । भागो जीव. स विज्ञेय सचानन्त्यायकल्पते ॥ * ॥ जीवोनामदेहादिव्यतिरिक्तस्तत्सा क्षी त्वम्पदार्थो योय विज्ञानमय यो य संसरति योय संसारी नतु देहादिर्जीव तस्यदृश्यस्य द्रष्टृत्वानुपपत्ते. ॥ * ॥ अस्ति देवि परब्रह्मस्वरूपी निष्कल शिव । सर्वज्ञः सर्वकर्त्ता च सर्वेशो निर्मलो ऽव्यय. ॥ स्वयंज्योति रनाद्यन्तो निर्विकार' परात्पर. । निर्गुणः सच्चिदानन्द स्तदंशा जीव सञ्ज्ञका. ॥ अनाद्यविद्योपहिता यथाग्नौविस्फुलिङ्गका । देहाद्युपाधिसम्भिन्ना स्ते कर्मभि रनादिभि. ॥ सुखदु' खप्रदै पुण्यपापरूपै र्नियन्त्रिता' । तत्तज्जातियुत देह मायुर्भोगञ्च कर्मजम् ॥ प्रतिजन्म प्रपद्यन्ते तेषा मप्यपरं पुन । सूक्ष्म लिङ्गशरीर तदामोक्षा दक्षयं प्रिये ॥ इति कुलार्णवे १ उल्लास ॥ पु । न । जीविते ॥ जीवनम् । जीव० । इगुपध्वेति घञ् ॥ जीवति वा । इगुपधल-क्षण क ॥ जीवयति वा । अच् । सुरसञ्जीवनमन्त्रज्ञत्वात् ॥

जीवक । पु । प्राणके द्रुमे ॥ पीतसाले । विजयसार इति ख्याते ॥ क्षपणे ॥ अष्टवर्गान्तर्गतौषधविशेषे

। कूर्चशीर्षे । ह्रस्वाङ्गे ॥ अस्यस्वरूप पर्यायगुणा । यथा । जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ । रसो- नकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्र कौ ॥ जीवकः कूर्चकाकार ऋषभो वृषशृङ्गवत् ॥ जीवको मधुरः शृङ्गो ह्रस्वाङ्गः कूर्चशीर्षक । ऋषभो वृषभो धीरो विषाणी न्द्राक्ष इत्य पि ॥ जीवकर्षभकौ बल्यौ शीतौ शु क्रकफप्रदौ । मधुरौ पित्तदाहास्र कार्श्यवातक्षयापहाविति ॥ त्रि । से वके । सेविनि ॥ वृद्धाशिनि ॥ जी विनि ॥ आहितुण्डिके ॥ जीवयति- । जीव० । ण्वुल् ॥ जीवतात् आशि षिचेतिवुन ॥

जीवघन । पु । हिरण्यगर्भे ॥ घनोमू र्त्तिः । जीवलक्षणो घन जीवघन सैन्धवखिल्यवत् ॥

जीवजीव । पु । चकोरे ॥

जीवञ्जीव । पु । चकोरे ॥ जीवंजी वयति । तद्दर्शनेनविषनाशात् । कृ ञ्ख्युटो बहुलमिति बाहुलकात् खश् ॥ खगान्तरे ॥ द्रुमप्रभेदे ॥

जीवत्तोका । स्त्री । जीवद्वत्सायाम् । जीवस्वाम् ॥ इतिहेम ॥

जीवत्वम् । न । कूटस्थादीनां चतुर्णां समूहे ॥ तथहि । कूटस्थब्रह्म अन्तः करणम् अन्तःकरणाश्रयाऽविद्याचि दाभासश्चेति चतुष्टयंमिलितसज्जी वत्वमितिनीलकण्ठश्चैव ॥

जीवत्पति । स्त्री । सधवायाम् ॥

जीवत्पितृक । त्रि । विद्यमानपितृके ॥ यथा । अमास्नान गयाश्राद्ध दक्षि णामुखभोजनम् । नजीवत् पितृक कुर्यात् कृतेपि पितृहाभवे दितिर घुनन्दन ॥

जीवथ । पु । कूर्मे ॥ प्राणे ॥ मयूरे ॥ मेघे ॥ त्रि । चिरायुषि ॥ धार्मिके ॥ जीवति । जीव० शीङ्शपिरुगमि वञ्चिजीविप्राणिभ्योऽथ ॥

जीवद । पु । वैद्ये ॥ विद्विषि । रिपौ ॥ ग्रन्थिपर्णे ॥ त्रि । जीवनदातरि ॥ जीव ददाति । डुदाञ्० । क ॥

जीवदात्री । स्त्री । ऋद्धिनामौषधौ ॥

जीवधनम् । न । गवादिपशुषु ॥

जीवनम् । न । वर्त्तने । जीविकायाम् ॥ जीवन्त्यनेन । जीव० । ल्युट् ॥ नीरे । जले ॥ प्राणधारणे । आयु षि । जन्ममरणयोर्मध्यकाले ॥ हीन जीवना द जीवन वरम् ॥ मज्जनि ॥ हैयङ्गवीने ॥ पु । पुत्रे । जीवकौ षधे ॥ वाते ॥ क्षुद्रफलकवृक्षे ॥ जी व्यतेऽनेन । जीव० । करणाऽधिकर णयोश्चेतिकरणे ल्युट् ॥

जीवनकम् । न । अन्ने ॥

जीवनयोनि । स्त्री । यत्नविशेषे ॥ स तु । अतीन्द्रिय शरीरे प्राणसञ्चार कारणम् । इतिभाषापरिच्छेद ॥

जीवनहेतु । पु । वर्त्तनोपाये ॥ विद्या शिल्पभृति.सेवागोरक्ष विपणि कृषि । वृत्तिर्भैक्ष्य कुषीदञ्च दशजीवनहेतव ॥

जीवना । स्त्री । मेदौषधे ॥

जीवनाघातम् । न । विष ॥

जीवनावास । पु । वरुणे ॥ जीवन मावासो यस्य ॥

जीवनिका । स्त्री । हरीतक्याम् ॥

जीवनी । स्त्री । गुर्जरदेशे डोडी इति प्रसिद्धायां जीवन्त्याम् । मधुस्रवाया म् । काकोल्याम् ॥ डोड्याम् ॥ मेदायाम् ॥ महामेदायाम् ॥ यष्ट्याम् ॥ जीव्यतेऽनया । जीव० । करणेल्युट् ॥

जीवनीयकम् । न । } जले । वारिणि ॥ जीवना
जीवनीयकम् । न । } यहितम् । छ ॥ जीवनीयगणे ॥

जीवनीयगण । पु । औषधविशेषे ॥ यथा । अष्टवर्ग सयष्टीको जीवन्ती मुद्गपर्णिका । माषपर्णी गणोऽयन्तु जीवनीय इतिस्मृत ॥ जीवनो मधुरश्चापि नाम्ना सपरिकीर्त्तित. ॥ जीवनीयगण. प्रोक्त. शुक्रकृद् बृंहणो हिम ॥ गुरुर्गर्भप्रद स्तन्य कफकृत् पित्तरक्तहृत् । तृष्णा शोष ज्वरदाह भ्रम मूर्च्छा व्यपोहति ॥ अपिच । अष्टवर्गश्च पर्णिन्यौ जीवन्ती मधुक स्तथा । जीवनीयगण प्रोक्तो जीवन स्तु पुन स्तथेतिवैद्यक परिभाषा ॥

जीवनीया । स्त्री । जीवन्त्याम् । गुर्जरे डोडी इति प्रसिद्धायाम् ॥ जीवनाय हिता । तस्मैहितमिति छ ॥

जीवनेत्री । स्त्री । सहल्याम् ॥

जीवनौषधम् । न । जीवातौ । मृतस ञ्जीवनौषधे ॥ येनम्रियमाणो जीवति । जीवनस्य औषधम् ॥

जीवन्त. । पु । प्राणे ॥ औषधे ॥ जीवशाके ॥ त्रि । आयुष्मति ॥ जीव्यात् । जीव० । रुचिनन्दि जीविप्राणिभ्य षिद्वाशिषीतिभच् । भोन्त ॥

जीवन्तिका । स्त्री । गुडूच्याम् ॥ जीवाख्यशाके ॥ वन्दायाम् ॥ हरीतक्याम् । जीवति । जीव० । रुचिनन्दीति भच् षित्वात् ङीष् । कन् ॥

जीवन्ती । स्त्री । जीवन्त्याम् । मधुस्रवायाम् ॥ जीवन्ती शीतला स्वादु स्निग्धा दोषत्रयापहा ॥ रसायनो बलकरो चक्षुष्या ग्राहिणी लघु ॥ शाकप्रकारस्तु जीवन्त्या कोमल

पच स्विन्न तक्र सुभर्जितम्। हिङ्गुना सयुते तैले तक्र चिप्त्वा प्रलेहयेत् ॥ डोडी इति गुर्जरेऽस्था प्रसिद्धि.॥ अम्याम्॥ गुडूच्याम्॥ वन्दायाम्॥ डोड्याम्॥ हरीतक्याम्॥ जीवन्ती स्वर्णवर्णिनीति रत्नमाला॥ जीवति जीवयति वा। जीव०। झट्'शतुरुगित्वात् ङीप्॥

जीवन्मुक्त। त्रि। आत्मविदि। जीवन्नेव मुक्तससारे॥ जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृते अज्ञानतत्कार्यसञ्चितकर्मसशयविपर्ययादीना मपिबाधितत्वा दखिलबन्धरहितो ब्रह्मनिष्ठ इति॥*॥ ननुजीवन्मुक्तो व्यवहरति न वा। आद्ये तस्य वद्धान्विशलक्षणता। द्वितीये देहस्यानुपयोगात् सद्य पातप्रसङ्ग इत्यतआह। अयन्तु व्युत्थानसमये मासशोणितमूत्रपुरीषादि भाजनेन शरीरेणान्ध्यमान्द्यपटुत्वादि भाजनेनेन्द्रियग्रामेण अशनायापिपासाशोकमोहादिभाजनेनचान्त करणेन पूर्वपूर्व वासनया क्रियमाणानि कर्माणि भुज्यमानानि ज्ञानाविरुद्धान्यारब्धफलानिच पश्यन्नपि बाधितत्वात् परमार्थतो न पश्यतीति। दृष्टान्तेनोक्तमर्थं स्पष्टयति। यथेन्द्रजालमिति ज्ञानवान् तदिदमिन्द्रजाल पश्यन्नपि परमार्थमिदमिति न पश्यति। उक्तञ्च। सुषुप्तिवज्जाग्रति यो न पश्यति द्वयन्तु पश्यन्नपिचाऽद्वयत्वत। तथाच कुर्वन्नपि निष्क्रियश्च य स आत्मवि न्नान्य इतीह निश्चय. इति॥ वेदविद्याव्रत स्नान देशिकस्य मुखात् स्वयम्। गृहीत्वाष्टोत्तरशत ये पठन्ति द्विजोत्तमा। प्रारब्धक्षयपर्यन्त जीवन्मुक्ताभवन्तिते॥ अष्टोत्तरशत मुपनिषदाम्॥ कौलिके॥ यथा। धन्या माहेश्वरा स्वार्थप्रत्यभिज्ञानशालिन। स्वपरिज्ञानमात्रेण जीवन्मुक्ता भवन्तिहि॥ महामन्त्रप्रभावेण कुलाचारप्रभावत। स्वेच्छाचारा निर्विकल्पा जीवन्मुक्ताहि कौलिका॥ योन्तर्व्योमवदच्छ स जीवन्मुक्त उच्यते॥ जीवन्नेव मुक्त॥

जीवन्मुक्ति। स्त्री। जीवतो बन्धनिवृत्तौ॥ जीवत पुरुषस्य कर्तृत्वभोक्तृत्वसुखदु खादिलक्षण श्चित्तधर्म क्लेशरूपत्वाद्बन्धोभवति तन्निवृत्ति स्वरूपाजीवन्मुक्ति॥

जीवन्मुक्त्युपाय। पु। कुलमार्गे॥ जी

न्मुक्तौ रूपायसु कुलमार्गैर्विनापर इतिसदाशिवोक्ते ॥

जीवपुत्र । पु । } जीयापोताइति
जीवपुत्रक । पु । } प्रसिद्धे पुत्रजीव द्रुमे ॥

जीवपुष्पा । स्त्री । वृहज्जीवन्त्याम् ॥

जीवप्रिया । स्त्री । हरीतक्याम् ॥

जीवभद्रा । स्त्री । जीवन्तीलतायाम् ॥ वृद्धिनामौषधे ॥

जीवभूत । त्रि । प्राणधारणोपाधिना कर्त्ता भोक्ता ससारीति रूपेण प्रसिद्धिमुपगते ॥

जीवमन्दिरम् । न । शरीरे ॥

जीवला । स्त्री । सैंहल्याम् ॥

जीवलोक । पुं । ससारे ॥ यथा । माता पिता गुरुजन स्वजनो ममेति मायोपमे जगति कस्य भवेत् प्रतिज्ञा । एको यतो व्रजति कर्मपुर स रोऽय विश्रामवृक्षसदृश खलुजीवलोक ॥ सायसायं वासवृक्ष समेता प्रात प्रातस्तेनतेन प्रयान्ति । त्यक्त्वान्योन्य तञ्च वृक्ष विहङ्गा यद्वत् तद्वज् ज्ञातयो ऽज्ञातयश्चेति ॥ जीवानांलोक ॥

जीववल्ली । स्त्री । क्षीरकाकोल्याम् ॥

जीवशाक । पु । मालवप्रसिद्धे शाकविशेषे । जीवन्ते । रक्तनाले । ताम्रपत्रे ॥

जीवशुक्ला । स्त्री । क्षीरकाकोल्याम् ॥

जीवश्रेष्ठा । स्त्री । ऋद्धिनामौषधे ॥

जीवसञ्ज्ञः । पुं । कामवृद्धिवृक्षे ॥

जीवसाधनम् । न । धान्ये ॥

जीवसूः । स्त्री । जीववत्सायाम् । जीवत्तोकायाम् ॥

जीवस्थानम् । न । मर्मणि ॥

जीवा । स्त्री । जीवन्तिकायाम् । मधुस्रवायाम् । डोडी इति गुर्जरभाषा ॥ मौर्व्याम् । धनुषोगुणे ॥ वचायाम् ॥ शिञ्जिते ॥ भूमौ ॥ वृत्तौ ॥ जीवति । जीव० । पचाद्यच् । टाप् ॥

जीवातु । पुं । न । अन्ने । भक्ते ॥ जीविते ॥ जीवनौषधे । मृतसञ्जीवनौषधे ॥ जीवयति जीवत्यनेन वा । जीव० । जीवेरातु ॥

जीवात्मा । पु । देहिनि । जीवे । पुनर्भविनि ॥

जीवाधार । पुं । क्षेत्रे ॥ हृदये ॥

जीवान्तक । पु । जीवनार्थं पक्ष्यादीना घातके । शाकुनिके ॥ त्रि । जीवनाशके ॥ जीवाना मन्तक ॥

जीवाला । स्त्री । सैंहल्याम् ॥

जीवास्तिकाय । पु । अनेकान्तवादिनां जीवपदार्थे ॥

जीविका । स्त्री । आजीवे । जीवनो-

पाये ॥ जीवन्त्याम् ॥ जीव्यते ऽन या । जीव० । गुरोश्चहलइत्य । सं ज्ञायां कन् । कुन्वा ॥

जीवितम् । न । प्राणने । जीवने ॥ त्रि । जीवनान्विते ॥ ब्रह्मादीनामपिजी वित स्वल्पमेव ॥ यथा । ये समर्था ज गत्यस्मिन् सृष्टिस्थित्यन्तकारिणः । तेपि काले प्रलीयन्ते कालोहिबलव- त्तर इतिस्मृते. ॥

जीवितकाल । पु । जीवनावच्छिन्नका ले । आयुषि ॥ जीवितस्यकाल. ॥

जीवितज्ञा । स्त्री । नाड्याम् ॥ इ०रा० ॥

जीविताशा । स्त्री । जीवनलोभे ॥ जी र्यंति जीर्यत. केशा दन्ता जीर्यन्ति जीर्यत । जीविताशा धनाशाच जी र्यंतो ऽपिनजीर्यति ॥

जीवितेश । पु । यमे । पितृपतौ ॥ प्रा णनाथे ॥ चन्द्रे ॥ सूर्ये ॥ त्रि । जी वितेश्वरे ॥ प्रिये ॥ जीवितस्वामिनि ॥ जीवातौ ॥

जीवी । पु । प्राणिनि ॥ जीविनां दारु णो रोग कर्मभोग शुभाशुभः । भ क्तो वैद्यस्त निघ्नन्ति कृष्णभक्तिरसा यनात् ॥

जीवेष्टि । स्त्री । बृहस्पतिसवे ॥

जीवोत्पत्तिवाद. । पु । पाञ्चरात्राणां वादे ॥ सयथा । ब्रह्मणोवासुदेवा त्स्याज् जीव सङ्कर्षणाभिध' । जायते च मन स्तस्मात् प्रद्युम्नाख्यं तत पु न ॥ अहङ्कारो ऽनिरुद्धाख्य स्तत्का रो त्रिस्वरूपका । वासुदेवाराधना द्यैर्जायतेबन्धमोक्षण मिति ॥

जीवोपाधि । पु । सुषुप्त्यादिषु ॥ त्रयो जीवोपाधय । तथाहि । सुषुप्तौबु द्ध्यादिसंस्कारोपरञ्जित मज्ञानमात्र मुपाधि. । स्वप्ने जाग्रद्वासनामय लि- ङ्गशरीर मुपाधि । जाग्रदवस्थाया- न्तु सूक्ष्मशरीरसंसृष्टस्थूलशरीरमु- पाधिरिति ॥

जीव्या । स्त्री । गोक्षुरदुग्धायाम् ॥ जी वन्त्याम् ॥ हरीतक्याम् ॥

जु' । स्त्री । त्वरागमने ॥ सामान्यग मने ॥

जुगुप्सनम् । न । निन्दने ॥ त्रि । जुगु- प्साशीले ॥ जुगुप्सते तच्छील । गु पेरनुदात्तेतश्चेतियुच् ॥

जुगुप्सा । स्त्री । निन्दायाम् ॥ घृणायाम् । घिन् इतिभाषा ॥ जुगुप्सनम् । गुपगो पनकृत्सनयो' । गुपेर्निन्दायांसन् । अप्रत्ययादिति भावेस्त्रियाम । टाप् ॥

जुगुप्सित । त्रि । निन्द्ये ॥

जुङ्ग । पु । वृद्धदारके ॥ जुङ्गति । जु ङ्गिवर्जने । अच् ॥ जुङ्ग्यते वा । घञ् ॥

जुङ्गक । पु । वृद्धदारकवृक्षे ॥ स्वाम

कन् ॥

जुटकम् । न । जटाग्राम् ॥ इति शब्द रत्नावली ॥

जुटिका । स्त्री । शिखायाम् । चोटी इति भाषा ॥ सहतकेशेषु ॥ जूडा जूटी इति भाषा ॥

जुषन् । त्रि । सेवमाने ॥

जुषमाण । त्रि।प्रीयमाणे॥सेवमाने॥

जुष्कक. । पु । मुद्गयूषे ॥

जुष्टम् । न । उच्छिष्ट।झूठ भूंठइतिच भाषा ॥ त्रि । सेवित ॥ प्रीते । जुष्य ते स्म । जुषीप्रीतिसेवनयो । क्त ॥

जुष्य । त्रि । सेव्ये ॥

जुहराण । त्रि । कुटिले ॥ चन्द्रे॥जु हूर्षति । हुर्च्छाकौटिल्ये । हुर्च्छे सनोलुक् छलोपश्चेत्यानच् ॥ जु हुराणकौटिल्यकारि इतिभाष्यम्॥

जुहुवान् । पु । अनले ॥

जुहुवाण । पु । अध्वर्यौ ॥ जातवेद सि ॥ चन्द्रे ॥

जुहू । स्त्री । स्रुग्भेदे । पलाशकाष्ठनि र्मिते ऽर्द्धचन्द्राकृतिरूपे यज्ञपात्रे ॥ पर्णमये यज्ञपात्रविशेषे ॥ जुहोति अनया वा । हुदानादनयो. । द्युति गमि जुहोतीनां द्वेचेति क्विप् जुहो तेर्दीर्घश्च ॥ त्रैलोक्यात्मन. कोपस्य प्राग्भागे ॥ जुहूच्यस्यादिशिकर्म्मि

णः प्राङ्मुखा सन्त इति ॥

जू । स्त्री । आकाशे ॥ सरस्वत्याम् ॥ पिशाच्याम ॥जवने ॥जु सौचोगतौ । भ्राज भासेतिक्विप्दीर्घश्च।जू जु वौ जुव ॥ क्विब्वचिप्रच्छीत्यादिना क्विब्दीर्घौ वा ॥

जूट । पु । जटायाम् । जूडा इतिभाषा ॥ बन्धे ॥

जूटक । पु । न । केशबन्धे । जटायाम् ॥

जूति । स्त्री । जवने । वेगे ॥ जु सौत्रो वेगे । क्तिन् । ऊतियूतीत्यादिना निपातनाद्दीर्घ ॥

जूतिका । स्त्री । कर्पूरविशेषे ॥

जूर्ण । पु । उलपे ॥

जूर्णाख्य । पु । उलू इति गौडप्रसिद्धे तृणविशेषे । खरच्छदे । सूच्यग्रे ॥

जूर्णाह्वय । पु । देवधान्ये । जुवार इति भाषा ॥ इति हेमचन्द्र ॥

जूर्ति । स्त्री । वेगे ॥ आदित्ये ॥ ज्वर ति । ज्वररोगे । वीज्याज्वरिभ्योनि ॥

जूर्त्ति । स्त्री । ज्वरे ॥ ज्वरणम् । ज्वर० । क्तिन् । ज्वरत्वरेत्यूठ् ॥

जूष । पु । न । यूषे ॥

जूषणम् । न । धातुपुष्प्याम् । धाइका फूल इतिभाषा ॥

जृम्भ । त्रि । मुखादिविकाशे । जृम्भा याम् ॥ जृम्भाच्यर्थे समीरणात् ॥

पीत्वैक श्वास मनिल पुन स्त्यजति वेगवान् । आलस्यनिद्रायुक्तस्य स जृम्भ इतिकथ्यते ॥ अस्यचिकित्सा । यथा । शुण्ठी पिप्पल्यूषण दीप्यक श्च सिन्धूद्भूत चेति सर्वं पृथग्वा । त द्रूप वा स्वच्छचूर्णीकृत वा जृम्भाभ ङ्ग स्तत्कृत स्यात्तदैव ॥ जृम्भावेगे समुत्पन्ने शोभनेशयनेनरम् । स्वाप येत् तेन नियमाज्जृम्भावेग प्रशाम्य ति ॥ जृम्भावेग चय याति कटुतैलेन मर्द्दनात् । भोजनात् स्वादुभोज्यानां तथा ताम्बूलभक्षणादिति ॥

जृम्भणम् । जृभि० घञ् ॥

जृम्भणम् । न । जृम्भे ॥ जृभिगात्रवि नामे ॥ भावेल्युट् ॥

जृम्भमाण । त्रि । जृम्भाकुर्वाणे ॥ वि वर्द्धमाने ॥

जृम्भा । स्त्री । विकाशे ॥ मुखविदारणे । जृम्भे ॥ जृभि० गुरोश्चेत्य । टाप् ॥

जृम्भिका । स्त्री । जृम्भे ॥

जृम्भितम् । न । स्त्रीणा करणे ॥ ईहायाम् । विचेष्टिते ॥ प्रवृद्धे ॥ जृम्भे ॥ स्फुटिते । प्राप्तविकाशे ॥ जृम्भ स ञ्जातोऽस्य । तारकादित्वादितच् ॥

जृम्भिणी । स्त्री । एलापर्णाम् ॥

जेतुम् । अ । वशीकर्त्तुमित्यर्थे ॥

जेता । त्रि । जित्वरे । जैत्रे ॥ जयनशील । दृन् । दृच्वा ॥ विजितोत्कर्षी ज्जेतुरुत्कर्षो भवति ॥ पु । मधुच्छन्दस पुत्रे ऋषिविशेषे ॥

जेन्ताक । पु । चरकोक्ते स्वेदविशेषे ॥

जेमनम् । न । भोजने । जोमना इतिभाषा ॥ जमुअदने । ल्युट् ॥

जेय । त्रि । जेतव्यमात्रके ॥ जेतुयोग्य । अर्हेकृत्यतृचश्चेति योग्यतायामन्वोयत् ॥

जैत्र । पुं । पारदे ॥ न । औषधे ॥ त्रि । जेतरि ॥ जेतैव । प्र० अण् । जैत्रस्तु जेतायोगच्छत्यल विद्विषत'प्रति ॥

जैत्ररथ । त्रि । जयशीले ॥ इतिहला युध ॥

जैत्री । स्त्री । जयन्तीवृक्षे ॥

जैन । पु । जिनमतावलम्बिनि । बौद्धे ॥ जिनस्यायम् । अण् ॥

जैपाल । पु । जयपालवृक्षे ॥

जैमिनि । पु । पर्वमीमांसाचार्ये ऋषिविशेषे ॥ अय सामवेदधरो वेदव्यासशिष्योवज्रवारक ॥ यथा । मुने क ल्याणमित्रस्य जैमिनेश्चापि कीर्त्तनात । विद्युदग्निभयं नास्ति पठितेच गृहोदरेइति ॥

जैवम् । त्रि । जीवसम्बन्धिनि ॥ जीवस्येदम् । अण् ॥

जैवलि । पु । प्रवाहणे ॥ जीवलस्यरा

जोऽपव्यम् । वृक् ॥

जैवातृक । पु । ग्लावि । सोमे ॥ भेषजे ॥ कर्पूरे ॥ त्रि । आयुष्मति । दीर्घायुषि ॥ कृशे ॥ जीवति जीवयति वा । जीव० । जीवेरिग्वन् वृत्तौ आतृकन् वृद्धिश्चेतिसाधु ॥

जैह्माशिनेयः । पु । जिह्माशिनोऽपत्ये ॥ शुभ्रादिस्वात्ढक् । दाण्डिनायनेतिटिलोपाभाव ॥

जैह्म्यम् । न । कुटिलत्वे ॥

जोङ्गकम् । न । अगुरुणि ॥ जुङ्गति जुङ्ग्यते वा । जुगिवर्जने । क्वुन् । पृषोदरादि. ॥

जोङ्गट । पु । गर्भिण्यभिलाषे । दोहदे ॥ इति हारावली ॥

जोटिङ्ग । पु । महादेवे ॥ महाव्रतिनि ॥

जोड । पु । जोडने ॥ जोडनम् । जुड बन्धने । घञ् ॥

जोडनम् । न । बन्धने ॥

जोन्नाल । पु ।
जोन्नाला । स्त्री । } देवधान्ये ॥

जोषणम् । न । सेवने ॥

जोषम् । अ । सुखे ॥ प्रशंसायाम् ॥ तूष्णीमर्थे ॥ लङ्घने ॥ जुषते । जुषत्यसौ । वाहुलकादम् ॥

जोषा । स्त्री । योषिति ॥ जुषते जुष्यते वा । जुषी प्रीतिसेवनयो । कष् घञ्वा ॥

जोषिका । स्त्री ॥ जालिकायाम् ॥

जोषित् । स्त्री । योषिति ॥ द्रुहृष्टिजुषिभ्य इतिपाठे जुषेरिति ॥

जोषिता । स्त्री । स्त्रियाम् ॥ जोष्यते स्म । णिजन्तात्कर्मणि क्त ॥

जोष्य । त्रि । प्रियेविषये ॥ जोष्याम् हि जुषत. काश्च संमासोऽ निच्छतोमम ॥

जोहलम् । न । } पक्ष्ममात्रस्यद्वितीये (ऽ । ऽ) पर्याये ॥
जोहलकम् । न । }

ज्ञ । पु । प्रह्मणि । स्वप्रकाशे ॥ चान्द्रमसायने । बुधग्रहे ॥ विचक्षणे । विदुषि ॥ पद्मासने । चतुराननेॄ भौमे ॥ जानाति । ज्ञाअवबोधने । इगुपधेतिकः । आतोलोपइटिचेत्या लोप ॥

ज्ञपित । त्रि । ज्ञाते ॥ ज्ञप्यतेस्म । ज्ञा मारणादौमित् । णयन्त.क्त. । वादान्तशान्तेतिसाधु ॥

ज्ञप्त । त्रि । ज्ञपिते ॥ ज्ञप्यतेस्म । ज्ञा अवबोधने मारणादौचवर्त्तते । मारणादौचामित् । णयन्त । क्त । वादान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ता. इतिसाधुः ॥

ज्ञप्ति । स्त्री । बुद्धौ । मनीषायाम् ॥

ज्ञपयति । ज्ञपमिच्च । अथ ज्ञाने ज्ञापने मारणतोषणनिशामने षुच वर्त्तते । चुरादि । तत्रज्ञानार्थकात् अपेक्षितत्वात् प्राप्तं युच वाधित्वा बाहुलकात् क्तिन् ॥ ज्ञाने ॥ ज्ञप्ते स्तु कारणाराम शिष्यप्रत्ययवक्रेवता ॥

ज्ञात । त्रि । ज्ञानेन विषयीकृते । प्रतीते । बुद्धे । ममिते ॥ ज्ञा० क्त ॥

ज्ञातनन्दन । पु । वर्द्धमानार्हद्विशेषे ॥

ज्ञातव्य । त्रि । अवगन्तव्ये । बोध्ये ॥ मन्तव्ये ॥

ज्ञातसिद्धान्त । पु । तान्त्रिके । शास्त्रतत्त्वज्ञे । तत्त्वार्थज्ञातरि ॥ ज्ञाता सिद्धान्ता येन ॥ आगमभाषया सर्वसिद्धान्तोपरि विराजमाने कौले ॥ यथा । सर्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवंपरम् । वैष्णवादुत्तमंशैवंशैवाद्दक्षिणमुत्तमम् ॥ दक्षिणादुत्तमं वामं वामात् सिद्धान्त मुत्तमम् । सिद्धान्तादुत्तमं कौलं कौलात् परतरं न हीति ॥

ज्ञाति । पु । ताते । पितरि ॥ पितृव्यादिपितृपक्षे । सगोत्रे । सपिण्डसहोदरादौ । स्वजने ॥ सचतुर्विध । सप्तमपुरुषपर्य्यन्तं सपिण्ड । ततस्त्रिपुरुषपर्यंत सकुल्य । ततश्चतुर्थपुरुषपर्यन्तं समानोदक । जन्मनामस्मृतिपर्य्यन्तमपि समानोदक. । तत पर गोत्रज. ॥ ज्ञातिद्रोहे दोषोयथा । यानि कानिच पापानि ब्रह्महत्या दिकानिच । ज्ञातिद्रोहस्य पापस्य कलां नार्हन्तिषोडशीम् ॥ जानाति । ज्ञा० । क्तिच् ॥ ज्ञायते वा । क्तिन् ॥

ज्ञाता । त्रि । ज्ञानशीले । विदुरे । ज्ञानिनि ॥ ज्ञानाश्रये । अहङ्कारादिप्रकाशकत्वेन चेतने ॥ जानाति । ज्ञा० । तृन् ॥ इन्द्रियद्वारा विषयज्ञानवति ॥

ज्ञातेयम् । न । ज्ञातित्वे ॥ ज्ञातेर्भाव कर्म वा । कपिज्ञात्योर्ढक् ॥

ज्ञान । पु । जीवे ॥ नश्वासावनश्च । विषयान्जानाति प्राश्नाति चेत्यर्थ ॥

ज्ञानम् । न । विशेषेण सामान्येनचाव बोधे ॥ पदार्थग्राहिकायां वृत्तौ ॥ यथा । ज्ञानद्विधा वस्तुमात्रद्योतक निर्विकल्पकम् । सविकल्पन्तु सञ्ज्ञादिद्योतकत्वादनेकधा ॥ सङ्कल्पसंशयभ्रान्तिस्मृतिसादृश्यनिश्चया । ऊहोऽनध्यवसायश्च तथान्येऽनुभवा अपि ॥ इत्यादिभेदेनानेकविधाभवन्तीत्यर्थ ॥ सम्यगवबोधे ॥ न्यायमते । अप्रमाच प्रमाचेति ज्ञान द्विविधमुच्यते । तच्छून्ये तन्मतिर्यासा द्यप्रमा सानिरूपिता ॥ तत् प्र

ज्ञानम्

पञ्चो विपर्यास संशयोपि प्रकीर्त्तित. । आद्योदेहआत्मबुद्धि शङ्खादो पीततामति ॥ भवेन्निश्चयरूपासा संशयोथ प्रदर्श्यते । किंस्विन्नरोवा स्थाणुर्वेत्यादिबुद्धिस्तु संशय ॥ तद्भावा ऽप्रकाराधी स्तत् प्रकारातुनिश्चय ॥ ससंशयो भवेद्याधीरेकत्रा भावभावयोः । साधारणादिधर्मस्य ज्ञानं संशयकारणम् ॥ दोषोऽप्रमायाजनक प्रमायास्तुगुणो भवेत् । पित्तदूरत्वादिरूपो दोषोनानाविधोमत' ॥ गुण स्याद्भ्रमभिन्नस्तु ज्ञानमत्रोच्यते प्रमा । अथवातत् प्रकारंयज्ज्ञान तद्वत् विशेष्यकम् ॥ ज्ञानंयन्निर्विकल्पाख्य तदतीन्द्रियमिष्यते । तत् प्रमा ना ऽप्रमा नापिज्ञानं यन्निर्विकल्पकम् ॥ प्रकारत्वादिशून्यं हिसम्बन्धानवगाहनात् ॥ इतिभाषापरिच्छेद ॥*॥ योगेतु । एकत्त्व बुद्धि मनसो रिन्द्रियाणाञ्च सर्वश । आत्मनोव्यापिन स्तात ज्ञानमेतदनुत्तमम् ॥ इति मोक्षधर्मे ॥ एकत्त्व बुद्धिमनसोवस्थानम् बुद्धिवृत्तिनिरोध इतियावत् ॥ देवताध्यानादो ॥ विवेकविज्ञाने । शास्त्राचार्योपदेशजे परमात्मविषये साक्षान्मोक्षफले आत्मनिश्चये ॥ तत्त्वज्ञाने ॥ शास्त्रे ॥

ज्ञानम्

मोक्षफलिकायांधियि ॥ जीवेश्वरजगद्भेदभ्रमाधिष्ठानभूते निश्चयस्वप्रकाशे सच्चिदानन्दरूपादितीये परमार्थसत्ये॥ आत्मामात्मसर्वपदार्थावबोधे ॥ विवेक सामर्थ्ये ॥ अहङ्कारोपासने ॥ शब्दयुक्तिभ्यामात्मनिश्चये ॥ अमानित्व मदम्भित्वमहिंसा क्षान्तिरार्जवम् । आचार्योपासनं शौचं स्थैर्य मात्मविनिग्रह ॥ इन्द्रियार्थेषु वैराग्य मनहङ्कारएवच । जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥-असक्ति रनभिष्वङ्ग पुत्रदारगृहादिषु । नित्यञ्च समचित्तत्व मिष्टानिष्टोपपत्तिषु ॥ मयिचानन्ययोगेन भक्तिरव्यभिचारिणी । विविक्तदेशसेवित्व मरति र्जनसंसदि ॥ अध्यात्मज्ञाननित्यत्त्व तत्त्वज्ञानार्थदर्शनम् । एतज्ज्ञानमिति प्रोक्त मज्ञानं यदतोन्यथा ॥ सात्त्विकादिभेदात् तत् त्रिविधम् । यथा । सर्वभूतेषु येनैक भाव मव्यय मीक्षते । अविभक्त विभक्तेषु तज्ज्ञान विद्धि सात्त्विकम् ॥ सात्त्विक सर्वसंसारोच्छित्तिकारणम् ॥ पृथक्त्वेनतु यज्ज्ञान नानाभावान् पृथग्विधान् । वेत्ति सर्वेषुभूतेषु तज्ज्ञान विद्धिराजसम् ॥ यत्तुकृत्स्नवदेकस्मिन् कार्ये स-

क्षमहेतुकम् । अतत्त्वार्थवदल्पञ्च त
त्तामसमुदाहृतम् ॥ राजसं ताम
सञ्च संसारकारणम् ॥ आत्मनः श्र
वणमननाभ्यां परिनिष्पन्ने ॥ प्रमा-
णजन्यचेतोवृत्त्यभिव्यक्तसच्चिद्रूपे ॥
परमात्मज्ञानसाधने ॥ शास्त्रादात्मत-
त्त्वस्यावगमे ॥ आत्मसाक्षात्कारे ॥ सा
ङ्गवेदतदर्थविषयेऽवबोधे ॥ ब्रह्मात्मै
क्यसाक्षात्कारे ॥ * ॥ गुणपुरुषान्यता
ख्यातौ ॥ अध्यवसाये ॥ * ॥ महा
वाक्यजन्याखण्डाकारायां वृत्तौ ॥ स्व
स्वरूपस्फुरणे ॥ ब्रह्मैवाहं समः शा-
न्तः सच्चिदानन्दलक्षणः । नाहं देहो
ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥
निर्विकारो निराकारो निरवद्यो
ऽहमव्ययः । नाहं० ॥ निरामयो नि
राभासो निर्विकल्पोऽहमाततः । ना
हं० ॥ निर्गुणो निष्क्रियो नित्यो नि
त्यमुक्तोऽहमच्युतः । नाहं० ॥ नि
र्मलो निश्चलोऽनन्तः शुद्धोऽहमजरो
ऽमरः । नाहं० ॥ लोकवासनया जन्तोः
शास्त्रवासनयापि च । देहवासनया
ज्ञानं यथावन्नैव जायते ॥ * ॥ ज्ञा
नमुत्पद्यते पुंसां क्षयात् पापस्य कर्म
णः । यथा दर्पणतलप्रख्ये पश्यत्या-
त्मानमात्मनि ॥ वेदे ॥ ज्ञायतेऽने
न । ज्ञा० । करणे ल्युट् ॥ अन्वयव्यति

रेकाभ्यां जाग्रत्स्वप्नसुषुप्तिषु । य
देकं केवलं ज्ञानं तदेवास्मि परं बृ
हत् ॥ ज्ञानाज्ञानविलासोऽयं ज्ञान-
ज्ञानेन शाम्यति । ज्ञानात् ज्ञानं परि
त्यज्य ज्ञानमेवावशिष्यते ॥

ज्ञानगम्यम् । न । ज्ञेये ब्रह्मणि ॥ ज्ञा
नेन अमानित्वादिना साधनकलापेन
ज्ञानहेतुतया ज्ञानशब्दितेन गम्यं
प्राप्यं ज्ञेयं ब्रह्म न तु तद्विना ॥ ज्ञानेन
गम्यते । गम्लृ० । पोरदुपधादिति यत् ॥
त्रि । परमेश्वरे । परमात्मनि ॥ नक
र्मणा न ज्ञानकर्मभ्यां गम्यते किन्तु
ज्ञानेनैव गम्यते इति सहस्रनामभा
ष्यम् । विवृतञ्चैतत् तारकब्रह्मान
न्दसरस्वतीयतिना ॥ यथा । ज्ञानेनै
व गम्यो ज्ञानगम्यः । सर्वं वाक्यं साव
धारणमिति न्यायात् ज्ञानेनैवेत्यव
धारणलाभ इत्यभिप्रेत्याह । न कर्म
णेति । अनेन केवलकर्मणां साक्षा
न्मोक्षसाधनत्वं व्यावर्त्यते । न ज्ञान
कर्मभ्यामित्यनेन समुच्चयो वार्यत
इति ॥

ज्ञानतपाः । पु । विदुषि । आत्मविदि
॥ ज्ञानमेव तपः सर्वकर्मक्षयहेतुर्यस्य
सः । नहि ज्ञानेन सदृशं पवित्रमिह
विद्यते ॥

ज्ञानदग्धशरीरः । त्रि । सर्वसङ्गनिवृ

सेभिधी ॥ ज्ञानदग्धशरीरस्य पुन
र्दाहो नास्तीत्यशौचक । सर्वस
ङ्गनिवृत्तस्य ध्यानयोगरतस्य च । न
तस्य दहनं कार्यं नैव पिण्डोदकक्रि
या ॥ निदध्यात् प्रणवेनैव बिले भि
क्षो कलेवरम् । प्रोक्षणं खननं चा
पि सर्वं तेनैव कारयेत् ॥

ज्ञानदर्पण. । पु । पूर्वजिने । मञ्जुघोषे ॥

ज्ञानदा । स्त्री । शारदायाम् ॥ ज्ञान
ददाति । ददाज्॰ । आतऽतिक'
॥ त्रि । ज्ञानस्य दातरि ॥

ज्ञानदाता । पु । ब्रह्मोपदेष्टरि श्रीगुरौ
॥ पितुर्दशगुणा माता गौरवेणेति
निश्चितम् । मातुः शतगुणः पूज्यो
ज्ञानदाता गुरु. प्रभो ॥ ज्ञानप्र-
दाता ॥

ज्ञानदीप. । पु । दीपसदृशे ज्ञाने ॥
स्वप्रकाशचैतन्यानन्दाद्वितीयलक्षण-
आत्मा स एव सद्विषयान्तःकरणपरि
णामरूपो दीपउच्यते ॥ ज्ञानं दी
पइव ॥

ज्ञानदीपित. । त्रि । ज्ञानेनप्रकाशिते
॥ श्रवणपूर्वकसमाधौ ॥ ज्ञान वेदान्तवा
क्यजन्यो ब्रह्मात्मैक्यसाक्षात्कार तेन
अविद्यातत्कार्यनाशद्वारा दीपित. अ
त्यन्तोज्ज्वलित ॥

ज्ञाननिर्धूतकल्मष । त्रि । अवधूते । प
रमहंसे ॥ ज्ञानेन निर्धूतं समुन्मू
लितं पुनर्देहसम्बन्धकारणं कल्मष
पुण्यपापात्मकं कर्म यस्य ॥

ज्ञाननिष्ठ । त्रि । ज्ञानिनि ॥ ज्ञाने नि
ष्ठाऽस्य ॥

ज्ञानप्लव । पु । ज्ञानपोते ॥

ज्ञानमय । पु । शिवे ॥ त्रि । अखण्ड
ब्रह्माकारे प्रकाशस्वरूपे ॥ ज्ञानं
तत्त्वत समस्तपदार्थावबोधकत्वा-
त्मक ॥

ज्ञानयज्ञ । पुं । न्यायेन वेदार्थनिश्चय
परे ॥ ब्रह्मात्मा वपरे यज्ञं यज्ञेनैवो
पजुह्वति । ब्रह्माग्नौ सत्यज्ञानान
न्तानन्दरूपं निरस्तसमस्तविशेषं ब्र-
ह्म तत्पदार्थं तस्मिन्नग्नौ यज्ञं प्र
त्यगात्मानं त्वं पदार्थम् यज्ञेनैव य
ज्ञशब्द.आत्मनामसु यास्केनपठित.
इत्थम्भूतलक्षणे तृतीया एवकारो भे
दाभेदव्यावृत्त्यर्थ: त्वपदार्थाभेदेनै
वोपजुह्वति तत्स्वरूपतया पश्यन्ती
त्यर्थ । अपरे पूर्वस्मात् कर्मयोगि
नो विलक्षणास्तत्त्वदर्शननिष्ठा.सन्या
सिनइत्यर्थ ॥ * ॥ महापापवतां
नृणां ज्ञानयज्ञो न रोचते । प्रत्युत
ज्ञानयज्ञस्तु प्रद्वेष्यो भासते स्वत ॥
भोगसारस्वविभ्रान्त्या ज्ञाने भोगौ
घघातिनि । प्रद्वेषोऽमुष्य चित्तस्य

मशापापवतोभवेत् ॥

ज्ञानयोग । पु । निष्ठाविशेषे । ज्ञानमेव ब्रह्मणा युज्यते इति ज्ञानयोगनिष्ठायाम् ॥ ब्रह्मज्ञानप्राप्त्युपाये ॥

ज्ञानयोगव्यवस्थिति । स्त्री । जीवन्मुक्तौ ॥ आत्मसाक्षात्कारमनोनाशवासनाक्षयानुकूलपुरुष प्रयत्नाभ्यां विशिष्टासंसारविलक्षणावस्थिति ॥

ज्ञानलक्षणा । स्त्री । त्रिविधालौकिकसन्निकर्षान्तर्गतसन्निकर्षे ॥ तल्लक्षणंयथा। विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणइति। अस्यार्थः। तद्विषयज्ञापकतद्विषयज्ञानम्। यथा पूर्वं घटादिज्ञाने सति पश्चात् घटादिज्ञानम् ॥

ज्ञानवान्। त्रि। ज्ञानिनि॥ ब्रह्मविदि ॥ ज्ञानमस्त्यस्य। मतुप् ॥

ज्ञानवापी । स्त्री । काश्यन्तर्गततीर्थविशेषे। ज्ञानोदतीर्थे ॥

ज्ञानसाधनम्। न। इन्द्रिये ॥

ज्ञानसिद्धि। स्त्री। ब्रह्मात्मैक्यबोधे॥

ज्ञानस्कन्धः। पु। निर्विकल्पके ॥

ज्ञानस्वरूप । पु । जीवे ॥ ज्ञानसाधनम्। विषयान् जानाति प्राणितिच। तादृशस्वरूपोजीवः ॥

ज्ञानाग्निदग्धकर्म्मा। त्रि। पण्डिते ॥ कर्मादावकर्मादिदर्शनं ज्ञानं तदेवाग्नि स्तेन दग्धानि शुभाशुभलक्षणानिकर्माणि यस्य. ॥

ज्ञानापोहः। पु। विस्मरणे ॥

ज्ञानाभ्यास । पु। अवणाद्यावृत्तौ ॥ तच्चिन्तन तत्कथन मन्योन्य तत्प्रबोधनम्। एतदेकपरत्वञ्च ज्ञानाभ्यासंविदुर्बुधा ॥ सर्गादावेव नोत्पन्नं दृश्य नास्त्येव तत् सदा। इदं जगदहञ्चेति बोधाभ्यास विदु परम् ॥

ज्ञानावस्थितचेता । पु। स्थितप्रज्ञे ॥ निर्विकल्पकब्रह्मात्मैक्यबोध एवाऽवस्थित चेतो यस्य ॥

ज्ञानासि । पु। आत्मविषयकनिश्चयखङ्गे ॥

ज्ञानी। त्रि। पदवाक्यन्यायादिज्ञाननिपुणे। तत्त्वदर्शिनि । कृतसाक्षात्कारे ॥ परोक्षज्ञानवति ॥ स्वतोऽपरोक्ष ज्ञान मसम्भावनादिप्रतिबन्धेन फलमजनयन् परोक्षमित्यु पचर्यते ॥ भगवत् तत्त्वसाक्षात्कारो ज्ञान तेन नित्ययुक्ते॥ तीर्थमात्रे। निवृत्तसर्वकामे। निष्कामभक्ते। तत्त्वज्ञानवति ॥ ज्ञानिना हृदयाम्भोजे कृतलेखा परमेश्वरीति देवीगीता ॥ पु। दैवज्ञे ॥ ज्ञानमस्यास्ति। अतइनिठनाविति इनि. ॥

ज्ञानेन्द्रियम्। न। धीन्द्रियेषु । श्रोत्र

त्वक्चक्षुर्जिह्वाघ्राणाख्येषु ॥ एता
न्याकाशादीनां सात्त्विकांशेभ्यो व्य
स्तेभ्यः पृथक् पृथक् क्रमेणोत्पन्नानि ॥
यथोक्तं देवीभागवते । पञ्चभूतस्थस
त्त्वांशैः श्रोत्रादीनां समुद्भवः । ज्ञाने
न्द्रियाणां राजेन्द्र प्रत्येकमिति ॥ ज्ञा
नसाधनमिन्द्रियम् ज्ञानार्थमिन्द्रिय
वा ॥ क्रमशो दिग्वातार्कप्रचेतोऽश्वि
नो ज्ञानेन्द्रियाणां देवताः ॥ शब्दस्प
र्शरूपरसगन्धाश्च क्रमशो ज्ञानेन्द्रि
याणां विषयाः ॥

ज्ञापकम् ॥ त्रि । गमके । बोधके ॥ नि
दर्शने ॥ ज्ञापयति । ज्ञा० ण्वुल् ॥

ज्ञापनम् । न । बोधने । जनावना इति
भाषा ॥

ज्ञापिका । स्त्री । बोधिकायाम् ॥

ज्ञापितः । त्रि । लक्षिते ॥ सूचिते ॥
प्रबोधिते ॥

ज्ञीप्समान । त्रि । बोधयितुमिष्टेर्थे ॥

ज्ञेयम् । त्रि । वेदितव्ये । ज्ञानविषये
। ज्ञानकर्मणि ॥ अज्ञातत्वात् ज्ञातु
मर्हे ब्रह्मणि ॥ अज्ञातज्ञातत्वाभावेन
ज्ञातुमनर्हत्वात् ॥ * ॥ ज्ञेयं यत् तत्
प्रवक्ष्यामि यद् ज्ञात्वाऽमृतमश्नुते
। अनादिमत् परं ब्रह्म न सत् तन्ना
सदुच्यते ॥ सर्वतः पाणिपादं तत्
सर्वतोऽक्षिशिरोमुखम् । सर्वतः श्रु

तिमल्लोके सर्वमावृत्य तिष्ठति ॥
सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविव-
र्जितम् । असक्तं सर्वभृच्चैव निर्गु
णं गुणभोक्तृ च ॥ बहिरन्तश्च भूता
नामचरं चरमेव च । सूक्ष्मत्वात्
तदविज्ञेयं दूरस्थं चान्तिके च तत्
॥ अविभक्तं विभक्तेषु विभक्तमिव
च स्थितम् । भूतभर्तृ च तज्ज्ञेयं ग्र
सिष्णु प्रभविष्णु च ॥ ज्योतिषामपि
तज्ज्योतिस्तमसः परमुच्यते । ज्ञा
नं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धि
ष्ठितम् ॥ ज्ञातुं योग्यम् । ज्ञा० । अ
चो यत् । ईद्यति । गुणः ॥

ज्या । स्त्री । मातरि ॥ वसुधायाम् ॥
मौर्व्याम् । धनुर्गुणे ॥ जिनाति । ज्या
वयोहानौ । अघ्न्यादित्वात् यग
न्तो निपातितः ॥ अन्येभ्योऽपीति डौ-
वा । टाप् ॥

ज्याघातवारणम् । न । गोधायाम् । त
ले ॥ ज्यायाः शिञ्जिन्या गुणस्य आ-
घातस्तस्य वारणम् ॥

ज्यानिः । स्त्री । जीर्णौ ॥ हानौ ॥ तटि
न्याम् ॥ ज्यानम् । ज्या० । ग्लाज्याहा
भ्यो निः ॥ यद्वा । जिनाति । ज्या० ।
वीज्याज्वरिभ्यो निः ॥

ज्यायान् । त्रि । अतिवृद्धे । वर्षीयसि
॥ अतिप्रशस्ते ॥ अयमनयोरतिश

येन वृद्ध प्रशस्यो वा । ज्यच वृद्धस्य च । द्विवचनेतीयसुनि वृद्धप्रशस्ययो ज्यादेश । ज्यादादीयस इत्यात्वम्॥

ज्यायसी । स्त्री । अतिप्रशस्तायाम् ॥ वृद्धायाम् ॥ ज्येष्ठायाम् ॥ ङीप् ॥

ज्येष्ठ । पु । शुक्रे । ग्रीष्मर्त्तौ. प्रथमे मासि ॥ ज्यैष्ठी पूर्णमास्य ऽस्मिन् । सास्मिन् पौर्णमासीत्यण् । संज्ञापूर्वकविधेरनित्यत्वादृद्ध्यभाव ॥ त्रि । अतिवृद्धे ॥ श्रेष्ठे ॥ अयमेषामतिशयेन वृद्ध प्रशस्योवा। अतिशायने तमबिष्ठनाविति इष्ठनि वृद्धस्य च ज्यचे त्यनेनच वृद्धप्रशस्ययोर्ज्यादेश ॥ अग्रजे ॥

ज्येष्ठतात' । पु । पितुरग्रजे ॥ तातस्य ज्येष्ठ' । राज० ज्येष्ठस्यपूर्वनिपात.॥

ज्येष्ठवर्ण. । पुं । ब्राह्मणे ॥ वर्णानां ज्येष्ठ । राज० ॥ कर्मधारयो वा ॥ त्रि । श्रेष्ठवर्णे ॥

ज्येष्ठवला । स्त्री । सहदेव्याम् ॥

ज्येष्ठश्वश्रू. । स्त्री । कुल्याम् । पत्न्या ज्येष्ठभगिन्याम् । वडीसाली इति जेठसास इतिचभाषा ॥

ज्येष्ठसामग: । पुं । ज्येष्ठसाम्नांगातरि ॥ तानिच आरण्यके गीयन्ते ॥

ज्येष्ठसाम । न । सामप्रभेदे । आरण्यके गीयमाने सामनि ॥ तदध्ययना कृत्ये ॥

ज्येष्ठस्थानम् । न । तीर्थविशेषे ॥ अत्र महादेवस्तिष्ठति ॥

ज्येष्ठा । स्त्री । अश्विन्यादिष्वष्टादशे नक्षत्रे ॥ सत्कीर्तिपुत्रै र्विविधै' समेतो विख्यातितेऽ त्यन्तवसत्प्रताप' । श्रेष्ठप्रतिष्ठो विकलस्वभावो ज्येष्ठा भवेद्यस्यचजन्मकाले ॥ गृहगोधायाम् ॥ मध्यमाङ्गुलौ ॥ गङ्गायाम् ॥ अलक्ष्म्याम् ॥ नायिकाभेदे । परिणीतत्वेसति भर्तुरधिकस्नेहायाम् ॥ प्रथमजायाम् ॥ज्येष्ठस्त्रियाम् ॥ ज्येष्ठस्त्री । पुंयोगलक्षणङीषंबाधित्वाअजादित्वाट्टाप् ॥

ज्येष्ठामूलीय: । पु ।ज्येष्ठे ॥ ज्येष्ठामूलीय मिच्छन्ति मास माषाढपूर्वजम्॥

ज्येष्ठाम्बु । न । तण्डुलाम्बुनि । मण्डे ॥

ज्येष्ठाश्रम' । पुं । गृहिणि ॥ यस्मात्-त्रयोप्याश्रमिणो ज्ञानेनान्नेनचाऽ-न्वहम् । गृहस्थेनैव धार्यन्ते तस्माज् ज्येष्ठाश्रमो गृही ॥ ज्येष्ठ आश्रमोयस्य । कर्मधारयो वा ॥

ज्येष्ठाश्रमी । पु । गृहस्थे । गृहस्थो ब्रह्मचारीच वानप्रस्थोथभिक्षुक । चत्वार आश्रमा. प्रोक्ता. सर्वेगार्हस्थ्यमूलका: ॥ ज्येष्ठश्चा सावाश्रमीच ॥

ज्येष्ठी । स्त्री । गृहगोधायाम् । छिपकली इतिभाषा ॥

ज्यैष्ठ । पु । ज्येष्ठे मासे । शुक्रे ॥ विदेश इति पुरुषः सुतीव्रः क्षमान्वितः स्यात् खलु दीर्घसूत्रः । विचित्रबुद्धिं विदुषां वरिष्ठो ज्यैष्ठाभिधाने जननं हि यस्य ॥ ज्यैष्ठीपूर्णमास्यस्मिन् । सास्मिन् पौर्णमासीत्यण् ॥

ज्यैष्ठिनेय. । पु । ज्येष्ठाया अपत्ये ॥ कल्याण्यादित्वात् ढक् इनङादेशश्च ॥

ज्यैष्ठी । स्त्री । ज्येष्ठपूर्णिमायाम् ॥ ज्येष्ठयायुक्ता पौर्णमासी । नक्षत्रेणयुक्तः काल इत्यण् । ततोङीप् ॥ गृहगोधायाम् ॥

ज्यैष्ठ्यम् । न । ज्येष्ठत्वे ॥ यथा । विप्राणांज्ञानतो ज्यैष्ठ्यं क्षत्रियाणान्तुवीर्य्यतः । वैश्यानां धान्यधनतः शूद्राणामेवजन्मतइतिमनुः ॥

ज्योक् । अ । कालभूयस्त्वे ॥ प्रश्ने ॥ शीघ्रार्थे ॥ सम्प्रत्यर्थे ॥

ज्योतिरिङ्ग । पु । खद्योते ॥

ज्योतिरिङ्गण । पुं । तमोमणौ । खद्योते ॥ ज्योतिर्नक्षत्र तद्वदिङ्गति । इगि गतौ । नन्दनशब्दार्थादित्युच् ॥

ज्योतिर्म्मेघहृद । पु । तीर्थविशेषे ॥

ज्योतिर्व्वित् । पु । कालपरमार्थं वादिनि॥

ज्योतिर्व्वीजम् । न । खद्योते ॥

ज्योतिश्चक्रम् । न । चन्द्रसूर्य्यादिग्रहनक्षत्रमण्डले । राशिचक्रे ॥ सप्तविंशतिभे ज्योतिश्चक्रं स्तिमितवायुगम् । तदष्टांशो भवेद्राशि र्नवर्क्षचरणाङ्कितः ॥

ज्योतिश्शास्त्रम् । न । ग्रहनक्षत्रादीनां तत्त्वनिर्णायके शास्त्रे ॥ सिद्धान्त संहिताहोरारूपस्कन्धत्रयात्मकम् । वेदस्य निर्म्मलं चक्षुर्ज्योतिश्शास्त्रमकल्मषम् ॥ विनैतदखिलं श्रौतस्मार्त्तं कर्म्म न सिध्यति । तस्माज्जगद्धितायेदं ब्रह्मणानिर्म्मितं पुरा ॥ अतएवद्विजैरेतदध्येतव्यं प्रयत्नतः ॥

ज्योतिषम् । न । वेदाङ्गविशेषे ॥ ग्रहनक्षत्रादिगणनशास्त्रे । पञ्चस्कन्धमिदंशास्त्रं होरागणितसंहिताः । केरलिशकुनञ्चेति ज्योतिश्शास्त्रमुदीरितम् ॥ वेदाहि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहितास्तुयज्ञाः । तस्मादिदं कालविधानशास्त्रं योज्योतिषं वेद सवेदयज्ञान् ॥ यथा शिखा मयूराणां नागानां मणयो यथा । तद्वद्वेदाङ्गशास्त्राणां गणितं मूर्द्धिसंस्थितम् ॥ लेहाल्लोभाच्च मोहाच्च योविप्रो ऽज्ञानतोपिवा । शूद्राणामुपदेशन्तु दद्यात् सनरकं व्रजेत् ॥ ज्योतिर्न्नक्षत्राद्यधिकृत्यकृतोग्रन्थः । कृतेग

ज्ये इत्यस्य। सञ्ज्ञापूर्वकत्वान्नवृद्धिः॥

ज्योतिषी। स्त्री। तारायाम्॥

ज्योतिष्क.। पु। चित्रकवृक्षे॥ मेथिका बीजे॥ गणिकारिकावृक्षे॥ पुंभूम्नि। ज्योतिष्का। चन्द्रार्कग्रहनक्षत्र तारकासु॥ न। मेरो शृङ्गान्तरे॥ तदीशभागे तस्मात् शृङ्गमादित्य सन्निभम्। यत्तज्ज्योतिष्कमित्याहु सदापशुपतेः प्रियम्॥ तस्मा छ्छ्म पुर्या ईशानभागे॥

ज्योतिष्टोम। पु। षोडशर्त्विक्साध्ये यज्ञविशेषे॥ अयश्चाद्यस्तदोदृ्ष्वि स्याभवति॥ ज्योतींषि स्तोमा यस्य यज्ञस्य सोय ज्योतिष्टोम.। ज्योतिरायुष स्तोम इतिषत्वम्। सलोप.॥

ज्योतिष्मन्। पु। सूर्ये॥ प्लक्षद्वीपस्थेऽद्रिविशेषे॥ त्रि। दीप्तियुक्ते॥ ज्योतिरस्यास्ति। मतुप्॥

ज्योतिष्मती। स्त्री। पारावतांघ्र्याम्। कटभ्याम्। मालकांगणी इति भाषा॥ ज्योतिष्मती कटु स्तिक्ता सरा कफ समीरजित्। अत्युष्णा वामनी तीक्ष्णा वह्निबुद्धिस्मृतिप्रदा॥ रात्रौ॥ उगित्वात् ङीप्॥

ज्योतिः। पु। अग्नौ॥ दिवाकरे॥ मेथिकायाम्॥ न। दृष्टौ। नेत्रकनीनिका मध्ये॥ नक्षत्रे॥ प्रकाशे॥ सर्वावभासके ब्रह्मणि चैतन्ये। आदित्यादीनां वृक्षादीनाञ्च बाह्यानामान्तराणामपि जडज्योतिषां चैतन्यज्योतिषोऽवभासकत्वोपपत्ते॥ विज्ञाने॥ द्योतते द्योतनं वाऽनेनवा। द्युत०। द्युतेरिसिन्नादेश्च ज॥

ज्योतीरथ। पु। ध्रुवे। औत्तानपादौ॥

ज्योत्स्ना। स्त्री। चन्द्रातपे॥ ज्योतिस्सयुक्तनिशि॥ कौमुद्याम्॥ श्वेतघोषायाम्॥ ज्योतिरस्त्यस्ता। ज्योत्स्नातमिस्रेत्यादिना ज्योतिषउपधलोपोनप्रत्ययश्च निपात्यते॥

ज्योत्स्नाप्रिय.। पु। चकोरे॥

ज्योत्स्नावृक्ष.। पु। दीपाधारविशेषे॥

ज्योत्स्नी। स्त्री। पटोलिकायाम्। चचेंडा इति प्रसिद्धे दीर्घफले॥ चन्द्रिकायुक्तायां रात्रौ। चादनीरात इति भाषा॥ रेणुकानामगन्धद्रव्ये॥ ज्योत्स्नाऽस्त्यस्या.। ज्योत्स्नादिभ्यउपसंख्यानमित्यण्। सञ्ज्ञापूर्वकत्व.वृद्ध्यभाव.। ङीप्॥

ज्योतिषिक। पु। दैवज्ञे। कालपरमार्थवादिनि॥ ज्योतिषमधीते वेदवा। क्रतूक्थादीति ठक्॥

ज्योत्स्न। पु। शुक्लपक्षे॥ ज्योत्स्नाऽस्मिन्नस्ति। ज्योत्स्नादिभ्य इत्यण्॥ त्रि। दीप्ते। ज्योत्स्नायुक्ते॥

ज्यौत्स्निका । स्त्री । चन्द्रिकायुक्तायां रात्रौ ॥ पटोल्याम् ॥

ज्यौत्स्नी । स्त्री । ज्योत्स्नया युक्तायां रात्रौ ॥ ज्योत्स्न्याम् ॥ अणन्तत्वान्ङीप् ॥

ज्वर. । पु । स्वनाम्ना प्रसिद्धे रोगे । जूर्त्तौ । रोगश्रेष्ठ । महागदे ॥ तस्योत्पत्ति. संख्याचोक्ता भिषग्भि । दक्षापमानसंक्रुद्धरुद्रनिश्वाससम्भव' । ज्वरोऽष्टधा पृथग्द्वन्द्व संघातागन्तुज.स्मृतइति ॥ तथाहि । वातिक.पैत्तिकश्चैव कफजो वातपित्तज' । वातश्लेष्मप्रभूतश्च पित्तश्लेष्मोद्भवस्तथा ॥ सघातागन्तुजा बेव ज्वरोऽष्टविधउच्यत इति ॥ अपिच । जनक सर्वरोगाणां दुर्वारो दारुणो ज्वर' । शिवभक्तश्च योगीच सएव विकृताकृति. ॥ भीमस्त्रिपादस्त्रिशिरा.षड्भुजोनवलोचन: । भस्मप्रहरणो रौद्र. कालान्तकयमोपम' ॥ मन्दाग्निस्तस्यजनको मान्द्यमेजीर्णकारणम्' । पित्तश्लेष्मसमीराश्च प्राणिनां दुखदायका: ॥ इत्यादि वैद्यशास्त्रतो विशेषोऽवगन्तव्य ॥ ज्वरणम् । ज्वररोगे । घञ् । संज्ञापूर्वकत्वात् वृद्ध्यभाव ॥ ज्वरति । अच् वा ॥ सन्तापहेतुत्वात्कोके ॥ ज्वरमुक्तस्य लक्षणं यथा । स्वेदो लघुत्वं शिरस. कण्डू पाको मुखस्यच । क्षवथुश्चान्नलिप्साच ज्वरमुक्तस्य लक्षणम् ॥

ज्वरघ्न । पु । गुडूच्याम् ॥ वास्तूके ॥ त्रि । ज्वरनाशके ॥

ज्वरघ्नी । स्त्री । } मञ्जिष्ठायाम् ॥
ज्वरहन्त्री । स्त्री । }

ज्वराग्नि' । पु । आधिमन्थके । ज्वररूपाग्नौ ॥

ज्वराङ्कुशी । स्त्री । भद्रदन्तिकायाम् ॥

ज्वरान्तक: । पु । नेपालनिम्बे ॥ आरग्वधे ॥ औषधविशेषे ॥ त्रि । ज्वरनाशके ॥

ज्वरापहा । स्त्री । विल्वगुण्याम् । विल्वपत्र्याम् ॥ त्रि । ज्वरनाशके ॥

ज्वरारि: । पुं । ज्वरघ्नौषधविशेषे ॥

ज्वरित. । त्रि । ज्वरिणि ॥ ज्वर. सञ्जातोस्य । तारकादित्वादितच् ॥

ज्वरी । त्रि । ज्वरयुक्त ॥ गुर्वभिष्यन्दकाले वा ज्वरीनाद्यात् कथञ्चन ॥

ज्वल. । पु । ज्वाले । दीप्तौ ॥ त्रि । दीप्तिविशिष्ट ॥ ज्वलति । ज्वलदीप्तौ । अच् ॥

ज्वलका' । स्त्री । अग्निशिखायाम् ॥ इतिहेमचन्द्र: ॥

ज्वलत् । त्रि । दीप्तिमति ॥

ज्वलन: । पु । अग्नौ ॥ चित्रकवृक्षे ॥ न । दहने ॥ ज्वलति । ज्वल० । जुच

हृक्रम्यदन्द्रम्यसृगृधिज्वलशुचलषप-
तपद. इति ताच्छील्यादिषुयुच् ॥
ज्वलनाश्मा । पु । सूर्यकान्तमणौ ॥
ज्वलित' । त्रि । दग्धे ॥ उज्ज्वले ॥ भा
स्वरे ॥ उज्ज्वलिते ॥ ज्वल० । क्त ॥
ज्वलिनी । स्त्री । मूर्वालतायाम् ॥
ज्वाल । पु । अग्निशिखायाम् ॥ त्रि ।
दीप्तिविशिष्टे ॥ ज्वलति । ज्वल० ।
ज्वलितकसन्तेभ्योणः ॥
ज्वाला । स्त्री । अग्निशिखायाम् ॥ टाप् ॥
ज्वालागर्दभक' । पुं । जालगर्दभरोगे ॥
ज्वालाजिह्व । पुं । अग्नौ ॥
ज्वालामरिचम् । न । रक्तमरिचे । पि
पली लालमरिच इत्यादि भाषा ॥
ज्वालामुखी । स्त्री । जालन्धरपीठान्त
र्गतपीठस्थानविशेषे ॥ तत्रभगवत्या
जिह्वापतिता । तत्राम्बिकादेवी ।
उन्मत्तनामको भैरवश्च ॥ तथाहि ।
ज्वालामुख्या महाजिह्वा देव उन्म-
त्तभैरव । अम्बिका सिद्धिदानाम्नी
स्तन जालन्धरे ममेति तन्त्रचूडाम
णि. ॥ देव्यन्तरे ॥ ज्वालामुखयस्या ॥
ज्वालिका । स्त्री । ज्वालायाम् । जाल
इतिभाषा ॥

झ

झ । पु । झञ्झीशे ॥ सुरगुरौ ॥ दै-
त्यराजे ॥ ध्वनौ ॥ झञ्झावाते ।
झंखड इतिख्याते । प्रचण्डानिले ॥
वृष्टौ ॥ त्रि । नष्टवसुनि ॥
झगझगायमान । त्रि । चाकचिक्य
युक्ते ॥
झगिति । अ । शैघ्र्ये ॥
झङ्कार । पु । भ्रमरादिसमूहशब्दे ॥
झङ्कृति । पु । कांस्यतालादिध्वनौ ॥
झञ्झा । स्त्री । वाते ॥ तारवाद्ये ॥
नष्टे ॥ ध्वनिविशेषे ॥ अम्बुकणवर्षणे ॥
झञ्झानिल । पु । प्रावृषिकवायौ ॥
झञ्झावात । पु । झञ्झानिले ॥
झटा । स्त्री । भूम्यामलक्याम् । वितु-
न्नकौषधौ ॥ झट्यते । झटसङ्घाते ।
घञ् । साचापूर्वकत्वान्नवृद्धि ॥
झटि । पु । क्षुद्रवृक्षे ॥ झट० । इन् ॥
झटिति । अ । शीघ्रार्थे । तत्क्षणार्थे
॥ झट० । सम्पदादित्वात् क्विप् । झट
मेति । इण्० । क्तिच् ॥
झणत्कार । पु । } कङ्कणादिध्वने र-
झनत्कार' । पु । } नुकरणशब्दे ॥
झम्प । पु । सम्पातपतने । लम्फे ॥ स्वे
च्छाधीनपतने ॥
झम्पाक । पु । वानरे ॥
झम्पाशी । पु । मत्स्यरङ्गविहङ्गमे ॥
झम्पी । पु । वानरे ॥

जर । पुं । निर्झरे । जलसानिर्गते गिरिवादि प्रवाहे ॥ जरयम् । जृष्व योहानौ । कदोरप् ॥

जरा । स्त्री । जरे । निर्झरे ॥ विश्वा हय ॥

जरि । स्त्री । जरे ॥ जरयम् । जृष्° । अपच ॥

जरी । स्त्री । गिरिवारिप्रवाहे ॥ क्ष दिकारादितिङीष् ॥

जर्जरः । पुं । कलियुगे ॥ वाद्यभाण्ड विशेषे । कठीजाँज इतिभाषा ॥ गौडास्तु चर्मपुटाच्छादितकाष्ठस्थाने इति वारख इतिख्यातेच । शिवि कोषेझरी प्रोक्तो जर्जर पटहः स्मृत' । इति तत्पर्याया । जल्लकी जल्ली जवरी जर्जरी इतिशब्दरत्नावलीच्याहु ॥
नेपालभाषया झ्याजीति प्रसिद्धे कांस्यवाद्ये ॥ नदविशेषे ॥ जलधर इति प्रसिद्धे जलपात्र विशेषे ॥ जरया जर्ना इतिच ख्याते पाकसाधने लौहद्रव्ये ॥ जर्ज इति शब्दराति । आतोऽनुपेतिक ॥ यथा । जर्जति । जर्ज परिभाषणभर्त्सनयो । वाहुलका दर ॥

जर्जरकः । पु । कलियुगे ॥ अव्यार्थ बोधकेषु, जर्जरशब्दार्थेषु ॥ क. ॥

जर्जरा । स्त्री । वेश्यायाम् ॥

जर्जरिका । स्त्री । रोटिकाविशेषे ॥ यथा । धूमसीरचिता रोटी प्रोक्ता जर्जरिकाबुधै । जर्जरी कफपित्तघ्नी किञ्चिद्वातकरीस्मृतेति ॥

जर्जरी । स्त्री । जर्जरवाद्ये ॥ जजरी इति ख्याते स्वल्पेशारिपाचे ॥ धूमसी रोटिकायाम् ॥

जर्जरीकः । पु । न । शरीरे ॥ जर्जति । जर्जपरिभाषणभर्त्सनयो । पर्फरी कादित्वात् साधु. ॥

जलजला । स्त्री । हस्तिकर्णास्फालने ॥

जवरी । स्त्री । हुडुके । जर्जरवाद्ये ॥ वाद्यकुम्भके । केशपक्षे ॥

जला । स्त्री । आतपशोभा ॥ कन्यायाम् ॥

जल्ल । पु । व्रात्यात् क्षत्रियात् सवर्णायामुत्पन्नेवर्णसङ्करजातिविशेषे ॥ करणे । मल्ले ॥ भाँड इति प्रख्याते प्रहासके ॥

जल्लकम् । न । कांस्यनिष्पन्ने करताले ॥ यथा । शिवागारे जल्लकञ्च सूर्यागारेच शङ्खकम् । दुर्गागारे वंशिवाद्य मधुरीञ्च न वादयेत् ॥

जल्लकण्ठ. । पु । कपोते ॥

जल्लरी । स्त्री । हुडुक्कवाद्ये ॥ वक्रकेशेषु ॥ जर्जते । जर्ज° । वाहुलकाद-रन् । पृषोदरादि । गौरादित्वात्

डाप् ॥ युद्धे ॥ क्लदे ॥

झल्लिका। स्त्री। उद्वर्त्तनमले। झिल्ली इति भाषा॥ द्योते॥ दीप्तौ। आतपच्छवौ॥

झल्ली। स्त्री। झर्झरवाद्ये ॥

झल्लोख.। पु। तर्कुलासके। चरखा इतिभाषा ॥

झष।पु। मत्स्ये। मीने ॥ मीनराशौ ॥ तापे ॥ अटव्याम्॥ न। खिले ॥ झषति। झषहिंसार्थे ।पचाद्यच् ॥ यद्वा। झष्यते । खनोघचेतिघ. ॥

झषकेतन. । पु। झषकेतु । पु। } कामदेवे। मदने ॥झषोमकर. केतनङ्केतुर्वा यस्य ॥

झषा। स्त्री। नागबलायाम् ॥ टाप् ॥

झषाङ्क । पु। अनिरुद्धे। कन्दर्पे ॥

झषाशन । पु। शिशुमारे ॥ त्रि। मत्स्याद्ये ॥

झषोदरी। स्त्री। व्यासमातरि ॥

झाङ्कृतम्। न। चरणालङ्कारविशेषे॥

झाट.। पु। निकुञ्जे ॥ कान्तारे ॥ व्रणादीनांमार्जने॥ न। सङ्घाते॥ झटनम्। झट०। घञ् ॥

झाटल । पु। घण्टापाटलौ। लोध्रविशेषे ॥ झाट सङ्घात लाति। ला०। आतोनुपेतिक ॥

झाटलि.। पु। स्त्री। आटलिवृक्षे॥

झाटा। स्त्री। भूम्यामलक्याम्॥ यूथीवृक्षे ॥ झट्यते।झटसङ्घाते। घञ् ॥

झाटामला। स्त्री। झाटिका। स्त्री। झाटी। स्त्री। } भूम्यामलक्याम्॥

झामकम्। न। दग्धेष्टकाविशेषे। झामाइति झांवां इतिच भाषा॥

झामर:। पु। तर्कुशाणे। तकुवेकीसाण इतिभाषा ॥

झार्झर। त्रि। झार्झरिके। झर्झरवाद्यकर्त्तरि ॥ झर्झरवादन शिल्प मस्य। मड्डुकझर्झराद्यन्यतरस्यामित्यण् ॥

झार्झरिक ।त्रि।झार्झरे ॥ झर्झरवादन शिल्प मस्य। पयष्ठक् ॥

झालि'। स्त्री। पानकविशेषे॥ यथा। आम्रमामफल पिष्ट राजिकालवणान्वितम्। भृष्टहिङ्गुयुतं पूत झोलितं झालिरुच्यते ॥ झालिंरुचिकृच्छ्राया' कुरुते कण्ठशोधिनी। मन्द मन्दं निपीता सा रोचनी वह्निबोधिनी॥

झावु.। पु।झाउ इतिश्रुते पिचुलवृक्षे ॥ झामितिशब्दं वेति गच्छति। वी गत्यादिषु। मित०डु ॥

झावुक। पु। पिचुले। झाउ इतिभाषा ॥ संज्ञायांकन् ॥

झिल्लाकम् । न । फलविशेषे ॥

झिल्लिनी । स्त्री । उल्कायाम् ॥ झिल्लि नीहत्वे ॥

झिल्ली । स्त्री । झिल्लिनीहत्वे ॥

झिञ्झिम. । पु । दावाग्नौ ॥

झिञ्झिरिष्टा । स्त्री । झिञ्झरी इ-तिगौडप्रसिद्धे क्षुपविशेषे । पीत पुष्पायाम् । रोमाश्रयफलायाम् ॥

झिञ्जी । स्त्री । झिल्ल्याम् ॥ यथा । झिञ्जावाऽव्यक्तमधुरा कूजन्ती म धुराकृतिरित्यागम. ॥

झिण्टिका । स्त्री । झिण्ट्याम् ॥ कन् ॥

झिण्टी । स्त्री । सैरीयके ॥ झिमिति रटति । रट० । अच् । पृषोदरादि. । गौरादित्वान्ङीष् ॥ अस्यागुणा' । कटुत्वम् । तिक्तत्वम् । दन्तामय शूलवातकफशोफकासत्वग्दोषना-शित्वञ्चेतिराजनिर्घण्ट. ॥ कुन्दर-कृषे ॥

झिरिका । स्त्री । } झिल्ल्याम् । झीं गुर इ० झींगर इतिचभाषा ॥
झिरी । स्त्री ।
झिरीका । स्त्री ।

झिल्लि । स्त्री । वाद्यविशेषे ॥ यथा । घण्टा शङ्ख स्तथा भेरीमृदङ्गौ झि ल्लिरेवच । पञ्चानां शस्यते वाद्यं देवताराधनेषुचेतिगूढार्थदीपिका॥

झिल्लिका । स्त्री । झिल्लीकायाम् । ची यौम् ॥ उद्वर्त्तनांशुके ॥ आतपत्विष चै ॥ विलेपनसमले ॥ स्वार्थेकन् ॥

झिल्ली । स्त्री । कीटविशेषे । झींगर इति भाषाप्रसिद्धे । झिरिकायाम् । चीर्यौम् ॥ आतपत्विषि ॥ वर्त्याम् ॥ उद्वर्त्तनांशुके ॥ स्थालीलग्नदग्धान्ने ॥ चिल्लति । चिल्लशैथिल्ये । अच् । पृषोदरादित्वा त्वस्यजः । गौरादि त्वान् ङीष् ॥

झिल्लीकण्ठ । पु । गृहकपोते ॥

झिल्लीका । स्त्री । झिल्लिकार्थेषु ॥

झीरुका । स्त्री । झिल्ल्याम् । झींगुर इति भाषा । झीतिरौति । रुशब्दे । बाहुलकात् कक् ॥

झुण्ट' । पु । अप्रकाण्डद्रुमे । स्तम्बे । गुल्मे । झुण्ड इति भाषा ॥

झुमरि । स्त्री । रागिणीविशेषे ॥ यथा । प्राय शृङ्गार बहुला माध्वीकमधुरा मृदु' । एकैव झुमरिर्लोके वर्णादि नियमोज्झिता ॥ अतो लक्षणमेत स्या नोदाहारि विशेषकम् । इदंहि ग्राम्यं सुप्रसिद्धं स्वपरञ्जनम् ॥ इति सङ्गीतदामोदर. ॥

झूषिः । स्त्री । क्रमुकभेदे ॥ दुष्टदैव श्रुतौ ॥

जोङः । पु । गुवाकवृक्षे ॥ इतिभूरिप्र योगः ॥

ञ

ञ. । पु । ञकारे ॥ बलीवर्द्दे ॥ शुक्रे ॥ वाममतौ ॥ गायने ॥ घर्घरध्वनौ ॥ *॥*॥ इत्यादिगौडकुलोत्पन्नाडीचवालप्रधानोपनामतुलारामभिश्रात्मजश्रीधनपतिमिश्रापरनाम्ना तथाश्रीसद्गुरुकुलावधूतश्रीपरमहंसपरिव्राजकाचार्यश्रीमद्धरिहरानन्दनाथभारतिशिष्येण ब्राह्मावधूतश्रीसुखानन्दनाथपरनामधेयेन विरचिते शब्दार्थचिन्तामणौ चवर्ग्गं समाप्तिङ्गत ॥ १ ॥

तत् सत्

ट

ट । पु । टकारे ॥ वामने ॥ पादे ॥ निस्वने ॥ न । करङ्के ॥ टङ्कारे ॥ टगणे ॥

टक्कदेशीय. । पु । शालूकशाके ॥ इति त्रिकाण्डशेष ॥

टक्कनामान. । पुभूम्नि । देशविशेषे । बाह्लीकेषु ॥ वाह्लीकाष्टक्कनामान इति हेमचन्द्र ॥

टगण । पु । त्रयोदशभेदभिन्नेषाबमात्रिके । यथा । (ऽऽऽशिव १)(॥ऽऽ शशि २) (।ऽ।ऽदिनपति ३) (ऽ॥ऽ सुरपति ४) (॥॥ऽशेष ५) (।ऽऽ। अहि ६) (ऽ।ऽ। सरोजम् ७) (॥ऽ। धाता ८) (ऽऽ॥ कलि ९) (॥ऽ॥ चन्द्र १०) (।ऽ॥ ध्रुव ११) (ऽ॥॥ धर्म्म. १२) (॥॥॥ शालिकर १३) इति षण्मात्रे त्रयोदशभेदा ॥

टगर । पु । टङ्कणक्षारे ॥ हेलाविभ्रमगोचरे ॥ त्रि । केकराक्षे ॥

टङ्क । पु । कोपे ॥ असिकोशे ॥ खड्गे ॥ ग्रावदारणे । टाँकी इति भाषा ॥ चतुर्माषकस्वरूपेमाने । चतुर्विंशतिरक्तिकारूपे वा ॥ दर्पे ॥ परशौ ॥ राजाम्रे ॥ पु । न । नीलकपित्थे ॥ खनित्रे ॥ टङ्कने ॥ टङ्कयति । टकि बन्धे । चुरादि । अच् ॥ टम् इति शब्दङ् कायति वा । कै० । आतोऽनुपेतिक सुपीति वा ॥

टङ्कक । पु । रजतमुद्रायाम् । रूप्या इति भाषा इत्यमरटीकासारसुन्दरी ॥

टङ्ककपति । पु । रूप्याध्यक्षे ॥

टङ्ककशाला । स्त्री । रजतमुद्रागृहे । टकशाल इतिभाषा ॥ इत्यमरटीकासारसुन्दरी ॥

टङ्कटीक । पु । शिवे ॥ इतित्रिकाण्डशेष. ॥

टङ्कण । पु । न । रसशोधने । मालतीतीरजे । सोहगा । विशि । सुहागा इति प्रसिद्धे चारे ॥ टङ्कणं वह्निकृद्रूक्षं कफघ्नं वातपित्तकृत् ॥ टङ्कयते ल्युट् । पृषोदरादि ॥

टङ्कनम् । न । टङ्कणे ॥

टङ्का । स्त्री । जङ्घायाम् । टाँग इति भाषा इतिमेदिनी ॥

टङ्कानक । पु । श्लेष्मदारुवृक्षे ॥

टङ्कार । पु । विस्मये ॥ प्रसिद्धौ ॥ शिञ्जिनीध्वनौ ॥ टमितिशब्दं करोति । कृ० । अण् ॥

टङ्कारी । स्त्री । ढेंकारी इति गौड प्रसिद्धे क्षुपविशेषे ॥ टङ्कारी वातजित् तिक्ता श्लेष्मघ्नी दीपनी लघु । शोथोदरव्यथाहन्त्री हिता पीठविसर्पिणाम ॥

टङ्ग । पुं । न । खनित्रे ॥ खड्गविशेषे । असौ ॥ जङ्घायाम् । टागइतिभाषा ॥

टङ्गण । पु । न । } टङ्कणे ॥ इति
टङ्गन । पु । न । } राजवल्लभ ॥

टङ्गिनी । स्त्री । पाठायाम् । अम्बष्ठायाम् । आकनादी इति गौडभाषा ॥

टट्टनी । स्त्री । ज्येष्ठ्याम् । छिपकली इतिविस्तुया इतिचभाषा ॥

टट्टरी । स्त्री । अनृताख्याने । मृषावादे । टरटर इति भाषा ॥ लम्पावाद्ये ॥ पटहवाद्ये ॥

टट्टर । पुं । भेरीरावे ॥

टणनम् । न । शिञ्जने ॥

टवर्ग । पु । टादिपञ्चवर्णेषु ॥

टवर्गीय । पुं । टवर्गभवेवर्णे । वर्गान्ताच्छ. ॥

टा । स्त्री । पृथिव्याम् ॥

टाङ्कम् । न । मद्यप्रभेदे ॥

टाङ्कर । पु । नागवीटे ॥

टार । पु । रङ्गे ॥ तुरङ्गे ॥ खञ्जे ॥

टिटिभ । पु । } टिट्टिभे ॥
टिटिभक । पु । }

टिट्टिभ । पु । टटीहरी इति भाषा प्रसिद्धे कोयष्टिखगे । टीटि इति गौड भाषा ॥ टिट्टि शब्दं भाषते । टिट्टि शब्देन भाति वा । अन्येष्वपीतिड ॥ दानवविशेषे ॥

टिट्टिभक । पु । कोयष्टिके । टिट्टिभे ॥ स्वार्थे कन् ॥

टिट्टिभिका । स्त्री । अम्बुशिरीषिकायाम ॥

टिण्डिश. । पु । डिंडसी इतिटिण्डाइतिचभाषाप्रसिद्धे फलशाकविशेषे । मुनिनिर्मिते । रोमशफले । डिण्डिशे ॥

टिप्पनी । स्त्री । टीकायाम् ॥

टीका । स्त्री । विषमपदव्याख्यायाम् ॥ वृत्तौ ॥ व्याख्याभाषे ॥ टीक्यते गम्यतेऽर्थोऽनया । टीकृगतौ । गुरोश्च हलइत्य । टाप् ॥

टुण्टुक । पु । श्योनाकवृक्षे ॥ कृष्णखदिरवृक्षे ॥ टुण्टुनि इति गौडप्रसिद्धे पक्षिविशेषे ॥ श्योनाकप्रभेदे ॥ त्रि । अल्पे ॥ टुण्टु इति कायति । कै० । आत इतिक ॥

टुनाका । स्त्री । तालमूल्याम् ॥

टेर । त्रि । वक्रचक्षुषि । टेरके ॥

टेरक । त्रि । वलिरे । केकरे । वक्रचक्षुषि । भैंगा इति भेडाइतिचभाषा ॥

ठ

ठ । पु । ठकारे ॥ मण्डले ॥ चन्द्रबिम्बे ॥ शून्ये ॥ लोकगोचरे ॥ महेश्वरे ॥ दृढध्वनौ ॥ ठगणे ॥ पु । न । अनुकरणशब्दे ॥

ठक्कुर । पु । विष्णुप्रतिमायाम् । ठाकुर इतिभाषा ॥ द्विजोपाधिविशेषे ॥ यथा । त्वसिंहठक्कुर ॥ वद्रपालठक्कुर इति ॥

ठगण । पु । अष्टभेदभिन्ने पञ्चमात्रि-

के ॥ यथा (।ऽऽ इन्द्रासनम् १) (ऽ।ऽ सूर २) (॥ऽ चाप ३) (ऽऽ । हीर ४) (॥ऽ । शेखरम् ५) (ऽ॥ कुसुमम् ६) [ऽ॥ अहिगण ७] ॥॥। पापगण ८] इति ॥

ठठम् । अ । } ठठठम् । अ । } अनुकरणशब्दे । ठन् ठन् इति ठनन् ठनन् इति चभाषा ॥ यथा । रामाभिषेके मदविह्वलाया' कक्षाच्युतो हेमघट स्तरुण्या । सोपान मासाद्य चकारशब्द ठठं ठठ ठ ठठ्ठ ठठ ठ ॥ इतिमहानाटकम् ॥

ड

ड । पु । डकारे ॥ वाडवाग्नौ ॥ शिवे ॥ शब्दे ॥ त्रासे ॥ डगणे ॥

डगण । पु । पञ्चभेदभिन्ने चतुर्मात्रिके ॥ यथा [ऽऽ गज १] [॥ऽरथ २] [।ऽ। तुरङ्गम ३] [ऽ॥ पदाति ४] (॥॥ मत्त ५] इति ॥

डङ्कर । पु । डिङ्करे ॥

डङ्गरी । स्त्री । गजदन्तफलायाम् । दीर्घेर्वारौ । ककडीइति तरा इतिच भाषा ॥

डङ्गारी । स्त्री । डङ्गरीफले ॥

डण्ड । पु । डडारीतिख्याते मत्स्ये ॥ डण्डमत्स्यो रसे तिक्तः पित्त रक्त कफ हरेत् । वातसाधारणः प्रोक्तः शुक्रो बलवर्द्धनः ॥

डम । पु । चाण्डाल्या लेटाज्जाते डोम इति प्रसिद्धे ऽन्त्यजे ॥

डमर । पु । अशब्दकलहे ॥ विप्लवे । धाकडलुटनादौ । डाका इतिधाडा इतिचभाषा ॥ परचक्रादिभये ॥ न । भीत्यापलायने । शृगालिकायाम् ॥ डम इतिशब्दस्य रानम् । रा० । बाहुलकात् घञर्थेक ॥

डमरु । पु । वाद्यप्रभेदे । कापालिकयोगिवाद्य ॥ चमत्कारे ॥ डमिति शब्द मियर्त्ति । मृगय्वादित्वादर्त्तेः कु । गणपाठादेवगुण ॥

डयनम् । न । पुरुषस्कन्धवाह्ये यानविशेषे । कर्णीरथे । चौडोल इतिख्याते ॥ डीयतेऽनेन । डीङ् विहायसागतौ । ल्युट् ॥ नभोगतौ ॥

डल्लकम् । न । वंशादिरचितेपात्रविशेषे । डगरा डाला छबडा छाबी इतिभाषा ॥ त्रिंशतञ्च षष्ट्यधिकं डल्लकं वल्लसंयुतम् । सभोज्यं सोपवीतञ्च सोपहारं मनोहर मिति ब्रह्मवैवर्त्तप्रकृतिखण्डम् ॥

डवित्थ । पु । काष्ठमये मृगे ॥ डित्थ. काष्ठमयो हस्ती डवित्थस्तन्मयो मृग इति सुपद्मव्याकरणोक्ते ॥

डहु । पु । लकुचे । लिकुचे । वडहल इति प्रसिद्धे वृक्षे ॥ दहति तोहति वा । दहभस्मीकरणे । तुहिर् अर्द्दने वा । मृगय्वादिषु निपातित ॥

डा । स्त्री । डाकिन्याम ॥

डाकिनी । स्त्री । कालीगणविशेषे ॥ डाकानासमूहे ॥ खलादित्वादिनि ॥

डाङ्गरी । स्त्री । डङ्गरीफले ॥

डामर । पु । चमत्कारे ॥ शिवोक्त षड्विधे शास्त्रविशेषे ॥ तेषांनामानि श्लोकसङ्ख्याश्चोक्तावाराहीतन्त्रे । यथा । डामर षड्विधोज्ञेय प्रथमो योगडामर । श्लोकास्तत्र त्रयस्त्रिंशत् तथापञ्चशतानिच । त्रिविंशतिसहस्राणि श्लोकानिवेहसङ्ख्यया ॥ १ ॥ एकादशसहस्राणि सङ्ख्याता' शिवडामरे । श्लोका सप्तैवनिश्चित्य ईश्वरेणैवभाषिता ॥ २ ॥ तावच्छ्लोकसहस्राणि पञ्चश्लोकशतानि च । गुणोत्तराणि दुर्गायाडामरे कथितानिच ॥ ३ ॥ नवश्लोकसहस्राणि नवश्लोकशतानिच । सारस्वते तथा श्लोकाः पञ्चैवपरिकीर्त्तिताः ॥ ४ ॥ स्वरसङ्ख्यासहस्राणि श्लोका

ना ब्रह्मडामरे। पञ्चोत्तरशतान्यथ सङ्ख्यातानिशिवेनतु ॥ ५ ॥ षष्टि श्लोकसहस्राणि गान्धर्वडामरोत्त मे। श्लोकाश्चषष्टिसङ्ख्याता ब्रह्म णाव्यक्तयोनिनेरित ॥ तथाहि। यो गडामर २३५३३। शिवडामर- ११००७। दुर्गाडामर ११५०३।सा रस्वतडामर ९९०५। ब्रह्मडामर ७१०५। गन्धर्वडामर. ६००६० ॥ इति ॥भूतडामराद्यो ऽन्येपिसन्ति ।भूतानांडामरश्चमत्कारो ऽत्रेतिनि बन्धकार ॥ डमरे ॥

डाहल। पु। चैद्य। चैपुरेदेशे ॥

डाहुक। पु। दात्यूहखगे ॥

डिङ्करी। स्त्री। दिङ्कर्याम् ॥

डिङ्गर.। पु। डङ्गरे ॥ क्षेपे ॥ खले ॥ धूर्त्ते ॥ सेवके ॥

डिण्डिभाण्डम्। न। वादित्रविशेषे ॥ पटहमृदङ्गकरटा. समेतायत्र वाद्य न्तेतानि डिण्डिभाण्डानीतिव्याख्या नात् ॥

डिण्डिम। पु। डौंडी इतिख्याते वा द्यभेदे ॥ यथा। श्लोकार्द्धेनच यत् प्रोक्त तदुक्त ग्रन्थकोटिभि ॥ ब्रह्म सत्य जगन्मिथ्येत्येषवेदान्तडिण्डि म ॥ गजघण्टानादे॥ यथा। मतिरेव बला द्गरीयसी तदभावेकरिणामि य दृशा। इतिघोषयतीव डिण्डिम. करिणो हस्तिपकाहत क्वणन् ॥ पा नीयामलके ॥ डिण्डि इतिशब्द- मिनोतिप्रकाशयति। डुमिञ्०। ड ॥

डिण्डिर.। पु। समुद्रफेने ॥

डिण्डिश। पु। डिंडसी ढेंडस टिण्डा इत्यादि भाषाप्रसिद्धे मुनिनिर्मि- ते। रोमशफले ॥ डिण्डिशो रुचि कृच्छेदी पित्तश्लेष्मापह. स्मृत। सु शीतो वातलो रूक्षो मूत्रलश्चाश्म रीहर ॥ * ॥ निश्शेषबीज स्वतिवृ त्तखण्ड सहिङ्गुक प्रोज्झितचण्डश ल्कम्। स्नेहेप्रतप्त चणदर्विदग्ध रु चिप्रद डिण्डिशक सपिण्डम् ॥

डिण्डीर। पु। अब्धिकफे। समुद्रफे- ने ॥ डिण्डि इतिशब्दम् ईरयति। ई रगतौ कम्पनेच। अच्। क्वचा ॥

डिण्डीरमोदकम्। न। गृञ्जने ॥

डित्थ.। पु। काष्ठमये गजे ॥ डित्थ काष्ठमयो हस्ती डवित्थस्तन्मयो मृ गइतिसुपद्मव्याकरणोक्तो ॥ विशेष लक्षणयुक्तेपुरुषे ॥ यथा। श्यामरू पोयुवाविद्वान् सुन्दर प्रियदर्शन । सर्वशास्त्रार्थवेत्ताच डित्थइत्यभिधी- यतइति कलापटीका ॥

डिम.। पु। नाटकस्य रूपकविशेषे ॥

डिम्ब। पु। भयध्वनौ ॥ अण्डे ॥ पु-

प्लुते ॥ प्रीशनि ॥ विप्लवे । डमरे । अशस्त्रकलहे ॥ एरण्डे ॥ भये ॥

डिम्बनम् । डिविनोदे । घञ् ॥

डिम्बाहव । पुं । भूभृताशून्ये युद्धे ॥

डिम्बिका । स्त्री । जलविम्बे ॥ शोणक वृक्षे ॥ कामुकस्त्रियाम् ॥

डिम्भ. । त्रि । बालिशे । वैधेये ॥ बाले । शिशौ ॥ डिम्भयति । डिभिसङ्घाते । चुरादि । पचाद्यच् ॥ डिंभ्यते वा घञ् ॥ अस्त्रमूपान्तरं डिम्बो पीतिद्विरूपकोश ॥

डिम्भक. । पु । डिम्भे ॥ स्वार्थेक. ॥

डिम्भचक्रम् । न । स्वरोदयोक्ते नराणां शुभाशुभनिर्णायके चक्र वि० ॥ यथा । डिम्भचक्रे न्यसेद्भानि भानुभादित्रिमस्तके । मुखेत्रीणि दयस्कन्धे चैकैक बाहुहस्तयो ॥ हृदिपञ्च नाभिगुह्ये चैकैकषट्चजानुनो । चरणाभ्यां तथैकैक जन्मर्क्षपतनात् फलम् ॥ शीर्षस्थेछत्रलाभ स्यात् वक्त्रेमिष्टान्नभोजनम् । स्कन्धेधनीच बाहुभ्यां स्थानभ्रष्टो भ .वत् ॥ पाणिभ्यांतस्करो लक्ष्मीर्हृदयायुश्च नाभित । गुह्येकामोभ्रमोजान्वो रल्पजीवी चपादयोरितिस्वरोदय ॥

डिम्भा । स्त्री । स्तनपायाम् ॥ टाप् ॥

डीनम् । न । पक्षिगतिप्रभेदेपतनमाषे ॥ कर्णपर्वणिविशेषोऽस्याद्रष्टव्य ॥ आगमशास्त्रविशेषे यथा । डामर डमर डीन श्रुत कालीविलासकम् । सप्तकोटि महाग्रन्था ममवक्त्राद्विनिर्गता ॥ इति मुण्डमालातन्त्रम् ॥

डयनम् । डीङ् विहायसागतौ । नपुसके भावेक्त. । स्वादयश्चोदित । श्चोदितश्चेति निष्ठातस्य न ॥

डीनडीनकम् । न । खगानागतिक्रिया विशेषे ॥ तेषांपतन निर्विशेषणाड् कुत्सितञ्च डीनडीनकपदवाच्यम् ॥

डीनावडीनम् । न । पक्षिणांगतिविशेषे ॥ तत्तु एकस्यागतौ गत्यन्तर- मिश्रणम् ॥ अध'कुत्सितगमनञ्च ॥

डीयमान । त्रि । आकाश प्रत्युत्- च्छति ॥

डुण्डु । पु । डुण्डुभसर्पे ॥

डुण्डुभ. । पु । राजिलेसर्पे ॥ डुण्डुइत्यनुकरणशब्द । तम् भणति तेन भातीति वा । अन्येभ्योपीतिड ॥ यद्वा । लड्यते । श्चोलडिउत्क्षेपे । घञ् । डलयोरेकत्वम् । डभति । डभपूरणे । इगुपधेतिक । डाडश्चासावुभश्च । पृषोदरादि ॥ द्विमुखो डुण्डुभ स्मृत' ॥

डुण्डुल. । पु । क्षुद्रोलूके । पिङ्गले । दक्षाविशि ॥

डुलिः । स्त्री । कमठ्याम् ॥ डोलयति । डुलउत्क्षेपे । इगुपधादितिकिः ॥
डुलिका । स्त्री । खञ्जनाकृतिपक्षिविशेषे ॥
डुली । स्त्री । चिल्लीशाके ॥
डोडिका । स्त्री । सुमुष्क्याम् । करेला इति प्रसिद्धे फलशाकविशेषे ॥ डोडिकापुष्टिदा वृष्या रुच्या वह्निप्रदा लघु । हन्ति पित्तकफार्शांसि क्रिमिगुल्मविषामयान् ॥ * ॥ बालडोडीफलं मविकलं स्विन्नमीषच्च तोये स्नेहे हिङ्गुप्रथयिनिततो वेसवारेण सिद्धम् । गव्यं तक्रं कथितनिहिते साधितं रामठेन खादन् खादन निभृत मसृत निन्दितभोक्तृभिः कैः ॥ * ॥ सम्मृज्य शुष्कतरणे प्रतापात् प्रतप्त माज्ये नवडोडिशाकम् । ससैन्धवं रामठ दत्तवास खादन्करो निन्दति व्यञ्जनानि ॥ डोडिका वातला रूक्षा शीता गुर्वी विषापहा । सुस्विन्ना रोचनी ह्युद्धा अस्विन्ना कण्ठकर्त्तरी ॥
डोडी । स्त्री । डोडिकायाम् ॥ क्षुपविशेषे । जीवन्त्याम् । सुखालुकायाम् ॥
डोम' । पु । स्वनामख्याते ऽस्पृश्यजातौ ॥ यथा । चण्डालश्चैव डोमश्च स्नानकश्च तथा इति । दण्डीरश्चैव भण्डीरो भूषण्डश्च इत्याश्रमी ॥ इयामुण्डी लिङ्गधारी समाएते यशस्विनि । स्पृष्ट्वा प्रमादतः स्नात्वा गायत्र्यष्टशतं जपेदिति मत्स्यसूक्ततन्त्रे ३९ पटलः ॥

डोरम् । न । } हस्तादिबन्धनसूत्रे ॥
डोरकम् । न । }

डोरडी । स्त्री । वृहत्याम् ॥ इति राजनिर्घण्टः ॥

ढ

ढ । पु । ढकारे ॥ ढक्कायाम् ॥ शुनि ॥ श्वलाङ्गूले ॥ निर्गुणे ॥ ध्वनौ ॥ ढगणे ॥
ढक्का । स्त्री । यश पटहे ॥ ढगितिकायति । कैशब्दे । आतइतिकः ॥
ढक्कारी । स्त्री । तारिणीदेव्याम् ॥
ढगण । पु । भेदत्रयविशिष्टे त्रिमात्रिके ॥ यथा । (।ऽ ध्वज १) (ऽ। ताल. २) (।।। ताण्डवम् ३) इति ॥
ढालम् । न फलके ॥
ढाली । त्रि । चर्मिणि ॥
ढामरा । स्त्री । हंस्याम् ॥
ढुण्ढि' । पु । श्रीगणेशविशेषे ॥ यथा । अन्वेषणे ढुण्ढिरयं प्रथितो ऽस्ति धातुः

सर्वार्थढुण्ढिततया भवढुण्ढिनामा
। काशीप्रवेशमपि कोऽलभतेऽत्रदे
ही तोषं विना तव विनायक ढुण्ढि
राज ॥ इति काशीखण्डगणेशप्रति
शिववाक्यम् ॥

ढोल । पु । स्वनामख्यातवाद्यविशेषे ॥

ढ

ढ । पु । ढकारे ॥ बुद्धदेवताविशेषे ।
विन्दुदेवे ॥ भूषणे ॥ गुणवर्जिते ॥
पानीयनिलये ॥ निर्घोषे ॥ ध्वाने ॥

ढ्यः । पु । ब्रह्मलोकस्थे समुद्रोपमे स
रोविशेषे ॥

* ॥ * ॥ इत्यादिगौडकुलोत्पन्नाढी
चवाख्यप्रधानोपनामतुलारामभिश्रा
त्मजश्रीधनपतिमिश्रापरनाम्ना स
याश्रीसद्गुरुकृपावधूतश्रीपरमहंस
परिव्राजकाचार्यश्रीमद्धरिहरानन्द
नाथभारतिशिष्येण शाक्तावधूतश्री
सुखानन्दनाथपरनामधेयेन विरचि
ते शब्दार्थचिन्तामणौ टवर्गः समा-
सः ॥ १ ॥ * ॥ * ॥ * ॥ * ॥ * ॥

तत् सत्

त

त । पु । तकारे ॥ चौरे ॥ अन्ते ॥
पुच्छे ॥ क्रोडे ॥ म्लेच्छे ॥ रत्ने ॥ सुग
ते ॥ योधे ॥ गौरविवर्जितपुच्छे ॥
क्रोष्टुपुच्छे ॥ स्त्री । न । तरणे ॥ पु
ण्ये ॥ तटति । तटउच्छ्राये । उ. ॥

तक्किल । त्रि । धूर्ते ॥

तक्किला । स्त्री । औषधे ॥

तक्रम् । न । चतुर्थांशजलसंयुक्ते दधि
नि । गोरसजे । इष्टावृते । काल
सेये ॥ तत्पञ्चविधम् । यथा । ससरं
निर्जलं घोलं मथितन्त्वसरोदकम्
। तक्रं पादजलं प्रोक्तं मुदश्विच्चार्द्ध-
वारिकम् ॥ छच्छिकासरहीनाऽच्छा-
दच्छा प्रचुरवारिका ॥ * ॥ तुर्यांशेन
जलेन संयुतमतिस्थूलं सदम्लं दधिप्रा
यो माहिषमंशुकेन विमले न्यग्गाल
ने गालयेत् । भृष्टहिङ्गुवजीरकञ्च
लवणं राजीञ्च किञ्चिन्मितां पिष्ट्वात
त्र विमिश्रयेद्भवति तत् तक्रं नकस्य-
प्रियम् ॥ अस्य गुणा यथा । तक्रं रुचिक
रं वह्निदीपनं पाचनं परम् । उदरे ये
गदास्तेषां नाशनं तृप्तिकारकम् ॥
अपि च । तक्रं ग्राहि कषायाम्लं स्वादु

पाकरसं लघु । वीर्य्योष्णं दीपनं दृ-
ष्यं प्रीणनं वातनाशनम् ॥ ग्रहण्या-
दिमतां पथ्य भवेत् संग्राहिलाघवा-
त् ॥ * ॥ किञ्च स्वादुविपाकित्वान्न
च पित्तप्रकोपणम् । कषायोष्णविका-
शित्वाद्रौक्ष्याच्चापि कफापहम् ॥ न
तक्रसेवी व्यथते कदाचिन्न तक्रदग्धाः
प्रभवन्ति रोगा. । यथा सुराणाममृ-
तं सुखाय तथा नराणां भुवि तक्रमा-
हुः ॥ समुद्धृतघृतं तक्रं पथ्यं लघु विशे-
षत । स्तोकोद्धृतघृतं तस्माद्गुरु वृ-
ष्यं कफापहम् ॥ अनुद्धृतघृतं सा-
न्द्रं गुरुपुष्टिकफप्रदम् ॥ * ॥ वाते
ऽम्लं शस्यते तक्रं शुण्ठीसैन्धवसंयुतम्
। पित्ते स्वादुसितायुक्तं सव्योषं स-
क्षारं कफे ॥ * ॥ हिङ्गुजीरयुतं घोलं सै-
न्धवेन सुसंयुतम् । भवेदतीव वातघ्न-
मर्शोऽतीसारहृत् परम् ॥ रुच्यं पुष्टि-
दं बल्यं वस्तिशूलविनाशनम् । मूत्र-
कृच्छ्रे तु सगुडं पाण्डुरोगे सचित्र-
कम् ॥ शीतकालेऽग्निमान्द्ये च तथा
वातामयेषु च । अरुचौ स्रोतसां रो-
धे तक्रं स्यादमृतोपमम् ॥ तत्तु ह-
न्ति गरच्छर्द्दिप्रसेकविषमज्वरान् ।
पाण्डुमेदोग्रहण्यर्शोमूत्रग्रहभगन्द-
रान् ॥ मेहं गुल्ममतीसारं शूल-
प्लीहोदरारुचीः । श्वित्रकोष्ठगतव्या-
धीन् कुष्ठशोथतृषाकृमीन् ॥ नैव त-
क्रं क्षते दद्यान्नोष्णकाले न दुर्बले
। न मूर्च्छाभ्रमदाहेषु न रोगे रक्त-
पैत्तिके ॥ * ॥ यान्युक्तानि दधीन्य-
ष्टौ तद्गुणं तक्रमादिशेत् ॥ अथाम्ल-
तक्रगुणाः । तक्रमामं कफं कोष्ठे ह-
न्ति कण्ठे करोति च । पीनसश्वासका-
सादौ पक्वमेव प्रयुज्यते ॥ तच्यति
तच्यते वा । तञ्चु गतौ । स्फायितञ्ची-
ति रक् । वञ्चकादिः ॥

तक्रकूर्चिका । स्त्री । छाना इति गौड
भाषाप्रसिद्धे दुग्धविकृतौ ॥ उष्ण-
दुग्धे तक्रयोगात् जाता स्यात् तक्र-
कूर्चिका ॥ तक्रेण सह पक्वे क्षीरे ॥
तक्रेणपक्वं यत्क्षीरं सा भवेत् तक्र
कूर्चिकेति ॥

तक्रपिण्ड. । पु । क्षीरविकृतौ ॥ दग्धा
तक्रेणवा नष्टं दुग्धं बद्धं सुवाससा ।
द्रवभागेन हीनं यत् तक्रपिण्डः स
उच्यते ॥

तक्रमांसम् । न । मांसप्रकारविशेषे ॥
यथा । पाकपात्रे घृतं दत्त्वा हरिद्रां-
हिङ्गु भर्जयेत् । छागादे. सवक्षा-
ऽपिखण्डान्यष्टौ च भर्जयेत् ॥ सिद्धि-
योग्यं जलं दत्त्वा पचेन्मृदुतरं व-
ना । राजिकादिद्रुते तक्रे मांसखण्डा-
न्निधारयेत् ॥ तक्रमांसन्तु वातघ्नं ब

सुरूक्षं चक्षुष्यम् । कफघ्नं पित्तलं किञ्चित् सर्वोन्मादस्य पाचनम् ॥

तक्रवामनः । पु । नारङ्गे ॥

तक्राटः । पु । मन्थानदण्डे ॥ तक्रे अटति । अट० । अच् ॥

तक्षः । पुं । भरतात्मजे । तक्षशिलाधीशे ॥ न । चित्रानक्षत्रे ॥

तक्षकः । पु । पातालस्थाष्टनागान्तर्गत नागराजविशेषे । कश्यपात्कद्रुगर्भे जाते इन्द्रसखे ॥ वर्द्धकौ । तक्षति ॥ सूत्रविशेषे ॥ विश्वकर्मणि ॥ तक्षति । तक्षूतनूकरणे । ण्वुल् ॥

तक्षणम् । न । तनूकरणे । तक्षू० । ल्युट् ॥

तक्षणी । स्त्री । वाश्याम् । वाइस् इति भाषा ॥ गौरादि ॥

तक्षा । पु । त्वष्टरि । वर्द्धकौ ॥ काष्ठं तक्ष्णोति तक्षति वा । तक्षू० । कनिन् युवृषि तक्षीति कनिन् ॥

तक्षशिला । स्त्री । देशविशेषे ॥ नगरीविशेषे । सिन्धुदेशे भरतात्मजस्य तक्षस्य राजधान्याम् ॥

तगणः । पुं । अन्त(ऽऽ।)लघौ ॥ तसंज्ञकेगणे ॥

तगरः । पुं । चान्दनी इति देशभाषा प्रसिद्धे पुष्पवृक्षविशेषे । सितपुष्पे । कटुच्छदे । कालपर्व्वी । टगर इति-गौडभाषा ॥ मदनवृक्षे ॥ न । नन्द्यावर्त्तवृक्षे । पिण्डतगर इतिकोङ्कणभाषा । तगरमूल इतिगौडभाषा ॥ तन्मूले तत्पुष्पे च ॥ तगरद्वयमुष्णंस्यात् स्वादु स्निग्धंलघुस्मृतम् । विषापस्मारमूर्द्धाक्षिरोगदोषत्रयापहम् ॥ काहुल्यवृक्षे ॥

तगरपादिकम् । न । तगरे । नन्द्यावर्त्ते ॥

तगरपादी । स्त्री । मंग । तगरे ॥

तङ्क । पु । दुःखेन जीवने ॥

तङ्कनम् । न । दुःखेनजीवने ॥ तकि० । ल्युट् ॥

तङ्ग । पु । जनपदविशेषे ॥

तङ्कण । पु । नीवृद्विशेषे ॥

तच्छील । त्रि । तत्स्वभावे ॥ यः स्वभावतः फलनिरपेक्षस्तत्प्रवर्त्तते स तच्छीलः ॥

तज्ज । त्रि । सांदृष्टिकार्थे ॥ तज्जाते ॥

तज्ज्ञ । त्रि । तद्भिज्ञे ॥ तत् जानाति । इगुपधेतिकः ॥

तञ्ची । स्त्री । हिङ्गुपत्र्याम् ॥

तट । त्रि । शरीरे । कूले । रोधसि तटति । तट उच्छ्राये । अच् ॥ न । क्षेत्रे ॥

तटस्थः । त्रि । तीरस्थे ॥ तटे तिष्ठति । स्था० । क ॥ न । तद्भिन्नत्वेसति त

तडाग | तण्डुलः

सोधकत्त्वमितिलक्षणलक्षिते स्वरू पेतरलक्षणे ॥ स्वरूपाऽनन्वयित्वे सति विशेषणान्तरं सद्व्येतरव्यावर्त्त कत्वरूपे लक्षणे ॥

तटाक. । पु । तडागे । पद्माकरे ॥ त टमकति । अककुटिलायांगतौ । क र्मण्यण् ॥

तडाग । पु । तडागे ॥ तटमगति । अ गकुटिलायांगतौ । कर्मण्यण् ॥

तटिनी । स्त्री । नद्याम् ॥ तटमस्त्यस्या । अतइनिठनाविती नि । पुष्करादि भ्योदेशेइति इनिर्वा । ऋन्नेभ्यइति ङीप् ॥

तटी । स्त्री । तीरे । कूले ॥ तटति । तट०। अच् । जातित्वाम् ङीष् ॥

तडाक । पु । तडागे ॥ तड्यते । तड आघाते । पिनाकादयश्चेतिसाधु ॥

तडाग । पु । जलाधारविशेषे । पद्मा करे ॥ प्रशस्तभूमिभागस्थो बहुस वत्सरोषित । जलाशय स्तडाग. स्यादित्याहु शास्त्रकोविदा. ॥ * ॥ पञ्चशतधनु परिमिते जलाशये ॥ यथा । चतुर्विंशाङ्गुलोहस्तो धनु स्त च्चतुरुत्तर । शतधन्वन्तरश्चैव तावत् पुष्करिणीशुभा । एतत् पञ्चगुण प्रो क्तस्तडागइतिनिर्णय: ॥ इतिमत्स्य वर्द्धमानधृतोवशिष्ठ' ॥ यन्त्रकूटके ॥

तड्यते । तड० आघाते । तडागाद यश्चेति निपातित ॥

तडाघात' । पु । आर्द्रीभूतस्यहस्तिशु ण्डाघाते ॥ यथा । उद्धे करिकराघा पे तडाघात विदुर्बुधा इति ॥

तडित् । स्त्री । विद्युति ॥ ताडयत्यभ्र म् । तड० । ताडेर्णिलुक्चेतीति प्र त्यय ॥ कन्तिके ॥

तडित्वान् । पु । वारिदे । मेघे ॥ तडि त'सन्त्यस्मिन् । मतुप् ॥ मुस्तके ॥

तण्डक । पु । न । खञ्जने ॥ फेने ॥ सम.समायशाचि । समस्तपदजात के ॥ गृहदारुणि ॥ तरुस्कन्धे ॥ चि । मायाबहुले ॥ तण्डते । तडिआडने । ण्वुल् ॥ उपघातके ॥

तण्डु' । पु । शिवद्वारपालविशेषे ॥

तण्डुरीण । पु । कीटमात्रे ॥ न । त ण्डुलोदके ॥ चि । बर्बरे ॥ इतिहे मचन्द्र ॥

तण्डुल । पु । धान्यादिनिकरे । धान्या दिसारे । वाइरइतिचाँवलइतिचभा षा ॥ तण्डुलोमेहजन्तुघ्न सनवस्थ तिदुर्ज्जर: ॥ ताड्यते । तडआघाते । सानसिवर्णसिपर्णसितण्डुलाङ्कुशे- त्यादिना निपातनादुलच् प्रत्ययो नुमागमश्च ॥ यद्वा । त्रियन्तेसुष्कत्वे तन्यन्ते तायते वा इति तण्डुला: ।

वृन्तुटितनिताडिभ्यउलच् तण्ड स्यादेश ॥ विडङ्गे ॥ अल्पमारिषे ॥

तण्डुलपरीक्षा । स्त्री । नवविधदिव्यान्तर्गतदिव्यविशेषे ॥

तण्डुला । स्त्री । महासमङ्गायाम् ॥ विडङ्गे ॥

तण्डुलाम्बु । न । ज्येष्ठाम्बुनि । तण्डुलोदके ॥

तण्डुलिकाश्रम । पु । तीर्थविशेषे ॥

तण्डुली । स्त्री । यवतिक्ताख्यलतायाम् ॥ यवाण्ड्वाम् ॥ तण्डुलीयशाके ॥

तण्डुलीक । पु । अल्पमारिषे ॥

तण्डुलीयः । पु । मेघनादे । अल्पमारिषे । बहुवीर्ये । शुशाके । चौंलाइ इतिभाषा ॥ तण्डुलीयो लघुः शीतो रूक्ष. पित्तकफास्रजित् । सृष्टमूत्रमलो रुच्यो दीपनो विषहारक. ॥ तण्डुलायहित । विभाषाहविरपूपादिभ्य इति छः ॥ विडङ्गतरौ ॥ ताप्ये ॥

तण्डुलीयकः । पु । तण्डुलीयशाके ॥ विडङ्गे ॥ स्वार्थेकन् ॥

तण्डुलीविका । स्त्री ।
तण्डुलुः । पु । } विडङ्गे ॥

तण्डुलेय' । पु ।
तण्डुलेर । पु । } तण्डुलीयशाके ॥

तण्डुलोत्यम् । न । तण्डुलाम्बुनि ॥

तण्डुलोदकम् । न । तण्डुलाम्बुनि ॥ यथा । जलमष्टगुणं दत्त्वा पलं कण्डिततण्डुलात् । भावयित्वा ततो देयं तण्डुलोदककर्मणीति वैद्यकपरिभाषा ॥

तण्डुलौघ. । पु । वेष्टवंशे ॥ तण्डुलसमूहे ॥

तण्डुल्य. । पु । तण्डुलीयशाके ॥ तण्डुलायहितः । विभाषाहविरपूपादिभ्य इतिपक्षेयत् ॥

तण्डुलीय. । पु । कीटमाचे ॥ न । तण्डुलोदके ॥ त्रि । बर्वरे ॥ इतिमेदिनिकर ॥

तत् । अ । हेतौ ॥ तनोति । तनुविस्तारे । क्विप् । गमादीनामितिवक्तव्य नुनासिकलोपे तुक् ॥

ततम् । न । वीणादिवाद्ये ॥ पु । वायौ ॥ त्रि । व्याप्ते ॥ विस्तृते । पृथौ ॥ तन्यते । तनु० । तनिमृङ्भ्यांकिच्चेति तनोतेस्तन् ॥ तन्यतेस्म वा । तनु० । क्त । अनुदात्तोपदेशेति नलोपः ॥

ततपत्री । स्त्री । कदलीवृक्षे ॥

ततम' । त्रि । बहुषुमध्येएकस्मिन् ॥

ततरः । त्रि । द्वयोर्मध्ये एकस्मिन् ॥

ततवत् । त्रि । विस्तारयुक्ते ॥

ततः । अ । आदौ ॥ पदिप्रश्ने ॥ आन

न्तर्यें ॥ कथान्तरे ॥ हेतौ ॥ पञ्चम्यर्थे ॥ तस्मात् । पञ्चम्यास्तसिल् । त्यदाद्यत्वम् ॥

ततस्त्य. । त्रि । ततोभवे ॥ ततसम्बन्धिनि ॥ अव्ययात् त्यप् ॥

तति । स्त्री । श्रेण्याम् ॥

तत्काल । पु । तदात्वे । वर्त्तमानकाले ॥ सधावौ कालश्च ॥

तत्कालधी: । त्रि । प्रत्युत्पन्नमतौ । उपस्थितबुद्धौ ॥ तत्कालेधीर्यस्य ॥

तत्क्रिय । त्रि । कर्मकारे । वेतन विनाकर्मकारके ॥

तत्पद्य । पु । सधार्थे ॥ सधावौ च याष्च । सत्यवक्ती वा ॥

तत्त्वम् । न । याथार्थ्ये । स्वरूपे । अनारोपितस्वरूपे ॥ परमात्मनि । ब्रह्मणि ॥ ब्रह्मभावे ॥ तदितिसर्वनाम सर्वञ्च ब्रह्म तस्यनाम तदिति । तद्भाव स्तत्त्व ब्रह्मणो याथात्म्य तत्त्वमिति पूज्यपादानां व्याख्यानम् ॥ आदिमध्यावसानेषु दु:ख सर्वमिद यतः । तस्मात सर्वं परित्यज्य तत्त्वनिष्ठो भवानघेत्युपदेश' ॥ अथाहुर्गौडपादाचार्याः । तत्त्वमाध्यात्मिक दृष्ट्वा तत्त्व दृष्ट्वा तु वाह्यत. । तत्त्वीभूत स्तदारामस्तत्त्वाद् प्रच्युतोभवेदिति ॥ तत्त्व चागमसत्सिद्ध मित्याहुर्वेदवादिन ॥ विसम्बितमनुक्ते ॥ तनर्न्तत् । तनु॰ । क्विप् । अन्येषामपीतिव: । त्वस्त्यरक्त्युपलक्षणंगीतवाद्ययो ॥ वाद्यप्रभेदे ॥ चेतसि ॥ वस्तुनि ॥ अवयवाने ॥ पारमार्थिके । धर्मिस्वरूपे ॥ मूलप्रकृत्यादिचतुर्विंशतिषु ॥ मूलप्रकृतिरविकृति र्महदाद्या:प्रकृतिविकृतय: सप्त । षोडशकस्तु विकारो न प्रकृति र्न विकृति पुरुष: ॥ तत्त्वभाव' । त्व. ॥*॥ वेदाक्ता बहुतर्ककर्कशमतिग्रस्ता पर मायया भाट्टा: कर्मकथाकुला इतधियो द्वैतेहि वैशेषिका. । अन्ये भेदरता विवादविकला स्ते तत्त्वतो वञ्चिता स्तस्मात् सिद्धमत स्वभावकमयं धीर. परंसश्रयेत् ॥ सत्त्वरजस्तमस्सु ॥ तत्त्वन्तु नामानुनिभिर्नानाविधमुक्तम् । विस्तरभियातन्न सङ्गृहीतम् ॥*॥ सर्वस्मिन् दृश्येबाध्यमानेऽपि तद्बाधाधिष्ठानत्वेनस्वयमबाध्यमान मनारोपित स्वरूप तत्वमितिविवरणकारा'। अनर्पयीया अमृत सत्यं परमार्थं सतत्वमित्येते एकार्थवाचिन परमार्थतो ब्रह्मणोवाचका शब्दाइतिभाष्यकारा: ॥

तत्त्वज्ञानम् । न । ब्रह्मज्ञाने ॥ यथार्थानुभवविशेषे ॥ यथा । प्रमाणप्रमेयसंशय

प्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः। इति गौतमः॥ अनारोपितवस्तुप्रत्यये॥ इदं सर्वं द्वैतजातमद्वितीये चिदानन्दात्मनि मायाकल्पितत्वान्मृषैव आत्मैवैकः परमार्थसत्यः सच्चिदानन्दोऽद्वयोऽहमस्मीति परिज्ञाने॥ तत्त्वस्य ज्ञानम्॥

तत्त्वज्ञानार्थदर्शनम्। न। तत्त्वज्ञानार्थस्यालोचने॥ तत्त्वज्ञानस्याहं ब्रह्मास्मीतिसाक्षात्कारस्य वेदान्तवाक्यकरणकस्यामानित्वादिसर्वसाधनपरिपाकफलस्यार्थः प्रयोजनमविद्यातत्कार्यात्मकनिखिलदुःखनिवृत्तिरूप परमानन्दावाप्तिरूपश्च मोक्षः तस्य दर्शनम् आलोचनम्। तत्त्वज्ञानफलालोचने हि तत्साधने प्रवृत्तिः स्यात्॥

तत्त्वतः। अ। यथावदर्थे॥

तत्त्वदर्शी। त्रि। वस्तुयाथात्म्यदर्शनशीले ब्रह्मविदि कृतसाक्षात्कारे॥ तत्त्वं वस्तुनो याथात्म्यम् तद्द्रष्टुं शीलं यस्य। णिनिः॥

तत्त्वभावः। पु। नेति नेतीत्यादिश्रुतिनिर्दिष्टे विदिताविदिताभ्यामन्यस्मिन्नद्वयस्वभावे॥

तत्त्वविचारः। पुं। भूतार्थचिन्तायाम्॥

तत्त्ववित्-द्। त्रि। स्वरूपविदि। याथात्म्यविदि। ब्रह्मविदि॥ शैवे॥ शैवो हि आत्मविद्याशिवा इति सङ्क्षेपतः षट्त्रिंशतत्त्वानि सर्वजगत्प्रवर्त्तकानीति मन्यते॥ तत्त्वस्वरूपसकलसंसारधर्मविलक्षणसच्चित्सुखरूपब्रह्माहमस्मीति वेत्ति जानातीति तत्त्ववित्॥

तत्पत्नी। स्त्री। हिङ्गुपत्र्याम्॥

तत्पदलक्ष्यार्थः। त्रि। अज्ञानादिसमष्ट्युपाध्युपहिताधारभूतेऽनुपहितचैतन्ये। चिदेकरसरूपिणि॥

तत्पदवाच्य। त्रि। तत्पदाभिधे॥

तत्पदवाच्यार्थ। त्रि। अज्ञानादिसमष्टिः एतदुपहितसर्वज्ञत्वादिविशिष्टचैतन्यम् एतदनुपहितचैतन्यञ्च तत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवतीति व्युत्पादितेऽर्थे॥

तत्पदाभिध। त्रि। तत्पदवाच्ये॥ मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः। पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः इत्याहुः॥

तत्पदार्थः। पु। जगत्कारणे परमात्मनि॥ यज्जगत्कारणं तत्तत्पदार्थः स उच्यते॥ तदिति पदस्यार्थः॥

तत्परः। त्रि। तन्नते॥ आसक्ते॥ तत्

परमुत्तमं यस्य । तेनपूर्यते वा । पूर्
पालनपूरणयोः । कदोरप् ॥

तत्परायणः । त्रि । तदासक्ते ॥

तत्पुरुषः । पु । प्रायउत्तरपदार्थप्रधाने
समासविशेषे ॥ सच द्वेधा। व्यधिकर
णपदः समानाधिकरणपदः सङ्ख्या
पूर्वपदश्चेति ॥

तत्फल । पु । कुवलये ॥ कुष्ठाख्यौष
धौ ॥ चोरनामसुगन्धिद्रव्ये ॥

तत्र । अ । तस्मिन् । सप्तम्यर्थे ॥ सप्त
म्यास्त्रल् ॥ तस्यामवस्थायाम् ॥

तत्रत्य । त्रि । तत्रभवे ॥ अव्ययात्-
त्यप् ॥

तत्रभवान् । त्रि । श्लाघ्ये । पूज्ये ॥ इत
राभ्योपिदृश्यन्त इतिप्राग्दीव्यतीयः
प्रथमार्थेत्रल् । सुप्सुपेतिसमासः ॥

तथा । अ । साम्ये ॥ अभ्युपगमे ॥ पृष्ट
प्रतिवाक्ये ॥ समुच्चये ॥ निश्चये ॥
तेन प्रकारेण । प्रकारवचनेथाल् ।
विभक्तित्वात् त्यदाद्यत्वम् ॥

तथागत । पु । बुद्धमुनै । सुगते ॥ त
था सत्यं गतं ज्ञानं यस्य यथापुनरावृ
त्तिर्नभवति तथा तेनप्रकारेण गत
इति तथागतः । सुप्सुपेतिसमासः ।
तथाच सुगतिसाधकताप्रोक्ता भव-
ति । तदुक्तंबैाद्धागमे । यथागता
स्ते सनयः शिवांगतिं तथागतःसो
पि ततस्तथागतइति ॥ त्रि । प्रकान्त
गतिशालिनि ॥ तथाभूते ॥

तथाच । अ । पूर्वोक्तार्थदृढीकरणे ॥

तथाहि । अ । निदर्शने ॥ प्रसिद्धमेवे
त्यर्थे ॥ तथाच हिच ॥

तथैव । अ । तद्वदेवेत्यर्थे ॥

तथ्यम् । न । सत्ये । ऋते ॥ त्रि । त
द्वति ॥ तथासाधुः । तत्रसाधुरिति-
यत् ॥

त । त्रि । पूर्वोक्ते । बुद्धिस्थस्य परामर्शे
। सो० इतिभाषा ॥ तद्देशकालाव
स्थादैा दृष्ट स इति कथ्यते ॥ विप्र
कृष्टविषये ॥ स्त्री । सा ॥ न । तत्
तद् । सच्चिज्ञानादिलक्षणलक्षितस्य
तत्त्वमस्यादिश्रुतिप्रसिद्धस्य ब्रह्मणो
नाम्नि ॥ यथा । तदित्यनभिसन्धा
य फलं यज्ञतप क्रियाः । दानक्रिया
श्चविविधाः क्रियन्तेमोक्षकाङ्क्षिभि
रिति॥ तदिति ब्रह्माभिधानमुच्चार्य
अनभिसन्धायचकर्मणः फलमित्यर्थः
॥ तनोति । तनु० । त्यजितनियजि
भ्यो डिदित्यदिः ॥

तदनन्यत्वम् । न । तदभिन्नत्वे ॥ त-
स्मात अनन्यत्वं नाम पृथक्सत्तारा
हित्यम् ॥

तदन्यबाधितार्थप्रसङ्ग । पु दोषवि
शेषे ॥ यथा । धूमो यदि वह्निव्यभि

चारी ध्यानवङ्किमन्यो न ध्यादि-
न्यादि' ॥

तदर्पणम् । न । वस्तुनःप्रत्यर्पणे । प्रति
दाने । स्वामिने निक्षेपार्पण ॥ त-
स्य अर्पणम् ॥

तदा । अ । तस्मिन् काले ॥ तदोदाच
॥ सर्वैकान्येति वा दा ॥

तदात्मा । पु । तत्स्वरूपे ॥ तस्यात्मा ॥

तदात्वम् । न । वर्त्तमानकाले ॥ त
देश्यस्यभाव । तस्यभावस्त्वतलै ॥

तदादि । त्रि । तदाप्रभृतौ ॥ सकाल
आदिर्यस्य यस्मिन्वा ॥

तदानीम् । अ । तस्मिन्काले । तदार्थे
॥ तदोदाच । दानीच ॥

तदामुखम् । न । आरम्भे ॥

तदेष । त्रि । सदेहात्मा प्रत्यक्षवेवे
न्यर्थे ॥

तद्गत । त्रि । तत्परे ॥

तद्गतमानस । त्रि । एकाग्रचित्ततये
छगतान्त.करणे ॥

तद्गुण. । पु । काव्यालङ्कारप्रभेदे ॥
स्वमुत्सृज्य गुण योगा दत्युज्ज्वल
गुणस्य यत् । वस्तु तद्गुणतामेति भ
ण्यतेसतु तद्गुण ॥ वस्तुतिरस्कृत
निजरूपकेनापिसमीपगतेनप्रगुणत
या स्वगुणसम्पदो परमा सन्ततिभा
समेव यत् समासादयति स तद्गुणः

। तस्याऽप्रकृतस्य गुणोऽस्यास्तीति ।
उदाहरणम् । विभिन्नवर्णा गरुडा
ग्रजेन सूर्यस्य रथ्या. परितः स्फुर
न्त्या । रत्नै पुनर्यत्र रुचा रुचं स्वा
मानन्यिरे वंशकरीरनीलैः ॥ अत्र
रवितुरगापेक्षया गरुडाग्रजस्य तद्पे
क्षया च हरिन्मणीनां प्रगुणवर्णता ॥

तदग्रह: । त्रि । तदभिनिवेशे ॥ तस्मिन्
ग्रहस्तद्ग्रह' ॥

तद्दिनम् । अ । दिनमध्ये ॥ प्रतिदिने
इतिहेमचन्द्र' ॥ न । पूर्वोक्तदिने ॥

तद्धन' । त्रि । कृपणे ॥ इतिहेम,

तद्धर्मा । पु । विनापिशीलेन स्वधर्मा
यमिति य' प्रवर्त्तते सतद्धर्मा ॥

तद्धित. । पु । वृत्तिविशेषे । तद्धिताद्
न्यधिकारविहितप्रत्ययेषु ॥ तेचद्वि
विधा' । प्रकृत्यर्थभिन्नार्था' स्वार्थिका
श्च ॥ तेभ्य प्रयोगेभ्योहितः ॥

तद्वत् । त्रि । पूर्वोक्तवति ॥ सयथास्ति
। मतुप् ॥ तत्सदृशे ॥ तेनतुल्ये ॥
तुल्यार्थे वति. ॥

तद्वला । स्त्री । वाद्यविशेषे ॥ इतिहेम
चन्द्र' ॥

तद्बुद्धि' । स्त्री । परमात्मसाक्षात्कार
परायांबुद्धौ ॥ त्रि । सदैवा निर्बीज
समाधिभाविकृतसाक्षात्कारे ॥ त
स्मिन् ज्ञानप्रकाशिते परमात्मतत्त्वे

सच्चिदानन्दघने एव वाह्यसर्वविषयपरित्यागेन साधनपरिपाकात्पर्यवसिता वुद्धिरन्तःकरणवृत्ति र्सा स्थाकारत्वचयायस्य स तथा ॥

तनय । त्रि । पुत्रे ॥ तनोति कुलम् तन्यते वा । तनु० । वलिमलितनिभ्य कयन् ॥

तनया । स्त्री । दुहितरि । पुत्र्याम् ॥ टाप् ॥ चक्रकुल्यायां लतायाम् ॥ घृतकुमार्याम् ॥

तनिका । स्त्री । तनी इति भाषाप्रसिद्धे वन्धनरज्जौ ॥ यथा । वितानतनिका ॥

तनिमा । पु । तनुत्वे । तानवे ॥ तनोर्भाव । पृथ्वादित्वात् इमनिच् ॥

तनिष्ठ । त्रि । क्षुद्रे ॥ अयमेषामतिशयेनतनु । अतशायने इष्ठन् ॥

तनीयान् । त्रि । अल्पे ॥ अयमनयोरतिशयेन तनु । द्विवचनविभज्येती यसुन् ॥

तनु । स्त्री । काये । शरीरे ॥ त्वचि ॥ स्त्रियाम् ॥ तन्व्याम् ॥ वोतोगुणवचनादिति पाक्षिकोङीषभाव. ॥ त्रि । अल्पे ॥ विरले ॥ कृशे ॥ तनोति तन्यतेवा । तनु० । भृमशीत्यु ॥ लाभे ॥

तनुकम् । न । त्वचे ॥ तनुकूच इति यावादिषु पाठात्कन ॥

तनुक्षीर. । पु । आम्रातके ॥

तनुच्छद । पु । वर्मणि ॥ तनुश्छाद्यते ऽनेन । छद० । पुंसिसञ्ज्ञायामिति घ ॥

तनुच्छाय । पु । जालवर्वुरकवृक्षे ॥ ॥ स्त्री । न । शरीरच्छायायाम् ॥ तनोश्छाया । विभाषासेनेति वा क्लीवत्वम् ॥

तनुज । पु । पुत्रे ॥ तनोर्जात । ड ॥

तनुजा । स्त्री । पुत्र्याम् ॥ टाप् ॥

तनुत्रम् । न । वर्मणि । सन्नाहे ॥ तनुस्त्रायते । चैङ्० । आतोनुपेतिक ॥

तनुत्राणम् । न । कवचे । तनुत्रे ॥ शरीररक्षणे ॥

तनुत्वचा । स्त्री । क्षुद्राग्निमन्थे ॥

तनुपत्र । पु । इङ्गुदीवृक्षे ॥

तनुभस्त्रा । स्त्री । नासिकायाम् ॥ तनोर्भस्त्रेव ॥ तन्व्यांचर्मप्रसेविकायाम् । छोटी भाथी इति छोटीमसक इतिच भाषा ॥

तनुभृत् । पु । जीवे ॥

तनुमध्या । स्त्री । गायत्रीछन्द प्रभेदे ॥ त्यौचेत्तनुमध्या । य० । मूर्त्तिर्मुरशत्रोरत्यद्भुतरूपा । आस्तां ममचित्ते नित्यं तनुमध्या ॥

तनुरस । पु । घर्मे । स्वेदजले ॥ अल्प

रसे ॥ त्रि । तद्विशिष्टे ॥

तनुरट् । न । रोमणि ॥

तनुरुहम् । न । तनुरुहे ॥ त्रि । तनौ रूढे ॥

तनुवात । पु । नरकविशेषे ॥

तनुवारम् । न । वर्मणि । सन्नाहे ॥ तनुं वृणोति आवृणोति आच्छादयति । वृञ्० । कर्मण्यण् ॥

तनुवीजः । पु । राजवदरे ॥

तनुव्रण । पुं । वल्मीकरोगे ॥

तनुः । न । शरीरे ॥ तनोति तन्यते वा । तनु० । अर्तिपृवपियजितनिधनितपिभ्यो नित् इत्युसिप्रत्ययः । तनुषी तनूंषि ॥

तनुसञ्चारिणी । स्त्री । बालिकायाम् ॥

तनुसर । स्वेदे ॥ तनो सरति । सृ० । अच् ॥

तनूः । स्त्री । काये । शरीरे ॥ तनोति तन्यते वा । तनु० । भृमृशीत्यु । प्राणिजातेरित्यूङ् ॥ कृषिचमितनिधनीत्यूर्वा ॥

तनूकृत । त्रि । तष्टे । सूक्ष्मीकृते ॥ अतनुस्तनुरकारि । कृञ् क्त ॥

तनूज. । पु । पुत्रे ॥ त्रि । शरीरजे ॥ तन्वाःजात. । पञ्चम्यामितिड ।

तनूजनि' । पु । पुत्रे ॥ तन्वा'जनिर्यस्य ॥

तनूजा । स्त्री । पुत्रिकायाम् ॥ टाप् ॥

तनूनपम् । न । आज्ये । घृते ॥ तन्वा जनकृशं पाति । पा० । क. ॥

तनूनपात् । पु । अग्नौ । पावके ॥ तनूं शरीरं न पालयति । नभ्राण्नपादिति निपातित । तनूनपातौ । तनूनपात ॥ तनूस्वस्वरूप न पाति रक्षति । आशुविनाशित्वात् इति तनूनपाच्छब्दन्त । उगिदचामिति नुमि तनूनपान् तनूनपान्तौ तनूनपान्त इतिवा ॥ तन्वा जन कृश पाति । तनूनप घृतादि तत् अत्ति । अदो ऽन न्न इतिविट् । तनूनपात् तनूनपादौ तनूनपादइतिवा ॥ चिन्त्यं ॥

तनूरुहम् । न । रोम्णि ॥ पक्षिपक्षे । पतत्रे ॥ पुत्रे ॥ तन्वा रोहति । रुह० । इगुपधेतिक. । मू०कोषा ॥

तनूहद. । पु । पायौ । गुदे ॥

तन्ति. । स्त्री । प्रसारितरज्ज्वाम् ॥ दाम्न्याम् ॥

तन्तु । पु । सूत्रे ॥ ग्राहे ॥ अपत्ये ॥ सन्ततौ ॥ तनोति तन्यते वा । तनु० । सितनीतितुन् ॥

तन्तुकाष्ठम् । न । तूल्याम् । ताँतका काठ इति भाषा ॥

तन्तुकी । स्त्री । नाड्याम् ॥

तन्तुकीट । पु । कोषकारे । गुटिपोका इतिगौड भाषा । रेसमकाकीडा

इति भाषा ॥

तन्तुण । पुं । ग्राहे । घाँगर इतिगै।
ड़भाषा ॥

तन्तुनाग । पु । ग्राहे ॥

तन्तुनाभ । पु । लूतायाम् ॥

तन्तुनिर्य्यास । पु । तालवृक्षे ॥

तन्तुपर्व । न । परमेश्वरोपवीतदानति
थौ । श्रावण्या पूर्णिमायाम् ॥

तन्तुभ । पु । सर्षपे ॥ तन्तुना भाति ।
भा० । सुपीतिक ॥ वत्से ॥

तन्तुरम् । न । }
तन्तुलम् । न । } मृणाले ॥

तन्तुली । स्त्री । सितापाके । चासनी
इतिभाषा ॥

तन्तुवाप । पु । तन्त्रवाये । कुविन्दे ॥
तन्तून् वपति । टुवपृ० । कर्मण्यण्॥

तन्तुवाय । पु । लूतायाम् ॥ तन्तून् व
यति । वेञ्० । ह्वावामश्चेत्यण् ॥ त
न्त्रवाये । कुविन्दे । कोली इतितांती
इतिचभाषा ॥

तन्तुविग्रहा । स्त्री । कदल्याम् ॥

तन्तुशाला । स्त्री । गर्त्तिकायाम् । त-
न्तुवपनगृहे ॥ तन्तूनां शाला ॥

तन्तुसन्ततम् । न । ऊते । स्यूते । बुना
कपड़ा इतिभाषा ॥

तन्तुसार । पुं । गुवाकवृक्षे ॥

तन्त्रम् । न । कुटुम्बकृत्ये ॥ सिद्धान्ते ॥

उत्तमौषधे ॥ प्रधाने ॥ तन्तुवाये ॥
परिच्छदे ॥ हेतौ ॥ उभयार्थ प्रयो
जके । उभयोद्देशेनसकृत्प्रवृत्तौ ॥
इतिकर्त्तव्यतायाम् ॥ राष्ट्रे ॥ परच्छ
न्दे ॥ करणे ॥ व्यर्थसाधके ॥ तन्तौ ॥
स्वराष्ट्रचिन्तायाम् ॥ परिजने ॥ वाप
साधने । तन्तुवायशलाकायाम् ॥ त
न्यन्ते तन्त्रो ऽस्मिन । ष्ट्रन् ॥ प्रबन्धे
॥ शपथे ॥ धने ॥ गृहे ॥ वपनसाध
ने ॥ कुले ॥ श्रुतिशाखाविशेषे ॥
शास्त्रविशेषे ॥ तल्लक्षणं यथा । स
र्गश्च प्रतिसर्गश्च मन्त्रनिर्णयएवच ।
देवतानाञ्च संस्थान तीर्थानां चैव
वर्णनम् ॥ तथैवाश्रमधर्मश्चविप्रस
स्थानमेवच । संस्थानञ्चैवभूतानां
यन्त्राणाञ्चैवनिर्णय ॥ उत्पत्तिर्विबु
धानाञ्च तरूणांकल्पसंज्ञितम् । सं
स्थान ज्योतिषां चैव पुराणाख्यानमे
वच ॥ कोषस्य कथनञ्चैव व्रतानांप
रिभाषणम् । शौचाशौचस्यचाख्या
न नरकाणाञ्चवर्णनम् ॥ हरचक्रस्य
चाख्यान स्त्री पुंसोश्चैवलक्षणम् ।
र.जधर्मो दानधर्मो युगधर्म स्तथैव
च ॥ व्यवहार कथ्यतेच तथाचाध्या
त्मवर्णनम् । इत्यादिलक्षणैर्युक्तं
तन्त्रमित्यभिधीयते ॥ *॥ अथतस्य
माहात्म्यम् । विष्णुर्वरिष्ठोदेवाना ह्र

ह्रदानामुदधिस्तथा । नदीनाञ्च यथा गङ्गा पर्व्वतानां हिमालय ॥ अश्वत्थ सर्व्ववृक्षाणां राज्ञामिन्द्रो यथा वर । देवीनाञ्च यथा दुर्गा वर्णानां ब्राह्मणो यथा ॥ तथा समस्तशास्त्राणां तन्त्रशास्त्र मनुत्तमम् । सर्व्वकामप्रद पुण्य तन्त्र वै वेदसम्मितम् ॥ कीर्त्तनं देवदेवस्य हरस्य मतमेव च । पावन श्रद्दधानानामिहलोके परत्र चेति ॥ तच्च चतुःषष्टिसङ्ख्यकम् । यथा । सिद्धीश्वर महातन्त्र कालीतन्त्रं कुलार्णवम् । ज्ञानार्णवं नील तन्त्रं फेत्कारी तन्त्रमुत्तमम् ॥ देव्यागममुत्तराख्य श्रीक्रम सिद्धियामलम् । मत्स्यसूक्त सिद्धसार सिद्धिसारस्वत तथा ॥ वाराहीतन्त्र देवेशि योगिनीतन्त्रमुत्तमम् । गणेशविमर्षिणी तन्त्र नित्यातन्त्र शिवागमम् ॥ चामुण्डाख्य महेशानि मुण्डमालाख्य तन्त्रकम् । हंसमाहेश्वर तन्त्र निरुत्तरमनुत्तमम् ॥ कुलप्रकाशक देविकल्पं गान्धर्व्वकं शिवे । क्रियासारनिबन्धाख्य स्वतन्त्रतन्त्रमुत्तमम् ॥ सम्मोहनं तन्त्रराज ललिताख्य तथा शिवे । राधाख्य मालिनी तन्त्रं रुद्रयामलमुत्तमम् ॥ बृहच्छ्रीक्रम तन्त्रञ्च गवाक्ष सुकुमुद्विनी । विशु

द्धेश्वरतन्त्रञ्च मालिनीविजयं तथा ॥ समयाचारतन्त्रञ्च भैरवीतन्त्रमुत्तमम् । योगिनी हृदय तन्त्रं भैरवं परमेश्वरि ॥ सनत्कुमारक तन्त्रयोनितन्त्र प्रकीर्त्तितम् । तन्त्रान्तरञ्च देवेशि नवरत्नेश्वरं तथा ॥ कुलचूडामणितन्त्र भावचूडामणीयकम् । मन्त्रदेवप्रकाशञ्च कामाख्यानामक तथा ॥ कामधेनु कुमारीच भूतडामरसञ्ज्ञकम् । मालिनीविजय तन्त्रं यामल ब्रह्मयामलम् ॥ विश्वसारं महातन्त्र महाकाल कुलामृतम् । कुलोड्डीश कुब्जिकाख्य यन्त्रचिन्तामणीयकम् ॥ एतानि तन्त्ररत्नानि सफलानि युगे युगे । कालीविलासकादीनि तन्त्राणि परमेश्वरि ॥ कालकल्पे सुसिद्धानि अश्वक्रान्तासु भूमिषु । महाचीनादितन्त्राणि कलिकल्पे महेश्वरि ॥ सुसिद्धानि वरारोहे रथक्रान्तासु भूमिषु इति सिद्धिसारस्वतम् ॥ * ॥ अपिच । चतुःषष्टिश्च तन्त्राणि यामलादीनि पार्व्वति । सफलानीह वाराहे विष्णुक्रान्तासु भूमिषु ॥ कल्पभेदेन तन्त्राणि कथितानि च यानि च । पाषण्डमोहनायैव विफलानीह सुन्दरीति महाविश्वसारतन्त्रम् ॥ वि । आयत्ते

॥ साङ्ख्यादिशास्त्रविशेषे ॥ तन्यन्ते
व्युत्पाद्यन्ते तत्त्वान्यनेनेति व्युत्पत्तेः ॥
तननम् । तन्यतेऽनेन वा । तनु॰
। ष्ट्रन् ॥ यद्वा । तन्त्रणम् । तन्त्र्यते वा
। तत्रि कुटुम्बधारणे । घञ् ॥

तन्त्रकम् । न । अनाहते । नवीनवस्त्रे
॥ तन्त्रादचिरापहृते इति साधु ॥

तन्त्रकाष्ठम् । न । तन्त्रवायस्य तुर्याम् ॥

तन्त्रता । स्त्री । अनेकमुद्दिश्य सकृत्प्र
वृत्तौ ॥ यथा । आग्नेयाष्टकपालैन्द्रद
ध्यैन्द्रपयोयागानां चयाणा माग्नेया
ष्टाकपालोपांशुयागाग्नीषोमीयैका
दशकपालयागानां चयाणां सकृत्
सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपका
र सिद्ध्यति । तथा नानाब्रह्मवधस
त्त्वे सर्वोद्देशेन सकृत् प्रायश्चित्ते कृ-
ते ब्रह्मवधजन्यपापनाशः । तन्त्रता
बाहेतुश्च । अदृष्टार्थैकजातीयकर्म
णा कालदेशकर्त्रादीनां प्रयोगानुब
न्धवैध हेतुभूतानामभेदे उद्देश्यवि
शेषाग्रह इति । एवञ्च सतोऽधिका
रीभवति दैवेपैत्रे च कर्मणि । पवि
त्राणां तथाज्यैदानेचविधिदर्शिते
इति विष्णूक्तम् । अतः स्नानाचरेत् क
र्मजपहोमादिकिञ्चनेति दक्षोक्तञ्च
क्रियाङ्गज्ञान कर्तृसंस्कारद्वारैव तद्धि
न कर्त्तव्याशेषकर्मार्थ मेकमेव न तु
प्रतिकर्मैककर्त्तव्यम् । इति प्रायश्चित्तत
त्त्वम् ॥

तन्त्रवाप । पु । तन्त्रवाये ॥ तन्तवोवि
तन्यन्ते यत्र तत् तन्त्रम् । तद् वपति ।
टुवप॰ । कर्मण्यण् ॥

तन्त्रवाय । पु । कुविन्दे ॥ वर्णसङ्करजा
तिरयम् ॥ अस्योत्पत्तिर्यथा । ताम्र
कुट्टाच्छङ्खकार्यां मणिकारश्चजाय
ते । मणिकारात् ताम्रकुट्ट्यां मणि
बन्धो व्यजायत ॥ मणिबन्धान्मणि-
कार्यां तन्त्रवायाश्च जज्ञिरे । इति
पराशरपद्धति ॥ तन्तवो वितन्यन्ते
यस्मिन् । तत् तन्त्रम् । तद् वयति ।
वेञ्॰ । ह्वावामश्चेति कापवादोऽण् ॥

तन्त्रिका । स्त्री । गुडूच्याम् ॥ तन्त्रयते ।
तत्रि॰ । ण्वुल् ॥ तन्त्र्येव वा । कन्
। ह्रस्व ॥

तन्त्रिपालक । पु । जयद्रथनृपे ॥

तन्त्री । स्त्री । वीणागुणे ॥ अमृताया
म् । गुडूच्याम् ॥ देहशिरायाम् ॥ ना
ड्याम् ॥ रज्ज्वाम् ॥ नदीविशेषे ॥
युवतीप्रभेदे ॥ वीणाप्रभेदे । तन्त्र
यते । तत्रि॰ । अवितृस्तृतन्त्रिभ्यई ॥

तन्द्रा । स्त्री । निद्रायाम् ॥ आलस्ये ।
प्रमीलायाम् ॥ तस्या निदान लक्ष
णञ्च । यथा । तमोवातकफात् त
न्द्रेति ॥ इन्द्रियार्थेष्वसंवित्ति गौर

वं जृम्भां क्लम । निद्रार्त्तस्येव यस्ये हा तस्य तन्द्रां विनिर्दिशेदिति ॥ निद्रायां प्रवृत्तस्य क्लमाभाव' । तन्द्रायान्तु प्रबोधितस्यापि क्लम इत्यनयो र्भेद ॥ तत् राति । तत्पूर्वाद्रातेरातोऽनुपेतिक । टाप् ॥ तत् द्रातिवा । द्राकुत्सायागतौ । स्पृशिगृह्णीत्यादिना तदोनान्तत्त्व निपात्यते ॥ निद्रातन्द्रेतिवा निपात्यते ॥ तन्द्राच सुखस्यभार्या निद्राया कन्या प्रीतेर्भगिनी । यथा । निद्राकन्याच तन्द्रा सा प्रीतिरन्यासुखप्रिये । याभ्यांव्याप्त जगत्सर्वं विधिपुत्रविधेर्विधाविति ॥

तन्द्रालु' । त्रि । निद्रालौ ॥ तत् द्राति । द्रा० । स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्यआलुजितितच्छीलादिषु आलुच् । तच्छब्दस्य नान्तत्त्वं समासस्य निपात्यते ॥

तन्द्रि । स्त्री । आलस्ये ॥ निद्रायाम् ॥ तन्द्राया कारणम् । तत्करोतीतिणय न्तादिच ॥ यद्वा । तदि चौरोधातु ॥ तस्मात् वङ्क्यादयश्चेत्यौणादिक क्रिन् ॥

तन्द्रिका । स्त्री । तन्द्र्याम् ॥

तन्द्रित । त्रि । अलसे ॥ तन्द्रा सञ्जाता अस्य । ता० इतच् ॥

तन्द्री । स्त्री । अत्यन्तश्रमादिना सर्वेन्द्रियासामर्थ्ये । प्रमीलायाम् ॥ तन्द्र्या कृदिकारादितिङीष् ॥ तत् राति वा । आतोनुपेतिक । गौ०ङीष् ॥ तत्द्रातिवा । द्रा० । निद्रातन्द्रेतितदोनान्तत्त्व निपात्यते ॥

तन्निष्ठ' । त्रि । सर्वकर्मसन्न्यासेन ब्रह्मात्मैक्यविचारपरे ॥ तस्मिन्नेव ब्रह्मणि सर्वकर्मानुष्ठानविक्षेपनिवृत्त्या स्थितिर्यस्येत्यर्थ ॥ तस्मिन्नुस्थिते ॥

तन्मय । त्रि । तद्भावभाविते ॥ अभेदे ॥

तन्मात्रम् । न । शब्दादीनां सूक्ष्मेषु । शब्दतन्मात्राणि स्पर्शतन्मात्राणीत्यादिपदवाच्येषु ॥ नत्वेषां शान्तादिविशेषोऽस्ति । यथोक्तविष्णुपुराणे । तस्मिंस्तस्मिंस्तुतन्मात्रा तेनतन्मात्रता स्मृता । तन्मात्राण्यविशेषाणि अविशेषा स्ततोहिते ॥ न शान्तानापिघोरास्ते न मूढाश्चाविशेषिण इति ॥ सा मात्रा यस्मिन् तत् । त्रि । तावन्मात्रे ॥

तन्यतु । पु । वायौ ॥ निशि ॥ तनोति । तनु० । ऋतन्यञ्जीत्यादिना यतुच् ॥ तन्यतुर्गर्जितमिति तन्यतुरशनिरितिचवेदभाष्यम् ॥

तन्ववस्था । स्त्री । अभिव्यक्तस्यापि सहकार्य्यऽभावात् कार्य्याजनने ॥

तन्वि । स्त्री । पृश्निपर्ण्याम् ॥

तन्वी । स्त्री । कृशाङ्ग्याम् ॥ वोतोगुणवचनादितिङीष् । तनुशब्दस्तनुत्वगुणमुक्त्वा तद्द्रव्यमभिधत्तइतिगुणवचन ॥ शालपर्ण्याम् ॥ सङ्कृतिसप्तके चतुर्विंशत्यक्षरात्मके वृत्ते ॥ भूतमुनीनैर्यतिरिह भतना सौ भनयाश्चरद्भिर्भवतितन्वी ॥ यथा । माधवमुग्धे मधुकरविरुते कोकिलकूजितमलयसमीरे । कम्पमुपेता मलयजसलिले प्लावनतोप्यऽविरतसनुदाहा ॥ पद्मपलाशैर्विरचितशयने देहजसञ्ज्वरभरपरिदूने । निश्वसतीसा मुहुरतिपवन ध्यानखेदितवनिवसतितन्वी ॥ इति ॥

तप । पु । ग्रीष्मे । ज्येष्ठाषाढयोः ॥ तपति । तपसन्तापे । पचाद्यच् ॥

तपःकरः । पु । तपस्वीमत्स्ये ॥ त्रि । तपस्याकारके ॥

तपःक्लेशसह । त्रि । दान्ते ॥ तपसं क्लेशं । सहते । षह॰ । अच् । तप क्लेशस्य सह ॥

तपःस्थ । त्रि । तपसिस्थिते ॥ सुपिस्थ इतिक ॥

तपस्विनी । स्त्री । काश्याम् ॥

तपती । स्त्री । छायानामसूर्यपत्न्याम् ॥ सूर्यसुतायाम् ॥ नदीविशेषे ॥

तपन । पु । सवितरि ॥ अरुष्करे । भल्लातवृक्षे ॥ निरयान्तरे ॥ ग्रीष्मे ॥ अर्कवृक्षे ॥ क्षुद्राग्निमन्थवृक्षे ॥ सूर्यकान्तमणौ ॥ तापे ॥ तपति । तप॰ । ल्यु ॥

तपनच्छद । पु । आदित्यपत्रवृक्षे ॥

तपनतनया । स्त्री । यमुनायाम् ॥ तपनस्य तनया ॥ शमीवृक्षे ॥

तपनमणि । पु । सूर्यकान्तमणौ ॥

तपनात्मजा । स्त्री । गोदावरीनद्याम् । यमुनायाम् ॥ तपनस्यआत्मजा ॥

तपनी । स्त्री । गोदावर्याम् ॥

तपनीयम् । न । स्वर्णे ॥ तप्यते ऽनेन । तप॰ । कृत्यल्युटइत्यनीयर ॥

तपनीयकम् । न । सुवर्णे ॥

तपनेष्टम् । न । ताम्रे ॥

तपा३ । पु । माघमासे ॥ शिशिरे ॥ तपन्त्यस्मिन् । तप॰ । असुन ॥

तप४ । न । जनलोकोपरिवर्त्तिनि लोकविशेषे ॥ यथा । तपो ऽर्ककोटियैत्रास्ते महायोगी सनन्दन । ऋभु. सनत्कुमारश्च सनकश्च महातपा इति ॥ ज्ञानादिलक्षणेत्रह्मणि ॥ अन्तर्यामिब्राह्मणादृष्ट्या तपस्याज्ञापयती स्मृतौ. ॥ आलोचने ॥ ज्ञाने ॥ स्वधर्मे । स्वाश्रमविहितकर्मणि ॥ वैधक्लेशजनककर्मणि ॥ नवमभवने ॥ कामानश

ने ॥ तपोनानशनात्परम् ॥ क्षुत् पिपासाशीतोष्णादिद्वन्द्वसहने ॥ चित्तप्रसादहेतुभूते व्रतनियमोपासनादिकर्मणि ॥ काष्ठमौनाकारमौनादिव्रते ॥ कायेन्द्रियमनसांसमाधाने ॥ शास्त्रीयमार्गेणकायेन्द्रियमनसांशोषणे ॥ कृच्छ्रचान्द्रायणप्राजापत्यादिरूपे प्रायश्चित्ते ॥ अग्न्यादिषिविततसमिद्धारोहणादौ ॥ वानप्रस्थाश्रमधर्मे ॥ तच्च शारीरादिभेदात्त्रिविधम् । यथा । देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् । ब्रह्मचर्यमहिंसाच शारीरं तप उच्यते ॥ अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्चयत् । स्वाध्यायाभ्यसनञ्चैव वाङ्मय तप उच्यते ॥ मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः । भावसंशुद्धिरित्येतत् तपोमानसमुच्यते ॥ तदपि सात्त्विकादिभेदात् त्रिविध यथा । श्रद्धया परयातप्तं तपस्तत् त्रिविधं नरैः । अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥ सत्कारमानपूजार्थं तपोदम्भेनचैवयत् । क्रियते तदिहप्रोक्तं राजसं चलमध्रुवम् ॥ मूढग्राहेणात्मनो यत् पीडया क्रियते तपः । परस्योत्सादनार्थंवा तत्तामसमुदाहृतम् ॥

ति ॥ मनसश्चेन्द्रियाणाञ्च ह्यैकाग्र्यं परमन्तपः ॥ ब्राह्मणस्यतपोज्ञानं तपः क्षत्रस्यरक्षणम् । वैश्यस्यतुतपोवार्त्ता तपः शूद्रस्यसेवनम् ॥ तपनम् तप्यतेऽनेनवा । तप० । तपति ईष्टे । तपत्यैश्वर्येवा । असुन् ॥

तपस । पु । चन्द्रे ॥ तपति । तप० । अत्यविचमितमिनमीत्यादिना ऽसच् ॥ पक्षिणि ॥

तपस्तक्ष । पु । इन्द्रे ॥ इतिहेमचन्द्रः ॥

तपस्य । त्रि । तपसिस्थिते ॥ सुपिस्थ इति कः । खर्परेशरीतिपाक्षिकोविसर्गलोपः ॥

तपस्य । पि । फाल्गुनेमासि ॥ अर्जुने ॥ तपसिसाधु । तत्रसाधुरितियत् ॥ न । कुन्दपुष्पद्रुमे ॥

तपस्या । स्त्री । नियमस्थितौ । व्रतचर्यायाम् । तपश्चर्यायाम् ॥ तपश्चरति तपस्यति । कर्मणोरोमन्थतपोभ्यांवर्त्तिचरोरितिक्यङ् । तपस्यति इति तपस्या । अप्रत्ययादितिस्त्रियामप्रत्ययः । टाप् ॥

तपस्वी । त्रि । तापसे । पारिकाङ्क्षिणि ॥ कृच्छ्रचान्द्रायणादितपःप्रधाने वानप्रस्थादौ ॥ अनुकम्प्ये । दीने ॥ प्रशस्तंतपसि ॥ तपो॥ऽस्यास्ति । तपस्सहस्राभ्यांविनिनीविति विनिः ॥ पु । ना

रदे ॥ घृतकाण्डे ॥ तप्सामाच् इति गौडभाषा प्रसिद्धे मत्स्ये । चेक्के ॥ इतिराजनिर्घण्टः ॥

तपस्विनी । स्त्री । तपोयुक्तायाम् ॥ जटामांस्याम् ॥ कटुरोहिण्याम् ॥ महाश्रावणिकायाम् ॥ सन्तापवत्याम् ॥ अन्नेभ्यइतिङीप् ॥

तपस्विपत्रः । पु । दमनकवृक्षे ॥

तपात्ययः । पु । वर्षाकाले ॥ तपस्यात्ययो यस्मिन् ॥

तपितः । त्रि । तप्ते । तपा इतिभाषा ॥

तपिनी । स्त्री नद्यन्तरे ॥

तपुः । न । सूर्ये ॥ अग्नौ ॥ शत्रौ ॥ तपति । तप० । अर्त्तिपृवपियजितनिधनितपिभ्योनिदित्युसिः । तपुषी तपूंषि ॥

तपोधनः । पु । तापसे । तपस्विनि ॥ दमनकवृक्षे ॥ तपोधनयस्य ॥

तपोधना । स्त्री । मुण्डीर्याम् ॥

तपोनिष्ठः । पु । सदाध्ययननिष्ठे तापसविशेषे ॥

तपोयत्तः । पु । तपस्विनि ॥ कृच्छ्रचान्द्रायणादितपएवयत्नो ऽस्य ॥

तपोवटः । पु । ब्रह्मावर्त्तदेशे ॥

तपोवनम् । न । गुह्यकलोकवासफलके तीर्थविशेषे ॥

तप्तः । त्रि । प्रज्वलिते ॥ तप्यतेस्म । तप० । क्तः ॥ तापयुक्ते । सन्तापिते ॥

तप्तकम् । न । तवा इति लोकप्रसिद्धे पोलिकादिसाधने ॥

तप्तकुम्भः । पु । नरकविशेषे ॥

तप्तकृच्छ्रः । पु । व्रतविशेषे ॥ यथा । तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान् । प्रतित्र्यहं पिबेदुष्णान् सकृत्स्नायी समाहितः इति ॥ अत्र पराशरोक्तो विशेषः ॥ यथा । षट्पलन्तु पिबेदम्भ स्त्रिपलन्तु पयः पिबेत् । पलमेकं पिबेत्सर्पिस्तप्तकृच्छ्रं विधीयते । इति ॥ पयो घृतमुदकं वायुं त्र्यहं प्रतित्र्यहं पिबेत् सततप्तकृच्छ्रः । इति गौतमः ॥

तप्तपाषाणकुण्डम् । न । नरकविशेषे ॥

तप्तबालुकः । पु । नरकविशेषे ॥

तप्तमासकम् । न । पुण्यपापयोः परीक्षाविशेषे ॥

तप्तमुद्रा । स्त्री । शरीरधार्याग्नितप्तधातुमयभगवदायुधचिह्ने ॥ यथा । आषाढशुक्लद्वादश्यां शयनीशयितेऽसति । वैष्णवं पारणं कृत्वा तप्तमुद्राश्च धारयेत् ॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैकान्तिनश्च ये । कुर्वन्त्वात्मानं तप्तमुद्राभिर्देहं सङ्कयेत् ॥ * ॥ तप्तमुद्राधारणनिन्दितोक्ता वायुपुराणे । अग्निनैवच सन्तप्तचक्र

मादाय वैष्णव । धारयेत् सर्ववर्णा
ना हरिसालोक्यसिद्धये ॥ ब्रह्माण्डे ।
कृत्वा धातुमयीं मुद्रां तापयित्वा स्व
कां तनुम् । चक्रादिचिह्निता भूप धा
रयेद्वैष्णवो नरः ॥ नारदीयपञ्च-
रात्रे । द्वादशारन्तु षट्कोणं वलयत्र
यसंयुतम् । हरेः सुदर्शनं तप्तं धार
येत् तद्विचक्षण ॥ सौपर्णे च श्रीभ
गवद्गरुडसंवादे तप्तमुद्राप्रकरणे ।
गरुतम्न्विशेषेण सर्ववर्णेष्वयविधिः ।
विप्रो वा क्षत्रियो वापि वैश्यः शूद्रस्त-
थैव च ॥ पाद्मे । अग्निहोत्रं यथानि
त्यं वेदस्याध्ययनं यथा । ब्राह्मणस्य त
थैवेदं तप्तचक्रादिधारणम् ॥ किञ्च
तत्रैवोत्तरखण्डे श्रीशिवोमासंवादे ।
शङ्खचक्राङ्कनं कुर्याद्ब्राह्मणो बाहु-
मूलयोः । हुताग्निनैव सन्तप्य सर्वपा
पापनुत्तये ॥ चक्रं वा शङ्खचक्रं वा त
थापञ्चायुधानि वा । धारयित्वैव विधि
वद् ब्रह्मकर्म समारभेत् ॥ * ॥ कि
ञ्चैतत्प्रसङ्ग एव । अधृत्वा विधिना च
क्रं ब्राह्मणः प्राकृतो भवेत् । किञ्च ।
न तस्य किञ्चिदश्नीयाद्‌पि क्रतुसह-
स्रिणः । सर्ववेदविदो वापि सर्वशा
स्त्रविशारद । अधृत्वा विधिना चक्रं
ब्राह्मणः पतितो भवेत् ॥ किञ्च ।
तप्तेनैवाङ्कनं कुर्याद्ब्राह्मणस्य विधा
नतः । श्रौतस्मार्तादिसिद्ध्यर्थं मन्त्र-
सिद्ध्यै तथैव च ॥ हरेः पूजाधिकारा
र्थं चक्रं धार्यं विधानतः । वैष्णवस्य
स्वसिद्ध्यर्थं भक्तिसिद्ध्यै विशेषतः ॥
किञ्च । उपवीतादिवद्धार्याः शङ्ख
चक्रादयस्तथा । ब्राह्मणस्य विशेषेण
वैष्णवस्य विशेषतः ॥ * ॥ अथ । यो
हवैसुश्लोकमौले धर्मानमुतिष्ठमा-
नोऽग्निनाचक्रं धत्ते । अग्निर्वैसह
स्रारः सहस्रारो नेमिर्नेमिना तप्तत
नुः सायुज्यं सलोकतामाप्नोतीत्या
द्याः श्रुतयो बह्व्य उदाहृताः सन्ति-
वेङ्कटाचार्यादिभिः । तद्विस्तानि पुरा
णवचनानि च तानि गौरवभिया न लि
खितानि । मन्वादिस्मृतिषु रामाय-
णभारतादिष्वदृष्टत्वात् मन्वर्थविप
रीतायाः स्मृतेरप्रशस्तत्वाच्च ॥
तप्तरूपकम् । न । रौप्ये ॥
तप्तसुराकुण्डम् । न । नरकान्तरे ॥
तप्तसूर्मिकुण्डम् । न । नरकविशेषे ॥
तप्ताङ्गार । पु । महानरकान्तरे ॥
तम । पु । तमोगुणे ॥ तमालवृक्षे ॥
स्वर्भानौ ॥ न । पादाग्रे ॥ अन्धकारे ॥
ताम्यति । तमु ग्लानौ । पचाद्यच् ॥
तमनम् । भावेघञ्वा । नोदात्तोप
देशस्येति न वृद्धिः ॥
तमःपति. । पु । क्रियाहङ्क निरोद्धरि बा

मदेवनाथे ॥

तमःप्रधान । पु । तमोगुणप्रधानमा योपाधिके परमात्मनि ॥ त्रि । तमो गुणप्रधाने ॥

तमःप्रभ । पु । नरकविशेषे ॥

तमःप्रभा । स्त्री । नरकभूमिभेदे ॥

तमक । पु । श्वासरोगप्रभेदे ॥

तमङ्गक । पु । इन्द्रकोषे । मञ्चके ॥

तमत । त्रि । तृषिते । तृष्णापरे ॥ ताम्यति । तमुकाङ्क्षायाम् । भृम दृशियजीत्यादिनाऽतच् ॥

तमप्रभ । पु । नरकविशेषे ॥

तमरम् । न । वङ्गे ॥ इतिहेम ॥

तमः । न । चक्षुर्दर्शननिरोधके भावे रादिध्वान्ते ॥ शोके ॥ पापे ॥ का र्य्यकार्य्याविवेके ॥ अविद्यायाम् ॥ मन्दान्धकारे ॥ मोहान्धकारे ॥ वि शेषदर्शनविरोधिदोषे ॥ सर्वदेहि नां मोहनेप्रकृतेर्गुणविशेषे ॥ प्र मादालस्यनिद्राभिस्तन्निबध्नाति ॥ गु णवर्णकमेवतमःइट साङ्ख्याचा र्य्यैः । तमस्त्वयमविक्रियम् । यन्मोह हेतु स्तन्मोहात्मक तम । भेदस्त मसो ऽष्टविध । तमसो ऽविद्याया अष्टविधोभेद । अष्टसु अव्यक्तमह दहङ्कारपञ्चतन्मात्रेष्वनात्मस्वात्मबु द्धिरविद्या तम स्तस्याष्टविधविषयत्वा दष्टविधत्वम् ॥ मले ॥ ताम्यति त म्यते ऽनेनवा । तमुग्लानौ । असुन् ॥ पु । न । विधुन्तुदे ॥

तमसम् । न । अन्धकारे ॥ ताम्यति ग्ला निं प्राप्नोत्यनेनाक्षिन्वा । तमु० । अत्यविचमितमीत्यादिनाऽसच् ॥

तमसा । स्त्री । नदीविशेषे ॥

तमस्तति । स्त्री । ध्वान्ते । अन्धकार समूहे ॥ तमस स्तति ॥

तमस्विनी । स्त्री । क्षपायाम् । रात्रौ ॥ तमो ऽस्त्यस्याम् । अस्मायामेधे- तिविनि ॥ हरिद्रायाम् ॥

तमा । स्त्री । रजन्याम् ॥ तमालद्रुमे ॥ ताम्यत्यस्याम् । तमु० । अच् । टाप् ॥

तमाल । पु । तिलके । पुण्ड्रे ॥ खड्गे । असौ ॥ वरुणद्रुमे ॥ तापिञ्छे । का लस्कन्धे ॥ तमाल, शालवदेशे दा हविस्फोटहृतपुन ॥ कृष्णखदिरे ॥ ताम्यति । तमु० । तमिविशिविडी तिकालन् ॥ न । पत्रके । तेजपात इतिभाषा ॥

तमालकम् । न । सुनिषण्णशाके ॥ प त्रके ॥ पु । न । तमालद्रुमे ॥

तमालपत्रम् । न । तापिञ्छ । कालस्क न्धे ॥ तिलके ॥ पत्रके । तेजपात- इतिभाषा ॥ तमालस्य पत्रमिव तद्दा

तिर्य्यत्तमोहरम् ॥ त्रि । तमसो हर
णकर्त्तरि ॥ हरति । हञ् । अच् ।
तमसोहरः ॥

तम्पा । स्त्री । } गवि । सैारभेय्याम् ॥
तम्बा । स्त्री । } इतिहेमचन्द्र ॥

तम्बिका । स्त्री । तकव्याम् ॥

तम्बी । स्त्री । तयी इति भाषाप्रसिद्धे
कान्दविकभाण्डे ॥

तय. । पु । रक्षके ॥ तयति । तयरक्ष-
णे गतैाच । अच् ॥

तरः । पु । तरणे ॥ न । लोभे ॥ तरति
। तॄ० । अच् । तरण वा । कन्दोरप् ॥

तरक्षः । पु । लकड इति प्रसिद्धे तरक्षौ ॥

तरक्षु । पु । मृगादने । तेंदुवाबाघ इ
तितरख इत्यादिनाम्नाख्याते क्षघु
व्याघ्रे ॥ तरगतिं मार्गं वा क्षिणोति
। क्षिणुहिंसायाम् । मित० डु ॥

तरक्षुक । पु । तरक्षौ ॥ स्वार्थेकन् ॥

तरङ्ग । पुं । वायुना नद्यादिजलस्य ति
र्य्यगूर्द्धप्लवने । भङ्गे । ऊर्म्याम् । लह
र हेउ इत्यादि भाषा ॥ तरति । तॄ
प्लवनसन्तरणयो । तरत्यादिभ्यश्चे
त्यङ्गच् ॥ अश्वादिसमुत्काले ॥

तरङ्गिणी । स्त्री । नद्याम् । तटिन्या-
म् ॥ तरङ्गा सन्त्यस्याम् । अतइनि
। पुष्करादिभ्यादिनिर्वा । ऋन्नेभ्यो
ङीप् ॥

तरङ्गितः । त्रि । भङ्गिमति । सञ्जात-
तरङ्गे ॥ तरङ्गा सञ्जाता अस्य । ता०
इतच् ॥ यद्वा । तरङ्गमत्कृतः मस्त
नात् तत्करोतीतिणिचि कर्त्तरि क्तः
। णाविष्टवद्भावान्मतुपो लुक् ॥

तरण. । पु । भेलके । उडुपे । डेँगा इति
भाषा ॥ स्वर्गे ॥ न । पारगमने । सन्त
रणे ॥ प्लवनपूर्वकदेशान्तरगमने ॥

तरणिः । पु । द्युमणो । सूर्य्ये ॥ भेलके
॥ अर्के । किरणे ॥ ताम्रे ॥ स्त्री ।
नैाकायाम् ॥ घृतकुमार्य्याम् ॥ तर-
न्त्यनेनसंसारम् । तरन्त्यनयाका ।
तॄ० । अर्त्तिसृधृधम्यश्यादिनातर
तेरनि. ॥

तरणिपेटकः । पुं । काष्ठाम्बुवाहिन्याम् ॥

तरणिरत्नम् । न । माणिक्ये ॥

तरणी । स्त्री । नावि ॥ घृतकुमार्य्याम्
॥ पद्मचारिण्याम् ॥ कृदिकारादि
तिङीष् ॥

तरण्ड । पु । न । वडिशीसूत्रबन्धन
काष्ठे । छड इतिडगन इतिचभाषा ॥
प्लवे ॥ नैाकायाम् ॥ कुम्भतुम्बीरम्भा
दिजप्लवे ॥ पु । देशविशेषे ॥ तर-
ति । तॄ० । बाहुलकादण्डन् ॥

तरण्डपादा । स्त्री । } नावि ॥ इ-
तरण्डा । स्त्री । } तिशब्दर-
तरण्डी । स्त्री । } त्नावली ॥

तरतम । अ । न्यूनाधिकभावेनेत्यर्थे ॥

तरत्-द् । स्त्री । भेलके । प्लवे ॥ प्लवमा के ॥ कारण्डवविहङ्गमे ॥

तरद्दी । स्त्री । कण्टकिवृक्षविशेषे । तीक्ष्णायाम् । रक्तबीजकायाम् ॥

तरड्टी । स्त्री । पक्वान्नविशेषे ॥ यथा । घृतेन मर्दितां दद्या कनिक्यां फेनयेत् ततः । विधाय वटिका स्तस्या घृते मन्दाग्निना पचेत् ॥ प्रक्षिप्ता खण्डपाकेन कर्पूरेण विमिश्रयेत् । ततएता' समरिचा स्तरद्वस्तु ता स्मृता. ॥ बल्या पुष्टिकरी हृद्या वृष्या पित्तानिलापहा । सुस्निग्धा कफदा च्यर्थं किञ्चित् तन्धामकुड्डिता ॥

तरन्त । पु । समुद्रे ॥ भेके ॥ वासरे । राक्षसे ॥ तीर्थने । तॄ० । तॄभूवहि वसीत्यादिनाझच् सचषित् ॥

तरन्ती । स्त्री । नौकायाम् ॥ तरति नीयतेऽनयात्रा । जच पिच्छान्ङीष् ॥

तरपण्यम् । न । आतरे । नद्यादिसन्तारशुल्के ॥ तरणम् । तॄ० । कदेरप् । तरस्य पण्यम् ॥

तरम्बुजम् । न । तरबूज इति प्रसिद्धे फले ॥ यथा । ज्येष्ठमासि मद्दृशानि पौर्णमास्यां निशार्द्धके । तृष्णातुरा महाकाली भ्रमन्ती पितृकानने ॥ तत्र सा स्वाप्नुया तस्यैफल दत्तं तरम्बुजम् ॥ तत्फलम् वयात् तुष्टा वरदासि हरप्रिया ॥ यो मे दद्यात् फलं रम्यं स चिरायुश्चतुर्युगमित्यु सरकामा ख्यातन्त्रम् ॥

तरल । पु । हारमध्यमणौ ॥ हारे ॥ तले ॥ त्रि । चञ्चले ॥ कामुके । षिङ्गे ॥ भास्वरे ॥ मध्यशून्यद्रव्ये ॥ द्रवीभूते ॥ तरति । तॄ० । अलच् ॥ तरलाति वा । आतद्धतिकः ॥ वृषादित्वाद्वा कलः ॥

तरलनयना । स्त्री । चञ्चलनेत्रायावनितायाम् ॥ तरलेलोलेनयनेयस्या ॥

तरलनयनि. । पु । वर्णवृत्तविशेषे ॥ द्विजवरगणयुग मुपनय सकुसुमनगणमिह रचय । सुदतिविमलमति फणिपतिनिगदितमरलनयनिरिति ॥ यथा । अपहर पुरहर भ्रमहर मभिनवकलियुगभयहर । हिमगिरिविहितशयनवर सुकृतसुलभशशधरेति ॥

तरललोचना । स्त्री । चञ्चललोचनायाम् ॥ तरले लोचने यस्या ॥

तरला । स्त्री । यवाग्वाम् ॥ सुरायाम् ॥ मधुमक्षिकायाम् ॥ तर लाति । ला० । क । टाप् ॥

तरलायित । पु । चञ्चलाचरिते ॥

तरलित । त्रि । आन्दोलिते । प्रेङ्खोलि

ते । कम्पिते । धूते । प्रेङ्खिते । क्षुभिते । त. ० इतच् ॥

तरवारि । पु । तरवार इतिप्रसिद्धे खड्गे ॥ इतिहेमचन्द्रः ॥ चतुरङ्गारिपोः सेनाश्छिन्दन्ती तरवारिभिरिति तन्त्रराजस्य ॥ विशेषस्तस्यान्यत्र खड्गपरीक्षायां युक्तिकल्पतरौ द्रष्टव्यः ॥

तरस । न । बले ॥ रोगे ॥ जवे । वेगे ॥ सवेगगतिवचने ऽस्यप्रयोग ॥ तीरे ॥ कपौ । प्लवगे ॥ वेगाख्यगुणे ॥ तरत्यनेन । तॄ० । असुन् ॥

तरसम् । न । मांसे ॥ तरोवलमस्मिन् । अर्शआद्यच् ॥

तरसा । अ । झटित्यर्थे । शैघ्र्ये ॥

तरस्थानम् । न । घट्टे ॥ तरस्थानम् ॥

तरस्वी । पु । गरुडे ॥ वायौ ॥ त्रि । शूरे ॥ वेगिनि ॥ तरोवलं जवोवाऽस्यास्ति । अस्मायामेधास्रजोविनि ॥

तरान्धु । पु । नौविशेषे । होडे । वचने ॥

तरालु । पु । नौकाविशेषे ॥

तरि । स्त्री । नौकायाम् ॥ वस्त्रादीनांपेटके ॥ दशायाम् ॥ तरन्त्यनया । तॄ० । अचइ ॥

तरिक । पु । प्लवे । भेलके ॥

तरिका । स्त्री । नावि ॥

तरिणी । स्त्री । नौकायाम् ॥

तरिता । स्त्री । तर्जन्याम् ॥ गाँजा इतिभाषाप्रसिद्धमत्तपर्याम् ॥ यथा । सविद्या कालकूटञ्च ताम्रकूटञ्च धुस्तुरम् । अहिफेन खर्जुरस त्वारिका तरिता तथेतितन्त्रम् ॥

तरित्र । पु । अरित्रे ॥ इतिहारावली ॥

तरी । स्त्री । वस्त्रादिपेटके ॥ द्रोण्याम् ॥ वेडायाम् । नावि ॥ गदायाम् ॥ धूमे ॥ दशायाम् ॥ तरन्त्यनया । तॄ । अचइः । कृदिकारादिति ङीष् ॥ पचादौतरडितिपाठान् ङीष् वा ॥

तरी । स्त्री । नावि ॥ तरन्त्यनया । तॄ० । अवितॄस्तृतन्त्रिभ्यईः ॥

तरीष । पु । स्वर्गे ॥ महोदधौ ॥ शोभनाकारे ॥ भेले ॥ व्यवसाये ॥ समर्थे ॥ वोधे ॥ तरन्ति येन । तॄ० । तॄभूभ्यामीषन् ॥

तरीषी । स्त्री । शक्रकन्यायाम् ॥

तरु । पु । अगमे । द्रुमे ॥ तरन्ति नरकमनेन रोपका । तॄ० । भृमृशीतॄचरीति उप्रत्यय ॥

तरुकुक्षि । पु । पक्षिविशेषे । वाग्गुदे । वागुड इतिभाषा ॥

तरुखण्ड । पु । तरूणां समूहे ॥ इभ्यादिभ्य खण्ड ॥

तरुजीवनम् । न । द्रुममूले ॥

तरुण । पु । एरण्डे ॥ स्थूलजीरके ॥ न । कुञ्जपुष्पे ॥ त्रि । यूनि । जाततारुण्ये ॥ नूतने ॥ तरति । तॄ० । योरम्च लोनेष्युनन् ॥

तरुणज्वर । पु । सप्ताहावधिज्वरे ॥ यथा । आसप्तरात्र तरुण ज्वरमाहुर्मनीषिण ॥

तरुणदधि । न । पञ्चदिनातीतदधिनि ॥

तरुणी । स्त्री । युवत्याम् । द्वितीयवयःप्राप्तायानार्याम् ॥ आषोडषाद्भवेद्बाला तरुणी त्रिंशतामतेत्युक्त ॥ तरति । तॄ० । योरम्चलोवेत्युनन् । वयसि चरमइतिङीप् । नञ्स्नञीकगिति वा ॥ गौरादिङीष वा । स्वरेविशेष ॥ घृतकुमार्याम् । सहायाम् । दन्तीवृक्षे ॥ चीडानामगन्धद्रव्ये ॥ सेवतीइतिभाषाप्रसिद्धे पुष्पे । सहायाम् । गन्धाख्यायाम् ॥

तरुणीकटाक्षमाल । पु । तिलकवृक्षे ॥

तरुतूलिका । स्त्री । } वादुल्याम् । वा तरुदूलिका । स्त्री । } दुड पक्षीइति भाषा ॥

तरुनख । पु । कण्टके ॥

तरुभुक् । पुं । वन्दाके ॥

तरुमृग । पु । वानरे ॥

तरुराग । पुं । नवीनपल्लवे । किसलये ॥

तरुराज । पुं । तालद्रुमे ॥

तरुरुहा । स्त्री । } वन्दाके ॥
तरुरोहिणी । स्त्री । }

तरुवल्ली । स्त्री । जतुकालतायाम् ॥

तरुविलासिनी । स्त्री । नवमल्लिकायाम् । सप्तलालतायाम् ॥ तरोर्विलासिनी ॥

तरुशायी । पु । खगे । पक्षिणि ॥

तरुसार । पु । कर्पूरे ॥ इतिशब्दावली ॥

तरुस्था । स्त्री । वन्दाके ॥

तरूट । पु । उत्पलकन्दे ॥

तर्क । पु । काङ्क्षायाम् ॥ वितर्के । व्यभिचारशङ्कानिवर्त्तके ॥ सचपञ्चविधः । यथा । आत्माश्रय. १ । अन्योन्याश्रय २ । चक्रक ३ । अनवस्था ४ । प्रमाणबाधितार्थक ५ इति ॥ ऊहे । अविज्ञाततत्त्वेर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थं ऊहे ॥ अनुमाने ॥ व्याप्यारोपेण व्यापकारोपे । व्याप्यारोपात् व्यापकप्रसञ्जने । यथा । वह्निर्नस्यात् तर्हिधूमोपि न स्यात् ॥ मीमांसादितर्कशास्त्रे । आगमाविरोधिन्यायेन आम्नायार्थपरीक्षणे । विचारे ॥ बुद्धिसाध्ये । स्वबुद्ध्यभूहमाने ॥ हेतुदृष्टान्तात्मनि ॥ तर्कणम् ।

तर्कभावार्थश्चुरादौ पटपुटेतिदण्डके पठित । भावेघञ् ॥ तर्कोऽर्थवाद इति कर्कोपाध्याय । यथा । अक्ता शर्करा उपदधातीतिविधि श्रूयते । तत्राञ्जनसाधन घृत तैल वा तन्मध्ये केनाक्ता इतिसंशये तेजो वै घृतमित्यर्थवादात् घृतेनाक्ता इति निर्णीयते। अतस्तर्को ऽर्थवाद ॥ तर्कोमीमांसेति कल्पतरुकार ॥*॥ अचिन्त्या खलु येभावा न तांस्तर्केण योजयेत्। नाऽप्रतिष्ठिततर्केण गम्भीरार्थस्यनिश्चय ॥

तर्कक । पु । याचके ॥ तर्ककारके ॥

तर्कयत् । त्रि । उत्प्रेक्षमाणे ॥

तर्कविद्या । स्त्री । आन्वीक्षिक्याम् ॥ तर्कस्य न्यायस्य विद्या ॥ तथाहि । चतुर्विधेभ्य पृथिव्यादिपरमाणुभ्योविश्वमुत्पद्यते त एवोपादानभूता नान्यत्। निमित्तकारणमीश्व कर्तृत्वात् कुलालवदिति तर्कविद्याया प्रमेयम् ॥*॥ अहोदुर्मतय.सर्वा पुरुषस्य निरूपणे। तर्कविद्या न जानन्ति अमेय पुरुषोत्तमम् ॥ अमेयम् अभिन्ननिमित्तोपादानत्वात् । यतएतदपि न जानन्ति सर्वं प्रमेयजात घटादिवत् कार्यमिति परमाणूपादानकारणमप्यपेक्षणीयमेवेति । परमाणूनां प्रमेयत्वहेतुना कार्यत्वसिद्धौ तदुपादानमपेक्षणीयम् । एव तत्तत्तदुपादानमपेक्षणीयम् । एव तत्तत्तपीत्थमनवस्था स्यात् । अतोऽप्रमेय: परमात्मैवोपादान नान्यदन्यकल्पितम् अनपेक्षणात् । तथाहि। अम्भ शीतकराम्तरीक्षनगरस्वप्नेन्द्रजालादिवत कार्यं मेय मसत्यमेत दृश्यत्वादियुक्त जगत् । शुक्तौ रूप्यमिव स्रजी भुजग स्वात्मावबोधे हरा वस्नाते प्रभवत्यथास्तमयते तत्त्वावबोधोदयादिति प्रबोधचन्द्रोदय ॥

तर्कारी । स्त्री । जयाद्रुमे । अरणी इतिभाषा । जाड़ी इतिकश्चित् । तर्कमृच्छति । ऋगतौ । कर्मण्यण् । ङीप् । गौरादित्वान् ङीष् वा ॥

तर्क्षिण । पु । } द्रुमे ॥ इतिरत्न
तर्क्षिल । पु । } माला ॥

तर्की । त्रि । तर्कविशिष्टे । मीमांसके ॥ यथा । त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठक । त्रयश्चाश्रमिण पूर्वे परिषत् स्याद्दशावरेतिमनु ॥

तर्कु । पु । कपासनालिकायाम् । तर्कुण्याम् ॥ कृन्त्यतेनेन । कृतीवेष्टने । कृतेराद्यन्तविपर्ययश्छेश्च । ककारतकारयोर्विनिमय । तकुआ इति भाषा ॥

तर्कुटम् । न । कर्त्तने । कातना इति भाषा ॥ इतित्रिकाण्डशेष. ॥

तर्कुटी । स्त्री । तर्कुः ॥ इतिहारावली ॥

तर्कुपिण्ड । पु । तर्कुस्थितसूत्पिण्डे । वर्त्तुलायाम् ॥ इतिहारावली ॥

तर्कुपीठी । स्त्री । तर्कुपिण्डे ॥ इति हारावली ॥

तर्कुलासक । पु तर्कुभ्रमणयन्त्रे । जल्लोले । चरखा इतिभाषा ॥ इ०हा० ॥

तर्कुशाण । पु । तर्कुघर्षणपाषाणे । जामरे । सामके ॥ इतित्रिकाण्डशेष' ॥

तर्क्षु । पु । तरक्षुके ॥ इतिशब्० ॥

तर्क्ष्य । पु । यवक्षारे ॥

तर्ज्जनम् । न । भर्त्सने ॥ भयजनने ॥ तर्ज्ज० । ल्युट् ॥

तर्ज्जनी । स्त्री । प्रदेशिन्याम् । अङ्गुष्ठनिकटाङ्गुलौ ॥ तर्ज्यते ऽनया । तर्जभर्त्सने । करणे ल्युट् ॥

तर्ज्जिक । पु । देशविशेषे । तायिके ॥

तर्ज्जित । त्रि । भर्त्सिते ॥ तर्ज्यतेस्म । तर्जभर्त्सने । क्त ॥

तर्ण । पु । वत्से ॥ तृणोति तर्णोति वा । तृणु अदने । अच् ॥

तर्णक । पु । गोपुत्रे । वत्से । बच्छा इतिभाषा ॥ सद्योजातस्तु तर्णक ॥ तृणोति तर्णोतिवा । तृणु० । ण्वुल् ॥

तर्णि । पु । सूर्ये ॥ प्लवे ॥ इतिशब्दा० ॥

तर्त्तरीकम् । न । वहित्रे । पोते । जहाज इतियवनभाषा ॥ त्रि । पारगे ॥

तर्द्द । त्रि । हिंसके ॥ तर्द्दहिंसायाम् । अच् ॥

तर्द्दू । पु । दारुनिर्मितदर्व्याम् । दारुहस्तके । डोइ इतिभाषा ॥ जलतरणोपकरणे ॥ तरति० । तॄ० । चोदुट्चेत्यूर्दुडागमश्च ॥ तर्द्दति । तृणत्तिवा । तर्द्द० । उतृदिर्हिंसानादरयोर्वा । बाहुलकात् ऊ ॥

तर्प्पणम् । न । तृप्तौ ॥ प्रीणने ॥ यज्ञकाष्ठे ॥ महायज्ञविशेषे । पितृयज्ञे । पितृउद्देश्याम्बुदाने । पितॄणां कव्यवालादीनाञ्च विधिना जलान्नदाने न तृप्तिसम्पादने ॥ तद्विविधम् । प्रधानमङ्गञ्च ॥ तत्राद्य यथा । तर्पणञ्च शुचि कुर्यात् प्रत्यह स्नातको द्विज । देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम् ॥ विधवामधिकृत्य । तर्पण प्रत्यह कार्य भर्त्तु कुशतिलोदकै । तत्पितु स्तत्पितुश्चापिनामगोत्रादिपूर्वकमिति ॥ * ॥ द्वितीय यथा । नित्य नैमित्तिक काम्य त्रिविध स्नानमुच्यते । तर्पणन्तु भवेत्तस्य अङ्गत्वेन व्यवस्थितम् ॥ तर्पणाकरणे दोषोयथा । नास्ति

ष्णभावा ह्यस्यापि न तर्पयंति वैसु त'। पिबन्ति लेहनि स्रात्र पितरो वै जलाञ्थिन इति ॥ जीवत्पितृ कस्य तन्निषेधो यथा। दर्शस्नानगया श्राद्ध तिलैस्तर्पण मेवच। न जीवत् पितृको भूप कुर्यात् कृत्वाघमा प्नुयादिति॥ तृपप्रीणने। भावेल्युट्॥

तर्पणी। स्त्री। गुरुस्कन्धद्रुमे॥

तर्पणेच्छु। पु। भीष्म॥ त्रि। तर्पणा काङ्क्षे॥

तर्पिणी। स्त्री। चारव्याम्। पद्मचारि ण्यामोषधौ॥

तर्म्म। न। यूपाग्रे॥ तरति। तॄ०। सर्व्व धातुभ्योमनिन्॥

तर्हट। पु। वत्सरे॥ चक्रमर्द्दे॥

तर्ष। पु। लिप्सायाम्॥ उदन्यायाम् ॥ भेलके॥ तर्षणम्। त्रितृषपिपा सायाम्। घञ्॥ तरन्त्यनेन। तॄ०। वृतृवदी तसोञ्रा॥

तर्षणम्। न। तृषि। पिपासायाम्॥ त्रितृष०। ल्युट्॥

तर्षित। त्रि। सतृष्णे। तृषिते। तिसाया इति भाषा॥

तर्हि। अ। विशेषे॥ तदार्थे॥ तस्मिन् काले। अनद्यतनेर्हिलन्यतरस्याम्॥

तल। पु। तालमहीरुहे॥ चपेटे॥ त्सरौ॥ सव्येन पाणिना तन्त्रीघाते॥ आधारे॥ स्वभावे॥ पु। न। अधोभागे। अनूर्द्धे। तले इतिनीचे इतिच। भाषा॥ स्वरूपे॥ यथा। महीतलम्॥ न। कानने। वने॥ कार्य्यवीजे॥ आलवाले। गर्त्ते॥ पादतलस्यमध्ये॥ स्त्री। न।। ज्याघातवारणे॥ तलति। तलप्रतिष्ठाम्। पचाद्यच्॥

तलकम्। न। पुष्करिण्याम्। तलाव इतिहिंदू भाषा॥ इतिहारावली॥

तलप्रहार। पु। चपेटे। चर्व्वणि। तलाघाते॥

तलसारकम्। न। अश्वस्य वक्षस्थलबन्धनरज्जौ। वक्रपट्टे। तङ्ग इतिभाषा॥

तलहृदयम्। न। पादतलस्यमध्ये॥

तला। स्त्री। गोधायाम्। ज्याघात वारणे॥

तलाची। स्त्री। नलनिर्मितेकटे॥

तलातलम्। न। अतलादिषुपञ्चमेऽधोभुवने॥

तलिका। स्त्री। वक्रपट्टे। तलसारके॥

तलित्। स्त्री। विद्युति। तडिति॥ डलयोरेकत्वस्मरणात्वर्णविपर्य्यय॥

तलित। त्रि। आज्यादिभ्रष्टमासादौ॥

तलितमांसम्। न। पक्वमासप्रभेदे। भृष्टमासे॥ यथा। मुद्गमासविधाने न मांस सम्यक् प्रसाधितम्। पुनश्चदाज्ये सम्भृष्ट तलित प्रोच्यते बु-

र्द्धे ॥ तलितं बलमेधाग्निमांसौज शुक्रवृद्धिकृत् । तत्पथ्यं लघु सुस्निग्धं रोचनं दृढताकरम् ॥

तलिन । त्रि । विरले ॥ स्तोके ॥ स्वच्छे ॥ दुर्बले ॥ न । शय्यायाम् ॥ तलति तल्यते वा । तल० । तलिपुलिभ्यामिनन् ॥

तलिमम । न । कुट्टिमे ॥ तल्पे ॥ चन्द्रहासे ॥ विताने ॥

तलुन । पु । पवने ॥ यूनि ॥ तरति । तॄ० । त्रोरश्चलो वे च्युनन् ॥

तलुनी । स्त्री । युवत्याम् । तरुण्याम् ॥ वयस्यचरम इति नजुसंज्ञिति दा ङीप् । गौ० ङीष् वा ॥

तलेक्षण । पु । शूकरे ॥ इतिशब्दा० ॥

तलोदरी । स्त्री । भार्यायाम् ॥

तलोदा । स्त्री । नद्याम् ॥

तल्कम् । न । वने ॥ इतित्रिकाण्डशेष ॥

तल्पम । न । अट्टे ॥ कलत्रे । दारेषु ॥ शय्यायाम् ॥ तल्यतेऽस्मिन् । तल० । खष्पशिल्पशष्पेतिसाधु ॥

तल्पकीट । पु । मत्कुणे ॥

तल्पनम् । न । करिपृष्ठे ॥ पृष्ठवंशस्य मांसे ॥

तल्ल । पु । जलाधारविशेषे । तलाव इति हिन्दूभाषा ॥ न । बिले । आलवाले ॥ त्रि । तस्मिन् क्षीणे ॥

तल्लज । पु । मतल्लिकायाम् । प्रशस्ते ॥ लजति । लजकान्तौ । पचाद्यच् । तद्दल्लज । अयमजहल्लिङ्ग समासे उत्तरपदे भवति । यथा । प्रशस्ताकुमारी कुमारीतल्लज । तल्लजस्य रूढिशब्दत्वात प्रशसावचनैश्चेतिसमास ॥

तल्लिका । स्त्री । कुञ्चिकायाम् । कूर्चिकायाम् । कूची ताली इत्यादि भाषा ॥

तल्ली । स्त्री । तरुण्याम् ॥

तवक्षीरम् । न । पय क्षीरे । यवजे । तीखुर इतिभाषा ॥ तवक्षीरन्तु मधुरं शिशिरं दाहपित्तहृत । क्षयकासकफश्वासास्रदोषं हन्तिच सेवनात् ॥

तवक्षीरी । स्त्री । गन्धपत्रायाम् ॥

तवराज । पु । यवासशर्करायाम् ॥

तवराजोद्भवखण्ड । पुं । यवासशर्कराभवखण्डे । सिद्धमोदके ॥

तवर्ग । पु । तादिपञ्चवर्णेषु ॥

तवर्गीय । पु । तवर्गभवेवर्णे ॥ वर्गान्ताच्चेति ठक् ॥

तविष । पुं । स्वर्गे ॥ महोदधौ ॥ तवेतिसौत्रोधातु । तवेर्णिद्वेतिटिषच् ॥ सुवर्णे ॥ शोभनाकृतौ ॥ व्यवसाये ॥ भेले ॥

तविषी । स्त्री । शक्रकन्यायाम् ॥ धरित्र्याम् ॥ नद्याम् ॥ वैदिकनिघण्टौ तु बलेपि ॥ टित्वात् ङीप् ॥

तष्ट' । त्रि । तनूकृते ॥ तक्ष्यतेस्म । तक्षू० । क्त' । स्कोरितिकलोपेष्टुत्वम् ॥

तष्टि. । स्त्री । काष्ठतक्षणे ॥

तसर' । पु । वस्त्रजात्यन्तरे । टसर इति भाषा ॥ सूत्रवेष्टने । तासनी इति गौडभाषाप्रसिद्धे तन्तुवायोपकरणे ॥ तनोति । तनु० । तनूपृषिभ्योक्सरन् । अनुदात्तोपदेशेत्यादिनानुनासिकलोपः ॥

तस्कर । पु । चोरे ॥ द्विविधांस्तस्करान् विद्यात् परद्रव्यापहारकान् । प्रकाशांश्च प्रकाशांश्च चारचक्षुर्महीपतिः ॥ प्रकाशवञ्चका स्तेषां नानापण्योपजीविनः । प्रच्छन्नवञ्चकास्त्वेते येस्तेनाटविकादयः ॥ तत्करोति । दिवाविभेत्यत्र कियत्तदबहुष्विच्यच् ॥ तद्बृहतोः करपत्योरितिसुट्दलोपौ ॥ हमनवृक्षे ॥ पृक्काशाके ॥

तस्करस्नायु । पु । काकनासालतायाम् ॥

तस्करी । स्त्री । कोपनायां नार्याम् ॥

तस्थिवान् । त्रि । स्थितिमति । स्थितेः ॥ ष्ठा० । छन्दसिलिट् । द्विर्वाद्विका वेम् । लिट' कानजादेश. ॥ क्वसु-

श्चेतिक्वसुप्रत्ययोवा ॥

तस्थू । पु । स्थावरे ॥

ताच्छील्यम् । न । नियततत्स्वभावतायाम् ॥ भावेष्यञ् ॥

ताटङ्क' । पु । तालपत्रे । कर्णिकायाम् । ताडङ्के ॥ गुर्वक्षरेऽ ॥

ताटस्थ्यम् । न । उदासीनत्वे ॥ निकटस्थत्वे ॥

ताड । पुं । ताडने ॥ घोषे । शब्दे ॥ मुष्टिमेयतृणादिषु ॥ अद्रौ ॥

ताडका । स्त्री । राक्षसीविशेषे ॥

ताडकान्तक । पु । श्रीरामे ॥

ताडकाफलम् । न । वृहदेलायाम् ॥

ताडकेय । पु । मारीचराक्षसे ॥ ताडकाया अपत्यम् । स्त्रीभ्योढक् ॥

ताडङ्क । पु । कर्णभूषायाम् । कर्णदर्पणे । कानतडक्का इतिभाषा ॥

ताडनम् । न । आघाते ॥ यथा । शतापराधे वनितां पुष्पेणापि न ताडयेत् । दोषान्न गणयेत् स्त्रीणां गुणानेव प्रकाशयेदितिमान्त्रिका' ॥ लालने बहवोदोषा स्ताडने बहवोगुणाः । तस्मात् पुत्रञ्च शिष्यञ्च ताडयेन्नतु लालयेत् ॥

ताडनी । स्त्री । अश्वताडनयष्ट्याम् । कशायाम् ॥ ताड्यतेऽनया । तडआघाते । ण्यन्त. । ल्युट् । ङीप् ॥

ताडपत्रम् । न । ताडङ्के ॥

ताडागम् । न । तडागोदके ॥ यथा । प्रशस्तभूमिभागस्थो बहुसंवत्सरोषित । जलाशय स्तडाग. स्यात्ताडागंतज्जलं स्मृतम् ॥ ताडागमुदकं स्वादु कषायं कटुपाकि च । वातलं बहुविष्मूत्र मल्पकृत्पित्तकफापहम् ॥ तडागस्येदम् । अण् ॥

ताडिः । स्त्री । तालीद्रुमे । ताडियाल इतिगौड भाषाप्रसिद्धे ॥

ताडी । स्त्री । पत्रद्रुमे । ताडियाल-इति गौडभाषा ॥ आभरण विशेष इतिदुर्गसिंह. ॥

ताड्यमान. । त्रि । पटहादिवाद्ये ॥ त्रि । तत्कालसताडिते । हन्यमाने । ताडमयुक्ते ॥

ताण्ड । पुं । मुन्यन्तरे ॥

ताण्डव । पु । न । लास्ये । नृत्ये ॥ पुन्नृत्य ताण्डवंप्राहु स्त्रीनृत्य लास्यमुच्यते ॥ तण्डुना प्रोक्तम् । तेनप्रोक्तमित्यण् ॥ तृणान्तरे ॥ उद्धतनृत्ये ॥ चिबुचुन्नि (॥।) ॥

ताण्डवतालिक । पु । नन्दिनि । शिवद्वारस्थि ॥

ताण्डवप्रिय. । पुं । शिवे ॥ त्रि । नृत्यप्रिये ॥ ताण्डव प्रियं यस्य ॥

ताण्डवितम् । न । नर्त्तिते ॥

ताण्ड्य । न । नृत्यशास्त्रे ॥

ताण्डी । पु । साम. शाखाविशेषा ऽध्यायिनि ॥

तात. । पु । जनके । पितरि ॥ अनुकम्प्ये ॥ त्रि । पूज्ये ॥ चतुष्कले (ऽ॥) आदिगुरौ ॥ तनोति । तनु॰ । दुतनिभ्यांदीर्घश्चेति क्त. । अनुदात्तेति नलोप ॥

तातगु' । पु । पितृभ्राते । काका चाचा इतिभाषा ॥ त्रि । जनकस्यहिते ॥

तातजनयित्र्यौ । स्त्री । मातापित्रो. ॥ द्विवचनान्तोयम् ॥

ताततुल्य । त्रि । पितृसमे । मनोजवे ॥ तातेन तुल्य' ॥

तातन । पु । खञ्जने ॥

तातल. । पु । वह्नि । रोगे ॥ पाके ॥ लोहकूटे ॥ मनोजवे । ताततुल्ये ॥ त्रि । ततभावे ॥

ताति । पु । पुत्रे ॥ इतिजटाधरः ॥

तात्कालिक । पुं । तत्कालभवे ॥

तात्कालिकविकार. । पु । विलासाख्ये भावे ॥ तात्कालिकविकार स्यादि लासो ऽङ्गक्रियादिषु ॥

तात्पर्य्यम् । न । तत्परतायाम् ॥ वक्तुरिच्छायाम् ॥ अभिप्राये ॥ तत्परस्य भावः । ष्यञ् ॥

ताद‌र्थ्यम् । न । तदर्थत्वे । तस्मै इदम्

तदर्थम् । तस्य भावः । ब्राह्मणादित्वात् ष्यञ् ॥

तादात्म्यम् । न । तत्स्वरूपे ॥ अभेदसम्बन्धे ॥ तस्य आत्मा तदात्मा । तदात्मनो भाव । ब्रा० ष्यञ् ॥

तादृक्षः । त्रि । तादृशि ॥ स इवदृश्यते । तमिव पश्यति वा । दृशिर् प्रेक्षणे । त्यदादिषु दृशोऽनालोचने कञ् च इति कस.। आसर्वनाम्न. इत्यत्र दृक्षे चेतिवार्त्तिकेनात्वम्

तादृक् ग् । त्रि । तथाविधे। उपमानगोचरे ।तादृशे ॥ तमिवेमपश्यन्ति सदृशार्थं पश्यति दृश्यते वा ।त्यदादिषु दृशोऽनालोचने कञ् । आसर्वनाम्नइत्यात्वम् ।ग्रस्चेति ष ।क्विन्प्रत्ययस्य कुः । चर्त्वम् ॥

तादृश ।पु । तादृशि ॥ सइवदृश्यते तमिवपश्यतिवा । त्यदादिर्ष्विति कञ् ॥

तान. । पु । गानाङ्गविशेषे ॥ यथा । वितायंते प्रयोगा यै र्मूर्च्छनाशेषसंश्रया । तानास्तेप्यूनपञ्चाशत् सप्तस्वरसमुद्भवा ॥ तेभ्य एव भवन्त्यन्ये कूटताना पृथक् पृथक् । तत्सु पञ्चसहस्राणि चयस्त्रिंशच्छतानिच॥ न। विस्तारे ॥ ज्ञानविशेषे ॥

तानवम् । न । तनुत्वे ॥ गात्रेतनुतायाम् ॥ यथा । तानवं तनुताङ्गे दैर्घ्यस्थमत्वादिकृत् ॥ तनोर्भाव । इगन्ताच्चेत्यण् ॥

तानूर । पुं । आवर्त्ते । पयसाभ्रमे ॥

तान्त । त्रि । ग्लाने ॥ क्लान्त । श्रान्ते ॥

तान्तव. । त्रि । प्रावरणान्तरे ॥ तन्तूनाविकार । ओरञ् ॥

तान्त्रिक । त्रि । ज्ञातसिद्धान्ते ।शास्त्रतत्त्वज्ञे । प्रज्ञादिनि कौलिके । यथानरेषु तन्त्रज्ञा. सरितां जाह्नवी यथा। यथाऽवर्णादिवेशाना मागमानामिदंतथा ॥ तन्त्रं सिद्धान्त मधीते वेदवा । ऋगयादिभ्याट्ठक् ॥ तन्त्रसम्बन्धिनि ॥

ताम्बूरम् । न । मांसव्यञ्जनप्रभेदे ॥ यथा । अङ्गारपूर्णगर्त्ते वद्धच्च मवलम्बितम् । सघृत मिश्रित मांसमत्र ताम्बूर मुच्यते ॥ सुस्वादुताम्बूरम् । पचेत्सैकारीचक्रं वह्निसम्भारसम्भृतम् । चतुर्दिक्कुण्डकाकारे पार्श्वप्रज्वलितानले। विपक्व सुरभि स्वादु ताम्बूरमिति कीर्त्तितम् ॥ अन्यच्च । कोद्दिकाया सुसम्भार मवलम्बमवलम्बितम् । मांसं पिधाय वा ज्वालितायास्वेदित वरम् ॥ ताम्बूर क्वचिद् वल्य मृदु पथ्यतम स्मृतम् । तथोक्त नव त्सूप मन्यथा

दोषवारकमिति ॥
ताप । पुं । सन्तापे ॥ कृच्छ्रे ॥ तपनम् । तपसन्तापे । घञ् ॥
तापक' । पुं । ज्वरे ॥ त्रि । तापकृति ॥ तापयति । तप० । ण्वुल् ॥
तापत्य । पुं । अर्जुने ॥ इति पु० ॥
तापत्रयम् । न । आध्यात्मिकाधिभौतिकाधिदैविकदुःखत्रये ॥ आध्यात्मिकादिभैदेय त्वात्वा तापत्रयं बुधः । उत्पन्नज्ञानवैराग्यःप्राप्नोत्यात्यन्तिकं फलम् ॥ तापानां त्रयम् ॥
तापन । पुं । सूर्ये ॥ कामवाणे ॥ असुरविशेषे ॥ सूर्यकान्तमणौ । त्रि । तापके । तापयितरि ॥ तापयति । तप० । कर्त्तरि ल्युः ॥
तापनीय । पुं । निष्कपरिमिते सुवर्णे ॥ तपनीयस्य विकारःपरिमाणः । जातरूपेभ्य.परिमाण इत्यण् ॥
तापस' । पुं । दमनकवृक्षे ॥ वकपक्षिणि ॥ न । तमालपत्रे । तेजपात इतिभाषा ॥ त्रि । तपस्विनि ॥ वानप्रस्थे ॥ तपोऽस्यास्ति । अणुचेत्यण् ॥ यद्वा । तप शीलमस्य । छत्रादिभ्योण' ॥
तापसतरु । पुं । } इङ्गुदीवृक्षे । इंगुआ इतिभाषा ॥ तापसोपयुक्तस्तरु ॥
तापसद्रुम । पुं । }
तापसद्रुमसन्निभा । स्त्री । गर्भदात्री क्षुमे ॥
तापसप्रिय' । पुं । पियालद्रुमे ॥
तापसप्रिया । स्त्री । द्राक्षायाम् ॥
तापसेष्ट' । पुं । पियाले । चारे ॥
तापहरी । स्त्री । ताहरी इति प्रसिद्धे व्यञ्जनपदार्थे ॥ यथा । घृते हरिद्रा संयुक्ते माषाणां भर्जयेद्वटीः । तण्डुलांश्चाऽपिनिर्द्दोषान् सद्यैवपरिभर्जयेत् ॥ सिद्धियोग्यं जलं तत्रक्षिप्य कुशलः पचेत् । लवणार्द्रकहिङ्गूनि मात्रया तत्रनि'क्षिपेत् ॥ एषासिद्धि समायाता प्रोक्ता तापहरीबुधैः ॥ भवेत्तापहरीवल्या वृष्या श्लेष्मा प्रसादकरेत् । हृद्यशीतपैत्तीवल्यागुर्वी तत्र गुणा'स्मृताः ॥
तापिञ्छ । पुं । तमालवृक्षे ॥ तापिन छादयति । छद० । कर्मण्यण् । पृषोदरादिः ॥ न । तमालपुष्पे ॥ तापिञ्छस्यपुष्पम । फलेलुगितितद्धितलुक् । विशेन प्रसवे सर्वभिति क्लीवता ॥
तापिञ्जम् । न । धातुमाक्षिके ॥ इति राजनिर्घण्टः ॥
तापित' । त्रि । पीडिते ॥ जातसन्तापे ॥ तपणया इति भाषा ॥ ताप'सञ्जातोस्य । ता० इतच् ॥
तापी । पुं । बुद्धे ॥ त्रि । तापवति ॥

तामोस्या ऽस्ति । अतइनिठमाविनीति ॥

तापी । स्त्री । विन्ध्याद्रिप्रसिद्धायां पश्चिमवाहिन्यां सरिति ॥ यमुनायाम् ॥

तापोजम् । न । स्वर्णमाक्षिके ॥

ताप्यः । पु । न । धातुमाक्षिके ॥

ताप्यकम् । न । माक्षिके ॥

ताभ्रः । पु । भीषणे ॥ दोषे ॥

तामरम् । न । जले ॥ घृते ॥ इ° वद्र ॥

तामरसम् । न । पद्मे ॥ ताम्रे ॥ काञ्चने ॥ तामरे जले सरति । सरस्वमे । अन्येभ्योपीतिड. ॥ यद्वा । तम्यते । तमु° । घञ् । नोदात्तोपदेशस्येतिनिषेधस्यानित्यत्वान्न वृद्धिनिषेधः । रस्यते । रसआस्वादे । चु° । अदन्त । एरच् । तामश्चतद्रसञ्च ॥ जगतीछन्द प्रभेदे । यथा । इह वद तामरसं ननजाय ॥ स्फुटसुषमामकरन्दमनोज्ञं व्रजललनानयनालिनिपीतम् । तवमुखतामरसं मुरशत्रो हृदयतडागविकाशि ममास्तु ॥

तामलकी । स्त्री । भूम्यामलक्याम् ॥ तामस्या सा चामलकीच । पृषोदरादि ॥

तामलिप्तम् । न । } तमोलुकइति

तामलिप्ती । स्त्री । } प्रसिद्धे दामलिप्ते देशे । विष्णुगृहे ॥

तामसः । पु । भुजगे ॥ खले ॥ उलूके ॥ भूताद्यहङ्कारे ॥ अधर्माज्ञानावैराग्यानैश्वर्याभिधानेषु चतुर्षु बुद्धिधर्मेषु ॥ चतुर्थेमनौ ॥ न । कृष्णधने ॥ यथा । पार्श्वकद्यूतचौर्यार्तिप्रतिरूपकसाहसैः । व्याजेनोपार्जितं यत्तु तत् कृष्णं समुदाहृतम् ॥ पार्श्वक अपात्र सम्पादतया योर्जयति । आत्मोपकारीइया । प्रतिरूपकेण कृत्रिमरत्नादिना । साहसेन समुद्रयानगिर्यारोहणादिना । व्याजेन ब्राह्मणवेषेणशूद्रादिना । कृष्णं तामसम् ॥ त्रि । तमसायुक्ते ॥ तमोवृत्तौ ॥

तामसकीलकः । पु । राहुसुतेषु केतुष ॥ यथा । तामसकीलकसञ्ज्ञा राहुसुता केतव स्त्रयस्त्रिशत् । वर्णस्थानाकारै स्तान् दृष्ट्वार्कफलं ब्रूयात् ॥ तेषार्कमण्डलगता पापफला श्चन्द्रमण्डले सौम्या । ध्वाङ्क्षकबन्धप्रहरणरूपा. पापा भ्राङ्क्षेऽपि ॥ तेषामुदये रूपाणाम्भ कलुषं रजोवृतं व्योम । नगतरुशिखरामर्द. सशर्करो वातिमारुतश्चण्ड. ॥ ऋतुविपरीतास्तरवोदीप्ता मृगपक्षिणोदिशादाहा. । निर्घातमहीकम्पाद्या भवन्त्यथचोत्पाता. ॥ अम्भ.कलुषादीनामुत्पातानां नि

ष्फलस्तमाह । न पृथक् फलानि- तेषां शिखिकीलकराहुदर्शनानि यदि । तदुदयकारणं मेषां केत्वादीनां फलक्रमाद् ब्रूयात् ॥*॥ तामसकीलाना दर्शनवशात् फलमाह। यस्मिन् यस्मिन् देशे दर्शन माया न्ति सूर्यबिम्बस्था । तस्मिंस्तस्मिन् व्यसन महीपतीनां परिज्ञेयम् ॥ ॥ क्षुतप्रम्लानशरीरा मुनयोप्युत् सृष्टधर्मसच्चरिता । निर्मांसबालहस्ता. कृच्छ्रेणायान्ति परदेशम् ॥ तस्करविलुप्तवित्त. प्रदीर्घनिःश्वास मुकुलितक्षिपुटा' । सन्त सन्नश रीरा' शोकोद्भववाष्पसद्धृष्टा ॥ चामा जुगुप्समाना स्वनृपतिपरचक्र पीडिता मनुजा।स्वनृपतिचरितक र्मच पुराकृत प्राप्नुवन्त्यन्ये ॥ गर्भेष्व पिनिष्पन्ना वारिमुचो न प्रभूतवारि मुच । सरितो यान्ति तनुत्व क्वचित् क्वचिज्जायते सस्यम्॥*॥ तेषामाकृतिवशेनफलमाह।दण्डेनरेन्द्रमृत्यु र्व्याधिभय स्यात्कबन्धसस्थाने ।ध्वाङ्क्षेचतस्करभय दुर्भिक्ष कीलकेऽ र्कस्थे ॥ राजोपकरणरूपैश्छत्रध्वज चामरादिभिर्विद्ध: । राजान्यत्वकृद र्क. स्फुलिङ्गधूमादिभिर्जनहा ॥ एकोदुर्भिक्षकरोद्व्याद्या.स्युर्नरपतेर्वि नाशाय। सितरक्तपीतकृष्णैस्तैर्विद्धोऽर्कोऽनुवर्णघ्न' ॥*॥ विशेषफलान्याह । दृश्यन्तेच यत स्तेरविबिम्बस्थोत्थि तामसोत्पाताः । आगच्छतिलोका नां तेनैवभयं प्रदेशेनेति वाराहीसंहिता ॥

तामसयज्ञ । पु । यज्ञविशेषे ॥ यथा । विधिहीन मसृष्टान्न मन्त्रहीन मद क्षिणम् । श्रद्धाविरहितं यज्ञं तामस परिचक्षते ॥ तामसानां यज्ञ. ॥

तामसाहारः । पु । तामसप्रकृतीनामाहारे ॥ यातयाम गतरस पूतिप र्युषितञ्चयत् । उच्छिष्ट मपिचामेध्य भोजनं तामसप्रियम् ॥

तामसिकः । त्रि । तामसे । तमोगुणकार्ये ॥

तामसी । स्त्री । निशायाम् ॥ दुर्गायाम् ॥ तमोन्वितायाम् ॥ जटामांस्याम् ॥

तामिस्र । पु । विपर्ययविशेषे ॥ सचाष्टादशधा । यथा । शब्दादयोदशवि षया रञ्जनीया. स्वरूपत' । ऐश्वर्य ञ्चाणिमादिक नस्वरूपतोरञ्जनीयम् । किन्तुरञ्जनीयशब्दाद्युपायः । ते चशब्दादय उपस्थिता. परेणोपह न्यमाना स्तदुपायाश्चाणिमादयः स्वरूपेणैव कोपनीया भवन्तीति श

व्दादिभिर्दशभि सहाखिमायष्टक- मष्टादशेति। तद्विपयोद्देषस्तामि स्त्रो ऽष्टादशविषयस्त्वादष्टादशधेति साङ्ख्या ॥ भोगेच्छाप्रतिघाते सति क्रोधे ॥ राक्षसे। तमिस्त्राचारिणि ॥ न। अन्धकारमये नरके ॥ परवित्तापत्यकलत्रापहर्त्ता यमदूतैर्यैर्निपात्यते ॥ तमिस्त्र मस्मिन अस्त्याऽस्मिवा । ज्योत्स्ना तमिस्त्र- त्ययण् ॥

ताम्बूलम्। न। क्रमुके। गुवाके ॥ नागवल्लीदले। पानइति प्रसिद्ध ॥ ताम्यति। तमु। पिच्छादित्वात् ऊलच्, धातोर्वुक् दीर्घत्वञ्च ॥ ताम्बूल कटु तिक्त मुष्णमधुर क्षार कषायान्वित वातघ्न कृमिनाशन कफहरं दुर्गन्धनिर्नाशनम्। वक्त्रस्याभरण विशुद्धिकरण कामाग्निसन्दीपनं ताम्बूलस्य सखे त्रयोदशगुणा स्वर्गेपिते दुर्लभा ॥ अपिचाहु। ताम्बूल विशद रुच्य तीक्ष्णोष्ण तुवर सरम्। वश्यतिक्त कटु क्षार रक्तपित्तकरं लघु ॥ बल्यश्लेष्मास्यदौर्गन्ध्यमलवातश्रमापहम् ॥ * ॥ अनिधाय मुखेपर्णं पूग स्वादयते नर। मतिभ्रंशो दरिद्र. स्यादन्ते न स्मरते हरिम ॥ * ॥ पर्णमूले वसेद्व्याधि पर्णाग्रे पापसञ्चय। चूर्णपर्णं हरेदायुश्शिरावुद्धिविनाशिनी ॥ नायुरग्र विषमूले मध्य ऽलक्ष्मी र्व्यवस्थिता। तस्मादग्रञ्चमूलञ्च मध्य पर्णस्य वर्जयेत् ॥ चूर्णाधिक हरतिगन्ध मथाधिपूग राग तथाधिकदलञ्च सुगन्धिकारि। ताम्बूलमुत्तममिद रसनाग्रभिन्नपर्णनिशास्वधिकखण्डितपर्णमह्नि ॥ ताम्बूल न हित प्रोक्तं शरीरे रूक्षदुर्बले। ज्वरास्यशोषपित्तास्त्रमदमूर्च्छाचिरोगिषु ॥ ताम्बूलात्युपयोगात् स्याच्छोष पित्तानिलास्त्रता। देहदृक्केशदन्ताग्निश्रोत्रवर्णवलक्षय. ॥ * ॥ विना पर्णं मुखे दत्त्वा गुवाक भक्षये यदि। ताव द्भवति चण्डालो यावद्गङ्गा नगच्छति ॥ * ॥ ताम्बूल विधवास्त्रीणा यतीनां ब्रह्मचारिणाम्। तपस्विनाञ्चविप्रेन्द्रगोमांससदृश ध्रुवम् ॥ इति ब्रह्मवैवर्त्तपुराणम् ॥

ताम्बूलकरङ्क। पु। पानवट्टा इतिप्रसिद्ध ताम्बूलपात्रे। स्वग्याम् ॥

ताम्बूलद.। त्रि। वाग्गुलिके। ताम्बूलदातरि॥ इतित्रिकाण्डशेष.॥ ताम्बूल ददाति। डुदाञ्। आतदूतिक. ॥

ताम्बूलपत्र। पु। पिण्डालौ ॥

ताम्बूलराग.। पु। मसूरे ॥ ताम्बूल

रक्ते ॥

ताम्बूलवल्लिका । स्त्री । ताम्बूल्याम् ॥

ताम्बूलवल्ली । स्त्री । ताम्बूल्याम् ॥ ताम्यति । तमु० । क्विप् । अनुनासिकस्येतिदीर्घः । वेल्लति । वुकमंज्जने । चुरादीनांणि च्वा । इगुपधेतिक. । ताम् चासौवुलश्च । पृषोदरादि. । ताम्बूलाख्यावल्ली । शाकपार्थिवादिः ॥

ताम्बूलिक । पुं । ताम्बूलिनि ॥

ताम्बूली । वि । राशौ ताम्बूलाधिकृते । तंबोली इति प्रसिद्धे आभ्यन्तरे ॥

ताम्बूली । स्त्री । ताम्बूलवल्ल्याम् ॥ ताम्बूलात् गौरादिङीष् ॥

ताम्रम् । न । तांबा इतिप्रसिद्धे तैजसधातुविशेषे । शुल्वे । म्लेच्छमुखे । नैपालिके ॥ अस्योत्पत्यादयो यथा । शुक्रं यत् कार्त्तिकेयस्य पतितं धरणीतले । तस्मात् ताम्रं समुत्पन्न मिदमाहु. पुराविद ॥ जपाकुसुमसङ्काश स्निग्ध मृदुघनञ्चमम् । लोहनागोज्झितं ताम्र मारणाय प्रशस्यते ॥ कृष्णं रूक्षमतिस्तब्ध श्वेतञ्चापिघनासहम् । लोहनागयुतञ्चेति शुल्वं दुष्ट प्रकीर्त्तितम् ॥ ताम्रं कषाय मधुरं सतिक्तमम्लञ्च पाके कटु सारकञ्च । पित्तापहं श्लेष्महरञ्च शीतं तद्रोपणं स्याल्लघु लेखनञ्च ॥ पाण्डूदराशोंज्वरकुष्ठकासश्वासक्षयान् पीनसमम्लपित्तम् । शोथं कृमिं शूलमपाकरोति प्राहु. परे बृंहणमल्पमेतत् ॥ एकोदोषो विषं ताम्रेत्वसम्यङ्मारिते ऽष्टते । दाहःस्वेदोरुचिर्मूर्च्छा क्लेदोरेको वमिर्भ्रम. ॥ तस्यशोधनविधिर्यथा । पत्तलीकृतपत्राणि ताम्रस्याग्नौ प्रतापयेत् । निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके ॥ गोमूत्रे च कुलत्थानां कषायेच त्रिधात्रिधा । एवं ताम्रस्य पत्राणां विशुद्धिः सम्प्रजायते ॥ तस्य मारणविधिं यथा । सूक्ष्माणि ताम्रपत्राणि कृत्वा संस्वेदयेद्बुध. । वासरत्रयमम्लेन ततःखल्ले विनिः क्षिपेत् ॥ पादांश सूतकं दत्वा याममम्लेनमर्द्दयेत् । तत उद्धृत्य पत्राणि लेपयेद् द्विगुणेनच ॥ गन्धकेनाम्लघृष्टेन तस्य कुर्याच्च गोलकम् । ततः पिष्ट्वाचमीनाक्षीं चाङ्गेरीं सपुनर्नवाम् ॥ तत्कल्केन वहिर्गोलं लेपयेद् द्व्यङ्गलोन्मितम् । धृत्वातद्गोलकं भाण्डशरावेणचरोधयेत् ॥ वालुकाभिः प्रपूर्याथ विभूतिलवणाम्बुभिः । दत्वाभाण्डमुखेसम्यक् ततस्तच्चुल्ल्यां विपा

चयेत् ॥ क्रमवृद्ध्याग्निना सम्यक् याव यामचतुष्टयम्। स्वाङ्गशीतं समुद्धृत्य मर्दयेच्छूरणद्रवे ॥ यामैक गोलक तच्च निःक्षिपेच्छूरणोदरे। मृदालेपस्तु कर्त्तव्य सर्वतोऽङ्गुष्ठमात्रकः ॥ पाच्यं गजपुटे चैव मृतं भवति निश्चितम्। वमनञ्च विरेकञ्च भ्रम क्लममथारुचिम् ॥ विदाह स्वेदमुत्क्लेदं न करोति कदाचनेति ॥ अरुणे। शुल्वनिभे ॥ पु। कुष्ठरोगप्रभेदे ॥ त्रि। अरुणवर्णवति ॥ ताम्यति तम्यतेवा। तमु०। अमितम्योर्दीर्घश्चेति रक्दीर्घौ ॥

ताम्रकम्। न। ताम्रे ॥ स्वार्थेक ॥

ताम्रकर्णी। स्त्री। अञ्जननामपश्चिमदिग्हस्तिकरिण्याम्॥ ताम्रौ कर्णौ यस्याः। पाककर्णेति नासिकेति वा ङीष् ॥

ताम्रकार। पु। ताम्रकुट्टके। शौल्विके। कसेरा इति भाषा प्रसिद्धे वर्णसङ्करजातौ ॥ उत्पत्ति कंसकारे द्रष्टव्या। ताम्रंकरोति। डुकृञ्०। कर्मण्यण् ॥

ताम्रकुट्टक। पु। कांस्यकारे॥ ताम्रकुट्टयति। पु। कुट्टच्छेदे। कर्मण्यण्। स्वार्थेक ॥

ताम्रकूट। तमाखु इति प्रसिद्धे क्षुपे ॥ यथा। सविद्याकाचकूटञ्च ताम्रकूटञ्च धुस्तुरम्। अहिफेनं खर्जुरसस्तारिकातरिता तथा ॥ इत्यष्टौसिद्धिद्रव्याणि यथा सूर्याष्टक प्रिये इति कुलार्णवतन्त्रम् ॥

ताम्रक्रिमि। पु। इन्द्रगोपकीटे ॥

ताम्रगर्भम्। न। तुत्थे ॥

ताम्रचूड। पु। कुक्कुटे ॥ ताम्रा चूडाऽस्य ॥ कुक्कुरद्रुमे ॥

ताम्रत्रपुजम्। न। कांस्ये ॥

ताम्रदुग्धा। स्त्री। गोरक्षदुग्धायाम् ॥

ताम्रपट्टम्। न। ताम्रनिर्मितेलेखनपत्रे ॥ यथा। दत्त्वा भूमिंनिबन्धवाकृत्वालेख्यन्तुकारयेत्। आगामिभद्रन्नृपते परिज्ञानाय पार्थिव ॥ पटेवा ताम्रपट्टेवा समुद्रोपरिचिह्नितमिति मिताक्षरा ॥

ताम्रपत्र। पु। जीवशाके॥ न। ताम्रनिर्मितपत्रे ॥

ताम्रपर्ण। पु। भारतवर्षीयोपद्वीपे॥

ताम्रपर्णी। स्त्री। चोलदेशवर्त्तिन्यां सरिद्धारायाम्॥

ताम्रपल्लव। पुं। अशोकतरौ ॥

ताम्रपाकी। पु। गर्द्दभाण्डवृक्षे ॥

ताम्रपादी। स्त्री। हंसपद्याम् ॥

ताम्रपुष्प। पु। भूमिचम्पके। भूंचांपा इति भाषा ॥ केविदारे। रक्तकाञ्चने ॥

ताम्रपुष्पिका । स्त्री । जपाकुसुमे ॥ रक्तत्रिवृति ॥

ताम्रपुष्पी । स्त्री । धातक्याम् ॥ पाटलावृक्षे ॥ जपायाम् ॥

ताम्रफलः । पु । अङ्कोठवृक्षे ॥

ताम्रमूला । स्त्री । दुरालभायाम् ॥ लज्जालौ ॥ कच्छुरायाम् । खिराइ इतिगौडभाषा ॥

ताम्रवर्णः । पु । पञ्चिवाहवृक्षे ॥

ताम्रवर्णा । स्त्री । जवायाम् ॥

ताम्रवल्ली । स्त्री । चित्रकूटादिदेशप्रसिद्धायां ताम्रायां लतायाम् । ताल्याम । तमाल्याम् ॥ मञ्जिष्ठायाम् ॥

ताम्रबीजः । पुं । कुलत्थे ॥

ताम्रवृक्षः । पु । कुलत्थे ॥ रक्तचन्दने ॥

ताम्रवृन्तः । पुं । कुलत्थे ॥

ताम्रवृन्ता । स्त्री । कुलत्थिकायाम् ॥

ताम्रशिखी । पु । कुक्कुटे ॥

ताम्रसारम् । न । रक्तचन्दने ॥ इतिरत्नमाला ॥

ताम्रसारकम् । न । रक्तचन्दने ॥ पु । रक्तखदिरे ॥ इतिराजनिर्घण्टः ॥

ताम्रा । स्त्री । ताम्रवल्ल्याम् ॥ सैंहल्याम् ॥ ताम्रवर्णायाम् ॥

ताम्राकुः । पु । उपद्वीपभेदे ॥

ताम्राक्ष । पु । कोकिले ॥ ताम्रेअक्षिणीयस्य ॥ त्रि । ताम्रनयने ॥

ताम्राभम् । न । रक्तचन्दने ॥

ताम्राख्या । स्त्री । तीर्थविशेषे ॥

ताम्रार्द्धम् । न । कांस्ये ॥

ताम्राश्मा । पुं । पद्मरागमणौ ॥

ताम्रिकः । पु । कांस्यकारे ॥ त्रि । ताम्रसम्भवे ॥ ताम्रस्यायम् । अध्यात्मादित्वाट् ठञ् ॥ ताम्रघट्टनं शिल्पमस्य वा शिल्पमिति ठक् ॥

ताम्रिका । स्त्री । गुञ्जायाम् ॥ मानरन्ध्राख्याद्ये ॥

ताम्री । स्त्री । वाद्यविशेषे । मानरन्ध्रायाम् ॥ विकारिकायाम् ॥

तायनम् । न । स्फीततायाम् । समृद्धौ ॥ तायृसन्तानपालनयोः । ल्युट् ॥

तायिकः । पु । तर्णिकाभिधदेशे ॥

तारः । पुं । वानरविशेषे ॥ मुक्ताविशुद्धौ ॥ शुद्धमौक्तिके ॥ देवीप्रणवे ॥ यथा । काश्यां विश्वेश्वरोऽह गिरिपतितनया संयुता वामभागे शुण्डादण्डेन दक्षे त्रिपथगतटिनीतीरशुद्धाम्बुभागे । मायावीजञ्च कर्णे सुरमुनिसहितो ध्यानयुक्त वदामि प्रीत्या लोकस्य तस्मात् सुरमुनिगणा कैवच्यते तारनामेति ॥ प्रणवे ॥ गर्भजन्मजरामृत्युलक्षणाद्भयात्तार यतीतितारः ॥ तरणे ॥ शिरोभवध्वनौ ॥ स्त्री । न । नक्षत्रे ॥ नेत्र

मध्ये । कनीनिकायाम् ॥ न । रूप्ये ॥ अध्ययनरूपायांसिद्धौ ॥ चि । स्फुरितदीधितौ ॥ अच्युवनादे ॥ निर्मले ॥ अच्युद्वै. ॥ तारयति अतिक्रामति अन्यान् शब्दान् । तॄ० । बहुलमेतन्निदर्शन मितिचुरादिगणाद्द्वात् स्वार्थेणिच् । पचाद्यच् ॥ यद्वा । तार्यते ऽनेनवा । घञ् घोरा ॥

तारक । पु । दैत्यविशेषे ॥ कर्णधारे ॥ भेलके ॥ न । दृशि ॥ स्त्री । कनीनिकायाम् ॥ ऋक्षे ॥ त्रि । त्रातरि ॥ संसारसमुद्रस्य तरणकारणे तारयितरि ॥ अतिजगतीप्रभेदे वृत्तविशेषे । यथा । यदि तोटकवृत्त पदे गुरुरन्त्यम् भवतीह तदा किलतारकवृत्तम् । फणिनायकपिङ्गल वर्णित मेत द्वर पण्डितमण्डलिकाहृतचित्तम् ॥ यथा । अतिभारतरं हृदि चन्दनपङ्क मनुते सरसीपव न विषशङ्कम् । तवदुस्तरतारवियोगपयोधे नहि पारमसौ भविता परमाधे. ॥ तारयति । तॄ० । ण्वुल् ॥

तारकजित् । पु । कार्त्तिकेये । षडानने ॥ तारक जयति । जि० । क्विप् । तुक् ॥

तारकराज । पु । चन्द्रे ॥

तारका । स्त्री । न । नेत्रकनीनिकायाम् ॥ ऋक्षे । नक्षत्रे ॥ तारकाज्योतिषीत्यमरः ॥ स्त्री । इन्द्रवारुण्याम् ॥

तारकारि । पु । कार्त्तिकेये । महासेने ॥ तारकस्य दैत्यविशेषस्य अरिः ॥

तारकिणी । स्त्री । निशायाम् ॥

तारकितम् । न । नभसि ॥ तारका सञ्जाता अस्य । तदस्यसञ्जाततारकादिभ्यइतच् ॥

तारण । पु । भेलके ॥ अष्टादशेवत्सरे ॥ अतिवृष्टिश्च जायेत धान्यस्याग्रपीडनम् । शस्यभवति सामान्य तारणे सुरवन्दिते ॥ त्रि । तरणकारयितरि ॥ तारयति । तॄ० । ल्यु. ॥ सन्तारणे ॥

तारणि । स्त्री । नावि ॥

तारतण्डुल । पु । धवलयावनाले ॥

तारतम्यम् । न । तरतमयोर्भावे । न्यूनाधिक्ये ॥ यथा । निर्धन निधनमेतयोर्द्वयोस्तारतम्यविधिमुग्धचेतसाम् ॥ बोधनाय विधिना विनिर्मितो रेफएवजयवैजयन्तिका ॥

तारतारम् । न । आगमाविरोधिना न्यायेन आगमार्थपरीक्षारूपे ऊहे । तृतीयायांसिद्धौ ॥

तारदी । स्त्री । तरदीवृक्षे ॥

तारपुष्प । पु । कुन्दवृक्षे ॥

तारमाक्षिकम् । न । कृष्णमाक्षिके । रजतो पधातौ ॥ तारमाक्षिक मन्य स्तु तद्भवेद्रजतोपमम् । किञ्चिद्रजतसाहित्यात् तारमाक्षिकमीरितम् ॥ अनुकल्पतया तस्य ततोहीन-गुणा स्मृता. । न केवलं कृष्णगुणा वर्त्तन्ते तारमाक्षिके ॥ द्रव्यान्तरस्य संसर्गात् सन्त्यन्येपि गुणा यत.॥ स्यात् तारमाक्षिक स्वादु तिक्तं वृष्य रसायनम् । चक्षुष्य वस्तिरुक्कुष्ठपाण्डुमेहविषोदरम् ॥ अर्शः शोथ चार्यकण्डु त्रिदोष मपिनाशयेत् ॥ मन्दानलत्व बलहानि मुग्रां विष्टम्भितां नेत्रगदान् सकुष्ठान । तथैव मालां व्रणपूर्विकाञ्च करोत्यशुद्धं रजताख्यमाक्षिकम् ॥ शोधनन्तु । कर्कोटीमेषशृङ्ग्युत्थै द्रैवैर्जम्बीरजैर्दिनम् । भावये दातपे तीव्रे विमला शुद्ध्यतिध्रुवम् ॥ विमला तारमाक्षिकम । कर्कोटी खखसा । मारणन्तु कुलत्थस्य कषायेण घृष्टा तैलेन वापुटेत् । तैलेन वाजमूत्रेण म्रियते तारमाक्षिकम् ॥

तारल' । पु । विटे ॥ इतिभूरिप्रयोगः ॥

तारवायु । पु । अत्युच्चशब्दवतिपवने ॥

तारविमला । स्त्री । तारमाक्षिके ॥

तारशुद्धिकरम् । न । सीसके ॥

तारा । स्त्री । बुद्धदेवताभेदे ॥ पञ्चकन्यान्तर्गतकन्यायाम् । वालिसुग्रीवयोर्यैशायाम् ॥ सुरगुरोर्भार्यायाम् ॥ कनीनिकायाम् ॥ नक्षत्रे ॥ यथा । एकतार नभोदृष्ट्वा सन्तुष्टो नारदो मुनिः । तावद्भवति चण्डालो यावदन्य न पश्यति ॥ तत्रविज्ञानु शासनं यथा । हस्ता स्वाती श्रवणा भद्रावे मृगशिरा नपुंसि स्यात् । पुंसि पुनर्वसुपुष्यौ मूलस्त्वन्यौ स्त्रियां शेषा. ॥ शेषा. ताराइतिसम्बन्ध. ॥ चीडायाम् ॥ मुक्तायाम् ॥ शिवशक्तयाम् ॥ द्वितीयायां महाविद्यायाम् ॥ यथा । लीलया वाक्प्रदा यस्मात् तेनलीलसरस्वती । तारकत्वात् सदा तारा सुखमोक्षप्रदायिनी ॥ उग्रापत्तारिणी यस्मा दुग्रतारा प्रकीर्त्तितेति ॥ तरन्त्यनया । तॄ० । भि० अङ् । ऋदृशोऽङीतिगुणः । भिपासमादृदीर्घः । अदन्तत्वाट्टाप् ॥

ताराकूटम् । न । तृतीयेयोटके । तारामैत्र्याम् ॥ यथा । वर्णादिपिकन्यपं कन्यकावरभावधि । पृथगङ्कं कृ तेत्रय विपच्चसमभक्तत्वसद्गिति ॥

तारापति. । पु । शिवे ॥ चन्द्रे ॥ वृहस्पतौ ॥ वालिनि ॥ सुग्रीवे ॥

तारापथः । पु । आकाशे ॥

तारापीड । पु । निशाकरे । चन्द्रे ॥
ताराभूषा । स्त्री । रात्र्याम् ॥
ताराभ्र । पु । कर्पूरे ॥
तारामण्डल । पु । ईश्वरगृहविशेषे ॥
तारामार्ग । पुं । आकाशे ॥
ताराराचि । स्त्री । आगमोक्ते पर्वविशेषे ॥ यथा । भाद्रे मासि कृष्णपक्षे भौमवारे कुलर्क्षगे । मघराशौ सक्रमश्च सातारा रात्रिरीरितेति ॥
तारारि । पु । विटमाक्षिके ॥
तारावती । स्त्री । कालिकापुराणप्रसिद्धायां चन्द्रशेखरभूपपत्न्याम् ॥
तारिकम् । न । तरमूल्ये ॥
तारिका । स्त्री । ताडीतिख्याते तालरसे ॥
तारिणी । स्त्री । बुद्धदेवान्तरे । लोकेश्वरात्मजायाम् ॥ * ॥ शिवपत्न्याम् । द्वितीयायां महाविद्यायाम् ॥
तारुण्यम् । न । यौवने ॥ तरुणस्य भाव । ब्राह्मणादित्वात् ष्यञ् ॥
तारेय । पु । वालिवानरपुत्रे । अङ्गदे ॥ ताराया अपत्यम् । ढक् ॥
तार्क्कवम् । न । तर्क्कविकारे ॥ तदवयवे ॥ कोपधाच्चेत्यण् ॥
तार्क्किक । त्रि । तर्क्कतत्परे । तर्क्कशास्त्रविदि ॥ तर्क्कमधीते । ठक् ॥ स च षड्विधो यथा । स्याद्वादवाद्यार्हत: स्या च्छून्यवादीतु बौगत. १ । नैयायिकस्त्वक्षपादो २ । योग साङ्ख्यस्तु कापिल ३ । वैशेषिक स्यादौलूक्यो ४ । बार्हस्पत्यस्तु नास्तिक. ५ । चार्वाकोलौकायतिकश्चै ६ ते षड पिताकिका ॥ आत्मनोऽचिद्रूपवादिनोऽनात्मवा द्यौते स्वबुद्धिपरिकल्पित यदिच्छन्ति तद्वदन्ति ॥
तार्क्ष । पु । कश्यपे ॥
तार्क्षी । स्त्री । पातालगरुडीलतायाम् ॥
तार्क्ष्य । पु । अश्वे ॥ सर्पे ॥ गरुडाग्रजे ॥ गरुडे ॥ तार्क्षस्य कश्यपस्यापत्यम् । गर्गादित्वात् यञ् । बहुत्वे तार्क्षा. ॥ एकस्मिन्कल्पे तृक्षस्य मुनेरपत्यत्वात्तार्क्ष्योगरुड । गर्गादित्वात् यञ् । बहुत्वेयञञोश्चेतिलुकि तृक्षाइत्यन्ये ॥ सुवर्णे ॥ स्यन्दने ॥ अश्वकर्णाख्यतरौ ॥ न । रसाञ्जने ॥
तार्क्ष्यजम् । न । रसाञ्जने ॥
तार्क्ष्यध्वजः । पु । हरौ । विष्णौ ॥ इति हेमचन्द्र. ॥
तार्क्ष्यनायक । पु । गरुडे ॥ इतिराजनिर्घण्ट ॥
तार्क्ष्यप्रसव । पु । अश्वकर्णवृक्षे ॥
तार्क्ष्यशैलम् । न । सतुत्थया दार्व्या कृताञ्जने । रसगर्भे । रसाञ्जने ॥ तर्क्ष

शैले भवम् । अण् ॥

तालीकम् । त्रि । तृणनिर्मिते ॥

तालीयीक । त्रि । तृतीये ॥ तीया ट्टीकक् स्वार्थे वा वाच्य: ॥

ताल । पु । करतले ॥ अङ्गुष्ठमध्यमाभ्यां सम्मिते । विस्तृताभ्यामङ्गुष्ठमध्यमाभ्यां सम्मिते दीर्घपरिमाणविशेषे ॥ तलस्येव । तल० । इत्यमरे तिष्यत् ॥ करास्फाले । करास्फोटे ॥ कांस्यमयवाद्यभाण्डे ॥ त्सरौ ॥ तालद्रुमे । दीर्घपादपे । लेख्यपत्रे ॥ पक्व तालफलं पित्तरक्तश्लेष्मविवर्द्धनम् । दुर्जरं बहुमूत्रञ्च तन्द्राऽभिष्यन्दशुक्रदम् ॥ तालमज्जा तु तरुणः किञ्चिन्मदकरो लघुः । श्लेष्मलो वातपित्तघ्न. सस्नेहोमधुर सर. ॥ तालमज्जा तालफलवीजमज्जा । तालज तरुणं तोय मतीवमदकृन्मतम् । अम्लीभूतं तदा तत् स्यात् पित्तकृद्वातदोषहृत् ॥ * ॥ मानविशेषे ॥ यथा । तालो द्वादशभिर्जानुपरिणाहपरिभ्रमैरिति । हस्तेन जानुमण्डलपरिभ्रमणं यावत्या कालमात्रया क्रियते तावतीभिर्द्वादशभिस्तालाख्य. कालांशोज्ञेय ॥ * ॥ गीतकालक्रियामाने । अयंस्वर इयत् कालंगेय: इयत्कालं विलम्बितम् इयत्कालद्रुतम् इयत्काल मध्यमिति बोधयितुम् ईदृशैर्हस्तैरङ्गुल्याकुञ्चनप्रसारणादिक्रियाभि र्नर्त्तितव्यं गातव्यंचेत्येवरूपेकालक्रिययोर्माने ॥ कालस्य एकद्विविमात्राद्युच्चारणा नियमितस्य क्रियाया: परिस्पन्दात्मिकाया' परिच्छेदहेतुस्ताल: ॥ * ॥ तस्योत्पत्तिर्यथा । गौरीश्वरयोर्नृत्येन तालो बभूव । तस्यकारणम् । क्रिया कालस्य । ईश्वरनृत्यस्य ताण्डवम् गौर्यानृत्यस्य लास्यमितिसंज्ञा । अर्थात् पुरुषनृत्यस्य ताण्डवम् नार्यानृत्यस्य लास्य मितिनाम । ताण्डवलास्ययो राद्यक्षरयो र्मेलनेनतालइतिसंज्ञा ॥ * ॥ आदिगुरुत्रिकले (ऽ।) ॥ तालयति-तल्यते वा । चु० । पचाद्यच् । घञ् वा ॥ न । हरिताले ॥ तालीशपत्रे ॥ दुर्गासिंहासने ॥ तालफले ॥ धनुषि ॥ तालस्यविकार: । तालादिभ्योण् । तालाद्धनुषि । अन्यत्तालमयम् ॥

तालकम् । न । द्वारपिधानसाधनयन्त्रे । ताला इतिभाषा ॥ हरिताले ॥ तुवरिकायाम्

तालकाभ. । पु । हरितवर्णे ॥ त्रि । तद्वति ॥

तालक्षीरकम् । न । तालसम्भूतक्षीरे ॥

तालकी । स्त्री । } तालजसुरायाम्
तालती । स्त्री । } । ताडी इतिभाषा॥
तालध्वज । पु । बलदेवे ॥ तालो लेख्यपत्रो ध्वजोऽस्य ॥
तालनवमी । स्त्री । भाद्रशुक्लनवम्याम्॥
तालध्वजा । स्त्री । पुरीविशेषे ॥
तालपत्रम् । न । ताडङ्के । कर्णाभरणविशेषे । कर्णिकायाम् ॥ तालस्य पत्रम् । स्वर्णरचितस्या पीदमेवनाम ॥ तालतरो पर्णे ॥
तालपत्रिका । स्त्री । तालमूल्याम् ॥
तालपत्री । स्त्री । मूषिकपर्ण्याम् । रखडायाम् ॥ मधुरौषधौ ॥
तालपर्णम् । न । मुरानामगन्धद्रव्ये ॥
तालपर्णी । स्त्री । मुरानामनि गन्धवस्तुनि । गन्धिन्याम् ॥ ताल.पर्णमस्या । तालशब्द तालपर्णसदृशे लाक्षणिक । पाककर्णेतिङीष ॥ मधुरिकायाम् ॥
तालपुष्पम् । न । प्रपौण्डरीके ॥ तालद्रुकुसुमे ॥
तालभृत् । पु । बलदेवे ॥
तालप्रलम्बम् । न । तालजटायाम् ॥
तालमूलिका । स्त्री । तालमूल्याम् । मुसल्याम् ॥ तालोमूलमस्या' । तालशब्दस्तालमूलसदृशे लाक्षणिक । पाककर्णेतिङीष् । स्वार्थे कन् ॥
तालमूली । स्त्री । तालमूलिकायाम् । दीर्घकन्दायाम् । मुसल्याम् ॥ तालमूलीतु विद्वद्भि र्मुसलीति निगद्यते । मुसली मधुरा वृष्या वीर्योष्णा वृंहणी गुरु. । तिक्ता रसायनी हन्ति गुदजान्यनिल तथा ॥ ॥
ताललक्ष्मा । पु । बलदेवे ॥
तालवन्तम् । न । तालपत्रनिर्मिते व्यजने ॥ यथा । परे ब्रह्मणिविज्ञाते समस्तैर्नियमैरलम् । तालवृन्तन किङ्कार्यं लब्धे मलयमारुते ॥ अस्य वायोर्गुणा यथा । त्रिदोषशमनोवायुर्लघुरस्य प्रकीर्त्तितइति ॥
तालवृन्तकम् । न । व्यजने ॥ तालस्ये वृन्तमस्य । तालेकरतले वृन्तमिववन्धनमस्यवा ॥
तालव्यम् । त्रि । तालुजाते ॥ शरीरावयवत्वात् यत् ॥
तालाख्या । स्त्री । मुरायाम् ॥
तालाङ्क । पु । बलभद्रे । प्रलम्बघ्ने ॥ तालोहृच्चविशेषोऽङ्कोध्वजोऽस्य॥ करपत्रे ॥ शाकभेदे ॥ महालक्षणसम्पूर्णपुरुषे ॥ पुस्तके ॥ हरे ॥
तालावचर । पु । नटे ॥ इ०त्रि० ॥
तालि. । स्त्री । भूम्यामलक्याम् ॥
तालिक । पु । प्रसारिताङ्गुलिपाणौ । चपेटे । प्रतले ॥ लिखितस्यनिवन्ध

ने। कांचनक्याम् ॥

तालिका। स्त्री। चपेटे ॥ तालमूल्याम् ॥ ताम्रवल्ल्याम् ॥

तालितम्। न। वाद्यभाण्डे ॥ तुलितपटे ॥ गुणे ॥

तालिश.। पु। शैले। पर्वते ॥

ताली। स्त्री। जटायाम्। वितुन्नकौषधौ। भुंइ आवला इतिभाषा ॥ तालद्रुमे ॥ आढक्याम्। तुवरिकायाम्। अरहर इतिभाषा ॥ द्वारोद्घाटनयन्त्रे ॥ तालमूल्याम्। ताम्रवल्ल्याम् ॥ तालजातसुरायाम्। ताडी इति भाषा ॥ * ॥ मध्याख्यच्छन्दोभेदे ॥ यथा। ताली सा निर्दिष्टा। उद्दिष्टो मोयत्र ॥ यथा। जानीते जानीते। सा सारूप्यं वैरूप्यम् ॥ अस्य नारीत्यपि संज्ञोक्ताछन्दोमञ्जर्याम्। मोनारी ॥ तालयति। तल॰। पचाद्यच्। गौरादित्वाज्जातित्वाद्वाङीष् ॥

तालीपत्रम्। न। तालीशे ॥

तालीशम्। न। तालीशपत्रे ॥ तालीशं लघु तिक्तोष्णं श्वासकासकफाऽनिलान्। निहन्त्यरुचिगुल्मामवह्निमान्द्यक्षयामयान् ॥ भूम्यामलक्याम् ॥

तालीशपत्रम्। न। तालीशख्याते वृक्षविशेषे। धात्रीपत्रे। शुकोदरे ॥ भूम्यामलक्याम् ॥

तालु। न। काकुदे। जिह्वेन्द्रियाधिष्ठाने स्वनाम्नैव प्रसिद्धे ॥ तरन्त्यनेन वर्णाः। तॄ॰। त्रोरश्चल इति ञुण् ॥ तालयति। तल॰। चु॰। मृगय्वादित्वात् कुर्वा ॥

तालुकम्। न। तालुनि ॥ स्वार्थे यावादित्वात् कन् ॥

तालुजिह्वः। पु। कुम्भीरे ॥

तालूर.। पु। आवर्त्ते ॥

तावक'। त्रि। त्वदीये ॥ तवायम्। तस्येदमित्यण्। तवकममकावेकवचने इति तवकादेश.। स्त्रियां तावकी ॥

तावकीन'। त्रि। त्वदीये ॥ तवायम्। युष्मदस्मदोरन्यतरस्यांखञ्चेति खञ्। पश्चात्तवकादेश' ॥

तावत्। अ। माने ॥ अनुक्रमे ॥ अवधारणे ॥ सम्भ्रमे ॥ परिच्छेदे ॥ कार्त्स्न्ये ॥ अधिकारे ॥ अवधौ ॥ तत् परिमाणमस्य। तद्धिता इति बहुवचने नान्येऽनुक्ताअपि तद्धिता ज्ञापिता'। तेन डावतुप्रत्यय ॥ तदादित्यर्थे ॥ यथा। भर्त्तापितावत् क्रथकैशिकानामितिरघु ॥

तावान्। त्रि। तत्परिमाणविशिष्टे ॥ ॥ तत् परिमाणमस्य। यत्तदेतेभ्य

परिमाणे इति वतुप्। आसवंनानद्द्याल्लम् ॥

तावतिथ । त्रि । तावताम् पूरणे ॥ डट् । वतोरिथुक् ॥

तावरम् । न । चापगुणे ॥ इतिभूरि० ॥

ताविष । पुं । स्वर्गे ॥ समुद्रे ॥ काञ्चने ॥ तवेति सौत्रोधातुः । तवेर्णिद्वेतिटिषच् ॥

ताविषी । स्त्री । चन्द्रकन्यायाम् ॥ भूमौ ॥ नद्याम् ॥ देवकन्यायाम् ॥ टित्वान्ङीप् ॥

तावुरि । पु । वृषराशौ ॥ इतिहल० ॥

तालून. । पु । मणे ॥

तिक्त । पु । तीता इतिप्रसिद्धे रसे ॥ तिक्त शीत स्तृषामूर्च्छाज्वरपित्तकफान् जयेत् । रुच्य स्वयमरोचिष्णु कण्ठकन्याश्रशोधन ॥ सुगन्धे ॥ वरुणद्रुमे ॥ कुटजे ॥ न । पर्पटौषधौ ॥ त्रि । तिक्तरसान्विते ॥ तेजयति । तिज०। सामान्यापेक्षज्ञापका क्षुरादीनाणिजभावे गत्यर्थाकर्मके तिक्त ॥

तिक्तक । पु । पटोले ॥ भूमिनिम्बे । चिरतिक्ते । चिरायता इतिभाषा ॥ कृष्णखदिरे ॥ निम्बे ॥ इङ्गुदीवृक्षे ॥ तिक्तार्थे ॥ तिक्तएव । स्वार्थे कन् ॥

तिक्तकन्दिका । स्त्री । गन्धपत्रायाम् ॥

तिक्तकर्कोटकी । स्त्री । वन्ध्याकर्कोटिकायाम् । नागदन्त्याम् । बाँझककरोल इतिभाषा ॥

तिक्तका । स्त्री । तिक्तालाबाम् । कटुतुम्ब्याम् ॥

तिक्तगन्धिका । स्त्री । वराहक्रान्तायाम् ॥

तिक्तगुञ्जा । स्त्री । करञ्जे । चुद्ररसायाम् ॥

तिक्ततण्डुला । स्त्री । पिप्पल्याम् ॥

तिक्ततुण्डी । स्त्री । कटुतुण्डीलतायाम् ॥

तिक्ततुम्बी । स्त्री । कटुतुम्ब्याम् ॥ तिक्ताचासौतुम्बीच ॥

तिक्तदुग्धा । स्त्री । अजशृङ्ग्याम् ॥ क्षीरिण्याम् ॥

तिक्तद्रुम । पु । पञ्चतिक्ते ॥

तिक्तधातु । पु । पित्ते ॥

तिक्तपत्र । पु । कर्कोटके ॥ तिक्तानि पत्राणि यस्य ॥

तिक्तपर्वा । स्त्री । हिलमोच्याम् ॥ गुडूच्याम् ॥ मधुयष्ट्याम् ॥ दूर्वायाम् ॥

तिक्तपुष्पा । स्त्री । पाठायाम् ॥

तिक्तफल । पु । कतकवृक्षे ॥

तिक्तफला । स्त्री । यवतिक्तायाम्लतायाम् ॥ वार्त्ताक्याम् ॥ षड्भुजायाम् ॥

इति राजनिर्घण्टः ॥

तिक्तभद्र । पु । पटोले ॥

तिक्तमरिच । पु । कतकवृक्षे ॥

तिक्तरोहिणिका । स्त्री । } कटुका
तिक्तरोहिणी । स्त्री । } याम् । क

टुक्याम् ॥ तिक्ताचासौरोहिणीच ॥

तिक्तवल्ली । स्त्री । मूर्वालतायाम् ॥

तिक्तबीजा । स्त्री । कटुतुम्ब्याम् ॥

तिक्तशाक । पु । खदिरवृक्षे ॥ वरुण द्रुमे ॥ तिक्तःशाकोऽस्यपत्राणाम् । वरुणस्य शाकमध्ये पाठात् ॥ पत्रसुन्दरवृक्षे ॥

तिक्तसार । पुं । खदिरे ॥ तिक्तःसारोस्य ॥ न । दीर्घरोहिषकतृणे ॥

तिक्ता । स्त्री । कटुक्याम् ॥ पाठायाम् ॥ यवतिक्तायां लतायाम् ॥ षड्भुजायाम् ॥ छिक्कन्याम् ॥ टाप् ॥

तिक्ताख्या । स्त्री । कटुतुम्ब्याम् ॥

तिक्ताङ्गा । स्त्री । पातालगरुडीलतायाम् ॥

तिग्मम् । न । तीक्ष्णे । पैना इतिभाषा ॥ त्रि । तद्वति ॥ तेजयति । तिज० । युजिरुचितिजां कुश्चेतिमक् कवर्गश्चान्तादेश ॥

तिग्मरश्मि । पु । सूर्ये ॥ तिग्मारश्मयोयस्य ॥

तिग्मांशु । पु । सूर्ये ॥ तिग्मा खराः अंशवोऽस्य ॥

तिजिल । पु । चन्द्रे ॥ तेजते । तिज० । गुपादिभ्य किदितीलच् ॥

तिण्टी । स्त्री । त्रिवृति ॥ सतीलायाम् ॥

तितउ । पु । चालन्याम् ॥ तनोति तन्यते वा । तनु० । तनोतेर्डउ सन्वच्च । सन्वद्भावाद् द्वित्वमभ्यासस्येत्वञ्च । क्षुद्रच्छिद्रसमोपेत चालन तितउस्मृतमित्युक्ते क्लीवत्वमपि ॥

तितिक्षा । स्त्री । क्षान्तौ । क्षमायाम् । परापराधसहने ॥ सर्वद्वन्द्वसहने । शीतोष्णमानापमानलाभालाभशोकहर्षादिद्वन्द्वसहिष्णुतायाम् ॥ अहोतितिक्षामाहात्म्यमज्ञोदानफलं मखम् । यदागतोहरिश्चन्द्रोमहेन्द्रस्यसलोकताम् ॥ तिजेः क्षमायां सन्नन्तादमप्रत्ययेटाप् ॥

तितिक्षित । त्रि । क्षान्ते । सोढे ॥ तितिक्षासञ्जाताऽस्य । तारकादित्वात् इतच् ॥

तितिक्षु । त्रि । क्षमान्विते । क्षान्ते । सहिष्णौ । जीवनविच्छेदव्यतिरिक्तशीतादिद्वन्द्वसहिष्णावितिशास्त्रसार ॥ तितिक्षते । तिजे क्षमायाम् । गुप्तिज्किद्भ्यःसन् । शिक्षिक्षमीक्ष । सनाशंसेच्छ उ ॥

तितिभ । पु । इन्द्रगोपकीटे ॥ इ० हे० ॥

तितीर्षु । त्रि । तरितुमिच्छौ ॥ तरते सन्नन्तादुप्रत्यय ॥

तिन्तिडीक । पु । वृक्षविशेषे ॥ ओषधिविशेषे ॥ तिम्यति । तिम आर्द्रीभावे । पर्फरीकादयश्चेति तिमेर्मकारस्य डकारोऽभ्यासस्य नुक ईकन् प्रत्ययश्च । तिन्तिडीचिञ्चाम्लिकेत्यमरे तु शब्दान्तरम् । तथा च । तिन्तिडी स्वम्लिका चिञ्चा तिन्तिडीका कपिप्रियेति वाचस्पति ॥

तित्तिर । पु । तित्तिरिपक्षिणि । तीतर इतिभाषा ॥ तित्ति इतिशब्दं राति । रा० । आतोनुपेतिक ॥

तित्तिरि । पु । तित्तिरे ॥ तित्तिरि कृष्णवर्णः स्यात् सतु गौर कपिञ्जलः ॥ तित्तिरिर्वर्णदो ग्राही हिक्का दोषत्रयापह । श्वासकासज्वरहरस्तस्माद्गौरोऽधिको गुणै. ॥ तित्ति इति शब्दं रौति । रु० । बाहुलकात् कि ॥ मुनिविशेषे ॥ यजुश्शाखाविशेषे ॥

तिथ । पु । कामे ॥ काले ॥ अनले ॥ तेजयति । तिज० । तिथपृष्ठगूथयूथ प्रोथा इति थक् तिजेर्जलोपश्च निपातनात ॥

तिथि. । स्त्री । पु । प्रतिपदादिपञ्चदशसु । चन्द्रकलाक्रियारूपायाम् । चन्द्रकलाक्रियोपलक्षिते वा काले ॥ अतति । अत० । ऋतन्यञ्जीत्यतेरिथिन् । पृषोदरादित्वात् अलोप ॥ यद्वा । तनोति विस्तारयति चन्द्रकलाय कालविशेष सा तिथि ॥ चन्द्रकलया तन्यते इति वा ॥ उक्तञ्च । तन्यन्ते कलया यस्मात् तस्मात् तास्तिथय स्मृता इति ॥ अमादिपौर्णमास्यन्ता याएव शशिन कला । तिथयस्ता समाख्याता षोडशैववरानने ॥ तत्र प्रथमकलाक्रियारूपा प्रतिपत् । एवद्वितीयादिकलाक्रियारूपाद्वितीयादि । साचवृद्धिरूपा चेत् शुक्ला ह्रासरूपा चेत् कृष्णा । यथा । तत्र पक्षावुभौ मासे शुक्लकृष्णौ क्रमेणहि । चन्द्रवृद्धिकर शुक्ल कृष्णश्चन्द्रक्षयात्मक ॥ पक्षस्थास्तु तिथय क्रमात् पञ्चदश स्मृता । दर्शान्ता कृष्णपक्षे ता पूर्णिमान्ताश्च शुक्लके ॥ * ॥ गोभिलोक्तामावास्या घटकाउपर्यधोभावापन्नसमसूत्रपातन्यायेन राश्येकांशच्छेदेन सहावस्थानयुक्ताकौमण्डला चन्द्रमण्डलस्य राशिद्वादशांशादशांशभोगात्मकनिर्गमरूपवियोगेन शुक्लाया प्रतिपदादितत्तत्तिथेरुत्पत्ति । एवगोभिलोक्तपौर्णमासीघटकस-

समराश्यवस्थानरूपपरमनियोगानन्तरमर्कमण्डलप्रवेशाय चन्द्रमण्डलस्य राशिद्वादशांशद्वादशधा भोगात्मकप्रवेशरूपस्तन्निकर्षेण कृष्णाया स्तत्त्क्षयेश्चोत्पत्तिरिति। यथा। अर्कादिनि' सृत प्राचीं यद्याद्य हरह शशी। भागैर्द्वादशभि स्तत् स्यात् तिथिश्चान्द्रमसदिनम्॥ चि शांशक स्तथाराशेर्भाग इत्यभिधीयते। आदित्याद्विप्रकृष्टस्तु भागद्वादशक यदा॥ चन्द्रमा स्यात तदारामतिथिरित्यभिधीयते॥ * ॥ सा देवकार्ये पूर्वाह्णयुताग्राह्या। एकादश्युपवासातिरिक्तस्थले सर्वत्रविसन्ध्यव्यापिनीग्राह्या॥ * ॥ पञ्चदशसङ्ख्यायाम॥ पञ्चदशाङ्के॥

तिथिक्षय. । पु। अमावास्यायाम्॥ इति शब्दार्थकल्पतरु॥ तिथे क्षये॥

तिथिप्रणी। पु। निशाकरे। चन्द्रे॥

तिथी। स्त्री। प्रतिपदादितिथिषु॥

तिनाशक। पु। तिनिशवृक्षे॥

तिनिश। पु। स्यन्दनद्रुमे। अतिमुक्तके। वञ्जुले। तिनास इतिसाइन इतिच प्रसिद्धे वृक्षे॥ तिनिश श्लेष्मपित्तास्रमेद कुष्ठप्रमेहजित्। तुवर. श्वित्रदाहघ्नो व्रणपाण्डुकृमिप्रणुत्॥ अतिशयेन नेशति। णिशसमाधौ। इगुपधेतिक'॥ यद्वा। अतिक्रान्तोनिशा। अत्यादय इतिसमास। पृषोदरादि॥

तिन्तिड। पु। दैत्यविशेषे॥ चिञ्चायाम्॥ वृक्षाम्ले॥

तिन्तिडिका। स्त्री। चिञ्चायाम्॥ वृक्षाम्ले॥

तिन्तिडी। स्त्री। चिञ्चायाम्। अम्लिकायाम्। अम्ली इति इम्ली इतिचभाषा॥ अम्लिकाया'फल पक्वं मर्दितं वारिणा दृढम्। शर्करामरिचोन्मिश्रं लवङ्गेन्दुसुवासितम्॥ अम्लिकाफलसम्भूतं पानक वातनाशनम्। पित्तश्लेष्मकरं किञ्चित् सुरुच्य वह्निवोधकम्॥ डिक्के॥ चुक्रे॥ तिम्यति। तिमआर्द्रीभावे। अलीकादयश्चेतिनिपातित'॥

तिन्तिडीकम्। न। वृक्षाम्ले। चुक्रे॥ तिम्यति। तिम०। अलीकादयश्चेति साधु॥ वक्ष्यन्तरे॥ तिन्तिड्याम्॥

तिन्तिडीका। स्त्री। चिञ्चायाम्॥

तिन्तिडीयूतम्। न। चुञ्चुर्याम्। तिन्तिडी वीजैर्विहितैर्यूते। आकरीवाकरी इतिभाषा॥

तिन्तिला। स्त्री। }
तिन्तिलिका। स्त्री। } चिञ्चायाम्।
तिन्तिली। स्त्री। } तिन्तिड्याम्॥
तिन्तिलीका। स्त्री। }

तिन्दिश. । पु । डिण्डिशे ॥

तिन्दु । पु । तिन्दुके । तेंदू इतिभाषा ॥ तिम्यति । तिम०। मृगय्वादित्वात् कु ॥

तिन्दुक । पु । स्फूर्जके । कालस्कन्धे । शितिसारके । तिन्दौ । तेदू इति भाषा॥ स्यादामं तिन्दुकं ग्राहि वातलं शीतलं लघु । पक्वं पित्तप्रमेहास्रश्लेष्मघ्नं मधुरं गुरु ॥ ततसारं चिररोगजित् ॥ विश्वतिन्दुकमप्येव विशेषात् ग्राहिशीतलम् ॥ न । कर्षपरिमाणे । इति वैद्यकपरिभाषा ॥ तिन्दो सज्ञायां कन् ॥

तिन्दुकि । स्त्री । तिन्दुके ॥

तिन्दुकिनी । स्त्री । आवर्त्तक्याम् ॥

तिन्दुकी । स्त्री । तिन्दुके ॥ तिम्यति । तिम०। बाहुलकाद् दुकण् गुणाभावश्च । ङीष् ॥

तिन्दुल । पु । तिन्दुकतरौ ॥

तिमि । पु । समुद्रे ॥ महाकाये सामुद्रे मत्स्यविशेषे ॥ अस्तिमत्स्य स्तिमिर्नाम शतयोजनविस्तरइतिदर्शनात् । अत्ररामायणे रामवाक्यम् । अस्तिमत्स्यस्तिमिर्नाम तथाचास्ति तिमिङ्गिल । तिमिङ्गिलगिलोप्यस्ति-तद्गिलोप्यस्तिराघवेति ॥ ताम्यति । तमुकाङ्क्षायाम् । क्रमितमिशति स्तम्भामतइश्चेति इन् ॥

तिमिकोष । पु । अब्धौ ॥

तिमिङ्गिल । पु । मत्स्यविशेषे ॥ तिमिं गिरति । गृनिगरणे । मू० क. । अचिविभाषेतिलत्वम् । गिलेऽगिलस्येतिमुम् ॥

तिमिङ्गिलगिल । पु । महामत्स्यविशेषे ॥ गिरति । गृ० । मूलविभुजादित्वात् क । लत्वम् । गिलङ्गिलती तिगिलगिल ।तिमीना गिलगिल । गिलेगिलेचेतिमुम् ॥

तिमित । त्रि । निश्चले ॥ क्लिन्ने ॥ तिम्यतिस्म । तिम० । अकर्मकत्वात कर्त्तरिक्त ॥

तिमिरम् । न । अन्धकारे । ध्वान्ते ॥ नेत्रामयान्तरे ॥ तल्लक्षणं । यथा । तिमिराख्य. सवैदोषश्चतुर्थं पटलङ्गत । रुणद्धि सर्वतोदृष्टि लिङ्गनाशमत परम् ॥ * ॥ भुक्त्वा पाणितलंघृष्ट्वा चक्षुषोर्येददीयते । अचिरेणैवतद्वारि तिमिराणि व्यपोहति ॥ तिम्यति । तिम० । इषिमदीतिकिरच् ॥

तिमिरच्छित् । पु ।
तिमिररिपु. । पु ।　सूर्ये ॥
तिमिरशात्रव. । पु ।

तिमिष । पु । ग्राम्यकर्कट्याम् ॥ इति

विकारज्वरोग ॥ नाटाम्रे ॥

तिमी । स्त्री । तिमिमत्स्ये ॥ इ०वि० ॥

तिरश्ची । स्त्री । पशौ पक्षिणश्चस्त्रियाम् ॥

तिरश्चीन । त्रि । तिर्यग्भते ॥ विभाषाञ्चेरदिक्स्त्रियामिति स्वार्थेख ॥

तिरः । अ । अन्तर्द्धौ ॥ तिर्यगर्थे ॥ अवज्ञायाम् । तिरस्कारे ॥ तरति । तॄ० । असुन् । क्वचिदपवादविषये प्युत्सर्गोऽभिनिविशते इति गणविषये इर् ॥

तिरस्करिणी । स्त्री । जवनिकायाम् । व्यवधानपट्याम् । कनात चिकसिर्की इत्यादिभाषा ॥ तिरस्करोति तिरस्क्रियते ऽनया वा । ग्रह्यादित्वाण्णिनि. । निपातनाद वृद्ध्यभाव । सत्त्वापूर्वकत्वाद्वा ॥ देवीविशेषे ॥

तिरस्कार । पु । अधिक्षेपे । अनादरे ॥

तिरस्कृत. । त्रि । अनादृते ॥

तिरस्कृति । स्त्री । दोषस्मृत्याधिक्कारे । उपेक्षायाम् । अनादरे ॥

तिरस्क्रिया । स्त्री । अनादर ॥ तिरस्करणम् । कृञ शश्चेति भावे श । तिरसोऽन्यतरस्यामिति सत्वम् ॥

तिरिटि । पु । इक्षुग्रन्थौ ॥

तिरिम । पु । शालिविशेषे ॥

तिरिय । पु । शालिभेदे ॥

तिरीट । पु । लोध्रे ॥ न । स्वर्णे ॥ किरीटे ॥ तीर्य्यते मज्जमनेन । तॄ० । कृतॄकृपिभ्य कीटन् । इत्त्वरपरत्वे ॥

तिरीटक । पु । रक्तलोध्रे ॥ स्वार्थेक ॥

तिरोधानम् । न । अन्तर्द्धाने । व्यवधायाम् । अपिधाने ॥ तिर पूर्वाड्डुधाञो ल्युट् । तिरोऽन्तर्द्धाविति गतित्वेक्तु गतीतिसमास ॥

तिरोभाव । पु । पिधाने ॥ प्रलये ॥

तिरोभत । त्रि । अन्तर्हिते ॥

तिरोहित । त्रि । अन्तर्हिते ॥ छन्ने ॥ नष्टे ॥ तिरोधीयतेस्म हितेनोतिस्म-वा । डुधाञ धारणपोषणयो हिगतौ वा । गत्यर्थेति कर्त्तरिक्त । धाञस्तु कर्मणिक्त । भावक्तान्ताभ्यामर्श आद्यच्वा ॥

तिर्य्यक्पाती । त्रि । माचिविप्रसारिणि । कुटिलवृत्तौ ॥

तिर्य्यक्स्रोता । पु । पशुपक्ष्यादौ ॥ सच ब्रह्मणोऽष्टम सर्ग । यथा । तिरश्चामष्टम सर्ग सोऽष्टाविंशद्विधोमत ॥ तेषाललक्षण यथा । अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनइति । अविद श्वसनादिज्ञानशून्या । भूरितमस आहारादिमात्रनिष्ठा । घ्राणज्ञा घ्राणेनैवेष्टमर्थं जानन्ति । हृदि अवेदिन दीर्घानुसन्धानशून्या -

॥ अष्टाविंशतिभेदा यथा । गौ रजोमहिष, कृष्ण, शूकरो गवयो-रुरु । द्विशफा पशवश्चेमे अवि रुष्ट्रश्चसत्तम ॥ खरो श्वो ऽश्वतरो गौर शरभश्चमरीतथा । एते चैकशफा पच शृणुपञ्चनखान् पशू न् ॥ श्वाशृगालोवृकोव्याघ्रोमार्जार शशशल्यकौ । सिंह कपिर्गज कूर्मो गोधाच मकरादय ॥ कङ्कगृध्रवकश्ये नभासभल्लूकवर्हिण । हससारसच क्राह्वकाकोलूकादय खगा, ॥ इति श्री भागवतम् ॥ गवादयउष्ट्रान्ताद्वि शफाद्विखुरानव । खरादयश्चमर्य्यन्ता एकशफा षट् । श्वादयोगोधान्ता पञ्चनखाद्श । एते भूचरा सप्तविंश ति । मकरादयोजलचरा कङ्काद य खगा अभूचरस्त्वेनैकीकृत्यगृही ता । एवमष्टाविंशति भेदान् वदन्ति । अन्येषामपितिर्य्यक्प्राणिनामयथाय थमेतेष्वन्तर्भाव । इतिश्रीधरस्वा मिन ॥

तिर्य्यगुड्डीनम् । न । पक्षिणांतिर्य्यग्ग-मने ॥

तिर्य्यग्यान । पु । कर्कटे । कुलीरे ॥

तिर्य्यङ्मुख । पु । नक्षत्रविशेषेषु ॥ अश्वि नीरेवती हस्ताचित्रेस्वातिपुनर्वसू । ज्येष्ठामृगा नुराधाश्च नव तिर्य्यङ्मु खा स्मृता ॥

तिर्य्यक् । अ । वक्रे । साचि ॥ निरुद्धा र्थे ॥ तिरोर्थे ॥

तिर्य्यङ् । त्रि । विहङ्गादौ ॥ पशौ ॥ वक्रगामिनि ॥ तिर्य्यगञ्चति । तिरस स्तिर्य्यलोपइति तिरि ॥ स्त्रियां ति रश्ची ॥

तिर्य्यक् । पु । पशौ ॥ खगादौ ॥

तिल । पु । स्वनामाप्रसिद्धे होमधान्ये । पापघ्ने । पितृतर्पणे ॥ तिल कृष्ण सितो रक्त सर्वोन्यस्तिल स्मृत ॥ तिलो रसेकटु स्तिक्तो मधुरस्तु वरो गुरु । विपाकेकटुक स्वादु स्निग्धोष्ण कफपित्तकृत् ॥ बल्य के श्यो हिमस्पर्शस्त्वच्य स्तन्योव्रणेहित । दन्त्यो ऽल्पमूत्रकृद् ग्राही वात घ्नो ऽग्निमतिप्रद ॥ कृष्ण श्रेष्ठतम स्तेषु शुक्लो मध्यम सित । अन्य हीनतरा प्रोक्तास्तज्ज्ञै रक्तादय-स्तिला ॥ तिलस्यफलम् तिल । अ वयवेचप्राणीस्थण् । तस्यफलपाके तिलुपि युक्तवद्भाव ॥ तिलकाल्के ॥

तिलक । पु । पुष्पवृक्षविशेषे । क्षुरके । श्रिरपुष्प्याम् । छिन्नरुहे । मृत जीवे । वासन्तसुन्दरे ॥ तिलक क टुक पाके रसेचोष्णो रसायन । क फकुष्ठकृमीन् वस्तिमुखदन्तगदान्

हरेत् ॥ तिलति । तिलस्नेहने । क्वुन् शिल्पिसञ्ज्ञयो । तिलइवेति वा । कन् ॥ तेलति । तिलगतैा वा । इगुपधेतिक । स्वार्थेकन् वा ॥ अश्वविशेषे ॥ रोगविशेषे ॥ तिलकालके ॥ ध्रुवकप्रभेदे ॥ यथा । पञ्चविंशति वर्णाङ्घ्रिस्तिलको ध्रुवको भवेत् । इष्टश्चन्तपुटे तालेरसेवीरेऽद्भुते पिबेति ॥ मरुवके ॥ न । सैावर्चले ॥ क्लोम्नि ॥ रुचके । मातुलुङ्गे ॥ पु । न । स्वनाम्नाप्रसिद्धे विशेषके । चन्दनादिना ललाटादिद्वादशाङ्गेषु कृते चिह्नविशेषे । तमालपत्रके ॥ शिवागमेदीक्षितैस्तु धार्यंतिर्यक्त्रिपुण्ड्रकम् । विष्णवागमेदीक्षितस्तु ऊर्द्ध्वपुण्ड्रंविधारयेत् ॥ ऊर्द्ध्वपुण्ड्रंद्विज. कुर्यात् क्षत्रियाणांतथैवच । वैश्यानांतुतथाविप्र शूद्रादेर्मण्डलाकृतम् ॥ अच्छिद्रमूर्द्ध्वपुण्ड्रन्तु ये कुर्वन्ति-जनाधमा' । तेषाललाटे सतत-शुन पादो न संशय ॥ इष्टाभाले-द्विजातीनामच्छिद्रमूर्द्ध्वपुण्ड्रकम् । कार्ष्णी. कृष्णस्मृतिकृत्वावस्त्रेणाच्छादयेन्मुखम् ॥ ललाटे दक्षिणे ब्रह्मा वसेद्वामे महेश्वर । मध्येविष्णुर्वसेन्नित्य तस्मान्मध्यं न लेपयेत् ॥ * ॥ काम्य नैमित्तिक नित्य यत्किञ्चित्कर्मनारद । वर्णाश्रमाणां तन्नास्ति स्नानान्ते तिलक विना ॥ त्रि । प्रधाने ॥

तिलकटम् । न । तिलानांरजसि ॥ अलाबूतिलोमाभङ्गाभ्योरजस्युपसङ्ख्यानमितिकटच् ॥

तिलकल्क । पु । पिण्याके । खल इति भाषा ॥

तिलका । स्त्री । हारप्रभेदे ॥ गायत्रीछन्दोभेदे । सगणद्वितयं भवतीय्यदा । रसवर्णपदातिलकेतिसदा ॥ यथा । वनमालिकया सकलालिदया । पुनरेतिकथ ममदृष्टिपथम् ॥

तिलकालक । पु । गात्रस्थतिले ॥ तिलइवकालक: ॥ रोगविशेषे । कृष्णानितिलमात्राणि नीरुजानिसमानि च । वातपित्तकफोद्रेकात् तान्विद्यात् तिलकालकान् ॥

तिलकाश्रय । पु । ललाटे ॥

तिलकिट्टम् । न । पिण्याके । खल इति खली इतिच भाषा ॥

तिलकी । स्त्री । सतिलके । तिलकयुक्ते ॥ शिखीतिलकी कर्मकुर्य्यादिति स्मृति. ॥

तिलचित्रपत्रक. । पु । तैलकन्दे ॥

तिलचूर्णम् । न । चूर्णीकृततिलेषु । तिलकल्के । पलले । तिलकुट इति

भाषा ॥

तिलतण्डुलकम् । न । आलिङ्गने ॥ तिलमिश्रिततण्डुलेषु ॥

तिलतैलम् । न । तिलानां स्नेहे ॥ स्नेहे तैलच् ॥ षष्ठ्यास्वमुर्यां स्नेहे ॥

तिलधेनु । स्त्री । दानाय तिलनिर्मितायां धेनौ ॥

तिलपर्ण । पु । श्रीवेष्टे ॥ न । चन्दने ॥ तिलतद्रुपर्णे ॥

तिलपर्णिका । स्त्री । रक्तचन्दने ॥

तिलपर्णी । स्त्री । रक्तचन्दने ॥ श्रीवासे ॥ सिल्हके ॥ मलयजे ॥ इति हेमचन्द्रः ॥ तिलस्येवपर्णान्यस्या । पाककर्णेतिङीष् ॥ यद्वा । तिलपर्णीमदी आकारोऽस्या ॥

तिलपिञ्ज । पु । निष्फलतिलवृक्षे । तिलपेजे ॥ निष्फलस्तिलः । तिलान्निष्फलात्पिञ्जपेजौ ॥

तिलपेज. । पु । तिलपिञ्जे ॥ निष्फलस्तिलः । पेज ॥

तिलमयूर । पु । मयूरविशेषे । गुरुपदके ॥

तिलरस । पु । } तिलतैले ॥
तिलस्नेह । पु । }

तिलाङ्कितदल । पु । तैलकन्दे ॥

तिलापत्या । स्त्री । कृष्णजीरके ॥

तिलित्स. । पु । सर्पविशेषे । गोनसे ॥

तिलगतौ भ्वादिः । तिलस्नेहने तुदादि । तेलनम् तिल् । स० क्विप् । तिलमेति । इण्० । क्विप् तुक् । तिलित् तिलित इति । पोन्नकमेधि । क ॥ यद्वा । तेलनम् तिलिः । कृष्यादित्वादिक् । तिलि त्सरति । त्सरच्छद्मगतौ । अन्येभ्योपीतिड ॥

तिलोत्तमा । स्त्री । स्वर्वेश्यायाम् ॥ अस्या नामकारणं महाभारते । तिलतिलं समानीय रत्नानां यद्विनिर्मिता । तिलोत्तमेति तत् तस्याना मचक्रे पितामह ॥

तिलोदनम् । न । कृशरे ॥

तिल्यम् । न । तैलीने । तिलक्षेत्रे ॥ तिलानाम्भवनङ्क्षेत्रम् । विभाषा तिलमाषोमाभङ्गाणुभ्य इतिपक्षेयत् ॥ तिलेभ्योहित वा । खलयवमाषतिल वृषब्रह्मणश्चेति यत् ॥

तिल्व । पु । लोध्रे ॥ तिलत्यनेनाङ्गम् । तिलस्नेहने । उल्वादयश्चेतिसाधु ॥ श्वेतरक्तलोध्रयो ॥

तिल्वक । पु । लोध्रे ॥ स्वार्थे क ॥

तिष्ठद्गु । अ । दोहनकाले ॥ तिष्ठन्तिगावो यस्मिन् काले । तिष्ठद्गुप्रभृतीनिचेत्यव्ययीभावोनिपातनाच्छत्रादेश. प्रथमासमानाधिकरणे प्रथमादेशस्या सम्भवात् ॥

तिष्य । पु । पुष्यनक्षत्रे ॥ तुष्यन्त्यऽस्मिन् । तुष॰ । सूर्यतिष्येतिनिपातनात्क्यप् उपधायाइत्वञ्च ॥ त्विषति वा । त्विषदीप्तौ । अघ्न्यादित्वात् यक् ॥ कलियुगे ॥ यथा । सतुसम्प्रदायप्रथनाय तिष्ये शिष्यैश्च तुभिः सहयोवतीर्णः । उक्तो बृहत् सङ्गमतन्त्रराजे श्रीशङ्कराचार्यगुरु तमीडेइति ॥ त्रि । तिष्येजाते ॥ अणोलुक् ॥

तिष्यक' । पु । पौषमासे ॥

तिष्यपुष्या । स्त्री । आमलक्याम् ॥

तिष्यफला । स्त्री । धात्र्याम् । आमलक्याम् ॥ नित्यमामलकैर्लक्ष्मीरिति श्रवणात् तिष्य मङ्गल्यं फलमस्याः । अजादित्वात् टाप् ॥ तिष्ये कलियुगे फलमस्याः सेवयेतिवा ॥

तिष्या । स्त्री । आमलक्याम् ॥

तीक्ष्ण । पु । यवाग्रजे । यवक्षारे ॥ श्वेतकुशे ॥ कुन्दुरुके ॥ न । सामुद्रलवणे ॥ विषे ॥ लौहे ॥ आजौ । युद्धे ॥ मरणे ॥ खरे । तिग्मे ॥ च व्यके ॥ शस्त्रे ॥ शीघ्रे ॥ मुष्कके ॥ न क्षत्रविशेषाणां गणे ॥ शक्राद्रिशिवमूलाश्च मन्दाश्च तीक्ष्ण दारुणे ॥ त्रि । तिग्मे गुणिनि ॥ आत्मत्यागिनि ॥ निरालसे ॥ सुबुद्धौ ॥ योगिनि ॥ तेजयति । तेज्यते अनेनवा । तिज॰ । तिजेर्दीर्घश्चेति क्स्नप्रत्ययो दीर्घश्च ॥ क्रूरहृदये ॥

तीक्ष्णक । पु । गौरसर्षपे ॥ मुष्कके ॥

तीक्ष्णकण्टक । पु । कितवद्रुमे । धत्तूरे ॥ इङ्गुद्याम् ॥ करीरे ॥ बर्बुरे ॥

तीक्ष्णकण्टका । स्त्री । कन्थारीवृक्षे ॥

तीक्ष्णकन्द. । पुं । पलाण्डौ ॥

तीक्ष्णकर्म्मा । त्रि । तीक्ष्णचेष्टे । आयःशूलिके ॥

तीक्ष्णकल्क' । पुं । तुम्बुरुवृक्षे ॥

तीक्ष्णकान्ता । स्त्री । मङ्गलचण्डिका प्रभेदे ॥

तीक्ष्णगन्ध । पुं । शोभाञ्जने ॥ कुन्दुरौ ॥ रक्ततुलस्याम् ॥ तीक्ष्णोगन्धोऽस्य ॥ गन्धके ॥

तीक्ष्णगन्धक । पुं । शोभाञ्जने ॥ तीक्ष्णोगन्धोऽस्य । शेषाद्विभाषेति कप ॥

तीक्ष्णगन्धा । स्त्री । वचायाम् ॥ राजिकायाम् ॥ श्वेतवचायाम् ॥ कन्थार्याम् ॥ सूक्ष्मैलायाम् ॥ जीवन्त्याम् ॥ तीक्ष्णोगन्धोयस्याः ॥

तीक्ष्णतण्डुला । स्त्री । पिप्पल्याम् ॥ तीक्ष्णास्तण्डुला यस्याः ॥

तीक्ष्णतैलम् । न । सुरायाम् ॥ स्नुहीक्षीरे ॥ सर्जरसे ॥

तीक्ष्णत्वम् । न । आशुकारित्वे । तीक्ष्णतायाम् ॥ भावेत्व. ॥

तीक्ष्णदंष्ट्र । व्याघ्रे ॥ भैरवे ॥ त्रि । तिग्मदंष्ट्रावति ॥

तीक्ष्णपत्र । पु । तुम्बुरुवृक्षे ॥

तीक्ष्णपुष्पम् । न । लवङ्गे ॥

तीक्ष्णपुष्पा । स्त्री । केतक्याम् ॥

तीक्ष्णफल । पु । तुम्बुरुवृक्षे ॥

तीक्ष्णमूल । पु । कुलञ्जने ॥ शिग्रौ ॥

तीक्ष्णरस । पुं । यवक्षारे ॥ तीक्ष्णो रसोऽस्य ॥

तीक्ष्णशूक । पु । यवे ॥ तीक्ष्ण शूकोऽस्य ॥

तीक्ष्णसारा । स्त्री । शिंशपायाम् ॥

तीक्ष्णा । स्त्री । वचायाम् ॥ सर्पकङ्कालिकौषधौ ॥ कपिकच्छ्वाम् ॥ महाज्योतिष्मत्याम् । अत्यम्लपर्ण्याम् ॥

तीक्ष्णायसम् । न । तीखाइतिगौड प्रसिद्धे लोहविशेषे । शस्त्रायसे ॥

तीर. । पु । त्रपुणि । सीसके ॥ न । कूले । रोधसि ॥ गङ्गातीरे ॥ यथा । सार्द्धहस्तशतं यावद्गर्भतस्तीरमुच्यते- ॥ भाद्रकृष्णचतुर्दश्यायावदाक्रमते जलम् । तावद्गर्भं विजानीयात् तदन्यत् तीरमुच्यते ॥ शरविशेषे । सायके ॥ तीरयति । पारतीरकर्म समाप्तौ । पचाद्यच् ॥

तीरभुक्ति । पु । तिरहुत इति प्रसिद्धे विदेहदेशे ॥ तीरे भुक्तिरस्य ॥

तीरितः । त्रि । शास्त्रव्यवस्थानिर्णीते ॥ न । कर्मणः समाप्तौ ॥ तीर० । भावेक्त ॥

तीर्ण. । त्रि । अभिभूते ॥ प्लुते ॥ उत्तीर्णे ॥ यथा । तीर्णा पूर्णा कति न सरितोलङ्घिता केनशैला नाक्रान्ताधाकतिवनभुव क्रूरसञ्चारघोरा । पापैरेतै किमिवदुरितकारितो नास्ति कष्टयद्दृष्टा स्तेधनमदमसीम्लानवक्त्रादुरीशा ॥ एतै परिग्रहै ॥ तरते कर्त्तरिक्त ॥

तीर्णपदी । स्त्री । तालमूल्याम् ॥

तीर्णा । स्त्री । प्रतिष्ठाख्यवृत्तविशेषे ॥ यथा । यस्मिन्वृत्ते कर्णौ कर्णौ । वेदैर्वर्णैः साक्षात् तीर्णा ॥ यथा । वंशीवादैर्दत्तोन्मादै । कृष्णाचेत क्वासीयात ॥ अस्या.कन्येत्यपिसंज्ञा । मगौचेत्कन्येतिलक्षणात् ॥

तीर्थम् । न । शास्त्रे ॥ शास्त्रानुध्याविषये ॥ अध्वरे । यज्ञे ॥ क्षेत्रे । पुण्यक्षेत्रे ॥ उपाये ॥ नारीरजसि ॥ अवतारे । जलावतारे ॥ ऋषिजुष्टाम्बुनि ॥ पात्रे ॥ विद्यायाः पात्रे ॥ यथा । ब्रह्मचारी धनदायी मेधावी श्रोत्रिय प्रिय । विद्ययाविद्याय प्राहता

नितीर्थानि यच्छमेति विद्यावचनम् ॥ उपाध्याये ॥ गुरौ ॥ मन्त्रिणि ॥ इतिमेदिनिकर ॥ सचिवे ॥ इति हेमचन्द्र ॥ योनौ ॥ दर्शने ॥ निपाने । नक्षत्रप्रदेशे । घट्टे ॥ उपकूपजलाशये ॥ मध्ये ॥ विप्रे ॥ तीर्य्यते ऽनेन वा तरन्त्यनेनवा । तृ० पातृ तुदिवचिरिचिसिचिभ्यस्थक् ॥ हस्तगततीर्थानि यथा । अङ्गुल्यग्रे दैव तीर्थं स्वल्पाङ्गुल्यो र्मूलेकायम् । मध्येङ्गुष्ठाङ्गुल्यो' पैत्र मूलेत्वङ्गुष्ठस्य ब्राह्मम् ॥ तीर्थं त्रिविधम् । जङ्गम मानसस्थावरभेदात् । तथाहि । ब्राह्मणा जङ्गमतीर्थं निर्म्मलं सार्वकामिकम् । येषांवाक्योदकेनैव शुद्ध्यन्तिमलिनोजना ॥ * ॥ अगस्त्यवाच । शृणु तीर्थानि गदतो मानसानिममानघे । येषु सम्यङ् नरः स्नात्वा प्रयातिपरमाङ्गतिम् ॥ सत्यं तीर्थं क्षमातीर्थं तीर्थमिन्द्रियनिग्रहः । सर्वभूतदयातीर्थं सर्वत्रार्जवमेवच ॥ दानं तीर्थं दमस्तीर्थं सन्तोषस्तीर्थमुच्यते । ब्रह्मचर्य्यं परं तीर्थं तीर्थञ्चप्रियवादिता ॥ ज्ञानं तीर्थं धृतिस्तीर्थं पुण्यतीर्थं मुदाहृतम् । तीर्थानामपितत् तीर्थं विशुद्धिर्मनसः परा ॥ एतत्तेकथितं देविमानसतीर्थं लक्षणम् ॥ * ॥ भौमानामपि-तीर्थानां पुण्यत्वेकारणं शृणु ॥ यथा शरीरस्योद्देशाः केचिन्मेध्यतमाःस्मृता. । तथापृथिव्या मुद्देशाः केचित् पुण्यतमा. स्मृता ॥ प्रभावादद्भुता द्भूमे. सलिलस्यचतेजसा । परिग्रहान्मुनीनाञ्च तीर्थानां पुण्यतास्मृता ॥ तस्माद्भौमेषुतीर्थेषु मानसेषुच निच्यश । उभयोरपि यः स्नाति स याति परमांगतिम् ॥ * ॥ तीर्थागमनेदोषो यथा । अनुपोष्य त्रिरात्राणि तीर्थान्य नभिगम्यच । अदत्त्वा काञ्चनं गाञ्च दरिद्रोनाम जायते ॥ * ॥ गमने फलं यथा । अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणै. । न तत्फलमवाप्नोति तीर्थाभिगमनेन यत् ॥ तीर्थान्यनुस्मरन्धीरः श्रद्दधान. समाहितः । कृतपापोविशुध्येत किंपुनः शुद्धकर्मकृत् ॥ तिर्य्यग्योनिं नवै गच्छेत् कुदेशेनच जायते । न दु.खीस्यात् स्वर्गभाक्च-मोक्षोपायञ्चविन्दति ॥ * ॥ तीर्थफलभागिनोयथा । यस्यहस्तौच पादौच मनश्चैव सुसंयतम् । विद्यातपश्च कीर्त्तिश्चस तीर्थफलमश्नुते ॥ प्रतिग्रहादुपावृत्त सन्तुष्टो येनकेनचित् । अहङ्कारविमुक्तश्च सती० ॥

अदाम्भिको निरारम्भो लघ्वाहारो जितेन्द्रिय । विमुक्तः सर्वसङ्गैर्यः स तीर्थफलमश्नुते ॥ अकोपनोऽमलमति सत्यवादी दृढव्रत । आत्मोपमश्च भूतेषु स ती० ॥ अश्रद्दधान पापात्मा नास्तिकोऽच्छिन्नसंशय । हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिन ॥ इति काशीखण्डम् ॥ कृते तु पुष्करं तीर्थं त्रेतायां नैमिषं तथा । द्वापरे तु कुरुक्षेत्रं कलौ गङ्गां समाश्रयेत् ॥

तीर्थकर । पु । जिने ॥ करोति इति कर । तीर्थस्य कर ॥ कपिलकणभुगादिशास्त्रकारेषु ॥

तीर्थकृत् । पु । } जिने ॥
तीर्थङ्कर । पु । }

तीर्थराजि । स्त्री । } अविमुक्ते । काश्याम् ॥
तीर्थराजी । स्त्री । }

तीर्थवाक । पु । केशे ॥ इति हेमचन्द्र ॥

तीर्थसेवी । पु । बकपक्षिणि ॥ इति राजनिर्घण्ट ॥ त्रि । तीर्थवासिनि ॥

तीवर । पु । अम्बुधौ ॥ व्याधे ॥ तेओर इति गौडप्रसिद्धे वर्णसङ्करजातिविशेषे ॥ स तु राजपुत्रस्त्रियां क्षत्रियाज्जात इति ब्रह्मवैवर्त्तपुराणम् ॥ चूर्णकभार्यायां पुण्ड्रकाज्जात इति पराशरपद्धति ॥ तरति तीर्यते वा । तॄ० । छित्वरच्छत्वरेत्यादिना ष्वरजन्तो निपातित ॥

तीवरी । स्त्री । तीवरस्त्रियाम् ॥ षित्त्वान्ङीष् ॥

तीव्र । पु । शिवे ॥ न । लोहे ॥ तीरे ॥ त्रपुणि । सीसके ॥ तीक्ष्णे ॥ त्रि । दुःसहे ॥ अत्युष्णे ॥ नितान्ते । अतिशये ॥ अद्रव्यवर्त्तमान क्लीवे । द्रव्यगामि तु वाच्यलिङ्ग । यथा । तीव्रं भुङ्क्ते । तीव्रो नर । कटौ । कटुरसादौ ॥ तीक्ष्णे ॥ तीव्यति । तीवस्थौल्ये । वाहुलकात् रक् । यद्वा । तेजति । तिज निशाने । वाहुलकाद्रन् दीर्घो जस्य च व. ॥

तीव्रकण्ठ । पु । सूरणे ॥

तीव्रगन्धा । स्त्री । यवान्याम् ॥

तीव्रज्वाला । स्त्री । धातक्याम् ॥

तीव्रबन्ध । पु । तामसवृत्तौ ॥

तीव्रवेदना । स्त्री । यातनायाम् ॥ तीव्रा चासौ वेदना च ॥

तीव्रा । स्त्री । कटुरोहिण्याम् ॥ राजिकायाम् ॥ गण्डदूर्वायाम् ॥ नदीविशेषे ॥ महाज्योतिष्मत्याम् ॥ तरदीवृक्षे ॥ तुलस्याम् ॥

तु । अ । पादपूरणे ॥ भेदे ॥ समुच्चये ॥ अवधारणे ॥ पक्षान्तरे ॥ नियोगे ॥ प्रशंसायाम् ॥ विनिग्रहे ॥ उक्ताशङ्कानिरासार्थे ॥ तुदति । तुद

व्यथने। भिलङ्गादित्वात् उः ॥

तुकाचीरी। स्त्री। वंशरोचनायाम्॥

तुगा। स्त्री। वंशरोचनायाम्॥

तुगाचीरी। स्त्री। वंशरोचनायाम्॥ तङ्गेदेर्गौसिकश्चित्॥

तुङ्ग.। पु। पुन्नागद्रुमे॥ पर्वते॥ बुध ग्रहे॥ नारिकेले॥ गण्डके॥ योग विशेषे॥ यथा। अजवृषभमृगाङ्ग नाकुलीरा झषवणिजौ च दिवाकरा दितुङ्गा.। दशशिखिमनुयुक् ति थीन्द्रियांशै स्त्रिनवकविंशतिभिश्च ते ऽस्तनीचा.॥ अपिच। सूर्यात्सुखान् क्रियवृषमृगकन्याकुलीरान्त्ययूके दि ग्वह्नीन्द्रद्वयतिथिशरान् सप्तविंशाँ श्च विंशान्। अंशानेतान् वदति य वन शान्त्यतुङ्गान् सुतुङ्गास्तानेवां- शान् मदनभवनेष्वाह नीचान् सु नीचानिति॥ न। किञ्जल्के॥ त्रि। उन्नते॥ उग्रे॥ प्रधाने॥ तुञ्ज्यते। तुजिहिंसायाम्। घञ्। न्यङ्क्वादिः॥

तुङ्गक'। पु। पुन्नागवृक्षे॥

तुङ्गकारण्यम्। न। तीर्थविशेषे॥

तुङ्गभद्र। पु। मदोत्कटे॥

तुङ्गभद्रा। स्त्री। दक्षिणदेश प्रसिद्धे स रिद्विशेषे॥ अस्याजलगुणा यथा। त ज्जल निर्मल स्निग्ध स्वादु प्रोक्त तथा गुरु। कण्डुपित्तास्रद प्राय. साल्प

मेधाकरं मतमिति॥

तुङ्गशेखर'। पुं। पर्वते॥

तुङ्गा। स्त्री। वंशलोचनायाम्॥ शम्या म्॥ अनुष्टुप्छन्दोभेदे॥ द्विगुणन गणकर्णौ सुललितवसुवर्णौ। रसि कविदितरङ्गा भवतिच किलतुङ्गा॥ यथा। विचरसि ममचित्ते मदनवि शिखक्लृप्ते। न नयनविषयत्वं व्रजसि तदपिमेत्वम्॥

तुङ्गी। पु। उच्चस्थानस्थिते ग्रहे॥

तुङ्गिनी। स्त्री। महाशतावर्याम्॥

तुङ्गी। स्त्री। हरिद्रायाम्॥ शाकभेदे॥ वर्बरायाम्॥ तुञ्जति। तुजि०। अच्। न्यङ्क्वादि। गौरादि ङीष्॥ निशायाम्॥

तुङ्गीपति.। पुं। चन्द्रे॥ दू० त्रि०॥

तुङ्गीश। पु। शिवे॥ कृष्णे॥ सूर्ये॥

तुच्छ। त्रि। शून्ये॥ अल्पे॥ क्षीणे॥ न। तुषाकणे। भुसइतिभूसा इतिच भाषा॥ तोदन तुद्। सम्पदादित्वा द्भावे क्विप। तुदाव्यथया छ्यति। छोछेदने। मूलविभुजादित्वात् क: ॥ तुदशति वा। आतङ्कतिक॥

तुच्छद्रु। पु। एरण्डवृक्षे॥

तुच्छधान्यकम्। न। तुषाके॥

तुच्छा। स्त्री। तुत्थायाम्। नीलीवृक्षे॥

तुञ्ज.। पु। दैत्ये॥ तुञ्जते। तुजिहि

सायाम् । पचाद्यच् ॥

तुभ्रेट् । पु । दैत्यभेदोपिशाचे ॥ ईग्र० । क्किप् । तुभ्रेभ्य' ईट् ॥

तुटुमः । पु । रन्ध्रबभ्रौ । उन्दुरौ ॥ इतिचिकाशेषः ॥

तुडि' । स्त्री । तोडने ॥ तोडति । तुडतोडने । सर्वधातुभ्य इन् ॥

तुणि । पु । नन्दिवृक्षे । तूणी इतिभाषा ॥ तूणयति । तूणसङ्कोचे । अच इ' । पृषोदरादि' ॥ तूणीकृत्य कटुपाके कषायो मधुरोलघु । तिक्तो ग्राहीहिमोवृष्यो ब्रणकुष्ठास्रपित्तजित् ॥

तुण्डम् । न । आनने । वक्त्रे ॥ तुण्डति । तुडितोडने । पचाद्यच् ॥

तुण्डकेरिका । स्त्री । कार्पास्याम् ॥

तुण्डकेरी । स्त्री । बिम्बिकायाम् । कुन्दुरु इतिकंदूरीइतिचख्यातौषधौ । तेलाकुचा इतिगौडभाषा ॥ प्रशस्ततुण्डम् । प्रशसार्थं कन् । तुण्डकमीर्ते । कर्मण्यण् ॥

तुण्डि' । पु । मुखे ॥ चञ्चौ ॥ तुन्दकूप्याम् ॥ स्त्री । नाभौ ॥ तुण्डेरिन् ॥

तुण्डि । स्त्री । बिम्बफलायाम् ॥ उन्नतायां नाभौ । टूंडीइतिसूंडी इतिचभाषा ॥ तुण्डते । तुडि० । सर्वधातुभ्यइन् ॥

तुण्डिका । स्त्री । बिम्बिकायाम् ॥ नाभौ । तुन्दकूप्याम् । टूंडी इतिसूंडी इतिचभाषा ॥

तुण्डिकेरी । स्त्री । कार्पास्याम् । समुद्रान्तायाम् । कपास इतिभाषा ॥ बिम्बिकायाम् ॥ तुण्डंचञ्चुरस्तियस्या । अतइतिठन् । तुण्डिकान् शरीराणि ईरयति । ईर० । कर्मण्यण् ॥

तुण्डिकेशी । स्त्री । बिम्बिकायाम् ॥

तुण्डिभ । त्रि । वृद्धनाभौ ॥ अतिशयिता तुण्डि वृद्धानाभि रस्य । तुन्दिवलिवटेर्भइतिसूत्रे मूर्द्धन्योपधोयतुण्डिरिति माधव ॥

तुण्डिल । त्रि । वृद्धनाभौ ॥ तुण्ड्यते । तुडि० । सर्वधातुभ्यइन् । ततसिध्मादित्वाल्लच् ॥ मुखरे ॥ तुण्ड्यते । तुडि० । सलिकल्पीति इलच् ॥

तुत्थ । पु । अग्नौ ॥ न । अञ्जनभेदे । मयूरके । शिखिग्रीवे ॥ तुत्थ ताम्रोपधातुर्हि किञ्चित्ताम्रेणतद्भवेत् । किञ्चित्ताम्रगुणं तस्माद्वक्ष्यमाणगुणञ्चतत् ॥ तुत्थक कटुक क्षार कषाय वामक लघु । लेखन भेदन शीत चक्षुष्य कफपित्तहृत् ॥ विषाश्मकुष्ठकण्डूघ्न खर्परञ्चापि तद्गुणम् । अस्यशोधनम् । विष्ठया मर्दयेत्तुत्थ मार्जारककपोतयो । दशांश टङ्कणं दत्त्वा पचेल्लघुपुटे तत ॥ पुटद-

भ्रापुट चौद्दे ईर्यं तुत्थविशुद्धये ॥

तुत्थति । तुद्व्यथने । पात्तुदीति थक ॥ तुत्थयतिवा । तुत्थ आवरणे । अच् ॥ कर्परीतुत्थे ॥

तुत्थकम् । न । तुत्थे ॥

तुत्था । स्त्री । नील्याम् ॥ सूक्ष्मैला याम् ॥ महानील्याम् ॥

तुत्थाञ्जनम् । न । अञ्जनप्रभेदे । शिखिग्रीवे । वितुन्नके ॥ तुत्थयति तुत्थतेवा । तुत्थ० । अच् एरच्वा । तुत्थञ्चतदञ्जनञ्च ॥

तुन्तुभ । पु । सर्षपे ॥ तुदति । तुद० । बाहुलकादुभच् । पृषोदरादि ॥

तुन्दम् । न । उदरे । कुचौ ॥ तुदति । तुद० । इगुपधेतिक । आच्छीन योर्नित्यम नुमिति योगविभागान्नुम् ॥ यदा । तर्णोत्यनम् । तुण अदने । अब्दादयश्चेतिसाधु ॥ त्रि । तुन्दिले ॥ तुन्दमस्त्यस्य । अर्शआदिभ्योच् ॥

तुन्दकूपिका । स्त्री । } नाभौ ॥
तुन्दकूपी । स्त्री । }

तुन्दपरिमृज । त्रि । अलसे । मन्दे ॥ तुन्दमुदरं परिमार्ष्टि । मृजूशुद्धौ । तुन्दशोकयो परिमृजापनुदोरिति क ॥

तुन्दवान् । त्रि । तुन्दिले ॥ अतिशयित तुन्दमुदरमस्य । तुन्दादिभ्यइलच्चेति चान्मतुप् ॥

तुन्दि । पु । गन्धर्वविशेषे ॥ न । उदरे ॥ स्त्री । नाभौ ॥

तुन्दिक । त्रि । वृहत्कुचौ । तुन्दिले ॥ अतिशयिततुन्दमुदरमस्य । तुन्दादिभ्य इलच्चेतिचकाराट्ठन् ॥

तुन्दिका । स्त्री । नाभौ ॥

तुन्दी । त्रि । पीनकुचौ । पिचण्डिले । तुन्दिले ॥ अतिशयित तुन्दमस्यास्य । तुन्दादिभ्यइलच्चेति चकारादिनि ॥

तुन्दिभः । त्रि । तुण्डिभे ॥ तुन्दिर्वृद्धा नाभिरस्त्यस्य । तुन्दिवलिवटेर्भ ॥

तुन्दिल । त्रि । वृहत्कुचौ । पिचिण्डिले ॥ अतिशयित तुन्दमस्यास्य । तुन्दादिभ्यइलच्चेति इलच् ॥

तुन्दिलफला । स्त्री । त्रपुष्याम् ॥

तुन्न । पु । नन्दीवृक्षे ॥ तुद्यते । तुद० । क्त ॥ त्रि । छिन्ने । द्विधाकृते ॥ व्यथिते ॥

तुन्नक । पु । तुन्ने ॥

तुन्नवत् । त्रि । बहुच्छिद्रे ॥

तुन्नवाय । पु । सौचिके । सूजी इति भाषाप्रसिद्धे ॥ तुन्नच्छिन्नंवयति । वेञ्तन्तुसन्ताने । ह्वावामश्चेत्यण् ॥

तुभ । पु । छागे ॥ तोभते । तुभहिंसायाम् । इगुपधेतिक ॥

तुमुल । पु । कलिद्रुमे ॥ व्याकुलेरणे ॥ न । रणसङ्कुले ॥ तवनम् तौति वा । तु वौप । बाहुलकान्मुलक ॥ सङ्कीर्णे । सङ्कुले ॥

तुम्ब' । पु । तुम्ब्याम् । अलाब्वाम् ॥ तुम्बतिरुचिम् । तुबिअर्दने । अच् ॥

तुम्बक । पु । तुम्बे ॥ स्वार्थेक. ॥ राजालावौ ॥

तुम्बा । स्त्री । वृहत्फलायांतुम्ब्याम् ॥ वर्तुलालाबाम् ॥ गवि ॥

तुम्बि । स्त्री । अलाबाम् ॥ तुम्बतिरुचिम् । तुबि० । सर्वधातुभ्यइन् ॥

तुम्बिका । स्त्री । अलाबाम् ॥ कटुतुम्ब्याम् ॥

तुम्बिनी । स्त्री । कटुतुम्ब्याम् ॥

तुम्बी । स्त्री । अलाबाम् । तूंबी इति भाषा ॥ तुम्बतिरुचिम् । तुबिअर्दने । अच् । गौ० ङीष् ॥ इकन्तात् कृदिकारादितिङीष्वा ॥ कुलिकवृषेइतिरत्नमाला ॥

तुम्बीपुष्पम् । न । अलाबूपुष्पे । लतान्मुले ॥

तुम्बुकम् । न । अलाबूफले । तूंबा इतिभाषा ॥ पु । अलाबाम् ॥

तुम्बुरी । स्त्री । शुन्याम् । कुक्कुर्याम् ॥ धन्याके ॥ इतिमेदिनी ॥

तुम्बुरु । पु । अर्हदुपासकविशेषे ॥ गन्धर्वप्रभेदे । स्वर्गगायके ॥ वृक्षविशेषे । शूलघ्ने । तीक्ष्णफले ॥ लम्बादि (।ऽ) त्रिकले ॥ न । कुस्तुम्बुरुणि ॥ तिन्दुकीफले ॥ तुम्बुरु प्रथित तिक्त कटु पाकेपितलकटु । रूक्षोष्णा दीपन तीक्ष्ण रुच्य लघु विदाहि च ॥ वातश्लेष्मा शिकर्णाष्ठशिरोरुग्गुदजकृमीन् । कुष्ठशूलारुचिश्वासप्लीहकृच्छ्राणि नाशयेत् ॥

तुरम् । न । तूर्णे । शीघ्रे ॥ वेगे ॥ त्रि । तद्वति ॥ तुतोर्त्ति । तुरत्वरणे । क ॥

तुरग. । पु । चित्ते ॥ वाजिनि ॥ तौरयाम् । तुरत्वरणे । घञर्थेक. । बाहुलकाद्घञ्वा । सत्तापूर्वकात्वागुख । तुरेण तुरयावा गच्छति । अन्येभ्योपीतिड ॥

तुरगगन्धा । स्त्री । अश्वगन्धायाम् ॥

तुरगब्रह्मचर्य्यकम् । न । अभावात् स्त्रीपरित्यागे ॥

तुरगलीलक । पु । तालप्रभेदे ॥ द्रुतद्वन्द्व विरामान्त लघुस्तुरगलीलके ॥

तुरगस्कन्ध । पु । तुरगाणां समूहे ॥ नरकरितुरगाणांस्कन्धच् ॥

तुरगी । त्रि । सादिनि । अश्वारोहे ॥

तुरगी । स्त्री अश्वगन्धायाम् ॥ वडवायाम् ॥

तुरङ्ग । पु । अश्वे । घोटके ॥ चित्ते ॥ तुरेण गच्छति । गमे सुपिवाच्य इति खच् । खच्चवाडित् । अरुर्द्विषदिति मुम् ॥ चतुष्कले (।ऽ।) मध्यगुरो सञ्ज्ञायाम् ॥

तुरङ्गक । पु । हस्तिघोषायाम् । घोषकाकृतौ ॥

तुरङ्गद्वेषिणी । स्त्री । महिष्याम् ॥

तुरङ्गप्रिय । पु । यवे ॥

तुरङ्गमः । पु । अश्वे ॥ तुरेण गच्छति । गम्लृ० । गमेरितिखच् । अरुर्द्विषदजन्तस्यमुम् ॥

तुरङ्गवक्त्र । पु । किन्नरे ॥ तुरङ्गस्येव वक्त्रमस्य ॥

तुरङ्गवदन । पु । किन्नरे । किम्पुरुषे ॥ तुरङ्गस्येव वदन मस्य ॥

तुरङ्गारि । पु । करवीरे ॥

तुरङ्गारोह । त्रि । अश्वारोहे । सादिनि ॥ तुरङ्गमारोहति । रुहे कर्म्मण्यण् ॥

तुरङ्गिका । स्त्री । देवदालीलतायाम् ॥

तुरङ्गी । त्रि । अश्वारोहे ॥ मत्वर्थेइनि ॥

तुरङ्गी । स्त्री । अश्वगन्धायाम् ॥ घोटिकायाञ्च ॥ वडवायाम् ॥

तुरायणम् । न । यज्ञविशेषे ॥ असङ्गवचने ॥ तुतोर्प्ति । तु । त्वरणे । क । तुरस्यायनम् । पूर्वपदादितिणत्वम् । त्वरितस्यच्छिगमनमसङ्गं भवति ॥

तुराषाट् ड् । पु । आखण्डले । इन्द्रे ॥ तुतोर्त्ति । तुर० । इगुपधज्ञाप्रीकिर क । तुरवेगवन्त साहयति अभिभवति अधे मसहने प्रसहनमभिभवइतिदत्ते । ण्यन्तात् सहे क्विप् । सहे.साड.सइतिषत्वम् । अन्येषामपीतिपूर्वपदस्यदीर्घ. । आकृप्रश्लेषोवा ॥

तुरि । स्त्री । तुर्याम् ॥ तुतोर्त्ति । तुर० । इन् ॥

तुरी । स्त्री । तन्तुवायस्य काष्ठनिर्मिते उपकरणविशेषे । तुल्याम् ॥ कृदिकारादितिङीष् ॥

तुरीयम् । न । ब्रह्मणि । सर्वाधारभूतेऽनुपहितचैतन्ये ॥ वनहृयत दवच्छिन्नाकाशयोर्जलाशय जलतद्गतप्रतिविम्बाकाशयोर्वा आधारानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूत यदनुपहितचैतन्य तत् तुरीयमित्युच्यते । आधारश्चासौ अनुपहितश्चासौ आकाशश्च सतथा तद्वदितियावत् । यद्याकाशस्य वनाश्रयत्वं जलाश्रयत्वंवा नास्ति तदनारम्भकत्वात् तथाप्यवकाशमन्तरेण तयो.स्थित्यनुपपत्तेस्तदाधारत्ववचनमितिद्रष्टव्यम् । अस्य

चैतन्यस्य तुरीयत्त्वं विश्वाद्यपेक्षया द्रष्टव्यम् ॥ त्रि । चतुर्थे ॥ यथा तुरीयवाचो मनुष्या वदन्तीति । वाचस्तुरीयत्त्वं पराद्यपेक्षया कुलगुरोरुपदेशात् ज्ञातव्यम् ॥ चतुर्णां पूरणः चतुरश्छयतावाद्यक्षरलोपश्चेतिछः ॥

तुरीयवर्ण । पु । शूद्रे ॥ तुरीयश्चासौ वर्णश्च ॥

तुरुष्क । पु । गन्धद्रव्यविशेषे । धूम्रे । सिल्हके । पीतसारे । शिलारस इति भाषा ॥ म्लेच्छजातिविशेषे । तुरक इति भाषा ॥ देशविशेषे । तुरकस्थान इतिभाषा ॥ श्रीवासे ॥ तुतोर्त्ति । तुर० । बाहुलकादुस् गुणाभावश्च । स्वार्थे कन् ॥ सरल्द्रुमे इतिकश्चित् ॥

तुर्य्य । त्रि । तुरीये । चतुर्थे ॥ चतुर्णां पूरणः । चतुरश्छयताविति यत् आद्यक्षरलोपश्च ॥

तुर्वसु । पु । म्लेच्छानां राज्ञि । म्लेच्छाचारपरे । ययातिराजस्य पुत्रविशेषे ॥

तुलजापुरम् । न । दक्षिणदेशप्रसिद्धे दुर्गास्थाने ॥

तुलसी । स्त्री । स्वनामप्रसिद्धायां वैष्णवाम् । वृन्दायाम् । पर्यायो ॥ तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तकृत् । दीपनी कुष्ठकृच्छ्रा स्रपार्श्वरुक कफवातजित् ॥ शुक्ला कृष्णा च तुलसी गुणैस्तुल्या प्रकीर्त्तिता ॥ तुलां स्वसादृश्यम् स्यति । अस्यति । अन्येषु । कर्म्मण्यण् । ङीप् । शकन्ध्वादि ॥ यस्मादृव्या स्तुलना स्ति विश्वेषु चाखिलेषु च । तुलसी तेनविख्यातेतिदेवीभागवतम् ॥ * ॥ यद्धर्म्मकर्म्म कुरुते मनुजः पृथिव्यां नारायणप्रियतमां तुलसीं विनाच । तत् सर्व्वमेव विफलं भवतिद्विजेन्द्र यन्नेचणो पिनहितुष्यति देवदेव ॥ * ॥ तुलसीकाष्ठनिर्म्माणमालां गृह्णाति येनरः । पदेपदे ऽश्वमेधानां लभन्तेनिश्चितं फलम् ॥ प्रभाते तुलसीं दृष्ट्वा स्वर्णदानफलं लभेत् । मालतीं यूथिकां कुन्दं माधवीं केतकीं तथेत्यादि ब्रह्मवैवर्त्तपुराणे श्रीकृष्णजन्मखण्डे १०२ अध्यायः ॥

तुलसीद्वेषा । स्त्री । वर्व्वर्याम् । सुरसायाम् ॥

तुला । स्त्री । सादृश्ये ॥ माने ॥ गृहाणां दारुबन्धाय पीठिकायाम् । उपरिस्थाप्यदार्वाधारभूते स्तम्भाग्रपीठे ॥ पलशते ॥ भाण्डे ॥ सप्तमराशौ । युके । घटे ॥ जन्मकालीनचन्द्राश्रितैतद्राशिफलम् । दृषतुरङ्गगजक्रयविक्रये द्विजसुरार्च्चनदानमना, पु

मान् । यस्मिन् तौलिगते बहुदार भाग् विभवसञ्चितचिन्तितविक्रम ॥ तुलाचम्रजातस्यफलम् । तुलालम्ने पुमान्जात. सुधी सत्कर्म्मतत्पर । विद्वान् सर्वकलाविज्ञो धनाढ्यो जन पूजित ॥ तोल्यतेऽनयावा तोल न वा । तुलउन्माने । भिदाद्यङ् । अतुलोपमाभ्यामिति निर्देशात्तुला भाव: ॥ * ॥ परीक्षाविशेषे ॥ यथा ह्नारद्' । ब्राह्मणस्यधटोदेय क्षत्रि यस्यहुताशन । वैश्यस्यसलिल दे-य शूद्रस्यविषमेवतु ॥ साधारण. स मस्तनाकोष प्रोक्तो मनीषिभि । विषवर्ज्जं ब्राह्मणस्य सर्वेषान्तुतुला-स्मृता ॥

तुलाकोटि । स्त्री । मानभेदे ॥ अवु दे ॥ नूपुरे ॥ तुलां तुलयावा कोट यति । कुटपरितापे । चु० । अच्इ ॥ तुलाकारकोटिरग्रमस्यवा ॥

तुलाकोटी । स्त्री । तलाकोटौ ॥

तुलाकोष । पु । तुलापरीक्षायाम् ॥

तुलाधर । पु । तुलाराशौ ॥ तुलागुणे ॥ त्रि । वाणिजके ॥ तुलाया धरो धारक ॥

तुलापुरुषदानम् । न । तुलादान इतिलोकप्रसिद्धे दाने । यथा । आद्यन्तु सर्वदा नानातुलापुरुषसञ्चितमिति ॥ षोड शमहादानान्तर्गतदानविशेषे ॥

तुलामानम् । न । स्वर्णादीनापरिच्छेदार्थक्रियमाणे । काँटा इतिभाषा-प्रसिद्धे ॥

तुलाबीजम् । न । गुञ्जायाम् ॥

तुलि । स्त्री । तुर्य्याम् ॥

तुलिका । स्त्री । खञ्जनिकायाम् ॥

तुलिकायन्त्रम् । न । ज्योतिर्विदांयन्त्र विशेषे ॥

तुलित. । त्रि । तुलया परिच्छिन्ने । तुलाइति तुलगया इतिचभाषा ॥ उपमिते ॥ समीकृते ॥ तुलयतेस्तुलक रोतेर्वायन्तात् कर्मणिक्त ॥

तुलिनी । स्त्री । } शाल्मलिद्रुमे ॥
तुलिफला । स्त्री । }

तुली । स्त्री । तुर्य्याम । तन्त्रवायकाष्ठ विशेषे ॥

तुल्य: । त्रि । सदृशे । समे । समाने ॥ तुलया सम्मित । नौवयोधर्म्मेत्या दिना यत् ॥

तुल्यपानम् । न । बहुभिरात्मीयैर्जनै. सहमिलित्वा एककालेकृते पाने । सपीतौ ॥ इत्यमर. ॥ तुल्यञ्चतत् पानञ्च ॥

तुल्ययोगिता । स्त्री । अलङ्कारविशषे ॥ यथा । नियतानां सकृद्धर्म सा पुनस्तुल्ययोगिता ॥ नियतानाप्राक-

रशिकानामेवाप्राकरणिकानामेव-वा । क्रमेणोदाहरणम् । पाण्डुच्छा मवदन हृदय सरस तथालसञ्च व पु । आवेदयति नितान्त चेत्रियरोग सखिहृदन्त ॥ कुमुदकमलनील नीरजालि ललितविलासजुषोर्द्दशो पुर का । अमृतममृतरश्मिरम्बुज न्मप्रतिहतमेकपदे तवाननस्य ॥ अ न्यदपि । प्रस्तुताना तथान्येषां केव ल तुल्यधर्मत । औपम्य गम्यतेयत्र सा मता तुल्ययोगितेति ॥

तुवर । पु । न । कषायरसे ॥ तवति छिनत्ति रेगान् । तुरितिसैाचोधातु । छित्वरच्छत्त्वरेत्यादिना ष्वरच् ॥ धान्यविशेषे । तुवरयावनाले ॥ चि । कषायरसवति ॥

तुवरयावनाल । पु । धान्यविशेषे । तुवरे । रक्तयावनाले ॥ तुवरोयावनालस्तु कषायोष्णो विरेचक । सङ्ग्राही वातशमने विदाही शोषकारक ॥

तुवरिका । स्त्री । तुवर्याम् । आढक्याम् । तुवर इति अरहर इतिच भाषा ॥ तुवरो ऽस्त्यस्या । अतइनिठनाविति ठन् । टाप् ॥ सुराष्ट्रजमृत्तिकायाम् । फिटकरी इतिभाषा ॥

तुवरी । स्त्री । आढक्याम् । अरहर इति तूर इतिचभाषा ॥ काक्ष्याम् । सैाराष्ट्रमृदि । फिटकरी इतिभाषा ॥ तोरी इतिप्रसिद्धे धान्ये ॥ यथा । तुवरी ग्राहिणी शीता लघ्वी कफवि षास्रजित् । तीक्ष्णोष्णा वह्निदा क ण्डूकुष्ठकोठकृमि प्रणुत ॥

तुवरीतैलम् । न । तुवर्या स्नेहे ॥ स्नेहेतैलच् । तीक्ष्णोष्ण तुवरीतैल ल घु ग्राहि कफास्रजित् । वह्निकृ द्वि षहृत् कण्डूकुष्ठकोठकृमिप्रणुत् ॥ मेदोदोषापहञ्चापि व्रणशोधहर परम् ॥

तुवरीशिम्ब । पु । रक्तचक्रमर्दके ॥

तुवि । स्त्री । तुम्ब्याम ॥ इ०अ०ला ॥

तुष । पु । धान्यत्वचि ॥ विभीतकद्रुमे ॥ तुष्यति । तुषतुष्टौ । इगुपधेति क' ॥

तुषग्रह' । पु । वह्नौ ॥

तुषधान्यम् । न । मुद्गादिषु ॥ मुद्गोमाषो राजमाषो निष्पावश्च मकुष्ठक । चणकाढकिमङ्गल्या खितुट' सकुलायक ॥ तुषधान्यानिप्रोक्तानि वैद्यशास्त्रेभिषग्वरै ॥

तुषसार । पु । अग्नौ ॥ इतिशब्दमाला ॥

तुषानल । पु । तुषजाग्नौ । कुकूले ॥

तुषाम्बु । न । तुषोदके ॥

तुषार । पु । शीकरे ॥ हिमे ॥ देश

विशेषे ॥ हिमभेदे ॥ कर्पूरभेदे ॥ त्रि । शीतले ॥ तोषयति । तुषैरन्न भावितत्वयर्थात् कर्मे किट्टिच्यनु च्चौ तुषारादयश्चेत्यारन् ॥

तुषारकाल । पु । हेमन्ते ॥

तुषारकिरण । पु । चन्द्रे ॥

तुषाराम्बु । न । तोषारे ॥

तुषित. । पु । गणदेवताप्रभेदे ॥ चचे स्नतयस्य यशाख्यस्य विष्णो र्द्वादश-सुपुत्रेषु ॥ तेयथा । तोष.प्रतोष सन्तोषो भद्र शान्तिरिडस्पतिः । इध्म' कवि र्विभु स्वह्न. सुदेवो रोच नो द्विषट् ॥ तुषितानामतेदेवा आसन् स्वायम्भुवान्तरे ॥ तुष्यति । तुष० । रुचिवचिकुचिकुटिभ्य. कि तजिति वाहुलकात् कितच् ॥ यद्वा । तोषणं तुट् । सपदादित्वात् कि प् । ततस्तारकादित्वादितच् ॥ प्राणा पाना वुदानश्च समानो व्यानएवच । चक्षु श्रोत्ररसो घ्राण स्पर्शोवुद्धि र्मनस्तथा । द्वादशै तेहितुषितादेवा स्वारोचिषेन्तरे ॥ केषाञ्चिन्मते षट् त्रिंशत् तुषितामता ॥

तुषोत्थम् । न । तुषोदके ॥ इतिरानि० ॥

तुषोदकम् । न । काञ्जिके ॥ काञ्जि-कप्रभेदे ॥ अस्यलक्षण यथा । तुषो दकयवैरामै सतुषै शकली कृते । यवैश्चदकसहिते सन्धानवर्गोक्त त्वात् । तुषाम्बुदीपन हृद्य पाण्डु कृमिगदापहम् । तीक्ष्णोष्णं पाचन पित्तरक्तकृद्वस्तिशूलनुत ॥

तुष्ट । त्रि । परितृप्ते । सन्तोषविशिष्टे । प्राप्तपरितोषे ॥ स्त्रियोजारेणतु ष्यन्ति गाव स्वच्छन्दचारत. । कुञ्ज रा पांशुवर्षेण ब्राह्मणा. परनिन्दया ॥ तुष्यतेस्म । तुष० । क्त ॥

तुष्टि । स्त्री । तोषे । अधिगतार्था द न्यत्र तुच्छत्त्ववुद्धौ ॥ भोगेष्वेतावता लमितिवुद्धौ ॥ साचानन्तपत्नी । य था । अनन्तपत्नीतुष्टिश्चपूजितावन्दि ताभवत् । ययाविना नसन्तुष्टा सर्व-लोकाश्चसर्वतइति श्रीदेवीभागव तम् ॥ नवधातुष्टि । ता परिगणय ति । आध्यात्मिकाश्चतस्र प्रकृत्युपा दानकालभागाख्या । वाह्याविषयो परमात् पञ्चनवतुष्टयोऽभिमता ॥ प्रकृतिव्यतिरिक्त आत्मास्तीति य स्ततोऽस्यश्रवणमननेस्त । ततोवि वेकसाक्षात्कारायतु असदुपदेशतु ष्टो न प्रयतते तस्यचतस्र आध्या त्मिकास्तुष्टयो भवन्ति । प्रकृतिव्यति रिक्तमात्मानमधिकृत्य यस्मात् ता स्तुटयस्तस्मादाध्यात्मिका । कास्ता इत्यतआह । प्रकृत्युपादानकालभा

गाख्या । प्रकृत्त्यादिराख्यायासा ता स्तथोक्ता । प्रकृत्त्याद्यर्थविभागश्चत त्तच्छब्दार्थ निरूपणे यथास्थान द्रष्ट व्य ॥ वाह्या दर्शयति। वाह्याविषयो परमादित्त्यादिना। वाह्यास्तुष्टयो विषयोपरमात् पञ्च । या खल्व नात्मन प्रकृतिमहदहङ्कारादीना त्मेत्त्यभिमन्यमानस्य वैराग्ये सति तुष्टयस्ता वाह्या आत्मज्ञानाभावेऽ नात्मानमधिकृत्त्यप्रवृत्ता ताश्चवै राग्येसतिभवन्तितुष्टयइतिवैराग्यहे तुपञ्चकत्वाद्वैराग्याणि पञ्च तत् पञ्च त्वात् तुष्टय पञ्चेति । उपरम्यतेऽ नेनेत्त्युपरमोवैराग्यम् विषयादुप रमोविषयोपरमस्तस्मात् । विषया भोग्या शब्दादय पञ्च उपरमाअपि पञ्च । तथाहि अर्जनरक्षणक्षयभोग हिंसादोषदर्शन हेतुजन्मान एका पारपारापारपारत पारानुत्तमाम्भो त्तमाम्भसंज्ञका पञ्चोपरमाभवन्ति । एकापाराद्यर्थविभागश्चयथास्थानं द्रष्टव्य । तदेवमाध्यात्मिकाभिश्चत सृभिर्वाह्याभिश्चपञ्चभिर्नव तुष्टयो ऽभिहिता साङ्ख्याचार्यैं ॥ तोषणा म् । तुष० । क्तिन् ॥ तुष्टिर्नुरकृत र्थस्यकृतार्थोऽस्मीतियामति ॥

तुष्टिदानम् । न । पारितोषिके ॥ तुष्टि

ज्ञानमेव चाराणा हितेतनम् तेहि तल्लाभात् स्वामिकार्येष्वतीव त्वरय न्ते इति नीतिवाक्यामृतम् ॥

तुष्टु । पु । कर्णमणौ ॥ इति शब्दच न्द्रिका ॥

तुष्टुषित । त्रि । स्तोतुमभिप्रेते ॥

तुहिनम् । न । हिमे ॥ चन्द्रतेजसि ॥ तोहति तुह्यतेऽनेनवा । तुहिर्अ र्दने । वेपितुह्योर्ह्स्वश्चेतीननप्र त्यय लघूपधगुणे कृतेह्रस्वश्च ॥

तुहिनांशु । पु । चन्द्रे ॥ कर्पूरे ॥

तुहिनांशुतैलम् । न । कर्पूरतैले ॥

तूण । पु । उपासङ्गे । तूणीरे । निष ङ्गे ॥ तूण्यतेऽनेन । तूणसङ्कोचने । चु० । घञ् ॥ तूणयति वा । अच् ॥

तूणकम् । न । अतिशर्करीसज्ञकच्छन्दो विशेषे ॥ यथा । तूणक समानिका पदद्वय विनान्तिमम् ॥ यथा । सा सुवर्णकेतक विकाशि भृङ्गपूरि तप ञ्चवाणबाणजालपूर्णहेमतूणकम् । राधिकावितर्क्य माधवाद्यमासिमाध वे मोहमेति निर्भर त्वया विनाक लानिधे ॥

तूणा । स्त्री । इषुधै । तूणे ॥ टाप् ॥

तूणी । पु । नन्द्योदृक्षे । पीतके ॥ त्रि । तूणयुक्ते ॥

तूणी । स्त्री । तूणे ॥ नील्याम् ॥ तूणय

तेऽनग्रा । तूर्णपूर्यो । इवश्चेतिघ ञ्। गौरादित्वान् ङीष् ॥

तूणीक । पु । नन्दीवृचे ॥

तूणीर । पु । तूणे । निषङ्ग ॥ तूणीं ग्रारै सङ्कोच राति । रादाने आदा नेच । आतोनुपेतिक ॥ यद्वा । तू णयते । तूण० । वाहुलकादीरन् ॥

तूतकम् । न । तूत्ये । तूतिया इति भाषा ॥

तूद । पु । तूदे । अश्वत्थाकारे पार्श्व पिप्पल इति ख्याते तूत इतिच प्र सिद्धे वृचे ॥ अस्यफलगुणा । तूद पक्क गुरु स्वादु हिम पित्तानिलापहम् । तदेवाम गुरु सर मत्युष्ण रक्तपि त्तकृत् ॥ तूदति । तूदव्यथने । इगु पधेतिक । पृषोदरादि ॥

तूरम् । न । वाद्यसामान्ये ॥ ताड्यमा ने पटहादौ ॥

तूरी । स्त्री । धत्तूरे ॥ इतिभावप्रकाश ॥

तूर्णम् । न । शीघ्रे । सत्वरे ॥ त्रि । त इति ॥ त्वरतेस्म । ञित्वरासम्भ्रमे । गत्यर्थाकर्मकेतिकर्त्तरिक्त रुष्य मत्वरसङ्घुषास्वनामितीड्भावप चे ज्वरत्वरेत्यूठ् । रदाभ्यामितिश त्वम् ॥

तूर्णि । पु । मले ॥ त्वरायाम् ॥ त्वर ते त्वरयत्त वा । ञित्वरा० । वहिश्रि

श्रुयुद्रुग्लाहात्वरिभ्यो नित्दितिनिः ॥

तूर्य्यम् । न । वाद्ये ॥ वाद्यप्रभेदे ॥ आ दिगुरु (ऽ।) चिकले ॥

तूर्य्यखण्ड । पु । हुगडवाद्ये ॥

तूलम् । न । ब्रह्मदारुणि । ब्राह्मणेष्टे । तूदे ॥ आकाशे ॥ पु । न । पिच्चौ । निर्वीजकार्पासे । रुयो इति भाषा ॥ तूलयति तूल्यते वा । तूलनिष्क र्षे इगुपधेतिक घोवा ॥

तूलकम् । न । तूले ॥

तूलकार्म्मुकम् । न । तूलस्फोटनार्थे धनुषि । पिञ्जले । तूलधनुषि ॥

तूलचाप । पु । } तूलकार्मुके । धुन
तूलधनु । न । } क इति भाषा ॥

तूलनालिका । स्त्री । पिञ्जिकायाम् । पांइज इति गौडभाषा ॥

तूलनाली । स्त्री । तूलनालिकायाम् ॥

तूलपिचु । पु । तूले ॥

तूलवृच । पु । शाल्मलीवृचे ॥

तूलशय्या । स्त्री । तूलिकायाम् ॥ तूल स्यशय्या । तूलेननिर्मिताशय्यावा । शाकपार्थिवादि ॥

तूलशर्करा । स्त्री । कार्पासवीजे । वि नौरा इति विनौला इति कपासि आ इतिचभाषा ॥

तूलसेचनम् । न । कर्त्तने । सूत्रकर्त्त ने । कातना इतिभाषा ॥ इ०श०स्ता॥

तूला । स्त्री । कार्पास्याम् ॥ वर्त्याम् ॥

तूलि । स्त्री । तूल्याम् ॥ स्वनाम्नाख्याते चित्रकरोपकरणे । ईषिकायाम् ॥ तूलति । तूल०। इगुपधात्किदितीन् ॥

तूलिका । स्त्री । शय्योपकरणे । तोसक इति भाषा ॥ आलेख्यस्यलेखन्याम् । कूर्चिकायाम् ॥ यथा । जगच्चित्र समालिख्य स्वेच्छातूलिकयात्मनि । स्वयमेव समालिख्य प्रीणातिभगवान् शिव ॥ आत्ममये महति पटे विविधजगच्चित्रमात्मनालिखितम् । स्वयमेव केवल मसौ पश्यन् प्रमुद प्रयाति परमात्मेति ॥ ईषिकायाम् । वीरणादिशलाकायाम् ॥ सुवर्णादेरावर्त्तनपरीक्षणार्थं निक्षिप्य माणायां शलाकायाम् ॥ तूलति भूष्यते वा । तूल०। कुन् ॥

तूलिनी । स्त्री । शाल्मलिद्रुमे ॥ लच्मणाकन्दे ॥

तूलिफला । स्त्री । शाल्मलौ ॥

तूली । स्त्री । नील्याम् ॥ वर्त्याम् ॥ तूलिकायाम् ॥ चित्रलेखन्याम् । चित्रसाधनद्रव्ये । कूर्चिकायाम् ॥ ङीष् ॥

तूवर । पु । काले ऽश्मश्रुपुरुषे ॥ प्रौढाशृङ्गानडुहि । काले ऽजातशृङ्गे गवि ॥ पुरुषव्यञ्जनरहिते ॥ कषाय रसे ॥ तौति । तु वैचौगस्त्यादौ । बाहुलकादरोदीर्घश्च ॥ यद्वा । तनोति । बाहुलकाट् डू । तूश्चासौ वरश्च आच्छादक ॥

तूवरी । स्त्री आढक्याम् ॥ सौराष्ट्रमृत्तिकायाम् ॥

तूष्णींशील' । त्रि । तूष्णीके । मौनयुक्ते ॥ तूष्णीं शील यस्य ॥

तूष्णीक । त्रि । मौनयुक्ते । मौनशीले ॥ तूष्णींशील । शीलेकोमलोपश्च । केश इति ह्रस्वोनमलोपसामर्थ्यात् अन्यथाऽठपमेवविदध्यात् । ऽपि अव्ययानामितिटिलोपेन सिद्धत्वात् ॥

तूष्णीकाम् । अ । मौने ॥ अकच्प्रकरणे तूष्णीम.काम्वक्तव्य' । भित्त्वा दन्त्यादच पर. ॥

तूष्णीम् । अ । मौने ॥ तोषणम् । तुषतुष्टौ । बाहुलान् नीम् उपधाया ऊत् ॥ घटाकाश महाकाशइवात्मान परात्मनि । विलाप्याखण्डभावेन तूष्णीं भव महामुने इत्युपदेश' ॥

तूस्तम् । न । रेणौ ॥ जटायाम् ॥ तोसति । तुसशब्दे । बाहुलकात् तन् धातोर्दीर्घश्च ॥

तृखम् । न । जातीफले ॥

तृणम् । न । अर्जुने । तृणमात्रे ॥ तृ

णविशेषे नडादौ ॥ तृणयते । तृणु अदने । घञ् । संज्ञापूर्वकत्वाद्गुणो न ॥ यद्वा । तृणति । तृणूहिंसायाम् । तृहे. श्रोहलोपश्च ॥ अग्निचौर भय रोगो राजपीडा धनक्षति । स क्लृहे तृणकाष्ठानां कृते । वस्त्रादिप क्वके ॥

तृणकन्द. । पुं । कशेरुणि ॥

तृणकाण्डम् । न । तृणानां समूहे ॥ दूर्वादिभ्यःकाण्ड ॥

तृणकुङ्कुमम् । न । सुगन्धद्रव्यप्रभेदे । तृणपुष्पे । गन्धाधिके ॥ कटुत्वमुष्णत्वं कफमारुतशोफकण्डूतिपामाकुष्ठामदोषनाशित्व परमभास्वरत्वञ्चास्यस्यगुणा ॥

तृणकुटी । स्त्री । कायमाने । तृणौकसि ॥

तृणकूर्म्म. । पु । तुम्ब्याम् ॥

तृणकेतु । पु । } वंशे ॥
तृणकेतुक । पु । }

तृणगोधा । स्त्री । चित्रकोले ॥ कृकलासे ॥

तृणग्रन्थि । स्त्री । स्वर्णजीवन्त्याम् ॥

तृणग्राही । पु । नीलमणौ ॥ कपूर इति प्रसिद्धे मणिविशेषे । तृणमणौ ॥

तृणजाति' । स्त्री । उलपादौ ॥

तृणज्योतिः । न । रात्रौ प्रकाशशालिनि लताविशेषे ॥

तृणता । स्त्री । कार्मुके । धनुषि ॥ तृणत्वे ॥ भावेतल् ॥

तृणद्रुम । पु । नारिकेलादिवृक्षेषु ॥ ताले ॥ गुवाके ॥ ताल्याम् ॥ केतक्याम् ॥ खर्जूरे ॥ खर्जूर्याम् ॥ हिन्ताले ॥

तृणधान्यम् । न । नीवारे । श्यामाकादौ । उडिधान इतिगौडभाषा ॥ तृणमिवधान्यम् अकृष्ट्योत्पन्नत्वात् ॥

तृणध्वज । पु । वंशे ॥

तृणनिम्ब । पु । नेपालनिम्बे ॥

तृणपत्रिका । स्त्री । इक्षुदर्भायाम् ॥

तृणपर्णी । स्त्री । गुण्डाशिन्याम् ॥

तृणपुष्पम् । न । तृणकुङ्कुमे ॥

तृणपुष्पी । स्त्री । सिन्दूरपुष्पीवृक्षे ॥

तृणपूली । स्त्री । चाँच इतिगौडेषु प्रसिद्धे । चञ्चायाम् ॥

तृणमणि । पु । तृणग्राहिणि ॥

तृणमत्कुण । त्रि । लग्नके । जामिन् इतिभाषा ॥ इतित्रिकाण्डशेष ॥

तृणराज । पु । नारिकेले ॥ तालवृक्षे ॥ तृणाना राजा । ट ॥

तृणराजाह्व । पु । तालद्रुमे ॥ तृणराजाह्वयास्याह्वायस्य ॥

तृणराजाह्वय । पु । तालवृक्षे ॥ तृण-

राजवृक्षाद्धयेोयस्य ॥

तृणवल्वजा । स्त्री । वल्वजायाम् ॥

तृणबीज. । पु । }
तृणबीजोत्तमः । पु । } श्यामाके ॥

तृणशीतम् । न । गन्धतृणे । कत्तृणे ॥

तृणशीता । स्त्री । जलपिप्पल्याम् ॥

तृणशून्यम् । न । मल्लिकायाम् ॥ के तकीशाखिन फले ॥ तृणशून्येस्या नेसाधु । तत्नसाधुरितियत् ॥ त्रि । तृणरहिते ॥

तृणषट्पद् । पु । वरोले । वरटाया म् । वरडै इति तत्तैया इतिचभाषा ॥

तृणसारा । स्त्री । कदल्याम् ॥ तृणानि सारमस्याम् ॥

तृणसिंह' । पु । कुठारे ॥

तृणहर्म्यं. । पु । मयटे । तृणनिर्मिता ट्टालिकायाम् । मैडा इतिभाषा ॥

तृणाग्नि । पु । वल्वले । तृणोत्थवह्नौ ॥

तृणाङ्घ्रिप । पु । मन्थानकतृणे ॥

तृणाञ्जन । पु । कृकलासे ॥

तृणाढ्यम् । न । पर्वततृणे । मृगप्रिये ॥

तृणाम्लम् । न । लवणतृणे । लूणियाशा क इतिभाषा ॥

तृणाह्वक् । पु । तृणकुङ्कुमे ॥

तृणेक्षु' । पु । वल्वजायाम् ॥

तृणोत्तम । पु । उखर्वलतृणे ॥

तृणोद्भव । पु । नीवारे ॥

तृणौकः । न । कायमाने । तृणनिर्मि तगृहे ॥

तृणौषधम् । न । एलवालुकाख्यगन्ध- द्रव्ये ॥

तृण्या । स्त्री । तृणसमूहे । तृणानां सम ह्तैा ॥ तृणानांसमूह । पाशादि भ्योयः ॥

तृतीय. । त्रि । त्रयाणां पूरणे । तीसरा इतिभाषा ॥ त्रे सम्प्रसारणञ्चेतितृती यप्रत्यय सम्प्रसारणञ्च ॥

तृतीयक' । पु । तृतीयकस्तृतीयेऽह्नी तिलक्षणलक्षितेज्वरविशेषे ॥ तृती येऽह्नीत्यागमादिनगह्णीत्वा । यतउ क्तम् । दिनमेकमतिक्रम्य योभवेत् सतृतीयक इति ॥ तृतीयेऽहनिभ व' । कालप्रयोजनाद्रोगइतिकन् ॥ त्रिके ॥ तृतीयेन रूपेण ग्रहणम् । ता वतिथग्रहणमितिलुग्वाइतिकन् ॥

तृतीयप्रकृति । स्त्री । क्लीवे ॥ स्त्रीपु सावपेक्ष्य तृतीयाचासौप्रकृतिश्चेति विग्रह ॥

तृतीया । स्त्री । तिथिविशेषे । चन्द्रम- ण्डलस्य तृतीयकलाक्रियारूपायाम् । तत्क्रियोपलक्षिते काले वा ॥ स कलगुणगभीरो भूमिपालानुरागी परनगरविनाशी सर्वलोकोपकारी । परविषयनिवासी कैातुकी सत्य

वादी भवति निखिलविद्यो यस्तृती यामृकृत ॥ टा भ्याम् भिस् इति त्रि के ॥ टाप् ॥

तृतीयाकृतम् । त्रि । त्रिगुणाकृते । त्रिवारकृष्टेक्षेत्रे ॥ तृतीयकृतम् । कृञो द्वितीयतृतीयेतिडाच् ॥

तृतीयाप्रकृति । स्त्री । नपुंसके ॥ स्त्री पुंसावपेक्ष्य तृतीया प्रकृति तृतीय प्रकार' । असमस्तमेतत् । समासेतु तृतीयप्रकृतिरेव ॥

तृपत् । पु । चन्द्रे ॥ छत्रे ॥ तृप्यति तृपप्रीणने । सम्पत्तृपद्दृदिति अति प्रत्ययान्तोनिपातित ॥

तृपला । स्त्री । लतायाम् ॥ तृप्यति । तृप० । कलस्तृपश्चेति तृपते.कल प्रत्यय. ॥

तृप्त । त्रि । हृष्टे । प्रमुदिते । प्रीते । तृप्तियुक्ते ॥ तृप्यतिस्म । तृप० । क्त. ॥

तृप्ति । स्त्री । तर्पणे । सौहित्ये । भक्षणादिनाकाङ्क्षानिवृत्तौ ॥ सर्वकामावाप्तौ । अलम्प्रत्ययेनेच्छाविच्छित्तौ ॥ तर्पणाम् । तृप० । स्त्रियां क्तिन् ॥

तृप्र । पु । घृते ॥ पुरोडाशे ॥ तृप्यतेऽनेन । तृप० । स्फायितञ्चीतिरक् ॥ न । काष्ठे ॥ दुःखे ॥

तृप्रांशु' । त्रि । तृप्रं न सहते । आशु' ॥

तृफला । स्त्री । त्रिफलायाम् ॥ तृफति । तृफ० तृप्तौ । कलस्तृपश्चेतिचकारात् तृफतेरपि कल. ॥

तृफु । पु । सर्पजातौ ॥

तृट् । स्त्री । लिप्सायाम् । वाञ्छायाम् ॥ उदन्यायाम् ॥ स्मरपुत्र्याम् । कामकन्यायाम् ॥ तर्षणाम् । ञितृषपिपासायाम । सम्पदादि क्विप् ॥

तृषा । स्त्री । तृषि ॥ भागुरिमते टाप् । तृषापि न कृशाममेति प्रयोग. ॥ लाङ्गलिकीवृक्षे ॥

तृषाभू । स्त्री । क्लोमनि । फोंपडा इतिभाषा ॥

तृषाह्वम् । न । जले ॥

तृषाह्वकम् । न । मधुरिकायाम् ॥

तृषाह्वा । स्त्री । मधुरिकायाम् ॥

तृषित । त्रि । सतृषि । तृषयायुक्ते ॥ तृट्सञ्जाताऽस्य । तारकादित्वादितच् ॥

तृषितोत्तरा । स्त्री । असनपर्ण्याम् ॥

तृष्णक् । त्रि । लुब्धे ॥ तृष्यति । ञितृष० । तच्छील । स्वपितृषोर्नजिङ् ॥

तृष्णा । स्त्री । तर्षे । पिपासायाम् । प्यास इतिभाषा ॥ लिप्सायाम् । अप्राप्ताभिलाषे । अनात्मीयस्वीकारेच्छायाम् ॥ इदं मे न चीयतामितीच्छायाम् ॥ उचितव्ययाकरणेनापि

धनरक्षणेच्छारूप कार्पण्यमपि तृष्णाभेद ॥ लोभे ॥ यादुस्त्यजा दुर्मतिभि र्जीर्यतो या न जीर्यति । तां तृष्णा दुःखनिवर्हां शर्मकामो द्रुतं त्यजेत् ॥ तर्षणम् । ञितृष० । तृषि शुषिरसिभ्य किदिति न ॥ विशेषो भावप्रकाशेचतजतृष्णायाम् ॥

तृष्णाक्षय । पु । शान्तौ ॥ परमानन्दप्राप्तिहेतौ ॥ तथाचवेदव्यास । यच्च कामसुख लोके यच्च दिव्य महत्सुखम् । तृष्णाक्षयसुखस्यै ते नार्हन्त षोडशींकलामिति ॥ पिपासानाशे ॥ तृष्णाया. क्षय ॥

तृष्णारि । पु । पर्पटे ॥ इतिराजनिर्घण्ट ॥

ते । अ । त्वयेत्यर्थे ॥

तेज कार्य्यम् । न । घृतादिकार्ये ष्वस्थिमज्जवाचु ॥ तेजस कार्यम् ॥

तेज फल । पु । तेजफल इति तेजवल इतिचप्रसिद्धे वृक्षविशेषे । गन्धफले । वहुफले ॥ अस्यगुणास्तु । तेजफल. कटुस्तीक्ष्ण सुगन्धिर्दीपनोमत । वातश्लेष्मारुचिश्वासकासहिक्काहर स्मृतइति ॥

तेजन । पु । वंशे ॥ मुञ्जे ॥ भद्रमुञ्जे ॥ तेजयति शस्त्र मग्निवा । तिजनिशाने । चु० । नन्द्यादित्वल्यु युंज्वा ॥

तेजनक । पु । गुन्द्रे । शराभिधतृणे ॥ तेजयति । तिज ग । चु० । ण्वुल् कुन्वा ॥

तेजनी । स्त्री । मूर्वायाम् ॥ ज्योतिष्मत्याम् ॥ तेजति । तिजपालने । ल्युट् । गौरादित्वङीष् ॥

तेजपत्रम् । न । गन्धजाते । पत्रके । त्वक्पत्रे । तेजपात इति प्रसिद्धे द्रव्ये ॥

तेजल. । पुं । कपिञ्जलपक्षिणि ॥

तेजवती । स्त्री । गजपिप्पलिकायाम् ॥

तेजः । न । दीप्तौ ॥ प्रभावे ॥ पराक्रमे ॥ रेतसि ॥ नवनीते ॥ अग्नौ ॥ तापकेज्योतिषि ॥ शरीरगतायांकान्तौ ॥ सुवर्णे ॥ मज्जनि ॥ पित्ते ॥ असहने ॥ यथा । अधिक्षेपापमानादे प्रयुक्तस्य परेणयत् । प्राणात्ययेप्यसहन तत्तेज समुदाहृतम् ॥ प्रागल्भ्ये ॥ पराभिभवसामर्थ्ये ॥ परैरनभिभाव्यत्वे ॥ अप्रतिहताज्ञत्वे ॥ चैतन्यात्मकेज्योतिषि ॥ स्त्रीवालकादिभिर्मूढैरनभिभाव्यत्वे ॥ लिङ्गदेहे ॥ हयवेगे ॥ तेजोनाम दर्पापरनामा सत्त्वगुणविकार प्रकाशकोऽन्त सारविशेष । यथाहभोजराज । तेजो निसर्गज सत्त्व वाजिनां स्फुरण रज । क्रोधस्तम इतिज्ञेया स्त्रयोपिसहजा गुणा: ॥ तच्चद्विविधम् । सततोत्थित भयोत्थितञ्चेति

। यथाहसएव। धारासुयोजितानाञ्च निसर्गात् प्रेरया विना। अविच्छिन्न मिवाभाति यत् तेज सततोत्थित म्॥ कशापादादिघाते यत् साध्वसा त् स्फुरितन्तुतदिति ॥ * ॥ शब्दस्प र्शतन्मात्रसहितारूपतन्मात्रादुत्पन्ने शब्दस्पर्शरूपगुणे तृतीयेमहाभूते ॥ यथा। तृतीय ज्योतिरित्याहुश्च क्षुरध्यात्ममुच्यते। अधिभूत ततोरूप सूर्यस्तत्राधिदैवम्॥ उष्णस्पर्शवत्ते- ज। तद्द्विविधम्। नित्यमनित्यञ्च । नित्यंपरमाणुरूपम्। अनित्यका र्यरूपम्। पुनस्त्रिविधम्। शरीरेन्द्रिय विषयभेदात्। शरीरमादित्यलोके । इन्द्रियंरूपग्राहकचक्षुःकृष्णतारा ग्रवर्त्ति। विषयश्चतुर्विध। भौमदि व्योदर्याकरजभेदात्। भौमवह्न्या दिकम्। अविन्धन दिव्यविद्युदादि। भुक्तान्नस्यपरिणामहेतुरौदर्यम्। आ करजसुवर्णादीतितर्कसङ्ग्रह ॥ स्प र्शउष्णस्तेजसस्तु स्याद्रूप शुक्लभास्व रम्। नैमित्तिकंद्रवत्वन्तु नित्यतादि चपूर्ववत् ॥ इन्द्रिय नयन वह्निस्वर्णादि विषयोमतइतिभाषापरिच्छेद. ॥ तेजयति तेज्यतेऽनेन वा। तिज०। असुन्॥ तेजोजलमितिच्छन्दोनि घण्टु' ॥

तेजस्कर'। त्रि। तेजोवृद्धिकारकेद्रव्ये ॥

तेजस्वी। त्रि। तेजोयुक्ते ॥ त्वक्का- न्तिमति ॥ तेजोस्त्यस्यास्मिन्विा। विनि ॥

तेजस्विनी। स्त्री। ज्योतिष्मत्याम्॥ महाज्योतिष्मत्याम्॥ तेजवती ते जवल्कल तेजवलइत्यादिनाम्ना ख्या ते तेज.फले ॥ तेजस्विनी कफश्वा सकासाऽऽस्यामयवातहृत्। पाच न्युष्णाकटुस्तिक्ता वन्हिवन्हिप्रदीप नी ॥ नान्तत्वपक्षेङीप्॥

तेजित। त्रि। शाने। शाणादिना ती क्ष्णीकृते। शाणिते। निशिते ॥ ते ज्यतेस्म। तिज०। चु०। क्त' ॥

तेजीयान्। त्रि। तेजोयुक्ते ॥ तेजीय सानदोषायवह्ने सर्वभुजोयथा ॥

तेजोमन्थ। पु। गणिकारिकायाम्॥ तेजोमथ्नाति। मन्थ०। कर्मण्यण् ॥

तेजोमय। पु। तेजप्रचुरे चैतन्य प्रधानेज्योतिर्मये। अन्न करणोप हितत्वात् वासनामये स्वप्ने ॥

तेजोमात्रा। स्त्री। इन्द्रिये ॥ तेजसो मात्रा ॥

तेजोरूपम्। न। प्रकाशरूपे ब्रह्मणि ॥ त्रि। प्रभारूपे ॥

तेजोवती। स्त्री। इभपिप्पल्याम्॥ चव्ये ॥ महाज्योतिष्मत्याम्॥ वह्नि

पुर्याम् ॥ यथा । रक्तपीतमणिप्रायहे मप्राकारगोपुरा । वङ्के स्तेजोवती व ह्नितुल्यभूतनिषेविता ॥ तेजवत्या स्यकाष्ठे ॥

तेजोदृच्च । पु । क्षुद्राग्निमन्थे ॥

तेन । पु । गानाङ्गविशेषे ॥ यथा । तेनेतिशब्दस्तेन स्वान्मङ्गलानाप्रद र्शक' । तेशब्देनोच्यतेगौरी नशब्दे नोच्यतेहर । तेनमाङ्गलिकश्चाय शब्दस्तेनइतिस्मृतइतिसङ्गी० ॥

तेम' । पु । समुन्दने । आर्द्रीभावे ॥ तेमनम् । तिमआर्द्रीभावे । घञ् ॥

तेमनम् । न । आर्द्रीकरणे ॥ निष्ठाने । व्यञ्जने । तींवण इति तेवण इति चभाषा ॥ तिम०। ल्युट् । तिम्यते ऽनेन वा करणे वा ल्युट् ॥

तेमनी । स्त्री । चुल्लिप्रभेदे ॥

तेवनम् । न । केलिकानने ॥ क्रीडाया म् ॥ तेवनेन वन गत्वा नदीस्तीर्त्वा बहूदकाइतिरामायणम् ॥

तैक्ष्ण्यम् । न । तीक्ष्णतायाम् ॥

तैजस । पु । इन्द्रियाणा करणे । राज साहङ्करे ॥ तेजोमयान्त करणोपहि तत्वात् स्थूलप्रपञ्चलयस्थाने स्वप्नव्य ष्ट्युपहितचैतन्ये ॥ तेजसि परमा त्मनि स्थिते ॥ न । धातुद्रव्ये । सर्व धातु ॥ घृते ॥ तेजसोविकार' । त स्यविकारइत्यण् ॥ यद्वा । तेजो ऽस्यास्य । ज्योत्स्नाद्यण् ॥ तीर्थविशेषे ॥ यत्रब्रह्मादिभि सैनापत्ये कार्त्ति केयो ऽभिषिक्त ॥

तैजसावर्त्तिनी । स्त्री । मूषायाम् ॥ ते जसोविकार सुवर्णादि रावर्त्यते ऽस्याम् । वृतुवर्त्तने । णयन्त । अधि करणेल्युट् । ङीप् ॥

तैतिल । पुं । गण्डकपशौ ॥ न । चतु र्थंकरणे ॥ कलासुदक्षो ललनाभि- लाषी सुमूर्त्तिसन्तर्जितकामदेव । वक्ता गुणाढ्य कुशल सुशीलश्चेन्न- तिलाख्यकरण प्रसूतौ ॥

तैत्तिडीकम् । न । तित्तिडीकस्यावय वे ॥ तद्विकारे ॥ कोपधाच्चेत्यण् ॥ तित्तिडीकै संस्कृते ॥ कुलत्थकोप- धादण् ॥

तैत्तिर । पु । तित्तिरिखगे ॥ न । ति त्तिरीणां गणे ॥ तित्तिरीणा समूह. । अनुदात्तादेरञ् ॥

तैत्तिरिक । पु । शाकुनिकविशेषे ॥ तित्तिरान्हन्ति । ठक् ॥

तैत्तिरीयक । पु । यजुर्वेदीयशाखा- विशेषस्याध्येतरि ॥

तैत्तिरीया । स्त्री । यजुर्वेदस्यशाखावि शेषे ॥

तैमिरिक. । त्रि । तिमिरग्रस्तचक्षुषि ॥

तैरणी । स्त्री । कुनीस्याम् । रागद्वेषु पविशेषे ॥

तैर्थिक. । पु । तीर्थकरे । कपिलकणभुगादिषु ॥

तैर्य्यग्योन । पु । त्रिविधभूतादिसर्गेष्वेकस्मिन् सर्गे ॥ सचपशुमृगपक्षिसरीसृपस्थावरभेदात् पञ्चविधोभवति ॥

तैलम् । न । तिलसर्षपादिजनितस्नेहे । प्रचणे । स्नेहे । तेल इतिभाषा ॥ तिलस्यविकार. । तस्यविकारइत्यऽण् ॥ तिलादिस्नेहवस्तूनां स्नेह स्तैलमुदाहृतम् । तत्तुवातहरसर्वंविशेषात्तिलसम्भवम् ॥ नास्तितैलात्परं किञ्चिद्भेषजमारुतापहम् ॥ तिलतैल गुरुस्थैर्यबलवर्णकरं सरम् । व्यविकाषि विशद मधुर रसपाकयो ॥ सूक्ष्म कषायानुरस तिक्त वातकफ पहम् । वीर्येणोष्णंहिमस्पर्शं वृंहण रक्तपित्तकृत् ॥ लेखन बद्धविण्मूत्रं त्वग्गर्भाशयशोधनम् । दीपन वृद्धिद मेध्य व्यवायि व्रणमेहनुत् ॥ श्रोत्रयोनिशिर शूलनाशनं लघुताकरम् । त्वच्यकेश्यञ्च चक्षुष्यमभ्यङ्गे भोजने ऽन्यथा ॥ छिन्नभिन्नच्युतोत्पिष्टमथितक्षतपिच्छिते । भग्नस्फुटितविद्धाग्निदग्धविश्लिष्टदारिते ॥ तथाभिहितनिर्भुग्नमृगव्याघ्रादिविक्षते । वस्तौ पानेन्नसस्कारे नस्येकर्णाक्षिपूरणे ॥ सेकाभ्यङ्गावगाहेषु तिलतैल प्रशस्यते । * । ननुलेखनहृणयो कथ सामानाधिकरण्यमित्याह । सूक्ष्मादिदुष्ट पवन स्रोत सङ्कोचये यदा । रसो ऽसम्यग्व्रजन् काश्यं कुर्याद्रक्ताद्यवर्द्धयन् ॥ तेषुप्रविष्टसरतासौक्ष्म्यस्निग्धत्वमार्द्दवै. । तैलशम रस नेतु कृशानां तेन वृंहणम् ॥ व्यवायि सूक्ष्मतीक्ष्णोष्णसरत्वैर्मेदस क्षयम् । शनै. प्रकुरुते तैलं तेन लेखन मीरितम् ॥ द्रुत पुरीषं बध्नाति स्खलित तत् प्रवर्त्तयेत् । ग्राहक सारक चापि तेन तैलमुदीरितम् ॥ घृत मब्दात्परं पक्व हीनवीर्यं प्रजायते । तैल पक्वमपक्व वा चिरस्थायिगुणाधिकम् ॥ तैलं स्वयोनिगुणकृद्वाग्भटेनाखिलं मतम् । अत. शेषस्यतैलस्यगुणाज्ञेया स्वयोनिवत् ॥ तैलानासार्षपादीना यथास्थान गुणेरणम् ॥ * ॥ प्रात. स्नाने कृते श्राद्धे द्वादश्यां ग्रहणे तथा । मद्यलेपसम तैल तस्मात्तैल विवर्जयेत् ॥ घृतञ्च सार्षपतैल यत्तैलपुष्पवासितम् । अदुष्टपक्वतैलञ्च तैलाभ्यङ्गेच नित्यश ॥ * ॥ अर्कैनूर्नंदह

तिक्रुद्य कीर्त्तिलाभश्चसोमे भौमे ग्रन्थर्भवति नियतं चन्द्रजेपुत्रलाभ । अथग्लानिर्भवतिचगुरौ भार्गवेशो कयुक्तं स्तैलाभ्यङ्गात् तनयमरणंसूर्यजेदीर्घमायु ॥ सिद्धके ॥

तैलकन्द । पु । तिलाङ्कितदले । द्रावककन्दे ॥ लोहद्राविल्व कटुत्वमुष्णत्व वातापस्मारविषशोफनाशित्वरसबन्धकारित्व देहसिद्धिकारित्वं चेत्यस्यगुणा इतिराजनिर्घण्ट ॥

तैलकार । पु । तेली इति प्रसिद्धे वर्णसङ्करजातिप्रभेदे । धूसरे । चाक्रिके । तैलिनि ॥ कोटकस्त्रीगर्भे कुम्भकाराज्जातोयमिति ।ब्र॰ब्र॰ख॥

तैलकिट्टम् । न । खल इति भाषाप्रसिद्धे तैलमले । पिण्याके ॥

तैलङ्ग । पु । अन्ध्रदेशे ॥ श्रीशैलन्तु समारभ्य चोलेशान्मध्यभागतः । तैलङ्गदेशोदेवेशि ध्यानाध्ययनतत्परः ॥

तैलचौरिका । स्त्री । तैलपायिकायाम् ॥

तैलद्रोणी । स्त्री । काष्ठपर्यन्तमज्जनार्थे तैलपूर्णे काष्ठादिनिर्मितपात्रविशेषे ॥ तत्रावस्थितिगुणा । वातरोगव्याकुष्ठरोगपङ्गुबाधिर्यमिन्मिनगद्गदधन्वङ्गुत्वधृष्ठप्रचलितपवनगात्रकम्पकपाटीग्रीवाभङ्गापतन्त्रकयक्ष्मधिरभवमूत्रकृच्छ्रवस्तिरोगेषु प्रशस्त

मितिराजवल्लभ ॥

तैलधान्यम् । न । तिलादिषु ॥ तिलातसीचतोरीचत्रिविधश्चापिसर्षप । द्विधाराजीखाखसञ्चबीज कौसुम्भसम्भवम् । एतानितैलधान्यानिप्रोक्तानिपूर्वसूरिभि ॥

तैलपर्ण । पु । पर्वतविशेषे ॥ न । ग्रन्थिपर्णे ॥

तैलपर्णकम् । न । ग्रन्थिपर्णवृक्षे ॥

तैलपर्णिकम् । न । हरिचन्दने ॥ तिलपर्णीवृक्षविशेषे जातम् । तत्रजातइत्यण् । ङीप् । स्वार्थेकन् । केयाइतिह्रस्व ॥ तैलपर्णोगिरिस्तत्राकरं इतिस्वामी ॥ पु । चन्दनविशेषे ॥

तैलपर्णी । स्त्री । मलयजे चन्दने ॥ श्रीवासे ॥ सिल्हके ॥ तिलपर्णीवृक्षेजाता । तत्रजातइत्यण् । ङीप् ॥

तैलपा । स्त्री । तैलपायिकायाम् ॥

तैलपायिका । स्त्री । सपक्षकीटविशेषे । घरोघ्यणाम् । तिलचटा इति भाषा ॥ तैलं पिबति । पापाने । ण्वुल् ॥

तैलपिपीलिका । स्त्री । पिपीलिकाप्रभेदे । कपिजाङ्गिकायाम् ॥

तैलफल । पु । इङ्गुद्याम् ॥ बिभीतके ॥

तैलभाविनी । स्त्री । जातीपुष्पवृक्षे ॥

तैलमाली । स्त्री । वर्त्याम् ॥ दीपकू

प्याम् ॥

तैलम्पाता । स्त्री । स्वधायाम् ॥ पतन म् पातः । तिलस्य पातः । तिलपातो ऽस्याम् । घञः आर्षात्वाच्चेति ज । वचनात् क्रियावाचिनः प्रथमान्ता दस्यामित्यर्थेन स्यात् तदन्तस्त्रिया म् । श्येनतिलस्येतिमुम् ॥

तैलसाधनम् । न । गन्धद्रव्यविशेषे । काकोले । कक्कोले । काकला इति गौडेषु प्रसिद्धे कोषफले ॥

तैलस्फटिक. । पु । तृणमणौ ॥ इ० हे ॥

तैलाक्त. । त्रि । तैलेनसिक्ते ॥

तैलागुरु । न । दाहागुरुणि ॥

तैलाटी । स्त्री । वरटायाम् ॥

तैलाम्बुका । स्त्री । तैलपायिकायाम् ॥

तैलिक. । पु । तैलकारे । तैलार्थंतिला दिबीजानां पेष्टरि ॥

तैली । पु । तैलकारे । चाक्रिके ॥ त्रि । तैलसम्बन्धिनि ॥

तैलिनी । स्त्री । दशावर्त्याम् । तैल कीटे । पद्विन्यायाम् ॥

तैलिशाला । स्त्री । तैलिकगेहे । य न्त्रगृहे ॥

तैलीनम् । न । तिल्ये । तिलक्षेत्रे । तिलानां भवनं क्षेत्रम् । विभाषाति लेतिखञ् ॥

तैषः । पु । पौषमासे ॥ तिष्येणयुक्ता

पौर्णमासी अस्मिन् । सास्मिन् पौर्णमासीत्यर्थे सन्धिवेलाद्यृतुनक्ष त्रेभ्योऽणित्यण् । तिष्यपुष्ययोर्नक्षत्रा णियलोपः । ङीप् ॥ ततःसास्मिन् पौर्णमासीत्यण् ॥

तैषी । स्त्री । पौष्याम् ॥ तिष्येण यु क्ता पौर्णमास्यस्मिन् । नक्षत्रेणयुक्त इत्यण् । तिष्यपुष्ययोर्नक्षत्राणियलोपः । ङीप् ॥

तोकम् । न । अपत्ये । पुत्रदुहित्रोः ॥ तौति । तु वृत्तौ हिंसावृत्तिपूर्त्तिषु । बाहुलकात्कः ॥

तोक्म । पु । हरिते ॥ हरियवे । अ पक्वयवे ॥ यवस्याङ्कुरे इति श्रीधर स्वामी ॥ हरिद्वर्णे ॥ न । कर्णमले ॥ तकति तक्यते वा । तकहसनेसहने च । बाहुलकान्मन् ओत्वञ्च ॥ मेघे ॥ इत्युणादयः ॥

तोटकम् । न । द्वादशाक्षरपादे जगती छन्दोभेदे ॥ यथा । विनिधेहि चतु सगणं रुचिरं रविसङ्ख्यकवर्णकृत सुचिरम् । फणिनायकपिङ्गलसंज्ञपि त त्रुव तोटकवृत्तमिदं रुचिरम् ॥ यथा । सकलं मनसा क्रियया जनि त समवेक्ष्यविनाश्रितयात्तुजनात् । प रिचित कश्चित् दृशोनिखिलादवि नाशियुतेन न कर्म्मितीति ॥

तोड । पु । भेदे ॥ तोडनम् । तुडतो डने ॥ घञ् ॥

तोडनम् । न । दारणे ॥ हिंसने । भेदे ॥

तोत्रम् । न । प्रतोदे । प्राजने । गवादिपशूनां ताडनदण्डे ॥ वैणुके । हस्तिन स्ताडनदण्डे ॥ तुद्यतेऽनेन । तुद्व्यथने । दाम्नीतिष्ट्रन् ॥

तोद । पु । व्यथायाम् ॥ तोदनम् । तुद० । घञ् ॥

तोदनम् । न । व्यथने ॥ तोत्रे । वृष भादिप्रेरणदण्डे ॥ तुद० । ल्युट् ॥

तोदित. । त्रि । प्रेरिते ॥

तोमर । पु । न । शर्वलायाम् । गडाँ साइति यवनी इतिवा ख्यातेऽस्त्रे ॥ हस्तक्षेप्यसशल्यदण्डे । रायबास इ तिभाषा ॥ स्थूलाग्रगदायाम् ॥ लघ्वादि (।ऽ) षिकले ॥ वृहतीछन्दोभेदे ॥ यथा । प्रथमकर विनिधाय जगणद्वयञ्चनिधाय । कुरु तोमर सुखकारि फणिराजवक्त्रविहारि ॥ यथा । सखि मादके मधुमासि व्रजसत्वर किमिहासि । सहतेनकि विहरामि किमुपावकं प्रविशामीति ॥

तोमरधर । पु । अग्नौ ॥ इतिशब्दा० ॥

तोमरिका । स्त्री । आढक्याम् । तुवर इतिभाषा ॥

तोयम् । न । अम्बुनि । जले ॥ एकहस्तोधृत तोय मभक्ष्य सर्वसम्मतम् ॥ उद्धृत वामहस्तेन यत्तोय पिबतिद्विज । सुरापानेन तुल्य स्यान्मनुराह प्रजापति ॥ अगन्धमव्यक्तरस शीत लञ्च तृषापहम् । अच्छ लघुच प थ्यञ्च तोयगुणवदुच्यते ॥ तौति । तु सौत्रमाचरणार्थः । औणादिकोय ॥ पूर्वाषाढायाम् ॥

तोयकाम । पु । अम्बुवेतसे । परिव्याधे ॥ त्रि । जलाभिलाषिणि ॥

तोयकृच्छ्रम् । न । जलमात्रपानरूप व्रतविशेषे ॥ इतिमिताक्षरा ॥

तोयडिम्भ । पु । घनोपले ॥ इ०श०॥

तोयद. । पुं । मेघे ॥ मुस्तके ॥ न । आज्ये ॥ त्रि । जलदातरि ॥ जलदान माहात्म्यमहाभारते दानधर्मे । अन्नेदत्तेनरेन्द्र प्राणादत्ताभवन्त्युत । प्राणदानाद्धि परमन्दान मिह विद्यते ॥ अन्न वापिप्रभवति पानीयात् कुरुसत्तम । नीरजातेन हि विना न किञ्चित् सम्प्रवर्त्तते ॥ अन्नौषध्योमहाराज वीरुधश्चजलोद्भवा । यत. प्राणभृतां प्राणा सम्भवन्ति विशाम्पते ॥ तस्मात्पानीयदानाद्वै न परं विद्यते क्वचित् । तद्ददस्वनरो निष्ययदीच्छेद्भूतिमात्मन ॥ धन्य यशस्य मायुष्य जलदान मिहोच्यते

। ग्रथंश्चाप्यधि कौन्तेय सदा तिष्ठति तोयदः ॥ सर्वकामानवाप्नोतिकीर्त्तिं चैवेहशाश्वतीम् । प्रेत्यचानन्त्यमश्नाति पापेभ्यश्चप्रमुच्यते ॥ तोयदोमनुजव्याघ्रस्वर्गं गत्वामहाद्युते । अक्षयान् समवाप्नोतिलोकानित्यब्रवीन्मनुरिति ॥ तोयंददाति । दु दाञ्° । क ॥

तोयधरः । पु । मुस्तायाम् ॥ सुनिषण्णाख्यभेषजे ॥ घने । मेघे ॥ तोयस्यधरः ॥

तोयधिः । पु । उदन्वति । समुद्रे ॥ तोयानि धीयन्तेऽत्र । डुधाञ्° । कर्मण्यधिकरणेचेतिकि । आतोलोपः ॥

तोयधिप्रियम् । न । लवङ्गे ॥

तोयनिधिः । पु । अब्धौ । समुद्रे ॥ तोयानि निधीयन्तेऽत्र । डुधाञ किः ॥ तोयानां निधिर्वा ॥

तोयपिप्पली । स्त्री । लाङ्गल्याम् । मकुलादन्याम् । गौडभाषया काँचड़ा इतिप्रसिद्धे जलजशाके ॥ तोयस्य पिप्पलीव ॥

तोयपुष्पी । स्त्री । पाटलावृक्षे ॥

तोयप्रसादनः । पु । न । कतकः ॥ षष्ठी समासः ॥

तोयप्रसादनफलम् । न । कतकफले ॥

तोयफला । स्त्री । इर्वारौ ॥

तोयवल्ली स्त्री । कारवेल्ले ॥

तोयशाला । स्त्री । प्रपायाम् ॥

तोयशुक्तिका । स्त्री । जलशुक्तौ ॥

तोयसूचक । पु । भेके ॥ इ० शब्दा० ॥

तोयात्मा । स्त्री । विष्णौ ॥ यथा । यस्य केशेषुजीमूता नद्यः सर्वाङ्गसन्धिषु । कुक्षौसमुद्राश्चत्वारः तस्मै तोयात्मनेनमइति ॥

तोयाधिवासिनी । स्त्री । पाटलावृक्षे ॥

तोयेशः । पु । वरुणे ॥ शतभिषायाम् ॥

तोरणः । पु । न । वहिर्द्वारे । द्वारवाह्यभागे ॥ स्तम्भोपरि चिते सिंहद्वाराख्ये ॥ तुरन्त्यत्र । तुरत्वरणहिंसयोः । अधिकरणे ल्युट् युच्वा ॥ तोलयन्त्यत्रेतिवा । तुलउन्माने । रलयोरेकत्वम् ॥ तुतुरत्यनेनवा । तुरत्वरणे । जौहोत्यादिकः ॥ न । कन्धरायाम् ॥ कन्धरातोरणकण्ठेति हारावली ॥

तोलः । पु । न । गुञ्जाशीतिसम्मित । तोलके ॥

तोलकः । पु । न । कोले । इङ्गणे । वटके । कर्षार्द्धे । अशीतिगुञ्जामिते ॥ षोडशमाषके षण्णवति रक्तिकापरिमाणे । तोला इतिभाषा । कर्षे ॥ इतिवैद्यकपरिभाषा ॥

तोषः । पु । तुष्टौ ॥

तैाक्षिक । पुं । धनूराशौ ॥

तैातातिकम् । न । तुतातभट्टकृतेमी मासाशास्त्रे ॥

तैातिक । पु । शुक्तौ ॥ न । मुक्तायाम् ॥

तैारङ्गिक । पु । अश्वारोहे । सादिनि ॥

तैारायणिक । पु । यजमाने ॥ तुरायणं यज्ञविशेष निर्वर्त्तयति । पारायण तुरायणेत्यादिनाठञ् ॥

तैार्य्यम् । न । तुर्य्यमुरजादै भवेशब्द रूपे ॥

तैार्य्यत्रिकम् । न । नृत्यगीतवाद्येषु समुदितेषु ॥ तुरीत्वरायाम् । त्वरस्तोणाद्येन् । गुण वाधित्वा वाहुल कादुत्त्वचेतिदीर्घं । तूर्य्यमुरजादि तत्रभव तैार्य्यंशब्द । त्रयोणा यस्य तत् त्रिकम् । सङ्ख्याया अतिशदन्ताया कन् । तैार्य्योपलक्षित त्रिकमिति विग्रह ॥

तैाल. । पु । तुलाराशौ । तैालिनि ॥ त्रि । तुलासम्बन्धिनि ॥

तैालिक । पु । चित्रकारे ॥

तैालिकिक । पु । चित्रकारे । रङ्गाजीवे ॥

तैाल्यम् । त्रि । तुलया परिच्छिन्ने ॥ तुल्यमेव । स्वार्थे ऽण् ॥

तैाषारम् । न । हिमोदकविशेषे । तुषारजले ॥ अपिनद्यः समुद्रान्ते वह्निरापस्तदुद्भवाः । धूमावयवनिर्मुक्तास्तैाषाराख्यास्तुता स्मृता ॥ अपथ्या प्राणिना प्रायो भूरुहाणान्तु ताहिता ॥ तुषाराम्बुहिम रूक्ष स्याद्वा तल मपित्तलम् । कफोरुस्तम्भकण्ठाग्निमेदोगण्डादिरोगनुत् ॥नदी मारभ्य समुद्रपर्यन्तवह्निरास्ते तद्भवा वह्निभवा धूमावयव निर्मुक्ता धूमा शरहिता आप तुषाराख्याइत्यर्थ ॥ तुषारस्येदम् । तस्येदमित्यण् ॥

त्यक्त । त्रि । हीने । विधूते । समुज्झिते । कृतत्यागे । छोडा इतिभाषा ॥ त्यज्यतेस्म । त्यजहानौ । क्त ॥

त्यक्तव्य' । त्रि । त्यजनीये ॥

त्यक्तसर्वपरिग्रह । त्रि । समस्तभोगोपकरणरहिते विरक्ते ॥ त्यक्ता सर्वे परिग्रहा येन ॥

त्यजनम् । न । त्यागे । वर्ज्जने ॥

त्य । त्रि । तच्छब्दार्थे ॥ सर्वादि । त्यजति । त्यज० । त्यजितनियजिभ्यो डिदित्यदि ॥ स्त्रियास्या । क्लीबे त्यत् ॥ वाक्याकाशयो ॥

त्याग । पु । दाने । अर्थिषु मुक्तहस्ततायाम् । धर्मेणोपार्जितार्थस्य सत्पात्रे विनियोगे ॥ वर्ज्जने ॥ सर्वकर्मफलाभिसन्धिवर्जने । कर्माधिकारिक

त्यागः

र्तृकफलाभिसन्धिपूर्वककर्मत्यागे ॥ सच सात्त्विकादिभेदात् त्रिविधोभवति ॥ यथा । नियतस्यतु सन्न्यास कर्मणो नोपपद्यते । मोहात्तस्यपरित्याग स्तामस परिकीर्त्तित ॥ १ ॥ दुःखमित्येवयत्कर्म कायक्लेशभयात् त्यजेत् । स कृत्वाराजसत्याग नैवत्यागफलंलभेत् ॥ २ ॥ कार्यमित्येवयत्कर्म नियत क्रियते ऽर्जुन । सङ्गं त्यक्त्वा फलञ्चैव स त्याग' सात्त्विकोमत ॥ ३ ॥ अपिच । विशेषणाभावात् विशेष्याभावात् उभयाभावाच्च त्रिविधो भवति । तथाहि । फलाभिसन्धिपूर्वककर्मत्याग सत्यपिकर्मणि फलाभिसन्धित्यागादेक. १ । सचसात्त्विकत्वादादेय ॥ सत्यपिफलाभिसन्धौ कर्मत्यागात् द्वितीय २ । सचदुःखबुद्ध्याकृतोराजसविपर्यासेनकृतस्तामस इतिभेदात् द्विविधोहेयो भवति ॥ फलाभिसन्धे. कर्मणश्चत्यागात् तृतीय. ३ । सच कर्मानधिकारिकर्तृकोनैर्गुण्यरूप. ॥ सोपिसाधनफलभेदेन द्विविध । तत्रसात्त्विकेन फलाभिसन्धित्यागपूर्वककर्मानुष्ठानरूपेण त्यागेन शुद्धान्त करणस्योत्पन्नविविदिषस्य आत्मज्ञानसाधनश्रवणाख्य वेदान्तविचा-

त्यागी

राय फलाभिसन्धिरहितस्यान्त करणशुद्धौ सत्यां तत्साधनस्य कर्मणो वैतृष्ण्येजातध्रुवा ऽवहननस्य परित्याग स एक साधनभूतो विविदिषासन्न्यास उच्यते ॥ द्वितीयस्तु जन्मान्तरकृतसाधना ऽभ्यासपरिपाकादस्मिन् जन्मनि आदावेवोत्पन्नात्मवोधस्य कृतकृत्यस्य स्वतएवफलाभिसन्धे कर्मणश्चपरित्याग. फलभूत सविद्वत्सन्न्यासइत्युच्यते ॥ * ॥ त्याग प्रपञ्चरूपस्य चिदात्मत्वावलोकनात् । त्यागोहि महतां पूज्य. सद्योमोक्षमयोयत ॥ * ॥ त्यागेन युक्ता दिवमुत्पतन्ति त्यागेनहीना नरकं व्रजन्ति । न त्यागिना दुष्करमस्ति किञ्चित् त्यागोहि सर्वव्यसनानिहन्ति ॥ त्यजनम् । त्यजहानौ । घञ् ॥ विवेकिपुरुषे ॥ इतिशब्दरत्नावली ॥ उपेक्षायाम् ॥

त्यागफलम् । न । ज्ञाननिष्ठायाम् ॥

त्यागी । त्रि । दातरि ॥ शूरे ॥ वर्जनशीले ॥ सात्त्विकत्यागेनयुक्ते ॥ न द्वेष्ट्यकुशल कर्म कुशलेनानुसज्जते । त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसशय ॥ नहि देहभृता शक्य त्यक्तु कर्माण्यशेषत. । यस्तुकर्मफलत्यागी सत्यागीत्यभिधीयते ॥

त्यजति तच्छील । सम्पृचानुरुधे तिघिनुण् ॥

त्यागिम । त्रि । त्यागजे ॥ त्यागेन निर्वृत्त । भावप्रत्ययान्तादिमप् ॥

त्याजित । त्रि । विसर्जिते ॥ त्यजेर्ण्यन्तात् द्विकर्मकात् कर्मणिक्त । ण्यन्ते कर्तुश्च कर्मणामित्युक्ते ॥

त्याज्य । त्रि । त्यागयोग्ये । वर्जनीये । वर्ज्ये ॥ तीरे प्रतिग्रहस्त्याज्यो त्याज्योधर्मस्य विक्रय ॥ अपिच । पित्र्यतिशयमथ शोधित वाप्यशोधितम् । त्याज्यो भवति कौना दण्डनीयो ऽपिभूभृत इति ॥ त्यजेश्चेति यति कवर्गादेशाभाव ॥

त्रङ्ग । पु । प्रतिमार्गे ॥

त्रङ्गा । स्त्री । प्रतिमार्गे । उत्रङ्गे ॥

त्रप । पु । सलज्जे ॥ त्रपते । त्रपूष् लज्जायाम् । षित्त्वादङ् ॥

त्रपा । स्त्री । लज्जायाम् ॥ कुलटायाम् ॥ त्रपते ऽनया । त्रपूष्० । षिद्भिदादिभ्योङ् । टाप् ॥ कुले ॥ कीर्त्तौ ॥ इति शब्दरत्नावली ॥

त्रपाक । पु । म्लेच्छविशेषे ॥

त्रपारण्डा । स्त्री । वेश्यायाम् ॥

त्रपिष्ठ । त्रि । तृप्रतमे ॥ अयमेषामतिशयेनतृप्र । अतिशायने इष्ठन् । प्रियस्थिरेति तृप्रस्यत्रबादेश ॥

त्रपीयान् । त्रि । तृप्रतरे ॥ अतिशयेन तृप्र । द्विवचनविभज्येति ईयसुन् ॥ प्रियस्थिरेति तृप्रस्यत्रबादेश ॥

त्रपु । न । सीसके ॥ रङ्गे ॥ अग्निदृष्ट्वा त्रपते लज्जतइव । त्रपूष० । शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्चेत्यु ॥

त्रपुकर्कटी । स्त्री । त्रपुष्याम् ॥

त्रपुटी । स्त्री । सूक्ष्मैलायाम् ॥ इ०रत्न० ॥

त्रपुलम् । न । रङ्गे । राँग इति भाषा ॥

त्रपुषम् । न । कर्कटीप्रभेदे । सुधावासे । सुशीतले । लघुखीरा वालन खीरा इत्यादिभाषा ॥ त्रपुष लघु नीलञ्च नव तृट्क्लमदाहजित् । स्वादुपित्तापह शीत रक्तपित्तहरं परम् ॥ तत् पक्व मम्लमुष्णस्यात् पित्तल कफवातनुत् । तद्बीजन्मूत्रल शीत रूक्ष पित्तास्रकृच्छ्रजित् ॥

त्रपुषी । स्त्री । कर्कट्याम् । खीरा इति भाषा ॥

त्रपुष । न । } रङ्गे ॥
त्रपुसम् । न । }

त्रपुसी । स्त्री । महेन्द्रवारुण्याम् ॥ कर्कट्याम् ॥ लताविशेषे । पीतपुष्पायाम् । खीरा इति भाषा ॥

त्रयम् । न । त्रितये ॥ त्रयो ऽवयवा अस्य । सङ्ख्याया अवयवे तयप् । द्वि

त्रिभ्यांतयस्यायज्ञा ॥

त्रयी । स्त्री । त्रिवेदाम् । ऋग्यजुःसामा ख्यश्रुतित्रये ॥ ब्रह्माऽथपुरुषो रुद्र स्त्रयमेतत् त्रयीमयम् । सर्गादावृग्मयोब्रह्मा स्थितौविष्णुर्यजुर्मय । रुद्रःसाममयोऽन्ताय तस्मात् तस्याशुचिर्ध्वनि ॥ पुरन्ध्र्याम् ॥ सुमतौ ॥ सोमराजीवृक्षे ॥ भवान्याम् । दुर्गायाम् ॥ यथा । ऋग्यजुःसामभागेन साङ्गवेदगतापिया । त्रयीति पठ्यते लोकेदृष्टादृष्टार्थसाधिनीति देवीपुराणम् ॥ त्रितये ॥ टिड्ढेतिङीप् ॥

त्रयीतनुः । पु । सूर्य्ये ॥ त्रयी तनुर्यस्यस ॥

त्रयीधर्म्म । पु । त्रय्या विधीयमाने ज्योतिष्टोमादिकर्मणि ॥ त्रय्या धर्म त्रयीधर्म ॥

त्रयीमुख. । पु । ब्राह्मणे ॥ त्रयी मुखे यस्य ॥

त्रयोदश । त्रि । त्रयोदशानाम्पूरणे ॥ तस्यपूरणेडट् ॥

त्रयोदश । त्रि । सङ्ख्याविशेषे १३ । तेरह इति भाषा ॥ सङ्ख्येये ॥ त्रयश्च दशच । त्र्यधिकादशेति वा । त्रेस्त्रय इतित्रयस् । स्त्वोत्त्वगुणा ॥

त्रयोदशी । स्त्री । तिथिविशेषे ॥ सा चन्द्रस्य त्रयोदशकलाक्रियारूपा त्रयोदशकलाक्रियावच्छिन्नकालरूपा वेति तिथ्यादितत्त्वम् ॥ रूपान्वित सात्त्विकभावहीन सुखीचवाल्ये जननीप्रियश्च । सदालस शिल्पगुणैकवेत्ता त्रयोदशी जन्मतिथिर्यदि स्यात् ॥

त्रय्यात्मा । पु । सूर्य्ये ॥ त्रयीआत्मास्वरूपंयस्य ॥

त्रसम् । न । वने ॥ त्रि । जङ्गमे ॥ त्रसति । त्रसीउद्वेगे । पचाद्यच् ॥

त्रसन । त्रि । सन्त्रासयुक्ते ॥

त्रसर । पु । तन्त्रवायोपकरणविशेषे । सूत्रबेष्टने । तासनी इति गौडभाषा ॥ त्रसनम् । त्रसी० । अरन् ॥

त्रसरेणु । पु । परमाणुषट्के । सयुक्तद्व्यणुकत्रये ॥ जालान्तरगतेभानौ यत्सूक्ष्म दृश्यते रज । प्रथम तत् प्रमाणाना त्रसरेणु प्रचक्षते ॥ वैद्यकपरिभाषया त्रिंशत् परमाणुपरिमाणे । ध्वस्याम् ॥ यथा । जालान्तरगतेसूर्यकरे ध्वसीविलोक्यते । त्रसरेणुस्तु विज्ञेय स्त्रिंशता परमाणुभिरिति ॥ स्त्री । सूर्यपत्न्याम् ॥

त्रस्त । त्रि । भीते ॥ चकिते ॥ न । शीघ्रे ॥

त्रस्नु । त्रि । त्रासशीले । भीरौ ॥ त्रस्यति । त्रसी० । त्रसिगृधिधृषिक्षिपे

णु । नेड्वशीतिनेट् ॥

त्राणम् । न । त्रायमाणायां औषधौ ॥ रक्षणे ॥ त्रि । रक्षिते ॥ त्रायतेस्म । त्रैङ् पालने । क्त । नुद्विदेति पक्षे नत्वम् ॥ रक्षके ॥ त्रायते । कर्त्तरि ल्युट्वा ॥

त्राणा । स्त्री । त्रायमाणाय म् ॥

त्रात । । रक्षिते ॥ त्रायतेस्म । त्रै [illegible] । नुद्विदोन्दत्राघ्राह्रीभ्यो न्यतर [illegible] मितिपक्षे नत्वाभाव ॥

त्राता । त्रि । पालयितरि ॥ त्रायते । त्रैङ्० । तृच् ॥

त्रान्त । पु । त्रावसाने शब्दे ॥ त्रोन्तेय स्य । यथा । यावान् कश्चित् त्रान्त शब्दोऽय नपुंसकेतु बोद्धव्य ॥ यथा । पत्रच्छत्रकलत्रमित्रकलत्रादयो नपुंसका पव्यन्ते ॥

त्रापुषम् । त्रि । त्रपुणोविकारे ॥ त्रपुजतुनो षुगित्यण् ॥

त्रायन्ती । स्त्री । वार्षिके । त्रायमाणायाम् । बलभद्रिकायाम् ॥ त्राणत्रा । सम्पदादित्वात् क्विप् । त्राम् अयति । इणगतौ । शतृप्रत्यय । उगितश्चेति ङीप् ॥ त्रायन्ती तुवरा तिक्ता सरा पित्तकफापहा । ज्वरहृद्रोगगुल्मास्त्रभ्रमशूलविषप्रणुत् ॥

त्रायमाणा । त्रि । रक्ष्यमाणे ॥

त्रायमाणा । स्त्री । बला इति बहुला इतिच गौडभाषाप्रसिद्धायां देवबलायाम् । वार्षिकौषधौ । त्रायन्त्याम् ॥ अस्यागुणा यथा । शीतत्वमधुरत्व गुल्मज्वरकफास्रभ्रमतृष्णाक्षयग्लानिविषच्छर्दिविनाशित्वमिति राजनिर्घण्ट ॥ त्रायते । त्रैङ्० । शानच् चानश् वा ॥

त्रास । पु । भये ॥ त्रसीउद्वेगे । घञ् ॥ मणिदोषे ॥

त्रासजिह्म । त्रि । भयक्लिष्टे ॥ त्रासेन जिह्म ॥

त्रासदायी । त्रि । भयदातरि । शङ्करे ॥ इति हेमचन्द्र ॥

त्रासन । त्रि । भयावहे ॥

त्रय । पु । त्रिसङ्ख्यायाम् । तीनइति भाषा ॥ त्रि । सङ्ख्येये । त्रिसङ्ख्याविशिष्टे ॥ यथा त्रयोदेवा नतुदेवानांत्रय ॥ तरति । तॄ० । तरतेर्ड्रिः । त्रय त्रीन् त्रिभ्यइत्यादिरूपाणि ॥ तिस्रोभार्याः स्त्रियास्तास्त्रयोभृत्याश्च बान्धवा । भुवि वेदविरुद्धाश्च नद्यो ते मङ्गलप्रदा. इतिब्रह्मवैवर्त्तपुराणम् ॥

त्रिंश । त्रि । त्रिंशत्तमे । तीसवाँ इति भाषा ॥ त्रिंशत पूरणः । तस्यपूरणे डट् ॥

त्रिंशक । त्रि । त्रिंशद्भिः क्रीते ॥ त्रिंश

तित्रिंशद्भ्यो डवुन्सञ्ज्ञायामित्यसं
ज्ञायामार्हीयेष्वर्थेषु डवुन् । टि
लोप ॥

त्रिंशत् । स्त्री । सङ्ख्याविशेषे । तीस
इतिभाषा ॥ सङ्ख्येये ॥ त्रयोदश
त परिमाणमस्य । पङ्क्ति विंशति
त्रिंशच्चत्वारिंशदितिनिपातनात् प्र
कृतेस्त्रिन् भाव शच्च प्रत्यय ॥

त्रिंशत्पत्रम् । न । कुमुदे । कैरवे ॥ त्रिंश
त्सङ्ख्यकानिपत्राणि यस्मिन् तत् ॥

त्रिंशांश । पु । लग्नत्रिंशदंशे ॥ यथा ।
पञ्चपञ्चाष्टविषयाः त्रिषमेत्रिंशदंश
का । माहेयशनिजीवज्ञशुक्राणां व्यु
त्क्रमात्समे ॥ विषमराशौ कुज-
शनिगुरुबुधशुक्राणां पञ्चपञ्चाष्टसप्त
पञ्चमितास्त्रिंशदंशका क्रमात्ज्ञेया
। समराशौ व्युत्क्रमात तेषां विपर्यये
णत्रिंशांशाज्ञेया ॥ यथा मेषोविष
मराशि तत्र प्रथमावधिपञ्चांशा भौ
मस्य । षष्ठांशमारभ्य दशमांशपर्यं
न्त पञ्चांशा शने । एकादशांशमा
रभ्याष्टादशांशपर्यन्त मष्टावंशागुरो
। ऊनविंशांशमारभ्य पञ्च त्रिंशांश-
पर्यन्त सप्तांशाबुधस्य । तत षड्विंशा
शमारभ्य त्रिंशांशपर्यन्त पञ्चांशा
शुक्रस्य त्रिंशांशा क्रमात्ज्ञेया. । मि
थुनसिंहतुलाधनु कुम्भेष्वप्येवम् ॥

समराशौ व्युत्क्रमाद्यथा । वृषेप्रथ
मांशमारभ्य पञ्चांशाभृगो ।ततो
दादशांशपर्यन्तं सप्तांशाबुधस्य । त
तोत्रिंशांशपर्यन्त मष्टावंशागुरो । त
त. पञ्चविंशांशपर्यन्त पञ्चांशा शने
। ततस्त्रिंशदंशपर्यन्त पञ्चांशा कुज
स्य त्रिंशांशा ॥ एवकर्कक गावृश्चि-
कमकरमीनेष्वपिबोध्या

त्रिकम् । न । पृष्ठाधरे । पृष्ठव ,धोभागे
। कटिभागे ॥ त्रये ॥ त्रिपथसंस्थाने
॥ त्रिफलायाम् ॥ त्रिकटौ ॥ त्रिम
दे ॥ यथा । गुडूचीसारसयुक्तात् त्रि
कत्रयसमन्वयात् । वातरक्तं निह-
न्त्याशु सर्वरोगहरन्त्वय ॥ त्रयाणां
सङ्घ । सङ्ख्यायाः सञ्ज्ञासङ्घसूत्रा
ध्ययनेष्वितिकन् ॥ तृतीयके ॥ तृ
तीयेनरूपेण ग्रहणं ग्रन्थस्य । तावति
थं ग्रहणमितिलुग्वेति कन् पूरण प्र
त्ययस्यच वालुक् ॥ पु । गोक्षुरे ॥

त्रिककुत् । पु । त्रिकूटाचले ॥ त्रीणि
ककुत् सदृशानि शृङ्गाण्यस्य ॥

त्रिककुब्धामा । पु । विष्णौ ॥ ऊर्द्ध्वाधो
मध्याभेदेन तिसृणां ककुभां धाम
आश्रयोय. ॥ तिसृणां ककुभां दिशां
समाहार इतिविग्रहे तद्धितार्थोत्त
रपदसमाहारेचेति समासे द्विगु
रेकवचनमित्येकवद्भावे सत्युत्त-

कमितिनपुंसकत्वेच त्रिककुप् तस्य धाम अधिष्ठानं प्रकाशो येनेति। इदञ्च समासात्मकमेकनाम। त्रिसर्गाक कुभामितिभाष्ये नविग्रहप्रदर्शकं किन्तुफलितार्थकथनम्॥

त्रिकट। पु। गोक्षुरके॥

त्रिकटु। न। कटुत्रिके। त्र्यूषणे। व्योषे॥ विश्वोपकुल्यामरिच त्रय त्रिकटु कथ्यते॥ त्र्यूषणं दीपनं हन्ति श्वास कासत्वगामयान्। गुल्ममेहकफ स्थौल्यमेद श्लीपद पीनसान्॥ चयाणां कटूनां मरिचशुण्ठिपिप्पलीनां समाहार॥

त्रिकण्ट। पु। गोक्षुरके॥ मत्स्यभेदे। क्षुद्रीप्रभेदे। तिकांटायूक इतिभाषा॥ टेङ्गरा इतिगौडप्रसिद्धे मत्स्ये॥ न। कण्टकत्रये। मिलित ७ इत्थ मिदमनीदुस्पर्शात्रयरूपे॥ त्रीणि कण्टकानि यस्य यस्मिन्वा॥

त्रिकण्टक। पु। गोक्षुरकवृक्षे॥ क्षुद्रमत्स्ये॥

त्रिकर्मकृत्। पु। इज्याध्ययनदानानां कर्त्तरि॥

त्रिकशूलम्। न। वातजन्यव्यथाविशेषे॥ स्फिगस्थ्नो पृष्ठवंशास्थ्नो य सन्धिस्तत्त्रिक स्मृतम्। तत्र वातेन या पीडा त्रिकशूल तदुच्यते॥

त्रिका। स्त्री। कूपस्यनेमौ। कूपस्यान्ते रज्ज्वादिधारणयन्त्रे॥ तिस्रो ऽस्य योऽस्या। सङ्ख्याया सत्रासङ्घसूत्राध्ययनेष्विति कन्॥

त्रिकाय। पु। सुगते॥ त्रय काया अस्य॥

त्रिकार्षिकम्। न। मिलितनागराऽतिविषामुस्तात्रयरूपे॥

त्रिकालम्। न। कार्य्यकालतत्पूर्वा पर कालेषु॥

त्रिकालज्ञ। त्रि सर्वज्ञे। पु। बुद्धे॥ त्रिकाल जानाति। ज्ञा०। आत इतिक॥

त्रिकालदर्शी। पु। मुनौ॥ त्रि। सर्वज्ञे। भूतभविष्यद्वर्त्तमानवेत्तरि॥ त्रिकाल पश्यति। दृशिर्०। गृह्या दिभ्यश्चिनि॥

त्रिकालवित्। पु। बुद्धे॥ त्रि। त्रिकालज्ञे॥ त्रिकालवेत्ति। विद्०। क्विप्॥

त्रिकूट। पु। त्रिककुत्पर्वते। लङ्कापुराधारे। सुबेले॥ क्षीरोदार्णव तीरवर्त्तिनिशैलविशेषे। यत्र गजेन्द्रो गरुडगामिना श्रीनारायणेनोद्धृत। अस्यवर्णनं वामनपुराणे द्रष्टव्यम्॥ न। सामुद्रलवणे॥

त्रिकूटपर्वत। पु। तीर्थविशेषे॥

त्रिकूटलवणम्। न। द्रोणीलवणे॥

त्रिकोणम् । न । तस्मात् नवमपञ्चम स्थानयोः ॥ योनौ ॥ कामरूपपीठे ॥ करतोयां समारभ्य यावद्दिक्करवासिनी । शतयोजनविस्तारं त्रिकोणं सर्वसिद्धिदम् ॥ त्रि । व्यस्त्रे ॥

त्रिकोणफलम् । न । शृङ्गाटके ॥

त्रिक्षारम् । न । क्षारत्रये ॥

त्रिक्षुर । पु । कोकिलाक्षवृक्षे ॥

त्रिखम् । न । त्रपुषे ॥

त्रिखट्वम् । न । खट्वात्रये ॥ तिसृणां खट्वानां समाहारः ॥

त्रिखट्वी । स्त्री । त्रिखट्वे ॥ द्विगोरिति ङीप् ॥

त्रिगङ्गम् । न । तीर्थविशेषे ॥

त्रिगण । पु । त्रिवर्गे ॥ त्रयाणांधर्मार्थकामानां गण ॥

त्रिगर्त्त । पु । सुशर्माख्यन्टपतेर्देशे । जालन्धरे ॥ तद्देशजे त्रिगर्त्ता ॥ गणितान्तरे ॥

त्रिगर्त्तक । पु । त्रिगर्त्ते ॥ त्रिगर्त्तएव । स्वार्थे क ॥

त्रिगर्त्ता । स्त्री । कामुकाङ्गनायाम् ॥ घुर्घुरिकायाम् ॥

त्रिगुणम् । न । प्रधाने । प्रकृतौ ॥ त्रयो गुणा सुखदुःखमोहा अस्येतिव्युत्पत्ते । तद्रूपेन सुखादीनामात्मगुणत्व पराभिमतं पराकृतं भवति ॥

व्यक्ते ॥ सत्त्वरजस्तमःसु ॥ त्रयाणां गुणानां समाहार ॥ त्रि । गुणत्रययुक्ते ॥

त्रिगुणा । स्त्री । तुल्यगुणत्रयात्मिकायां प्रकृतौ ॥

त्रिगुणाकृतम् । न । त्रिहल्ये । त्रि कृष्टक्षेत्रे ॥ त्रिगुणाकृतम् । सङ्ख्याया श्चगुणान्ताया इतिडाच् ॥

त्रिगुणात्मकम् । न । अज्ञाने ॥ गुणा लोहितशुक्लकृष्णा अज्ञानकार्येषु तेजोवन्नेष्व वान्तरप्रकृतिषु श्रुतिप्रसिद्धा. । तथाच कार्यगतत्रिरूपेण कारणमप्यज्ञान मव्याकृतात्मक त्रिरूपेण त्रिगुणात्मकम् । यद्वा रजस्सत्त्वतमो लक्षणाख्यो गुणा स्तद्गुणत्मकत्वान गुणगुणिनो रभेदविवक्षयात्रिगुणात्मक भवति ॥ त्रयोगुणा आत्मानो यस्य ॥

त्रिगुणित । त्रि । त्रिराहत्यकृते ॥

त्रिजटा । स्त्री । राक्षसीविशेषे ॥ सीतापक्षपातिनीय रावणालये ॥ विल्ववृक्षे ॥

त्रिजातम् । न । समानतया मिलिते षुत्वगेलापत्रेषु ॥ यथा । एलाद्विभिरुद्दिष्ट त्रिजातंत्रिसुगन्धिकम् ।१ चतर्जात सनागन्तु इयवातकफापहमिति ॥

त्रिजातकम् । न । त्रिसुगन्धौ । तुल्येषु त्वगेलापत्रकेषु ॥ एतच्च रोचन रू च तीक्ष्णोष्ण मुखगन्धहृत् । लघु पित्ताग्निकृद्वर्ण्य कफवातविषापह म् ॥ त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम् । नागकेशरसयुक्त चा तुर्जातक मुच्यते ॥

त्रिणता । स्त्री । धनुषि ॥ त्रिषुस्थानेषु न ता । पूर्वपदादितिणत्वम् ॥ टाप्त्वे ॥

त्रिणाचिकेत । पु । अध्वर्युव्रते ॥ तद्यो गात् पुरुषे ॥ त्रि कृत्वो नाचिकेतो ऽग्नि श्चितोयेन तस्मिन् ॥ तद्विज्ञा न स्तदध्ययन स्तदनुष्ठानवान् वा य स्तस्मिन् ॥

त्रिणेत्र । पु । त्र्यम्बके । हरे ॥ त्रि । नेत्रत्रयविशिष्टे ॥ त्रीणिनेत्राणियस्य । पूर्वपदात् सञ्ज्ञायामग इति गिरिन द्यादीनांवेति वा णत्वम् ॥

त्रितक्षम् । न । तक्षणा त्रये ॥ त्रयाणा तक्ष्णा समाहार ॥

त्रितयम् । न । त्रये ॥ त्रयोऽवयवा अस्य । सङ्ख्याया अवयवेतयप् ॥

त्रिदण्डम् । न । चतुरङ्गुलगोवालवेष्ट नादन्योन्यसम्बन्धे यतेर्दण्डविशेषे ॥ पु । सन्यासाश्रमे ॥ यथा । यस्त्वस यतषड्वर्गं प्रचण्डेन्द्रियसारथि. । ज्ञा नवैराग्यरहित स्त्रिदण्ड मुपजीवती तिविष्णुभागवतम् ॥ त्रयाणां दण्डानां समाहार ॥ त्रिदण्डमस्त्यस्य । अच् ॥

त्रिदण्डी । पु । त्रिदण्डधारिणि सन्या सिविशेषे ॥ वाङ्मन कायाना निषि द्धाभिधानासतङ्कल्पप्रतिषिद्धव्यापार त्यागवति ॥ यथा ह्यमनु । वाग्दण्डो थ मनोदण्ड कायदण्ड स्तथैवच । यस्यैते निहितावुद्धौ त्रिदण्डीतिसउ च्यते इति ॥ त्रिदण्डमस्यास्ति । इनि ॥

त्रिदला । स्त्री । गोधापदीलतायाम् ॥

त्रिदलिका । स्त्री । चर्मकषायाम् ॥ इति शब्दचन्द्रिका ॥

त्रिदश । पु । देवे । निर्जरे ॥ तृती या यौवनाख्या दशा यस्य स । त्रिश ब्दस्तृतीयार्थता त्रिविभागवत् । त्रिदशयो सङ्ख्यायेतिबहुव्रीहि । बहुव्रीहौसङ्ख्येयेडजबहुगणात इतिडच् ॥ त्रीन् तापान् दशति । दं शदशने । मूलविभुजादित्वात् क । पृ०नलोप इति वा ॥ जन्मसत्ताविं नाशाख्यास्तिस्रोदशा यस्य । नतुम र्त्यांना मिव बाल्ययौवनवार्द्धक्याख्या ॥ त्रयस्त्रिंशद्देवमुख्यगणे ॥ त्र्यधिका स्त्रिराद्दशादश त्रिदशा । अधिकात्र सरूपार्थान्तर्भावेनैकार्थीभाव । ते च अर्कादादश रुद्राएकादश वसवो ष्टौ विश्वेदेवौद्वाविति ॥ एकएवचि

शब्दस्तन्त्रेणोभयार्थे वृत्तिस्तताधिका राविदशाइत्ययथाख्यात.॥

त्रिदशगोप । पु । इन्द्रगोपकीटे ॥

त्रिदशदीर्घिका । स्त्री । स्वर्गङ्गायाम्॥

त्रिदशमञ्जरी । स्त्री । तुलस्याम् ॥

त्रिदशवर्त्म । न । नभसि ॥ त्रिदशानां वर्त्म॥

त्रिदशाचार्य्य । पु ।जीवे।सुरगुरौ ॥ त्रिदशानाम् आचार्य. ॥

त्रिदशाधिप । पु । शक्रे ॥

त्रिदशाध्यक्ष । पु।विष्णौ॥गुणावेशेन सञ्जातानांतिसृणां दशानां जाग्रदादीना मध्यक्ष स्वामी ॥ त्रिदशानां देवानां वा अध्यक्ष ॥

त्रिदशायुधम् । न । वज्रे ॥

त्रिदशारि । पु । दैत्ये॥ त्रिदशानाम् अरि. ॥

त्रिदशालय । पु।स्वर्लोके॥ त्रिदशानाम् आलय ॥ सुमेरुपर्वते ॥

त्रिदशावास । पु । त्रिविष्टपे।स्वर्गे ॥ त्रिदशानाम् आवास ॥

त्रिदशाहार । पु । अमृते।पीयूषे ॥

त्रिदशेश्वरी । स्त्री । दुर्गायाम्॥

त्रिदालिका । स्त्री । चर्मकषायाम् ॥

त्रिदिनव्रतम् । न। नैमित्तिकेव्रतविशेषे ॥ यथा।खरकुक्कुटकोलांश्च विक्रीणन्गोद्विजातय । नीचहन्ति चरन्तो पिशुद्धयेयु स्त्रिदिनव्रतात् ॥ दिनमेक निराहारो द्वितीय कणभोजन । तृतीयन्तु नयेदद्भि स्त्रिदिनव्रतम स्मिकेइतिकुलार्णवसेतु ॥

त्रिदिनस्पृक् । पु । त्र्यहस्पर्शे । अहस्ति थिचयस्पर्शने ॥ यथा । त्रिदिनस्पृक् दिनत्रयस्पर्शनादह्न । तथाहोरात्रस्य वारद्वयेन तिथ्यन्तद्वयदि स्पृश्यते तदा त्रिदिनस्पृक् स्यादित्यर्थ ॥

त्रिदिव. । पुं । स्वर्गे ॥ त्रयोब्रह्मविष्णुरुद्रा दीव्यन्त्यत्रेति त्रिदिव । इगुपधत्वे ति घञ् । सज्ञापूर्वकत्वान्नगुण. ॥ यद्वा । सात्त्विकराजसतामसभेदेन त्रिविधा दीव्यन्ति व्यवहरन्तिप्रकाशन्ते वा । इगुपधत्वात्क ॥ यद्वा तृतीयाश्री । घञर्थेकविधानम् । वृत्तिविषये सङ्ख्याशब्दस्य पूरणार्थत्वम् ॥ न । खे । नभसि ॥ सुखे ॥

त्रिदिवा । स्त्री । नदीविशेषे ॥

त्रिदिवेश । पु । देवे । निर्जरे ॥ त्रिदिवस्य ईश ॥

त्रिदिवोद्भवा । स्त्री । स्थूलैलायाम् ॥

त्रिदिवौका । पु । देवे । सुरे ॥

त्रिदृक् । पु । शिवे । महादेवे ॥ त्रि । त्रिनेत्रे ॥

त्रिदोषः । पु । सन्निपाते ॥ न । वात-

पित्तकफरूपे दोषत्रये ॥

त्रिदोषज । पु । त्रिदोषजनिते सन्निपातरोगे ॥ अस्य पूर्वरूपम् । सर्वलिङ्गसमावाय सर्वदोषप्रकोपजे ॥ सर्वदोषप्रकोपजे पूर्वसर्वलिङ्गसमावाय । कृतिश्वयितजृम्भानेत्रदाहाश्वारुचिसञ्चितानां श्रमादीनां समवायोभवति ॥ * ॥ त्रिरज्वरे वातकफोल्बणेवा त्रिदोषजेवाद्यमूलमिश्रः । किराततिक्तादिगण प्रयोज्य शुद्धार्थिनेवा त्रिवृतादिमिश्रः ॥

त्रिधा । अ । त्रिप्रकारे ॥ यथा । त्रिधा करोति ॥

त्रिधातु । पु । गणेशे ॥ न । धातुत्रये ॥

त्रिधामा । पु । विष्णौ ॥ शिवे ॥ अग्नौ ॥ मृत्यौ ॥ त्रीणिधामानि स्थानानि भूरादीनि सत्त्वादीनि वा यस्य स ॥ न । स्त्री । धामत्रये ॥

त्रिधारक । पु । गुण्डतृणे ॥

त्रिधारस्नुही । स्त्री । त्र्यस्रे । स्नुहीविशेषे ॥

त्रिधाविशेष । पु । सूक्ष्मादिविशेषे ॥ यथा । सूक्ष्मामातापितृजा सहप्रभूते स्त्रिधाविशेषा स्युः । सूक्ष्मास्तेषां नियता मातापितृजानिवर्त्तन्ते ॥ सूक्ष्मशरीरमेक मातापितृजोद्वितीय महाभूतानितृतीयोविशेष । तेषांमध्ये सूक्ष्मानियता माता पितृजानिवर्त्तन्ते कीटान्ता वा भस्मान्ता वा विडन्तावेति ॥ त्रिप्रकारको विशेष ॥

त्रिधासर्ग । पु । भूतादिसर्गे ॥ अष्टविकल्पोदैव स्तैर्यग्योनश्चपञ्चधाभवति । मानुष्यश्चैकविध समासतोयत्रिधासर्ग ॥ ब्राह्म प्राजापत्य ऐन्द्र पैत्र गान्धर्व याक्ष राक्षस पैशाच इत्यष्टविकल्पोदैव सर्ग । १ ॥ पशुमृगपक्षिसरीसृपस्थावरा इति पञ्चविधस्तैर्यग्योन सर्ग । २ ॥ मानुष्यश्चैकविध । ३ ॥ ब्राह्मणत्वाद्यवान्तरजातिभेदाविवक्षया संस्थानस्य चतुर्ष्वपिवर्णेष्वविशेषात् ॥

त्रिनयन । पु । विषमनयने । शिवे ॥ त्रीणिनयनान्यस्य । क्षुभ्नादिषुचेति निषेधात् पूर्वपदात् संज्ञायामग इतिणत्वाभाव ॥ त्रि । नेत्रत्रयवति ॥

त्रिनयना । स्त्री । उमायाम् ॥ टाप् ॥

त्रिनेत्र । पु । शिवे । हरे ॥ त्रीणिनेत्राणियस्य ॥ त्रि । नेत्रत्रयविशिष्टे ॥

त्रिनेत्रचूडामणि । पुं । शशाङ्के । चन्द्रे ॥

त्रिनेत्रा । स्त्री । वाराहीकन्दे ॥ नेत्रत्रययुक्तायाम् ॥

त्रिपञ्च । त्रि । त्रिगुणितपञ्चसु । पञ्च

दृशसु ॥

त्रिपथ्वाङ्गम । न । पञ्च दृशसङ्ख्याक ङ्गेषु निदिध्यासनाङ्गिसाधकसाधन-विशेषेषु ॥ तानि यथा । यमोऽथ नियम स्त्यागो मौन देशश्च काल ता । आसन मूलबन्धश्च देहसाम्य ञ्च दृक्स्थिति ॥ प्राणसंयमनञ्चैव प्रत्याहारश्चधारणा । आत्मध्यान समाधिश्च प्रोक्तान्यङ्गानिवैक्रमात् ॥ एषातुलक्षणा स्वस्वस्थानेज्ञेय मनीषिभि ॥

त्रिपताकम । न । रेखात्रयाङ्कितभाले॥

त्रिपत्र । पु । विल्वे ॥ न । दलत्रयवति विल्वपत्रे ॥ यथा । विष्णुरुवाच । ऊर्द्ध पत्रहरोज्ञेय पत्र वामविधि स्वयम् । अहदचिणपत्रञ्चत्रिपत्रदलमित्यु तेतिदृहद्धर्मपुराणे ११ अध्याय ॥

त्रिपत्रक । पु । किंशुकवृक्षे । पलाशे ॥

त्रिपत्री । स्त्री । पत्रत्रये ॥ द्विगोरिति ङीप् ॥

त्रिपथम् । न । त्रिमार्ग्याम् ॥ त्रयाणा पथा समाहार । तद्धितार्थेतिसमास । ऋक्पूरिति समासान्त । पथ सङ्ख्याव्ययादेरितिक्लीवता ॥

त्रिपथगा । स्त्री । भागीरथ्याम् । गङ्गायाम् ॥ त्रीन्पथोगच्छति । त्रिभि पथिभिर्गच्छतिवा । गमॢ° । अन्येभ्यो पीतिड ॥ यद्वा । त्रिपथेन गच्छति । ड. ॥ टाप् ॥ क्षितौतारयते मर्त्यान् नागाँस्तारयतेऽप्यध । दिवितारयतेदेवाँ स्तेनत्रिपथगास्मृता ॥

त्रिपदा । स्त्री । छन्दोविशेषे ॥ त्रय. पादा अस्या । सङ्ख्यासुपूर्वस्येति पादस्यान्तलोप । टाबृचीतिटापि भत्वात् पाद पत् ॥ हंसपदीवृक्षे ॥

त्रिपदिका । स्त्री । तिपाई इति प्रसिद्धे आधारविशेषे ॥ अर्घ्यार्थंधातुनिर्मिते त्रिपाद्युक्ते शङ्खादिपात्राधारे ॥

त्रिपदी । स्त्री । गोधापदीलतायाम् । हंसपद्याम् ॥ हस्तिगात्रबन्धे ॥ त्रिपदी पादबन्धनमितियादव ॥ अर्घ्यादिपात्राधारे ॥ त्रय पादाअस्या सङ्ख्यासुपूर्वस्येति पादशब्दस्यान्तलोप । पादोऽन्यतरस्यामितिङीपि भत्वात् पाद पदिति पद्भाव' ॥ पादत्रययुक्तायाम् ॥ भाषाकवितायाश्छन्दोविशेषे । यथा । पञ्चफटिकान्ता यद्दियमकान्ता द्वादशपरिणतमात्रा । किन्नरगीतिस्तद्दितिनिवीति स्यादिसमाचरणात्रा ॥ स्यपादान्तउदाहृत ॥ यैषा सङ्गीतकेनित्य निर्वीति किन्नराख्यिका ॥ सैव स्यात् प्राकृतेगाने त्रपदीतिपरिश्रुता ॥ इतिकाव्योदय ॥

त्रिपर्ण । पु । किंशुके ॥

त्रिपर्णा । स्त्री । वनकार्पास्याम् ॥

त्रिपर्णिका । स्त्री । कन्दविशेषे । अग्निवल्ल्याम् । कन्दालौ ॥

त्रिपर्णी । स्त्री । शालपर्ण्याम् ॥ वनकार्पास्याम् ॥ पृश्निपर्णीभेदे ॥

त्रिपात् द् । पु । विष्णौ ॥ ज्वरे ॥ त्रय पादा अस्य । सख्यासुपूर्वस्येतिपादस्यान्तलोप ॥

त्रिपादिका । स्त्री । हंसपदीलतायाम् ॥

त्रिपिबन् । पु । वार्द्धीणसे ॥ नद्यादौ पय पिबतोयस्य त्रीणिजल स्पृशन्ति कर्णौजिह्वाच । त्रिभि पिबति । पा० । शतृ ॥

त्रिपिष्टपम् । न । स्वर्गे ॥ त्रिदशानापिष्टपम् । पृषोदरादित्वात् दशशब्द लोप ॥ तृतीय पिष्टपम् त्रिपिष्टपम् । पूरणप्रत्ययस्तु वृत्तौ गतार्थत्वान्न प्रयुज्यते त्रिभागवत् । मर्त्यपातालापेक्षया तृतीय पिष्टप भुवनम् ॥

त्रिपिष्टपसद् । पु । देवतायाम् ॥ त्रिपिष्टपेदिवि सीदतिवर्त्तते । सद्ल्ट० । क्विप् ॥

त्रिपुट । पु । सतीनके । खिसारीति प्रसिद्धे कलाये ॥ त्रिपुटोमधुरस्निग्धस्तुवरोरूक्षणो भृशम् । कफपित्तहरोरुच्योग्राहक शीतलस्तथा ॥ कि

गुरुक्षस्तपङ्गुत्वकारी वातातिकोपन ॥ तीरे ॥ तालके ॥ हस्तभेदे ॥ गोक्षुरे ॥

त्रिपुटा । स्त्री । मल्लिकायाम् ॥ सूक्ष्मैलायाम् ॥ त्रिवृद्दोषधौ ॥ त्रय पुटा यस्या ॥ कर्णस्फोटायाम् ॥ रक्तत्रिवृति ॥ स्थूलैलायाम् ॥ देवीविशेषे ॥

त्रिपुटी । पु । एरण्डे ॥

त्रिपुटी । स्त्री । त्रिवृतायाम् ॥ त्रय णां पुटाना समाहारे ॥ त्रयाणां ज्ञातृज्ञानज्ञेयादिरूपाणा पुटानामाकाराणा समाहार । द्विगोरिति ङीप् ॥

त्रिपुटीफल । पु । एरण्डे ॥ त्रिपुटीफले यस्य ॥

त्रिपुण्ड्रम् । न । भालस्थतिर्यग्रेखात्रितये ॥ ऊर्द्ध्वपुण्ड्रं द्विज कुर्यात् क्षत्रियस्त्रिपुण्ड्रकम् । अर्द्धचन्द्रन्तु वैश्यस्तु वर्त्तुल शूद्रयोनिज ॥ * ॥ विनाभस्मत्रिपुण्ड्रेण विनारुद्राक्षमालया । पूजितोपिमहादेवो न स्यात्तस्यफलप्रद ॥ तस्मान्मृदापिकर्त्तव्य ललाटे तुत्रिपुण्ड्रक मितिस्मृति ॥ मृत्तया भस्मना वापित्रिपुण्ड्र विन्दुसयुतम् । ललाटेतिलक कुर्याद्गायत्र्या बहुकुन्तल इतिमहानिर्वाणतन्त्रम् ॥ येषांवपुर्मनुष्याणा त्रिपुण्ड्रे

शिविनाशितम् । श्मशानसद्दश्यंतत्-स्थानमेवं पुण्यकृज्जनैरितिदेवी-भागवतम् ॥ अपिचतत्रैव नारदं प्रति नारायणवाक्यम् । त्रिपुण्ड्रये विनिन्दन्तिनिन्दन्तिशिवमेवते । धारयन्ति चयेभक्त्या धारयन्ति तमेवते ॥ तिर्यग्रेखाः प्रदृश्यन्तेललाटे सर्वदेहिनाम् । तथापि मानवा मूर्खा न कुर्वन्ति त्रिपुण्ड्रकमिति ॥ त्रयाणां पुण्ड्राणां समाहार ॥ तद्धितार्थेत्यादिनासमास. ॥

त्रिपुण्ड्रकम् । न । त्रिपुण्ड्रे ॥ ललाटगासितस्रो भस्मरेखास्त्रिपुण्ड्रकमितिहारावली ॥ त्रिपुण्ड्रमेव । स्वार्थेक. ॥

त्रिपुरः । पु । असुरविशेषे ॥ न । मयदानवविरचिते कामचारिणि पुरत्रये ॥ त्रयाणा पुराणां समाहार. त्रिपुरम् । तद्धितार्थेतिसमास । पात्रादित्वात् स्त्रीत्वाभाव ॥

त्रिपुरदहन । पु । शिवे । हरे ॥

त्रिपुरभैरवी । स्त्री । देवीविशेषे ॥

त्रिपुरमल्लिका । स्त्री । पुष्पवृक्षविशेषे । क्षेमन्नायाम् । त्रिपुरमालिकेति गौडेषुख्यातायाम् ॥

त्रिपुरमालिका । स्त्री । मोहिन्याम् । वटपत्रायाम् ॥

त्रिपुरा । स्त्री । चतुर्वर्गप्रदायां परदेवतायाम् ॥ ब्रह्मविष्णुमहेशाद्यैस्त्रिदशैरर्चितापुरा । त्रिपुरेतितदानामकथित दैवतैस्तव ॥ अपिच । त्रिकोणं मण्डलञ्चास्यास्त्रिपुरन्तु चिरेखकम् । मन्त्रन्तुत्र्यक्षरं प्रोक्तं तथारूपत्रयं पुन ॥ त्रिविधाकुण्डलीशक्तिस्त्रिदेवानाञ्चसृष्टये । सर्वं त्रयं त्रयं यस्मात् तस्मात्तुत्रिपुरामतेति ॥

त्रिपुरान्तक । पु । महेश्वरे । शूलिनि । शिवे ॥ त्रयाणांसुवर्णरौप्यलोहानां मयादिनामकानां दैत्यत्रयाणां वा पुराणि तेषामन्तकोनाशक. । त्र्यवयवं पुरं त्रिपुरं तस्यान्तक ॥ त्रयाणां पुराणां समाहार । पात्रादिरिति कश्चित् तन्न । तथासतिपञ्चपात्रीतिवत् त्रिपुरीति प्रयोगाभाव स्यात् ॥

त्रिपुरारि । पु । सदाशिवे ॥

त्रिपुरी । स्त्री । चेदिपुर्याम् । त्रिपुरा इति प्रसिद्धेदेशे ॥

त्रिपुषा । स्त्री । कृष्णत्रिवृति ॥

त्रिपुष्करम् । न । ब्रह्मकृततीर्थविशेषे । ज्येष्ठमध्यमकनिष्ठेषु त्रिषु पुष्कराभिधह्रदेषु ॥ पु । योगविशेषे ॥ यथा । वारा क्रूरा स्तिथिर्भद्रा नक्षत्र भद्रपादकम् । जाते ऽनुजारजोयोगो

मरणे ऽत्रिपुष्करइति ॥

त्रिपुष्टः । पु । राजभेदे । प्राजापत्ये ॥

त्रिपृष्ठ । पु । त्रयाणांलोकानामुपरिस्थिते सत्यलोके ॥

त्रिफला । स्त्री । हरीतक्यादिफलत्रिके ॥ पथ्याविभीतधात्रीणांफलैः स्यात् त्रिफला समैः । फलत्रिकञ्च त्रिफला सावराच प्रकीर्त्तिता ॥ त्रिफला कफपित्तघ्नी मेहकुष्ठहरीसरा । चक्षुष्या दीपनी रुच्या विषमज्वरनाशिनी ॥ त्रयाणां फलानां समाहारः । अजादित्वात् द्विगोरिति न ङीप् ॥

त्रिफली । स्त्री । त्रिफलायाम् । इति राजनिर्घण्टः ॥

त्रिवलीकम् । न । पायौ ॥

त्रिभङ्गी । स्त्री । मात्रावृत्तान्तरे ॥ यथा । प्रथम यदि दृश्यम वदति विरामं तदनु निकाम वसुवसुकम् वसुविमल तुरङ्गम मतिहृदयङ्गम क्षपितभुजङ्गम नृपतिलकम् । त्रिशद्विकलास विहितनिवास सततविलास हृदय मुदे मदमुदितभुजङ्गी मोहनरङ्गी वदति त्रिभङ्गीवृत्तमदः ॥ यथा । विविधायुधखण्डितसङ्गरपण्डितरणखण्डितपाखण्डभटे चण्डासुरखण्डिनि सुरपुरमण्डिनि शशधरखण्डनिबद्धजटे । भवसागरतारिणि दुर्गतिहारिणि मङ्गलकारिणि मयिसुचिरम गिरिराजनिवासिनि शैलविलासिनि शम्भुविलासिनि देहिवरमिति ॥

त्रिभण्डी । स्त्री । त्रिवृतायाम । श्वेतत्रिधारेतिख्यातौषधौ ॥ त्रीन्दोषान्भण्डते । भडिपरिभाषणे । कर्मण्यण् । ङीप् ॥

त्रिभद्रम् । न । सुरते ॥ इतित्रिकाण्डशेषः ॥

त्रिभुवनम् । न । स्वर्गमर्त्त्यपातालात्मके लोकत्रये । त्रिलोक्याम् ॥ त्रयाणां भुवनानां समाहारः ॥ तद्धितार्थेत्यादिना समासः ॥

त्रिमद । पु । मुस्ताचित्रकविडङ्गेषु ॥

त्रिमदोत्पथ । त्रि । त्रिभिर्मदैर्वृत्ते ॥ विद्यामदो धनमदस्तथैवाभिजनो मदः । एते मदा मदान्धानां त एव हिसतां दमाः ॥

त्रिमधु । पु । ऋग्वेदैकदेशे ॥ मधुवाताद्युक्त्रयवेत्तरि ॥ यथा । त्रिणाचिकेत स्त्रिमधुस्त्रिसुवर्णः षडङ्गविदिति ॥ न । मधुत्रये । मिलितसितामाक्षिकसर्पिःषु ॥ यथा । दुग्धसिता माक्षिकञ्च विज्ञेय मधुरत्रयम् ॥

त्रिमार्गगा । स्त्री । गङ्गायाम् ॥ त्रिभि

र्मार्गैर्गच्छतीतिविग्रहः ।

त्रिमार्गी । स्त्री । त्रिपथे ॥ त्रयाणां मार्गाणां समाहारः ॥ ङीप् ॥

त्रिमुकुट । पु । त्रिकूटाचले ॥

त्रिमुख । पु । बुद्धविशेषे ॥

त्रिमुखा । स्त्री । बुद्धदेवीविशेषे । मायादेव्याम् । वज्रवाराह्याम् ॥

त्रिमूर्त्ति । पु । बुद्धभेदे ॥ ब्रह्मविष्णुशिवाख्यमूर्त्तित्रयवति ॥ यथा । त्रिमूर्त्तिर्यः सर्गस्थितिविलयकर्माणि तनुते । इतिगङ्गेशोपाध्यायः ॥ तिस्रो मूर्त्तयोयस्य ॥ स्त्री । देवीविशेषे ॥ तिस्रोमूर्त्तयोयस्याः । त्रयोब्रह्मादयोवामूर्त्तयो यस्याः ॥ एकमूर्त्तिरपि भिन्नरूपिणी या जगज्जननपालनक्षये । काच्युतेश्वरतया विवर्त्तते ब्रह्मशक्ति मह मानतोऽस्मिताम् ॥

त्रियष्टि । स्त्री । स्वेभपर्ण्याम् ॥

त्रियामकम् । न । पापे ॥ इतिशब्दमाला ॥

त्रियामा । स्त्री । रात्रौ ॥ त्रयोयामा यस्याः । आद्यन्तयोरर्द्धयोश्चेष्टाकालत्वेन दिनप्रायत्वात् ॥ हरिद्रायाम् ॥ यमुनायाम् ॥ नील्याम् ॥ कृष्णत्रिवृतायाम् ॥

त्रियुगः । पु । यज्ञपुरुषे ॥ कृतयुगेयज्ञाभावात् । कलौछन्नत्वाद्वा ॥

त्रियूह । पु । कपिलाश्वे ॥

त्रिरात्रम् । न । रात्रित्रये । तिसृणांरात्रीणां समाहारे ॥

त्रिरुक्तम् । त्रि । विषादादिना त्रिवारोच्चारिते ॥ विषादे विस्मये हर्षे खेदे दैन्ये ऽवधारणे । प्रसादने सम्भ्रमेपि द्विस्त्रिरुक्तनदुष्यति ॥

त्रिरेख । पु । शङ्खे ॥ त्रि । रेखात्रयविशिष्टे ॥ तिस्रोरेखायस्य ॥

त्रिलव । पु । तृतीयांशे ॥

त्रिलवणम् । न । लवणत्रये ॥ यथा । सैन्धवञ्च विडञ्चैव रुचकञ्चतृतीयकम् । मिलितैस्त्रैतत् त्रिलवणं वैद्यशास्त्रेनिरूपितम् ॥

त्रिलोकात्मा । पु । अन्तर्यामिणि ॥ त्रयाणां लोकानां मात्मा ॥

त्रिलोकधृक् । पु । विष्णौ ॥ त्रीन्लोकान् धारयति इति । धृञ् । क्विप् ।

त्रिलोकी । स्त्री । स्वर्गमर्त्यपातालेषु ॥ त्रयाणां लोकानां समाहारः । द्विगोरितिङीप् ॥

त्रिलोकेश । पु । सूर्य्ये ॥ सदाशिवे ॥ त्रयाणां लोकानामीशो ऽधिष्ठाता ॥ त्रयोलोका सदाशसा स्वेषुकर्मसु वर्त्तन्त इतिवा ॥

त्रिलोचन । पु । त्र्यम्बके । शिवे ॥ त्रीणि लोचनानि यस्य । त्रिषु कालेषु

लोकेषु गुणेषु वेदेषु वा लोचनं स्थानं यस्येतिवा। त्रयोवेदा वर्णा वा अकारोकारमकाराः लोचनानि यस्यवा॥

त्रिलोचना। स्त्री। दुर्गायाम्॥ बुद्धदेवी प्रभेदे॥

त्रिलोचनाष्टमी। स्त्री। गौणचान्द्रज्येष्ठस्य कृष्णाष्टम्याम्॥

त्रिलोहकम्। न। सुवर्णरजतताम्राभिधे धातुत्रये॥

त्रिलोही। स्त्री। त्रिलोहघटितमुद्राविशेषे॥

त्रिवर्ग। पु। धर्मकामार्थेषु॥ धर्मार्थकामा सममेव सेव्या योह्येकसक्तः सजनोजघन्यः॥*॥ यथाऽऽनुकूल्यं दम्पत्योः त्रिवर्गस्तत्रवर्द्धते॥ त्रिफलायाम्॥ कटुत्रिके॥ वृद्धिस्थानक्षये॥ क्षयःस्थानञ्चवृद्धिश्चत्रिवर्गो नीतिवेदिनाम्॥ सत्त्वरजस्तमस्सु॥ त्रयाणां वर्गःसमूहः॥ सुनीतौ॥ इति शब्दरत्नावली॥

त्रिवर्गक। पु। गोक्षुरके॥ न। त्रिफलायाम्॥ त्र्यषणे। कटुत्रिके॥ ब्राह्मणक्षत्रियविट्सु॥

त्रिवर्षिका। स्त्री। त्रिवर्षायाङ्गवि। त्रिहायण्याम्॥ त्रीणिवर्षाणि वयोयस्याः सा त्रिवर्षा। ततःस्वार्थेकः॥

त्रिविक्रम। पु। विष्णौ॥ बलिबन्धनार्थं भूव्योमस्वर्गेषु त्रिषुलोकेषुगुणेषुवा त्रयोवा विक्रमाःपादन्यासा यस्यस। त्रिरित्थंत्रयोलोकाःकीर्त्तितामुनिसत्तमैः। क्रमतेतांस्त्रयासर्वांस्त्रिविक्रमोजनार्दनः॥ इतिहरिवंशः॥ त्रींल्लोकान् विशेषेण क्रामति व्याप्नोतिवा। क्रमु०। अच्॥

त्रिविध। त्रि। त्रिप्रकारे॥ तिस्रोविधायस्यस॥

त्रिविधसर्ग। पु। त्रिधासर्गे॥

त्रिविष्टपम्। न। स्वर्गे। सुरलोके॥ विशन्त्यस्मिन् सुकृतिन इति विष्टपम्। विटपपिष्टपविशिपोलपा इति विशेरौणादिक कपन्प्रत्ययः तस्यतुट्। त्रश्चेतिषत्वम्। त्रयेपिष्टपेतिपाठउज्ज्वलदत्तरीत्योक्तः। अन्येतु विष्टपेतिदन्त्योष्ठादिमेव पठन्ति। युक्तञ्चैतत्। यत्त्रभुरस्यविष्टपमित्यादौ तथादर्शनात्। अमरकोषेपि विष्टपं भुवनं जगदितिप्रचुरपाठाच्च॥ तृतीयं विष्टपम्॥ त्रिभुवने॥

त्रिविष्टपसद्। पु। देवे। सुरे॥

त्रिवीज। पु। श्यामाके॥ इतिराजनिर्घण्टः॥

त्रिवृत्। स्त्री। त्रिवृतायाम्। सुवृतायाम्। श्वेतत्रिधारा इति प्रसिद्धौषधौ

॥ श्वेतात्रिवृद्रोचनी स्यात स्वादुरुष्णासमीरहृत् । रूक्षा पित्तज्वरश्ले ष्मपित्तशोथोदरापहा ॥ श्वेतकृष्ण प्रभेदेन द्विविधा त्रिवृदुच्यते । श्या मात्रिवृत्ततोहीनगुणा तीव्राविरेचि का ॥ मूर्च्छादाहमदभ्रान्तिकण्ठो त्कर्षणकारिणी ॥ त्रीन् अवयवान् वृणोति । वृञ० । क्विप् तुक् ॥

त्रिवृता । स्त्री । त्रिवृद्दोषधौ ॥ त्रिभि रवयवैर्वृता ॥

त्रिवृत्करणम् । न । तेजोवन्नानां मि श्रीकरणे ॥ तत्प्रकारो यथा । तेजोव न्नानांत्रयाणां मध्ये एकैकद्विधा सम विभज्यपुनरेकैकभागस्य द्विधाविभा गकृत्वास्वस्वद्वितीय स्थूल भाग परि त्यज्यान्यदीयस्थूलभागयोरेकैकस्य भागस्यसयोजनमिति ॥

त्रिवृत्पर्णी । स्त्री । हिलमोचिकायाम् ॥

त्रिवृद्वेद । पु । त्रय्याम् । ऋग्यजु सा मात्मके वेदे ॥ प्रणवे ॥ ऋचोयजूंषिचान्यानि सामानि विविधानिच । एषत्रेय त्रिवृद्वेदो योवेदैन सवेद वित् ॥ आद्य यत् त्र्यक्षर ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता । सगुह्योन्य त्रि वृद्वेदो यस्तवेद सवेदवित ॥ कृणा त्यात्मनात्रिरावर्त्तते इति त्रिवृत् स चासौवेदश्चेति कर्म्मधारय. ॥

त्रिवेणी । स्त्री । स्थानविशेषे ॥ सा द्विधा । युक्तवेणीमुक्तवेणीतिभेदात् । तत्र प्रयागे युक्तवेणी गङ्गया यमुना सरस्वत्यो सङ्गमात् ॥ दक्षिणप्रया गे मुक्तवेणी गङ्गया यमुनासरस्व त्योर्वियोगात् ॥ दक्षिणप्रयागस्यसी मानिर्णयो यथा । प्रद्युम्नस्य ह्रदाद्या म्ये सरस्वत्यास्तथोत्तरे । तद्दक्षिण प्रयागस्तु गङ्गातो यमुना गतेति ॥ * ॥ सगरसन्ततिसन्तरणेच्छया प्रच लितातिजवेन हिमालयात् । इहतु मन्दमुपैति सरस्वतीयमुनयोर्विर- हादिव जाह्नवीतिनदियाधिपतिकृ ष्णचन्द्रराजस्यसभास्थो वाणेश्वरवि द्यालङ्कार ॥

त्रिवेणु । पु रथमुखस्थेऽवयवविशेषे॥

त्रिवेद । पु । वेदत्रयवेत्तरि ॥

त्रिवेदी । पु । त्रिवेदज्ञे ॥

त्रिवेदी । स्त्री । वेदत्रये ॥ त्रयाणांवेदा ना समाहारे । द्विगोरिति ङीप् ॥ ऐष्टिकपाशुकसौमिकवेदिकात्रये ॥

त्रिवेला । स्त्री । त्रिवृति ॥

त्रिशक्तिधृक् । पु । भगवति ॥ त्रिशक्ति मीया ता धरतीतिविग्रह ॥

त्रिशङ्कु । पु । सूर्यवंशीयन्नपविशेषे ॥ शलभे ॥ वृषदंशके । मार्जारे ॥ चातके ॥ खद्योते ॥

त्रिशङ्कुज । पु । हरिश्चन्द्रनृपे ॥

त्रिशङ्कुयाजी । पु । विश्वामित्रे ॥

त्रिशरण । पु । बुद्धे । जिने ॥

त्रिशर्करा । स्त्री । मिलितगुडोत्पन्ना शिमोत्थामधुरेति राजनिघण्टुः ॥

त्रिशला । स्त्री । वृत्तार्हन्माहविशेषे । वर्द्धमानमातरि ॥

त्रिशाखपत्र । पु । बिल्वे । मालूरे ॥

त्रिशिख । पु । राक्षसान्तरे । रावणपुत्रे ॥ बिल्वे ॥ न । त्रिशूले ॥ मण्डलान्तरे ॥ किरीटे ॥ त्रि । शिखात्रयवति ॥

त्रिशिखिदला । स्त्री । मालाकन्दे ॥

त्रिशिरा8 । पु । ज्वरे ॥ कुबेरे ॥ रावणपुत्रविशेषे ॥ खरसेनापतौ ॥ त्री णि शिरांसि यस्य ॥

त्रिशीर्षक । न । त्रिशूले ॥

त्रिशूलम् । न । अस्त्रविशेषे । त्रिशिखे ॥ त्रयाणां शूलानां समाहारः ॥

त्रिशूली । पु । शिवे ॥ त्रि । त्रिशूलधारिणि ॥

त्रिशृङ्ग । पु । त्रिकोणे ॥ त्रिकूटाद्रौ ॥ त्रीणि शृङ्गाण्यस्य ॥

त्रिशृङ्गी । पु । रोहितमत्स्ये ॥

त्रिष्टुप् । स्त्री । एकादशाक्षरायां वृत्तौ ॥

त्रिसन्ध्य । त्रि । परदेवतायाम् । परमेश्वरे ॥ त्रिष्वपिकालेषु सृष्टेः पूर्वं प्रलयानन्तरं स्थितिसमये चसन्ध्योऽव्यभिचारेण वर्त्तमानत्वात् ॥

त्रिसन्धि । स्त्री । पुष्पविशेषे । सन्ध्यकुसुमे । फागनिया इतिभाषा ॥ पूर्वापरमध्यसन्धौ ॥

त्रिसन्ध्यम् । न । प्रातःसायंमध्याह्ने । त्रिकाले ॥ प्रातः सूर्योदयकालो मध्याह्नस्तदनन्तरम् । सायह्नमस्तसमय त्रिकालानामयङ्क्रमइतिनिर्णीयतत्वम् ॥ तिसृणां सन्ध्यानांसमाहारः । आवन्तोवेतिपाक्षिकीङीवता ॥ पुष्पविशेषे ॥

त्रिसन्ध्या । स्त्री । जपापुष्पे ॥ देवीविशेषे ॥ अस्याः स्थानं कुरुक्षेत्रतीर्थम् ॥

त्रिसमम् । न । समभये । समहरीतकीनागरगुडरूपे ॥

त्रिसर । पु । कृसरे ॥ इतिहेमचन्द्रः ॥

त्रिसरकम् । न । त्रिवारमधुपाने ॥ त्रयाणां सरकाणां समाहारः । तद्धितार्थेत्यादिना समाहारेद्विगुः । पात्रादित्वान्नपुंसकत्वम् ॥

त्रिसवनम् । न । त्रिकाले । त्रिसन्ध्ये ॥

त्रिसामा । स्त्री । नदीविशेषे । महेन्द्राद्रेः चरन्त्यां स्रवन्त्याम् ॥

त्रिसिता । स्त्री । त्रिशर्करायाम् ॥

त्रिसीष्यम् । न । त्रि कृष्टक्षेत्रे । त्रिह

ल्ले ॥ त्रिवार सीतया समितम्। नैा वयोधर्मेत्याादिनायत् ॥

त्रिसुगन्धि । न । त्रिजातके ॥ त्वगेला पत्रकैस्तुल्यै स्त्रिसुगन्धि त्रिजात कम् ॥

त्रिसुपर्ण । पु । बहृचानां वेदभागे ते षाव्रतेच ॥ तद्योगात् पुरुषे ॥

त्रिस्रोता४ । स्त्री । गङ्गायाम् ॥ त्रीणि स्रोतासियस्याः ॥ नद्यन्तरे ॥

त्रिहल्यम् । न । त्रिगुणाकृते । तृतीया कृते । त्रिसीत्ये ॥ त्रिवार हलेन कृ ष्टम् । मतजनहला.तुकरणजल्पकर्षे ष्वितियत् ॥

त्रिहायणी । स्त्री । त्रिवर्षाया गवि । व्य ब्दायाम् ॥ त्रयोहायना यस्याः । दाम हायनान्ताच्चेतिङीप् ॥ त्रिचतुर्भ्याहा यनस्येतिणत्वम् ॥ द्रौपद्याम् ॥ यथा । कृते युगे वेदवती त्रेतायां जनकात्म जा । द्वापरे द्रौपदीछाया तेनकृष्णा त्रिहायणीति ब्रह्मवैवर्त्ते श्रीकृष्णज न्मखण्डम् ॥

त्रुटनम् । न । विच्छेदे । टूटना इति भाषा ॥

त्रुटि । स्त्री । संशये ॥ लेश । स्वल्पे ॥ सूक्ष्मैलायाम् ॥ कालमाने । लवद्व ये ॥ द्वयोर्निमेषयोः ॥ त्रुट्यते ऽने नवा । त्रुटच्छेदने । इगुपधात्किदि तीन् ॥

त्रुटित. । त्रि । छिन्ने ॥

त्रुटिवीज । पु । कच्वाम् ॥ इति श- ब्दमाला ॥

त्रुटी । स्त्री । त्रुट्यर्थमात्रे ॥ कृदिकारा दितिङीष् ॥

त्रेता । स्त्री । द्वितीययुगे । सत्ययुगान न्तरयुगे ॥ अस्यपरिमाण यथा । त्रि चत्वारिंशल्लक्षेण विंशत्सहस्राधिके नच । चतुर्युग परिमित नरमान क्रमेणच ॥ द्विषड्लक्षपरिमितं ष ण्णवतिसहस्रकम् । त्रेतायुग परिमि त कालविद्भि प्रकीर्त्तितमिति ब्रह्म वैवर्त्ते प्रकृतिखण्डम् ॥ * ॥ तद्धर्मा यथा ॥*॥ त्रेतायुगे समायाते धर्म पा दोनता गत । अत्यल्पक्लेशान्विता लो का केचित् केचिद्दयाश्रया ॥ वि- ष्णुध्यानरता लोका यज्ञदानपराय- णा । वर्णाश्रमाचाररता सुखिन सुस्थचेतस ॥ क्षत्राभूमिस्पृश शूद्रा सर्वे ब्राह्मणसेविन । ब्राह्मणाश्चमहा त्मानो वेदवेदाङ्गपारगा ॥ प्रतिग्रह निवृत्ताश्च सत्यसन्धाजितेन्द्रिया । तपोव्रतपरानित्य दातारो विष्णु सेविन ॥ कालवर्षीतडित्त्वाश्चक्षि य सर्वा पतिव्रता । वसुन्धराचशस्या ढ्या पुत्राश्चपितृसेविन इतिपाद्मेक्रि

यायोगसार ॥ * ॥ अथाद्याया भगवतीजीवाना निष्कृति यथा ॥ कृते व्यतीते त्रेतायाद्दृष्ट्वा धर्म्मव्यतिक्रमम् । वेदोक्तकर्मभिमर्त्त्या न शक्ता श्चेष्टसाधने ॥ बहुक्लेशकर कर्म्मवैदिक भूरिसाधनम् । कर्त्तु न योग्या मनुजाश्चिन्ताव्याकुलमानसा ॥ त्यक्तुंकर्त्तुं नचार्हन्तिसदाकातरचेतस । वेदार्थयुक्तशास्त्राणि स्मृतिरूपाणि भूतले ॥ तदात्व प्रकटीकृत्य तप स्वाध्यायदुर्बलान् । लोकानतारय पापात् दुःखशोकामयप्रदात् ॥ त्वा विनाको ऽस्तिजीवानां घोरससारसागरे । भर्त्ता पाता समुद्धर्त्ता पितृवत् प्रियकृत् प्रभुरितिश्रीमहानिर्वाणतन्त्रे जीवो द्वारणहेतवे जगन्मातु सदाशिवं प्रतिवाक्यम् ॥ त्रीन् भेदानेति । पृ० ॥ त्रेताये ॥ एकोक्त्या दक्षिणाग्निगार्हपत्याहवनीयात्मके अग्नित्रये॥चार्थं चा' सदासन्धुक्षणम् । चाग्निता ॥ यद्वा । त्रायन्ते ऽत्राहुतय । त्राभिरिता । त्रित्वमितेतिवा । पृषोदरादि ॥त्रीणिइता वा । पृषोदरादित्वादेत्त्वम् ॥

त्रेताय । पु । द्यूतक्रीडासाधनीभूताक्षश्दितस्य यस्मिन्भागे त्रयोऽङ्काभवन्ति तस्मिन् ॥ त्रेतासंज्ञकोऽयः॥

त्रेधा । अ । त्रिधा । त्रिप्रकारे ॥ सङ्ख्यायाविधार्थेधा । एधाच्चेतिधाइत्यस्य स्थाने एधाजादेश ॥

त्रैककुदम् । न । सौवीराञ्जने ॥

त्रैकाल्यम । न । कार्यकालतत्पूर्वोऽपरकाले ॥

त्रैगुणिक । पु । वार्द्धुषिके ॥ त्रिगुणार्थं द्रव्य त्रिगुणम् । तत् प्रयच्छति त्रिगुण गृहीतुमेकगुण ददातीत्यर्थ । प्रयच्छतिगर्ह्यमितिठक् ॥

त्रैगुण्यम । त्रि । त्रिगुणात्मके । सकामे ॥ न । त्रिषुगुणेषु ॥ त्रयोगुणाएव । ष्यञ् ॥ गुणत्रयकार्यपुण्यपापव्यामिश्रकर्मफलसमाहारलक्षणे ससारे ॥

त्रैगुण्यविपर्य्यय । पु । त्रिगुणान्यथात्वे॥

त्रैगुण्यविषय । पु । कर्मकाण्डात्मके वेदे ॥ त्रयाणां गुणानां कर्म त्रैगुण्यङ् काममूल ससार स एव प्रकाश्यत्वेनविषयोयस्यस ॥

त्रैदशिक । पु । दैवे ॥

त्रैधम । अ । त्रैविध्ये । त्रिधा ॥ त्रिप्रकारम् । द्वित्र्योश्चधमुञ् ॥

त्रैधर्म्मम् । न । होत्राध्वर्यवौद्गात्रधर्मत्रयार्हेज्योतिष्टोमादिकेकाम्यकर्मणि॥

त्रैपुर । पु । त्रिपुरदेशे । त्रैपे । डाहले ॥ इतिहेमचन्द्र ॥

त्रैलोक्यम् । न । स्वर्गमर्त्त्यपातालात्म

के लोकत्रये ॥ त्रयाणां लोकानां समाहार । त्रिलोकम । तदेव । चतुर्वर्णादित्वात् स्वार्थे ष्यञ् ॥

त्रैलोक्यविजया । स्त्री । भङ्गायाम् ॥ इति शब्दचन्द्रिका ॥

त्रैविद्य । पु । वेदत्रयवेत्तरि ॥ ऋग्वेदयजुर्वेदसामवेदलक्षणा होत्राध्वर्यवौद्गात्रप्रतिपत्तिहेतवस्तिस्रो विद्या यस्य स त्रिविद्य । स्वार्थे तद्धित ॥ तिस्रो विद्या वेद । तदधीते तद्वेदेत्यण् वा ॥ याज्ञिके ॥ त्रैविद्याख्यव्रते ॥

त्रैविष्टप । पु । अमरे । देवे ॥ त्रिविष्टपे वसति । अण् ॥

त्रैष्टुभम् । न । छन्दोविशेषे ॥ त्रिष्टुबेव । स्वार्थेऽण् ॥

त्रोटकी । स्त्री । रागिणीविशेषे ॥

त्रोटि । स्त्री । कट्फले ॥ चञ्च्वाम् ॥ खगान्तरे ॥ मीनविशेषे ॥ त्रोट्यते । त्रुटच्छेदने चु० । अच् इ ॥

त्रोटिहस्त । पु । पक्षिणि ॥ त्रोटिर्हस्तो यस्य ॥

त्रोटी । स्त्री । त्रोट्यर्थभावे ॥

त्रोत्रम् । न । प्राजने । तोदने । गवादिपशुताडनदण्डे ॥ त्रायते । त्रैङ् पालने । अशित्रादिभ्य इत्रोत्रौ । इति उत्र ॥

त्र्यक्ष । पु । शिवे ॥ त्रीणि अक्षीणि यस्य ॥

त्र्यक्षर । पु । प्रणवे ॥ अकारादीनि त्रीण्यक्षराणि यस्मिन् ॥ घटके ॥ इ० त्रि० ॥

त्र्यङ्कटम् । न । शिक्यप्रभेदे ॥ धौताञ्जन्याम् ॥

त्र्यङ्गट । पु । त्र्यङ्कटे ॥ ईश्वरे ॥

त्र्यङ्गुलम् । न । प्रमाणविशेषे ॥ तिस्रोऽङ्गुल्य प्रमाणमस्य । तद्धितार्थेति समास । द्विगोर्नित्यमिति द्वयसचो लुक् । तत्पुरुषस्याङ्गुलेरित्यच् ॥

त्र्यञ्जनम् । न । कालाञ्जनपुष्पाञ्जनरसाञ्जनात्मकेऽञ्जनत्रये ॥

त्र्यध्वगा । स्त्री । गङ्गायाम ॥

त्र्यनीका । स्त्री । सेनाविशेषे ॥ त्रयाणामनीकानां समाहार । अजादेराकृतिगणत्वात् टापाद्विगोरिति प्राप्तो ङीप् बाध्यते ॥

त्र्यब्दा । स्त्री । त्रिहायण्याम् ॥ त्रयोऽब्दा वय प्रमाणमस्या । आर्हीयष्ठक् । तस्याध्यर्द्धेति लुक् ॥

त्र्यस्तयोग । पु । तिथिवारर्क्षात्मकयोगे ॥ नन्दाभौमार्कवारे पवनशतभिषार्द्रान्त्यचित्राग्निमूलासार्पैर्भद्रासमेता शशिनिभृगुसुते फल्गुयुग्माद्रयुग्मे । सौम्याहे वै जयाख्यात्मृगगुरुहरिभेन्द्राश्विवाम्याभिजिद्भिर्जीवे रिक्तार्कविश्वादितिवरुणविशाखा

नुराधामघाभि ॥ सौरेपूर्वाधनिष्ठा करकमलजन्मर्क्षयुक्ता यदिस्याद्योगं चाहुस्त्रिपूर्वं सततशुभकरं चामृतारव्यं मुनीन्द्राः ॥

त्र्यम्बक । पु । महेश्वरे । शिवे ॥ त्रीणि अम्बकानि नयनान्यस्य ॥ यद्वा लोकानाम् अम्बकः पितेति वा ॥ त्रीन्वेदान् अम्बते शब्दायते वा। अबिशब्दे । ओषध्योपध । कर्मण्यण् । सञ्ज्ञायामितिकः ॥ त्रिषु लोकेषु कालेषु वा अम्ब शब्दो वेदश्च यो यस्येतिवा ॥ अम्बनम् अम्ब शब्दः । त्रयोऽकारोकारमकाराः अम्बाः शब्दाः प्रतिपादका वाचका वा अस्येतिवा ॥ त्रीणि पृथिव्यन्तरीक्षद्युलोकाख्यानि अम्बकानि स्थानानि यस्येति वा । लोकत्रयव्याप्तोहि महेश्वरः ॥

त्र्यम्बकसख । पु । कुबेरे ॥ त्र्यम्बकस्य सखा । राजाहः सखिभ्यष्टच् ॥

त्र्यम्बका । स्त्री । त्रिलोकजनन्यामाद्यायाम् ॥ सोमसूर्यानलाचिह्नत्वात् त्र्यम्बका सा स्मृता बुधैः ॥

त्र्यहस्पर्श. । पु । त्रिदिनस्पृशि । तिथित्रयस्पर्शयुक्ते ऽहनि ॥

त्र्यहस्पृक् । पु । वारत्रयेप्येकस्यांतिथौ ॥ तिथिर्वारत्रये चैका त्र्यहस्पृग्समुदाहृतम् ॥ अन्यच्च । एकादशी द्वादशी च रात्रिशेषे त्रयोदशी । त्र्यहस्पृक् तदहोरात्रमुपोष्यासासदा तिथिः ॥

त्र्यहस्पृश । न । त्र्यहस्पर्शे ॥ यथा । एकस्मिन् सावनेत्वह्नि तिथीनां त्रितयं यदा । तदा दिनत्रयं प्रोक्तं स्तत्र साहस्रिकफलम् ॥ अपिच । एकंदिन यत्रतिथित्रयं स्पृशेत्तमाहुर्मुनयो ऽवमाख्यम् । एकातिथिस्त्रीणि दिनानियत्र स्पृशेत्तदाहुस्त्रिदिनस्पृशं तु ॥ त्र्यहस्पृश नामयदेतदुक्तं तत्र प्रयत्नं कृतिभिर्विधेयं । विवाहयात्राशुभपुष्टिकर्म सर्वं न कार्यं त्रिदिनस्पृशेतु ॥

त्र्यहैहिक । पु । दिनत्रयनिर्वाहोचितधने ब्राह्मणे ॥ ईहाचेष्टा तस्यां भवम् ऐहिकम् । त्र्यहपर्याप्तम् ऐहिकधनं यस्य ॥

त्र्याहिक । त्रि । तृतीयेह्निभवेज्वरादौ ॥

त्र्युषणम् । न । त्रिकटुनि ॥ ओषति । उषदाहे । ल्युट् । त्रयाणाम उषणानां समाहारः । पात्रादित्वात् स्त्रीत्वं न ॥

त्र्यूषणम् । न । त्र्युषणे । व्योषे ॥ ऊषति । ऊषदाहे । ल्युट् । त्रयाणामूषणानां समाहारः । पात्रादित्वात् स्त्रीत्वं न ॥

त्वेषी। स्त्री श्रल्ल्याम्। श्वाविल्लोमनि ॥ चीरयेनान्यस्यामितिवहुव्रीहौ व र्णादनुदात्तादिति ङीपि तकारस्य नकारादेशे पर्वपदादितिणत्वम्॥

त्व। त्रि। भिन्ने। अन्यस्मिन्॥ तनोति। तनु०। तनोतेरनश्चव। चा तृक्विप्। आगमानित्यत्वात् तुगवै कल्पिक। केचित्तु चाद्विचमनुवर्त्तयन्ति॥

त्वक्कण्डुर। पु। व्रणे॥ इ०श०॥

त्वक्चीरम्। न। वंशरोचनायाम्॥ त्वचोवशात् चीरमस्य॥

त्वक्चीरी। स्त्री। वंशरोचनायाम्॥ गौरादित्वात् ङीष्॥

त्वक्छद। पु। चीरीशवृक्षे। चीर कञ्चुको इतिगौडभाषा॥

त्वक्पञ्चकम्। न। पञ्चवल्कले॥ न्यग्रोधोदुम्बराश्वत्थपारिशप्लक्षपादपा। पञ्चैते चीरिणोवृक्षा स्तेषा त्वक् पञ्चवल्कलम्॥ केचित्तु पारिशस्थाने शिरीष वेतसपरे। वदन्तीतिशेष॥ त्वक्पञ्चक हिम ग्राहि व्रणशो थविसर्पजित्। तेषांपञ्च हिमंग्राहि व्रणशोथविसर्पजित्॥ विष्टम्भाध्मा नजित् तिक्तं कषाय लघु लेखनम्॥ पथ्य चीरिवृक्षपञ्चकम्॥

त्वक्पत्रम्। न। वराङ्गके। गुडत्वचि ॥ त्वगिव पत्र मस्य॥

त्वक्पत्री। स्त्री। कारव्याम्। हिङ्गुपत्र्याम्॥

त्वक्पुष्पम्। न। सेहुवाँ इति प्रसिद्धे किलासरोगे॥ रोमाञ्चे॥

त्वक्पुष्पिका। स्त्री। किलासे॥

त्वक्पुष्पी। स्त्री। किलासे॥ त्रि। किलासयुक्ते॥

त्वक्सार। पु। वंशे॥ गुडत्वचि॥ रन्ध्रवंशे॥ शोणहवे॥ त्वक् त्वचिवा सारोऽस्य॥

त्वक्सारभेदिनी। स्त्री। चुद्रचञ्चुवृक्षे

त्वक्सारा। स्त्री। वंशरोचनायाम्॥

त्वक्सुगन्ध। पु। नारङ्गे। नारङ्गी इतिभाषा॥

त्वक्सुगन्धा। स्त्री एलवालुकाख्यगन्धद्रव्ये॥

त्वक्स्वादी। स्त्री। दारुसितायाम्॥

त्वगङ्कुर। पु। रोमाञ्चे॥

त्वगाक्षीरी। स्त्री। वंशरोचनायाम्॥

त्वग्गन्ध। पु। नारङ्गे॥

त्वग्जम्। न। रुधिरे॥ रोमणि॥

त्वग्दोष। पु। कोठरोगे॥

त्वग्दोषापहा। स्त्री। वाकुच्याम्॥

त्वग्दोषारि। पु। हस्तिकन्दे॥ इति-राजनिर्घण्ट॥

त्वक्। स्त्री। वल्कले॥ गुडत्वचि। दा

त्वचीनी इतिभाषा ॥ चर्मणि । स्प र्शग्रहणलिङ्गेदेहव्यापिनीन्द्रिये॥ त्व चति । त्वचसंवरणे । क्विप् ॥ यद्वा । तनोति तन्यतेवा । तनु० । तनो तेरनश्चव चाच्चिक् प्रत्यय ॥

त्वचम् । न । त्वचि । चर्मणि ॥ वल्क ले ॥ त्वक्पत्रे ॥ यथा । त्वच लघूष्णा कटुक स्वादु तिक्तञ्च रूक्षकम् । पि त्तल कफवात घ्न कण्डूमारुचिना शनम् ॥ हृद्वस्तिरोगवातार्श्च कृमि पीनसशुक्रहृदिति ॥ प्रशस्तात्वगस्यअ स्ति । अर्शआद्यच् ॥ त्वचति । त्वचस वरणे । पुसीतिघ' ॥

त्वचनम् । न । संवरणे ॥ त्वचो ग्रहणे ॥

त्वचा । स्त्री । त्वचि ॥

त्वचापत्रम् । न । त्वक्पत्रे ॥

त्वचिष्ठ वि । त्वचीयसि । अतिशयत्व ग्विशिष्टे ॥

त्वचिसार । पु । वंशे ॥ हलदन्तादि तिसप्तम्या अलुक् ॥

त्वचिसुगन्धा । स्त्री । क्षुद्रैलायाम् ॥

त्वत् । त्रि । भिन्ने । अन्यस्मिन् ॥ तनो ति । तनु० तनोतेरनश्चव । चात् क्विप्तुक् ॥

त्वदीय । वि । भवदीये ॥ तवायम् । छ' । प्रत्ययोत्तरपदयोश्चेतिमपर्य न्तस्यत्वदादेश. ॥

त्वद्विध: । वि । त्वत्सदृशे ॥ तवेव विधा प्रकारोयस्य ॥

त्वम्पदलक्ष्यार्थ । पु । अज्ञानादिव्यष्टि व्युपाध्युपहिताधारभूते अनुपहित प्रत्यगानन्दतुरीयचैतन्ये ॥

त्वम्पदवाच्य । वि । त्वम्पदाभिधे ॥ दे हादिभि परिच्छिन्नोजीवस्तुत्वम्प- दाभिध ॥

त्वम्पदवाच्यार्थ । त्रि । अज्ञानदिव्य- ष्टि । एतदुपहितात्पज्ञत्वादिविशि ष्ट चैतन्यम् । एतदनुपहितचैतन्य- ञ्च । एतत्त्रय तप्ताय पिण्डवदेकत्वे नावभासमान त्वम्पदवाच्यार्थो भ- वति ॥

त्वम्पदाभिध । पु । त्वम्पदवाच्ये । जीवे ॥ आलम्बनतया भाति योऽस्मत्प्रत्य यशब्दयो । अन्त करणसम्भिन्नबो ध स त्वम्पदाभिध ॥ त्वम्पद मभि धायस्य ॥

त्वरणम् । न । त्वरायाम् ॥

त्वरा । स्त्री । वेगे । सम्भ्रमे । आवेगे ॥ त्वरणम् । ञित्वरा० । घटादय षितइतिषित्वातिदेशात् अङ् ।- टाप् ॥

त्वरि. । स्त्री । त्वरायाम् । सवेगे ॥

त्वरितम् । न । शीघ्रे ॥ त्वरतेस्म ञि त्वरासम्भ्रमे । गत्यर्थाकर्मकेति क

र्त्तरि क्त । तूष्यम् त्वरसङ्घुषास्व नामिति वेट् ॥ त्रि । तद्विशिष्टे । तरस्विनि ॥ त्वरते । शीत क्त ॥ त्वरासञ्जातास्येतिवा । तारकादित्वादितच् ॥ शीघ्रार्थोऽयं क्रियाविशेषणत्वाद्द्रव्येवर्त्तमान क्लीवे । यथा । त्वरितगच्छति । द्रव्यवाचीतुत्रिलिङ्ग । यथा। त्वरितोऽश्व । उतावलाघोडा इतिभाषा ॥

त्वरितगति । स्त्री । पङ्क्तिवृत्तप्रभेदे ॥ त्वरितगतिश्चनजनगै । यथा । त्वरितगतिव्रजयुवति स्तरणिसुताविपिनगता । मुररिपुणा रतिगुरुणा परिरमिताप्रमदमितेति ॥

त्वरितोदित । त्रि । निरस्ते । शीघ्रोच्चारितेवचसि ॥ त्वरितम् उदित ॥

त्वष्ट. । त्रि । तष्टे । तनूकृते । छीला इतिभाषा ॥ त्वक्ष्यतेस्म । त्वक्षूतनूकरणे । क्त ॥

त्वष्टा । पुं । देवशिल्पिनि । विश्वकर्मणि ॥ आदित्यविशेषे ॥ तक्षिण । शिल्पिनि । तखाणइतिखाती इतिचभाषा ॥ वर्णसङ्करविशेषोयम् । शूद्रागर्भे विश्वकर्मण औरसेन जात । इति ब्र० वै० ब्र० ख० ॥ चित्रानक्षत्रदेवतायाम् ॥ त्वक्षति । त्वक्ष्यते वा । त्वक्षू० । त्वेषतिवा । त्विष० । नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ इतिसाधु । त्विषेर्देवतायामकारश्चोपधाया अनिट्त्वञ्चेतितृन् वा ॥

त्वा । अ । वितर्के ॥ विशेषे ॥

त्वाचप्रत्यक्षम् । न । स्पर्शज्ञाने । द्रव्यादे स्पर्शद्वाराबोधे ॥ यथा । अथज्ञानमात्रे त्वङ्मन सयोगस्य यदि कारणत्त्व तदा रासनचाक्षुषादिकाले त्वाचप्रत्यक्षं स्यात् । इतिसिद्धान्तमुक्तावली ॥

त्वादृक् । त्रि । त्वत्तुल्ये ॥

त्वाष्ट्र । पु । वृत्रासुरे । त्वष्टुरपत्ये ॥ अपत्येऽण् ॥

त्वाष्ट्रम् । न । चित्रानक्षत्रे ॥ त्वष्टादेवता अस्य । सास्यदेवतेत्यण् ॥

त्वाष्ट्री । स्त्री । सञ्ज्ञानामसूर्यपत्न्याम् ॥ क्षुद्ररथे । रथिकायाम् ॥ चित्रानक्षत्रे ॥

त्विट् । स्त्री । शोभायाम् । कान्तौ ॥ वाचि ॥ रुचौ । प्रभायाम् ॥ जिगीषायाम् ॥ व्यवसाये ॥ त्वेषति । त्वेषणमनयावा । त्विषदीप्तौ । सम्पदादित्वात् क्विप् ॥

त्विषा । स्त्री । त्विडर्थे ॥ भागुरिमतेन टाप् ॥

त्विषाम्पति. । पु । सूर्ये ॥ अलुक् ॥

त्विषि । पु । किरणे ॥ इतिहेमचन्द्रः ॥

त्वे । अ ।
त्वै । अ । } वितर्के ॥ विशेषे ॥

त्सरु । पु । खड्गादिमुष्टौ । आदिनाकटितखच्छुरिकादिग्रहः । मूठ इति भाषा ॥ त्सरति । त्सरच्छद्मगतौ । भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्यउ ॥

त्सरुक । त्रि । त्सरौकुशले ॥ आकर्षादिभ्य कन् ॥

थ

थः । पु । शिलोच्चये । पर्वते ॥ भयरक्षके ॥ व्याधिभेदे ॥ भयचिह्ने ॥ भक्षणे ॥ न । रक्षणे ॥ मङ्गले ॥ साध्वसे ॥ इतिमेदिनीकरः ॥ थुडेर्डः ॥

थुत्कारः । पु । निष्ठीवनध्वन्यानुकरणशब्दे ॥

थूथू । अ । निष्ठीवनध्वन्यानुकरणशब्दे ॥ यथा । थूथूकृत्यवमङ्गिरध्वमजनैरिति सूक्तिकर्णामृतम् ॥

थैथै । अ । वाद्यानुकरणशब्दविशेषे ॥

थोडनम् । न । संवरणे ॥ थुडसंवृतौ । ल्युट ॥

धौणेयः । पुं । स्थौणेये ॥

द

द । पु । अचले । शैले ॥ दत्ते ॥ खण्डने ॥ न । भार्यायाम् ॥ इत्येकाक्षरकोषः ॥ त्रि । दातरि ॥

दंश । पु । वनमक्षिकायाम् । डाँस इतिभाषा ॥ दंशति । दंशदशने । अच् ॥ वर्मणि ॥ मर्मणि ॥ दोषे ॥ खण्डने ॥ भुजगक्षते ॥ दशने ॥ दन्त इतिहेमचन्द्रः ॥

दंशक । पु । दंशे ॥ त्रि । दंशनकर्तरि ॥

दंशनम् । न । दंशे । दन्तेन खण्डने । काटखानाइति काटना इतिचभाषा ॥ कवचे । वर्मणि ॥ दृश्यतेऽनेन । दंशिर्दंशनस्पर्शनयोः । करणेति ल्युट् ॥

दंशभीरु । पु । स्त्री । कासरे । महिषे ॥ इतित्रिकाण्डशेषः ॥

दंशमूल । पु । शिग्रौ ॥

दंशितः । त्रि । कवचाचिते । धृतसन्नाहे । वर्म्मिते ॥ दष्टे ॥ दंश सञ्जातोऽस्य । ता० इतच् ॥ यद्वा । दंश्यते स्म । दंशि० क्त ॥

दंशी । मशकू इतिख्याते क्षुद्रदंशे ॥ दंश

ति । दंश० अच् । गौ० ङीष् ॥

दंष्ट्रा । स्त्री । दन्तविशेषे । दाढायाम् । दाढ इति भाषा ॥ दन्तपङ्क्तिद्वयप्रान्ते चतस्रश्चतस्रो दन्तविशेषा दंष्ट्रा । द्विगुणीकृतादन्तावलिरिति भावप्रकाश ॥ दश्यतेऽनयेत्यर्थे दाम्नीशसयुयुजेत्यादिनाकरणेष्ट्रन् । टाप् । गौरादिषु मातामहीशब्दस्य पाठादनित्यं'षित्वाङीष् ॥

दंष्ट्राल । पु । शूकरे ॥

दंष्ट्रिका । स्त्री । दाढिकायाम् ॥

दंष्ट्री । पु । घृष्टी । शूकरे ॥ सर्पे ॥ त्रि । दंष्ट्राविशिष्टे ॥ यथा दंष्ट्रिभि शृङ्गिभिर्वापि हता म्लेच्छैश्च तस्करै । ये स्वाम्यर्थे हता यान्ति राजन् स्वर्गं न संशय । इत्यग्नि पुराणम् । प्रशस्ता दंष्ट्रा अस्ति अस्य । व्री० इनि ॥

दकम् । न । वारिणि । जले ॥

दक्ष । पु । ब्रह्मणो दक्षिणाङ्गुष्ठाज्जाते प्रजापतिविशेषे । ततएव मैथुनेन प्रजा जाता ॥ ताम्रचूडे । कुक्कटे ॥ मुनिविशेषे ॥ हरवृषे ॥ वृक्षविशेषे ॥ त्रि । चतुरे । ज्ञातव्येषु कर्त्तव्येषुवोपस्थितेषु सद्यएवज्ञातुङ्कर्त्तुंच समर्थे । शिक्षिते । अनलसे ॥ दक्षते । दक्षवृद्धौ शीघ्रार्थेच । पचाद्यच् ॥

दक्षकन्या । स्त्री । भवान्याम् । दुर्गायाम् ॥ दक्षस्यप्रजापते कन्या ॥ ता.पञ्चाशतसङ्ख्यका वह्निपुराणे गणभेद नामाध्याये प्रसिद्धा ॥

दक्षजा । स्त्री । दुर्गायाम् ॥ दक्षाज्जाता । पञ्चम्यामितिड ॥

दक्षजापति । पु । शिवे ॥ चन्द्रे ॥

दक्षता । स्त्री । क्षिप्रकारित्वे ॥

दक्षसावर्णि । पु । नवमे मनौ । भाविषु सप्तमनुषु द्वितीये ॥

दक्षसुत । पु । देवे ॥

दक्षा । स्त्री । भूमौ ॥

दक्षाध्वरध्वंसक । पु । शिवे ॥ वीरभद्रे ॥ दक्षाध्वरस्य ध्वंसक ॥

दक्षाध्वरध्वंसकृत् । पु । हरे ॥ वीरभद्रे ॥ दक्षाध्वरध्वंसकरोति । कृञ० । क्विप् । तुक् ॥

दक्षाय्य । पु । गरुडे ॥ गृध्रे ॥ दक्षते । दक्ष० । श्रुदक्षिस्पृहिगृहिभ्य आय्य ॥

दक्षिण । त्रि । दक्षिणोद्भूते ॥ सरले ॥ परच्छन्दानुवर्त्तिनि । पराभिप्रायवर्त्तिनि ॥ अपसव्ये । अवामे ॥ दक्षे ॥ औदार्यवति ॥ पु । चतुर्धीपत्यन्तर्गतपतिविशेषे ॥ सकलनायिकाविषयसमसहजानुरागो दक्षिण इति लक्षणात् ॥ दक्षते । दक्ष० ।

द्रुदक्षिभ्यामिनन् ॥

दक्षिणकालिका। स्त्री। आद्यायांशक्तौ॥

दक्षिणतः। अ। दिशि ॥ देशे ॥ वसत्यागतो वा। कालेऽस्तिर्नास्ति। दक्षिणोत्तराभ्यामतसुजिति स्वार्थेऽतसुच् ॥

दक्षिणतारम्। न। दक्षिणतीरे ॥

दक्षिणमार्ग । पुं। पितृयाणे। गतागतलक्षणे कर्मिणामार्गे ॥ यथोक्तमीशोपनिषद्भाष्ये। निर्विशोऽह दक्षिणेनमार्गेण गतागतलक्षणेनेति ॥

दक्षिणसिन्धु । पु। भैामतीर्थविशेषे॥

दक्षिणस्थ । पु। सारथैा ॥ त्रि। दक्षभागस्थिते ॥ दक्षिणे तिष्ठति। ष्ठा० सुपीतिक ॥

दक्षिणा। अ। दिशि ॥ देशे ॥ वसति रमणीय वा। दक्षिणस्यांदिशि दक्षिणादिग्वा। दक्षिणादाजिति स्वार्थे आच् ॥ दक्षिणाहि इत्यर्थे ॥

दक्षिणा। स्त्री। अवाच्यांदिशि। याम्यदिशि ॥ यज्ञादिविधिदाने ॥ यज्ञपत्न्याम् ॥ यथा। दक्षिणा यज्ञपत्नी च दीक्षा सर्वत्रपूजिता। यथाविनाहिविश्वेषु सर्वकर्मेष्विनिष्फलमिति भागवते ९ स्कन्धे १ऽध्याय ॥ प्रतिष्ठायाम् ॥ देव्यन्तरे ॥ दक्षप्रजापतेस्तनयायाम् ॥ परिक्रयद्रव्ये ॥

नायिकाविशेषे ॥ यथा। या गैारव भय प्रेम सद्भाव पूर्वनायके। नमुञ्चत्यन्यसक्तापि सा ज्ञेया दक्षिणा वुधैरितिश्रीधरस्वामी ॥

दक्षिणाग्नि । पु। अन्वाहार्यपचनाख्ये यज्ञाग्निविशेषे ॥ दक्षिणाग्नेर्हि यो निविकल्प। यतोवैश्यकुलाद्वित्तवतो भ्राष्ट्राद्वा गार्हपत्याद्वानीयते ॥ दक्षिणोऽग्नि। दिक्सङ्ख्ये संज्ञायामितिसमास ॥

दक्षिणाचल । पु। मलयपर्वते ॥

दक्षिणाचार । पु। वामेतराचारे ॥ यथा। स्वधर्मनिरतोभूत्वा पञ्चतत्त्वेन पूजयेत्। सएवदक्षिणाचारः शिवोभूत्वा शिवांयजेदित्याचारभेदतन्त्रम् ॥ यत्र। चतुर्मकारा सन्त्येवपञ्चमोविजयारस इतिकश्चित् ॥

दक्षिणात्। अ। दिशि ॥ देशे ॥ काले ॥ वसत्यागतो रमणीय वा ॥ दक्षिणस्यांदिशि दक्षिणस्या दक्षिणा वा। उत्तराधरदक्षिणादाति ॥

दक्षिणापथ । पु। देशविशेषे ॥ यथा। एतेगच्छन्तिवह्व पन्थानो दक्षिणापथम्। अवन्तीमृक्षवन्तञ्चसमतिक्रम्यपर्वतमितिमहाभारते नलोपाख्यानम् ॥

दक्षिणापथजन्मा। पुं। जातिविशेषे॥

यथा ॥ दक्षिणापथजन्मानः सर्वेनर वरान्धका । गुहा पुलिन्दा शबराश्चुचुका मद्रकैः सह ॥ उत्तरापथजन्मान कीर्त्तयिष्यामितानपि । यौनकाश्च गान्धारा किराताबर्बरैः सह ॥ एतेपापकृतस्तातचरन्ति पृथिवीमिमामिति महाभारते मोक्षधर्मे ॥

दक्षिणापथदेशः । पु । देशविशेषे ॥ यथा । तथापरेजनपदा दक्षिणापथवासिनः । पाण्ड्याश्च केरलाश्चैव चोलाः कुल्यास्तथैवच ॥ सेतुकामुषकाश्चैव कुपथावारवासिकाः । नवराष्ट्रामाहिषकाः कलिङ्गाश्चैवसर्वशः ॥ कावेराश्च सहैषीकैराटव्याः शबरास्तथा । पुलिन्दा विन्ध्यमूषीका वैदर्भाद्दण्डकैः सह ॥ कुलीयाश्च शिराकाश्च रूपसा तापसैः सह । तथातैत्तिरिकाश्चैव सर्वेकारस्करास्तथा ॥ नासिकाद्याश्चयेचान्ये येचैवान्तरनर्मदा । भानुकच्छा समाहेया सहसारस्वतैस्तथा ॥ कच्छीयाश्च सुराष्ट्राश्च आनर्त्तास्त्वर्बुदैः सह । इत्येतेअपरान्ताश्शृणुयेविन्ध्यवासिनः ॥ इति मत्स्यपुराणम् ॥

दक्षिणामुखः । पु । दक्षिणादिगभिमुखे ॥ यथा । अमावास्यां गयाश्राद्धे दक्षिणामुखभोजनम् । न जीवत् पितृक कुर्यात् कृतेच पितृहा भवेत् ॥

दक्षिणामूर्त्तिः । पु । परशिवे ॥ मोक्षेच्छाखमहावटद्रुमतटे योगासनस्थं प्रभुं प्रत्यक्तत्त्वबुभुत्सुभिः प्रतिदिशं प्रोदीक्ष्यमाणाननम् । मुद्रां तर्कमयीं दधानममलं कर्पूरगौरं शिवद्वन्द्वं कलये स्फुरन्तमनिशं श्रीदक्षिणामूर्त्तिकम् ॥ चित्रवटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा । गुरोस्तु मौनं व्याख्यानं शिष्यास्तुच्छिन्नसंशयाः ॥

दक्षिणायनम् । न । देवानांरात्रौ । कर्कटेऽर्कसङ्क्रमे । श्रावणादिषट्सु मासेषु ॥ माघादिमासयुग्मेस्तु कर्कतः षट् क्रमादितः । उत्तरायणमाद्यैस्तै स्त्रिभिः स्याद्दक्षिणायनम् ॥ याम्यायनेयस्य भवेत् प्रसूतिः शठः कठोरः पिशुनस्वभावः । चतुष्पदाद्यः कृषिमानहंयुर्वाचामशान्तो मनुजः प्रतापी ॥

दक्षिणारुः । पु । व्याधकर्त्तृकदक्षिणाङ्गकृतव्रणे मृगे । दक्षिणेर्मणि ॥ दक्षिणे अरुर्यस्य ॥

दक्षिणार्हः । त्रि । दक्षिणीये ॥ दक्षिणामर्हति । अर्हपूजायाम् । अर्हइष्यच ॥

दक्षिणावर्त्तः । त्रि । दक्षिणे आवर्त्तविशिष्टे ॥

दक्षिणावर्त्तकी। स्त्री। वृश्चिकाल्याम्॥

दक्षिणाशापति। पु। यमे। वैवस्वते। धर्मराजे॥ दक्षिणाशाया पति॥

दक्षिणाहि। अ। दक्षिणदिशि॥ दक्षिणदेशे॥ दक्षिणात्। आहिचदूरे इतिस्वार्थे आहिर्दूरे चेदवधिमान्। वसति रमणीयवा॥

दक्षिणीय। चि। दक्षिणार्हे॥ दक्षिणामर्हति। कडङ्करदक्षिणाच्छचेति छ.। तस्य ईयादेश॥

दक्षिणेन। अ। दक्षिणदिशि॥ दक्षिणदेशे॥ एनबन्यतरस्यामदूरेपञ्चम्या। दक्षिणेन वसति रमणीयवा॥

दक्षिणेर्म्मा। पु। दक्षिणारी। सक्षतमृगे॥ दक्षिणे ईर्मं व्रणमस्य। दक्षिणेर्म्मालुब्धयोगइति अनिजन्त.साधु:॥

दक्षिण्य.। चि। दक्षिणार्हे॥ दक्षिणामर्हति। कडङ्करदक्षिणाच्छचेति यत्॥

दगार्गलम्। न। निर्जलदेशे जलोपलब्धिज्ञाने॥ तं निरूपयति वराहमिहिर.। तत्रादौ प्रयोजनप्रदर्शनार्थं माह। धर्म्म्यं यशस्यञ्चवदाम्यतोऽहं दगार्गलं येन जलोपलब्धि। पुंसां यथाङ्गेषु सिरास्तथैवक्षितावपि प्रोन्नतनिम्नसंस्था.॥ एकेन वर्णेन रसेन चाम्भश्च्युतं नभसो वसुधा विशेषात्। नानारसत्वं वहुवर्णताञ्च गतं परीक्ष्यं क्षितितुल्यमेवम्॥ २॥ सिरानामानि॥ पुरुहूतानलयमनिर्ऋतिवरुणपवनेन्दुशङ्करा देवा। विज्ञातव्या क्रमश प्राच्याद्यानां दिशांपतय॥ दिक्पति संज्ञाचशिरा नवमीमध्ये महासिरानाम्नी। एताभ्योऽन्या शतशो विनिसृताना मभि प्रथिता॥ पातालादूर्द्ध्वसिरा शुभा चतुर्दिक्षु संस्थितायाश्च। कोणदिगुत्थानशुभा सिरा निमित्ता न्यथोवक्ष्ये॥ ५॥ *॥ यदिवेतसो ऽम्बुरहिते देशे हस्तैस्त्रिभि स्ततः पश्चात्। सार्द्धे पुरुषे तोयं वहति सिरा पश्चिमातच॥ चिह्नमप्यर्द्धपुरुषे मण्डूक पाण्डुरोऽथमृत्पीता। पुटभेदकश्चतस्मिन् पाषाणो भवति तोयं मत॥ ७॥ जम्ब्वाश्चोदग्घस्तै स्त्रिभि सिराऽधोनरद्वये पूर्वा। मृल्लोहगन्धिकापाण्डुराथपुरुषेत्र तोऽत्र मण्डूक॥ ८॥ जम्बूवृक्षस्य प्राग् वल्मीकोयदिभवेत् समीपस्थ। तस्माद्दक्षिणपार्श्वेसलिलंपुरुषद्वये स्वादु॥ अर्द्धपुरुषेच मत्स्य पारावतसन्निभश्च पाषाण। मृद्भवतिचात्रनीला दीर्घकालञ्चवहुतोयम्॥ १०॥ पश्चादुदुम्बरस्यत्रिभिरेवकरैर्नरद्वयेसार्द्धे। पुरु

सेसितोऽपि दृष्ट्वाऽननेोपमोऽध सि रासुजला॥ ११ ॥ उदगर्जुनस्य दृश्यो वल्मीको यदि ततोऽर्जुनाद्धस्तै । त्रिभिरम्बु भवति पुरुषे स्त्रिभिरर्द्धैस मन्विते, पश्चात् ॥ श्वेतागोधार्द्धन रे पुरुषे मद्धूसरा तत कृष्णा। पीता सिता ससिकता ततोजल नि र्दिशेदमितम् ॥ १३ ॥ वल्मीकोप चितायां निर्गुण्ड्यां दक्षिणेन कथित करैः। पुरुषद्वये सपादे स्वादुजल भवति चाशोष्यम् ॥ रोहितमत्स्यो र्द्धनरे मत्कपिलापाण्डुरा तत पर त'। सिकता सशर्करेटा क्रमेणप रतो भवत्यम्भ' ॥ १५ ॥ पूर्वेणयदि वदर्या वल्मीकोदृश्यते जलंपश्चात् । पुरुषैस्त्रिभिरा देश्यं श्वेतागृहगो धिकाऽर्द्धनरे ॥ १६ ॥ सपलाशावद रीचेद्दिश्यपरस्यां ततोजलं भवति । पुरुषत्रये सपादे पुरुषे ऽत्रदुण्डु भश्चिह्नम् ॥ १७॥ बिल्वोदुम्बरयेोगे विहायवल्मीकमम्बुयाम्येन । पुरुषैस्त्रि भिरम्बु भवेत् कृष्णोर्द्धनरेचमण्डूक ॥ १८ ॥काकोदुम्बरिकायां वल्मी कोदृश्यते सिरातस्मिन् । पुरुषत्रये सपादे पश्चिमदिक्स्थावहति सा च ॥ आपाण्डुपीतिकामृद्गौरसव र्णो भवतिपाषाण । पुरुषेर्द्धे कुमु

दनिभो दृष्टिपथ मूषिको याति ॥ २० ॥ जलपरिहीनेदेशे दृश्च का म्पिल्यको यदादृश्य । प्राच्यांहस्त त्रितयेवहतिसिरा दक्षिणा प्रथमम् ॥ मन्नीलोत्पलवर्णा कापोतादृ श्यते ततस्तस्मिन् । हस्तेजगन्ध को मत्स्योजलमल्पञ्च सक्षारम् ॥ २२ ॥श्योनाकतरो रपरेोत्तरेसिरा द्वौकरावतिक्रम्य। कुमुदानामसिरा सा पुरुषत्रयवाहिनी भवति ॥२३॥ आसन्नोवल्मीको दक्षिणपार्श्वे विभी तकस्य यदि । अध्यर्द्धेभवतिसिरा पु रुषे ज्ञेया दिशि प्राच्याम् ॥ २ ॥ त स्यैवपश्चिमायांदिशिवल्मीको यदा भवेद्धस्ते । तत्रोदग्भवतिसिरा चतु र्भिरर्धाधिकै पुरुषै ॥ श्वेतोविश्व म्भरक प्रथमेपुरुषेतु कुङ्कुमाभो श्मा । अपरस्यां दिशिचसिरानश्य तिवर्षत्रयेतीते॥२६॥सकुश सितप श्चायां वल्मीको यत्रकोविदारस्य । मध्येतयोर्नरैरर्ध पञ्चभैस्तोयमक्षो भ्यम् ॥ प्रथमेभुजग कमलोदरस न्निभो महीरक्ता । कुरुविन्द पाषा णा श्चिह्नान्येतानि वाच्यानि ॥२८॥ यदिभवति सप्तपर्णो वल्मीकवृत स्तदुत्तरेतोयम् । वाच्यं पुरुषैं पञ्च भि रत्रापि भवन्ति चिह्नानि ॥ पुरु

षार्द्धेनतुहरितो दर्दुरोहरितालस निभाभूश्च। पाषाणोऽञ्जनिकाश्च सौम्याचसिरा शुभाम्बुवहा॥ ३० ॥ सर्वेषाटन्ययामध स्थितो दर्दुरोयदा दृश्य।तस्मादुत्सतोय चतुर्भिरर्द्धाधिकैःपुरुषैः॥पुरुषेतुभवति नकुलो नीलाम्रतु पीतिकाततःश्वेता।दर्दुरसमानरूप पाषाणोदृश्यते तत्र॥ ३२॥ यद्यहिनिलयेदृश्यो दक्षिणत सस्थित करञ्जस्य। हस्तद्वयेतु याम्ये पुरुषत्रितये सिरासार्द्धे॥उदगन्धा स्वादुजला हरितोऽश्माधस्ततस्तोयम्। पुरुषार्द्धे कच्छपक प्रथम पूर्वा सिरोद्भिद्यते तत्र॥ उत्तरतश्च मधूका दहिनिलय पश्चिमेततस्तोयम्।परिहृत्य पञ्चहस्तान् नवचाष्टौ पौरुषान् प्रथमम् ॥ अहिराज पुरुषेऽधोधूम्राधात्री कुलत्थवर्णोऽश्मा। माहेन्द्रे भवति सिरा वहतिसफेन सदातोयम्॥३६।वल्मीक स्निग्धो दक्षिणे सकुभदूर्वेस्तत् तिलकस्य। पुरुषैःपञ्चभिरम्भोदिशिवारुण्यासिरापूर्वा॥ ३७॥ सर्पावास पश्चाद्वल्मीका दक्षिणे कदम्बस्य। परतोहस्तत्रितयात्षड्भि पुरुषैस्तु दीर्येतनैः॥ कौबेरीचात्रसिरा वहतिजलं लोहगन्धिचाप्यश्मम्।कन

कनिभोमण्डूकोनरमात्रेऽस्तिकापीता॥ ३९॥ वल्मीकसहृत्तोयदितालोवाभवति नारिकेलोवा।पश्चात् षड्भिर्हस्तैर्नरैश्च तुभि सिरायाम्या॥ ४०॥ याम्येनकपित्थस्याहिस श्चयश्चे दुदग्जल वाच्यम्। सप्तपरिव्यज्यकरान् खात्वापुरुषान् कर्बुरा पुटभिद्॥अश्मन्तकस्यवामे बदरीवा दृश्यतेहिनिलयोवा। षड्भिरुदग्धकरै सार्द्धेपुरुषत्रये तोयम्॥ कूर्म प्रथमे पुरुषे पाषाणोधूसरः ससिकताम्रत्।आदौचसिरायाम्या पूर्वोत्तरतो द्वितीयाच॥ ४३॥ वामेनहारिद्रतरो वल्मीकश्चेज्जलं भवतिपूर्वे। हस्तत्रितयेसत्र्यंशैः पुम्भि पञ्चभिर्भवति॥ नीलोभुजगो दृश्योम्रत्पीतामरकतोपमश्चाश्मा। कृष्णाभू प्रथम वारुणीसिरादक्षिणेनान्या॥ ४४॥ जलपरिरहितेदेशेऽनूपजानिदृश्यन्ते निमित्तानि। वीरणदूर्वाम्रदवो यत्रस्तु तत्रजलं पुरुषे॥ भार्गीत्रिवृतादन्ती सूकरपादीच लक्ष्मणाचैव। नवमालिका च हस्तद्वयेऽम्बुयाम्येत्रिभि पुरुषैः॥ ४६॥ स्निग्धा प्रलम्बशाखावामनविकटद्रुमाःसमीपजला। सुषिराजर्जरपत्राःरूक्षाश्चजलेनसन्त्यक्ताः

॥४७॥ तिलकाम्रातकधरणकभल्लातकबिल्वतिन्दुकाङ्कोला । पिण्डारशिरीषकाञ्जनपरूषकावञ्जुलातिबला ॥ एतेयदिस्निग्धैर्वल्मीकैःपरिवृतास्ततस्तोयम् । हस्तैस्त्रिभिरुत्तरतश्चतुर्भिर्द्धेनचरणेन ॥ ४९ ॥ अतृणेसतृणायस्मिन्सतृणेतृणवर्जिता मही यच । तस्मिन्सिरा प्रदिष्टा वक्तव्य वाधनंवास्मिन् ॥ ५० ॥ कण्टक्यकण्टकानां व्यत्यासेम्भस्त्रिभिःकरैःपश्चात् । खात्वापुरुषत्रितयं त्रिभागयुक्तंधनंवास्यात् ॥ ५१ नदतिमहीगम्भीरं यस्मिञ्चरणाहताजलं तस्मिन् । सार्द्धै स्त्रिभिर्मनुष्यैः कौवेरीतत्र च सिराश्यात् ॥ ५२ ॥ वृक्षस्यैकाशाखा यदिविनताभवति पाण्डुरावास्यात् । विज्ञातव्यं शाखातले जल त्रिपुरुषंखात्वा ॥ ५३ ॥ फलकुसुमविकारोयस्यतस्यपूर्वेसिरात्रिभिर्हस्तैः । भवति पुरुषैश्चतुर्भिः पाषाणोऽधःक्षिति पीता ॥ ५४ ॥ यदिकण्टकारिकाकंटकैर्विनादृश्यतेसितैः कुसुमैः । तस्यास्तलेम्बुवाच्य त्रिभिर्नरैरर्द्ध पुरुषैश्च ॥ ५५ ॥ खर्जूरोद्विशिरस्कायषभवेज्जलविवर्जितेदेशे । तस्याः पश्चिमभागे निर्देश्य त्रिपुरुषैर्वारि ॥ ॥ ५६ ॥ यदिभवतिकर्णिकारःसित

कुसुम स्यात्पलाशश्वेतोवा । सव्येन तचहस्तद्वयेम्बु पुरुषद्वये भवति ॥ ५७ ॥ यस्यामूष्माधात्र्यां धूमोवातत्र वारिनरयुगले । निर्देष्टव्याचसिरामहतातोयप्रवाहेण ॥ ५८ ॥ यस्मिन् क्षेत्रोद्देशेजातसस्यं विनाशमुपयाति । स्निग्धमतिपाण्डुरंवा महासिरानरयुगेतत्र ॥ ५९ ॥ * ॥ इतिजाङ्गलानूपयोर्जलपरिज्ञानम् ॥ * ॥ अथमरुभूमौ सिराविज्ञानम् । मरुदेशे भवतियिरायथातथाऽतःपरंप्रवक्ष्यामि । ग्रीवाकरभाणामिव भूतलसंस्थाःसिरायान्ति ॥ ६० ॥ पूर्वोत्तरेणपीलोर्यदिवल्मीको जलं भवति-पश्चात् । उत्तरगमनाचसिरा विज्ञेयापञ्चभिः पुरुषैः ॥ चिह्नंदर्दुरमादौ मत्स्यपिशाततपरं भवेद्धरिता । भवतिचपुरुषे ऽधोश्मातस्यतलेम्भो विनिर्देश्यम् ॥ ६२ ॥ पीलोरेव प्राच्यां वल्मीको ऽतोर्द्धपञ्चमैर्हस्तैः । दिशियाम्यायां तोयं वक्तव्यं सप्तभि पुरुषैः ॥ प्रथमेपुरुषे भुजगः सितासितो हस्तमात्रमूर्तिश्च । दक्षिणतोवहतिसिरा सक्षार भूमिपानीयम् ॥ ६४ ॥ उत्तरतश्च करीरस्यापिगर्हदृक्षिणेजलं स्वादु । दशभि पुरुषै र्षयंपुरुषे पीतो ऽश्मपङ्कः

॥ ६५ ॥ रोहीतकस्य पश्चाद्दक्षिणस्य त्रिभि करैर्याम्ये । द्वादशपुरुषान् खात्वा सवारापश्चिमेन सिरा ॥ ६६ ॥ इन्द्रतरोर्वल्मीक प्राग्दृश्य. पश्चिमे सिराहस्ते । खात्वा चतुर्दशनरान् कपिलागोधानरे प्रथमे ॥ ६७ ॥ यदि वा सुवर्णनाम्नस्तरोर्भवेद्वाम तो भुजङ्गगृहम् । हस्तद्वये तु याम्ये पञ्चदशनरावसाने ऽम्बु ॥ क्षार प यो ऽत्र नकुलोऽर्द्धमानवे ताम्रसन्निभश्चाश्मा । रक्ताच भवति वसुधा व हति सिरा दक्षिणातत्र ॥ ६८ ॥ बद रीरोहितवृक्षौ सम्पृक्तौ चेद्दिनापि वल्मीकम् । हस्तत्रये ऽम्बु पश्चात् षोडशभिर्मानवैर्भवति ॥ सुरस जल मादौ दक्षिणा सिरा वहति चोत्तरे णान्या । पिष्टनिभ. पाषाणो मत्को ता वृश्चिकोऽर्द्धनरे ॥ ६९ ॥ सकरीरा चेद्बदरी त्रिभि.करै पश्चिमेन त त्राम्भ । अष्टादशभि. पुरुषैरैशा नी वहुजला च सिरा ॥ ७० ॥ पीलु समेता बदरी हस्तत्रयसम्मिते दिशि प्राच्याम् । विंशत्या पुरुषाणामशो ध्यमम्भो ऽत्रसचारम् ॥ ७१ ॥ ककुभकरीरावेकत्र संयुतौ यत्र ककुभ बिल्वौ वा । सार्द्धद्वयेऽम्बु पश्चात् न रैर्भवेत् पञ्चविंशत्या ॥ ७२ ॥ व

ल्मीकमूर्द्धनि यदा दूर्वाश्च कुशाश्च पाण्डुराः सन्ति । कूपो मध्ये देयो ज लमत्र नरैकविंशत्या ॥ ७३ ॥ भूमि कदम्बकयुता वल्मीको यत्र दृश्यते दूर्वा । हस्तद्वयेन याम्ये नरैर्जलं पञ्च विंशत्या ॥ ७४ ॥ वल्मीकत्रयमध्ये रोहीतकपादपो यदा भवति । नाना वृक्षै सहित स्त्रिभिर्जलं तत्र वक्तव्यम् ॥ हस्तचतुष्के मध्यात् षोडशभिश्चा ङ्गुलैश्च वारि । चत्वारिंशत् पुरुषान् खात्वाश्माथ. सिरा भवति ॥ ७६ ॥ ग्रन्थिप्रचुरा यस्मिन् शमी भवेदुत्त रेण वल्मीक. । पश्चात् पञ्चकरान्ते शताद्धसङ्ख्यैर्नरैः सलिलम् ॥ ७७ ॥ एकस्था. पञ्च यदा वल्मीको म ध्यमो भवेच्छ्वेत । तस्मिन् सिराप्र दिष्टा नरषष्ट्या पञ्चवर्जितया ॥ ७८ ॥ सपलाशा यत्र शमी पश्चिमभा गेऽम्बु मानवै. षष्ट्या । अर्द्धनरेऽहि प्रथम सवालुका पीतमृत् परतः ॥ ७९ ॥ वल्मीकेन परिवृत श्वेतो रो हीतको भवेद्यस्मिन् । पूर्वेण हस्तमा त्रे सप्तत्यामानवैरम्बु ॥ ८० ॥ श्वे ताकण्टकबहुला यत्र शमी दक्षिणे न तत्र पय. । नरपञ्चकसंयुतया सप्त त्याहिनैरार्द्धे च ॥ ८१ ॥ * ॥ अथ विशेषः ॥ मरुदेशे यच्चिह्नं न जाङ्ग

लेतैर्जलं विनिर्देश्यम् । जम्बूवेतस पूर्वे येपुरुषा स्ते मरौदिगुणा ॥ ८२ ॥ जम्बूत्रिवृत मौर्वीशिशुमारी शारिवाशिवाश्यामा । वीरुधयो वा राहीज्योतिष्मतीगरुडवेगाच ॥ सू करिकामाषपर्णीव्याघ्रपदाश्चेतियद्य हिर्निलये । वल्मीकादुत्तरतस्त्रि-भि. करैस्त्रिपुरुषेतोयम् ॥ एतदनूपेवाच्यजाङ्गलभूमौतु पञ्चभि पुरुषे. । एतैरेवनिमित्तै मैरुदेशे सप्तभि कथयेत् ॥ ८५ ॥ एकनिभायच महौ दृश्यतरुवल्मीकपरिहीना । तस्यां यत्रविकारोभवति धरित्र्या जलं तत्र ॥ ८६ ॥ यत्रस्निग्धा निम्ना स वालुका सानुनादिनी वायात् । त त्राद्धपञ्चकै र्वारि मानवे. पञ्चभि र्वेदिवा ॥ ८७ ॥ स्निग्धातरूणांयाम्ये नरै श्चतुर्भि र्जल प्रभूतञ्च । तरुग हने अपिविकृतो यस्तस्मात् तद्वदे व वदेत् ॥ ८८ ॥ नमतेयन्नधरित्री सार्द्धेपुरुषेभ्यु जाङ्गलानूपे । कीटा वायत्रविनालयेनवहवोम्बु तत्रापि ॥ ८९ ॥ उष्णाशीताच मही शीतोष्णा म्भस्त्रिभिर्नरैः सार्द्धैः । इन्द्रधनुर्मत्स्योवावल्मीकोवाचतुर्हस्तात् ॥ ९० ॥ वल्मीकानांपङ्क्त्या यद्येकोभ्युच्छ्रितसिरा तदध. । शुष्यतिनरो हते वा सस्यं यस्याश्चतन्नाम्भ ॥ ९१ ॥ एतज्जाङ्गलानूपे ॥ * ॥ न्यग्रोध पलाशोदुम्बरैः समेतैस्त्रिभिर्जलं त दध' । वटपिप्पलसमवाये तद्वत्स्या च्चं सिराचोदक् ॥ ९२ ॥ * ॥ अथ कूपलक्षणम् ॥ आग्नेययदिकोणे ग्रा मस्यपुरस्य वा भवेत् कूप. । नित्य सकरोतिभय दाहञ्च समानुषं प्रायः ॥ नैऋतकोणे बालक्षयञ्च वनिताभ यञ्चवायव्ये । दिक्त्रयमेतत् त्यक्त्वा शेषासुशुभावहाः कूपाः ॥ ९४ ॥ * ॥ सारस्वतेनमुनिना दगार्गेलं यत् कृतं तदवलोक्य । आर्याभिः कृतमेतद् वृत्तैरपिमानवं वक्ष्ये ॥ ९५ ॥ स्निग्धा यत' पादपगुल्मवल्यो निश्छिद्रपत्रा श्च तत.सिरास्ति । पद्म क्षुरोशीरकुला' सगुन्द्रा काशा कुशावा नलिका नलोवा ॥ खर्जूरजम्ब्वर्जुनवेतसा स्यु क्षीरान्विताबा द्रुमगुल्मवल्ल्य' । छत्रेभनागा. शतपत्रनीपा. स्युर्नक्तमालाश्च ससिन्धुवाराः ॥ विभीतकोवा मदयन्तिकावा यत्रास्ति तस्मिन् पुरुषत्रये ऽम्भः । स्यात् पर्वतस्योपरिपर्वतोन्य स्तत्रा-स्ति मूलेपुरुषत्रयेम्भः ॥ ९८ ॥ या मौञ्जीयै' काशकुशैश्चयुक्ता नीला-चमृदयत्रसशर्करा च । तस्मा प्रभूत

सुरसञ्चतोय कृष्णाथरक्ताश्च तथैव
स्रवे ॥ ९९ ॥ * ॥ अथभूगुणाः ॥ स
शर्करा ताम्रमही कषाय क्षारं धरि
त्रीकपिला करोति। आपाण्डुरायां
लवणं प्रदिष्ट मिष्टपयोनीलवसुन्ध
रायाम् ॥ १०० ॥ शाकाश्वकर्णार्जुन
बिल्वसर्जा श्रीपर्ण्यरिष्टाधवशिंशपा
श्च। छिद्रैश्चपर्णैर्द्रुमगुल्मवल्ल्यो रूक्षा
स्वदूरेम्बु निवेदयन्ति ॥ १ ॥ सूर्याग्नि
भस्मोष्ट्रखराऽनुवर्णा या निर्जला-
सा वसुधा प्रदिष्टा। रक्ताङ्कुरा क्षी
रयुता करीरा रक्ताधराश्चेज्जलम
श्मनोध. ॥ २ ॥ वैदूर्यमुद्गाम्बुदमेच
काभा पाकोन्मुखोदुम्बरसन्निभावा
। भृङ्गाञ्जनाभा कपिलाथवा या ज्ञेया
शिलाभूरिसमीपतोया ॥ ३ ॥ पारा
वतक्षौद्रघृतोपमाया क्षौमस्य वस्त्रस्य
च तुल्यवर्णा । या सोमवल्ल्याश्च समा
नरूपा साप्याशुतोय कुरुतेऽक्षय-
ञ्च ॥ ४ ॥ ताम्रैःसमेता पृषतैर्विचि
त्रै रापाण्डुभस्मोष्ट्रखरानुरूपा। भृङ्गो
पमाङ्गुष्ठिकपुष्पिका च सूर्याग्निवर्णा
च शिलावितोया ॥ ५ ॥ चन्द्रातप
स्फटिकमौक्तिकहेमरूपा याश्चेन्द्र
नीलमणिहिङ्गुलकाञ्जनाभाः । सू
र्योदयांशुहरितालनिभाश्चयाः शु-
भा. शोभनामुनिवचोऽत्र वृत्तमेत

त् ॥ ६ ॥ एता ह्यभेद्याश्च शिला.
शिवाश्च यक्षैश्चनागैश्च सदाभिजु
ष्टा' । येषाञ्च राष्ट्रेषु भवन्ति राज्ञां
तेषा मदृष्टिर्नभवेत्कदाचित् ॥ ७
॥ * ॥ शिलानां विदारणार्थमाह ॥
भेद यदानैति शिला तदानीं पला
शकाष्ठैः सह तिन्दुकानाम् । प्रज्वा
लयित्वानलमग्निवर्णा सुधाम्बुसि-
क्ताप्रविदारमेति ॥ ८ ॥ तोयं श्रि-
त मोक्षकभस्मनावा यत्सप्तकृत्व.
परिषेचनंतत् ॥ कार्यंशरक्षारयुतं
शिलायाः प्रस्फोटनं वह्निवितापिता
या. ॥ ९ ॥ तक्रकाञ्जिकसुराः सकु
लत्था योजितानि बदराणिचतत्र ।
सप्तरात्रमुषितान्यभितप्तां दारयन्ति
हि शिलां परिषेकैः ॥ १० ॥ नैम्बंप
त्रं त्वक्चनालं तिलानां सापामार्गं
तिन्दुकं स्याद्गुडूची । गोमूत्रेण स्रा
वितः क्षार एषां षट्कृत्वोऽत स्ता
पितोभिद्यतेऽश्मा ॥ ११ ॥ * ॥ अथ
पानम् ॥ आर्कम्पयोहुडुविषाण म
षीसमेतं पारावताखुशकृता चयुत
प्रलेप । टङ्कस्यतैलमथितस्य ततो
स्य पानं पश्चाच्छितस्य न शिलासु भ
वेद्विघात. ॥ १२ ॥ क्षारं कदल्या
मथितेनयुक्तं दिनोषिते पायितपा
यसंयत् । सम्यक्छितं चाश्मनिनैति

दण्डः

दशमीचत्रिषष्ठिका। द्वितीयासप्तमीचैवदग्धा. सूर्यादिवारतः॥ प्रकारान्तरमपि। एकादशीचेन्दुवारे द्वादशीचार्कवासरे। षष्ठीवृहस्पते र्वारे। तृतीयाबुधवासरे। अष्टमी शुक्रवारेच नवमीशनिवासरे॥पञ्चमीभौमवारेच दग्धयोगा. प्रकीर्त्तिताः॥ मासदग्धा यथा। तृतीयामीनधनुषो चतुर्थी वृषकुम्भयोः। मेषकर्कटयो. षष्ठी कन्यामिथुनयोष्टमी॥ दशमी वृश्चिकेसिंहे द्वादशी मकरेतुले। एभिर्जातोनजीवेत य द्विशक्रसमोभवेदितिदीपिका॥ कुरुट इति गौडप्रसिद्धे वृक्षे। स्वलेट्कायाम्। कर्बूरच्छायाम्। दग्धरुहायाम्॥ दहेःक्तान्तात् टाप्॥

दग्धिका। स्त्री। दग्धभक्ते। भिक्षाटायाम्। जलाभात इति भाषा॥ कुत्सितादग्धा दग्धिका। कुत्सिते इति कन्॥ दग्धाहस्वे॥

दग्धेष्टका। स्त्री। झामके। झांमा इति भाषा॥

दण्ड.। पु। न। लगुडे। लट्ठ लठिया इतिभाषा॥ पु। व्यूहभेदे॥ प्रकाण्डे॥ अश्वे॥ कोणे॥ मन्थाने॥ सैन्ये॥ दाम्यते छन्दतोऽनेन। दम॰। अमन्तात्ड.॥ काले। घडी इति भाषा

दण्डक.

॥ यथा। दशगुर्वेचरोक्षादकाख्य' प्रा था.चडात्मकैः। तैःपक्ष स्यात्ततस्तद्वदाद्याद्दण्डश्चाभिधीयते॥ मानभेदे। काठा इति गौडभाषा॥ चतुर्हस्तपरिमिते मानकाष्ठादौ॥ षण्डाभोः। मारिपोश्विके। अकीनुचरे॥ दमे॥ यमे॥ अभिमाने॥ ग्रहभेदे॥ अर्थोपचारादिरूपेणचांचतुर्थैपाये॥ यथा। दण्ड शास्ति प्रजा सर्वा दण्डएवाभिरक्षति। दण्ड सुप्तेषुजागर्त्ति दण्डं धर्मं विदुर्बुधा ॥ यथश्यामो लोहिताक्षो दण्डश्चरति पापहा। प्रजा स्तत्र नमुह्यन्ति नेता चेत्साधु पश्यति॥ सर्वोदण्डजितोलोको दुर्लभोहिशुचिर्नरः। दण्डस्यहिभया त्सर्वं जगद्भोगायकल्पते॥ * ॥ कृपेयादेशचन्द्रग्राहाधने॥ उत्पथप्रवृत्तौ नियन्हेतुर्दण्डोभगवद्विभूति.॥ मानामाचे॥ धनुर्द्वयपरिमिते मानकाष्ठादौ॥ इक्ष्वाकुराजपुत्रे॥ दण्डोस्त्रास्त्रि। अर्शआद्यच॥ दण्डयति दण्ड्यतेऽनेनवा। दण्डदण्डनिपातने। पचाद्यच्। पुसीतिघोवा॥ दमनम्। वा। दमुउपशमे। अमन्तात्ड॥ राजाश्वछत्रस्थपदातिषु॥

दण्डकः। पु। न। चण्डवृष्टिप्रपातादि छन्दःप्रभेदे ॥ लघुलगुडे। सोंठा

सोंठी छडी इत्यादि भाषा ॥ ह्रस्वो दण्ड. । ह्रस्वे इतिकन् ॥

दण्डकन्दक. । पु । धरणीकन्दे ॥

दण्डका । स्त्री । दण्डकारण्ये । जनस्थाने ॥

दण्डकाक । पु । द्रोणकाके ॥

दण्डकारण्यम् । न । रावणस्यजननिवेशस्थाने । जनस्थाने ॥ दण्डकनाम्ना राज्ञापरिपालितोदेश. । सचशुक्रशापादरण्यमभूत् ॥ तीर्थविशेषे ॥

दण्डढक्का । स्त्री । वाद्यविशेषे । यामघोषे । यामनाल्याम् । दमामा नगारा नौवत इत्यादिभाषा ॥

दण्डताम्री । स्त्री । ताम्रीवाद्ये ॥

दण्डधर । पु । काले । यमे । अन्तके ॥ दण्डस्यधर' ॥ न्टपे ॥ कुम्भकारे ॥ त्रि । दण्डहस्ते ॥ दुष्टनिग्रहकर्त्तरि ॥

दण्डधार । पु । पृथ्वीपतौ । राज्ञि ॥ यमे । समवर्त्तिनि ॥ त्रि । दण्डहस्ते ॥ दण्ड धरति । धृञ्० । कर्मण्यण् ॥

दण्डनायक । पुं । सेनान्याम् । चतुरङ्गबलाध्यक्षे ॥

दण्डनीति. । स्त्री । अर्थशास्त्रे । शुक्रनीत्यादिनीतिशास्त्रे ॥ दम्यतेऽनेन । दम० । अमन्ताड्डः । दण्डोनीयते बोध्यतेऽनया इति दण्डनीति । क्तिन् ॥ दण्डेन नीयतेचेदं दण्डनयतिवापुन । दण्डनीतिरितिख्यातार्त्रीलोकानतिवर्त्तते ॥ विद्यायोमन्हाभारतेराजधर्मेद्रष्टव्य. ॥ दुर्गायाम् ॥ यथा । नयानयगता लोके विकल्पनिश्चयाऽमला । दण्डनाद्दमनाद्वापि दण्डनीतिरितिस्मृतेति देवीपुराणम् ॥

दण्डनीय । त्रि । दण्ड्ये ॥

दण्डपति: । पु । दण्डधरे ॥ दण्डमायके ॥

दण्डपांशुल. । पु । गर्वाटे । द्वारपाले ॥

दण्डपाणि: । पुं । भैरवविशेषे । काशीस्थे शिवगणविशेषे ॥ यमे ॥ दण्ड: पाणौयस्यस. ॥

दण्डपारुष्यम् । न । ताडनादौ । अष्टादशविवादान्तर्गतविवादविशेषे ॥ राज्ञांसप्तव्यसनान्तर्गतव्यसनविशेषे ॥

दण्डपाल: । पु । अर्द्धशफरमत्स्ये । दांडिका इति गौडभाषा ॥

दण्डपालक' । पु । शकुलमत्स्ये ॥

दण्डभृत् । पु । यमे ॥ कुम्भकारे ॥ त्रि । दण्डधारके ॥ दण्डविभर्त्ति । डुभृञ्० । क्विप् ॥

दण्डमत्स्य । पुं । दण्डारी इति प्रसिद्धमत्स्ये ॥ दण्डमत्स्योरसेतिक्त' पित्तरक्तं कफ हरेत् । वातसाधारण प्रोक्त:शुक्रलोवलवर्द्धन: ॥

दण्डमाथ । पु । दण्डाकारेपथि ॥

दण्डयात्रा । स्त्री । दिग्विजये ॥ युद्धाय गमने ॥ सयाने ॥ वरयात्रायाम् ॥ इति मेदिनीहेमचन्द्रौ ॥ दण्डाययात्रा ॥

दण्डयाम । पु । कीनाशे ॥ दिवसे ॥ कुम्भसम्भवे । अगस्त्यमुनौ ॥ इति मेदिनी ॥

दण्डरी । स्त्री । डङ्गरीफले इति राजनिर्घण्टः ॥

दण्डवान् । त्रि । दण्डिनि ॥ मतुप् ॥

दण्डवादी । पु । द्वर्वटे । द्वारपाले ॥ त्रि । दण्डवक्तरि ॥

दण्डवालधि । पु । हस्तिनि । इभे ॥ दण्डइववालधिर्यस्य ॥

दण्डवासी । पु । द्वारपाले ॥ इतित्रिकाण्डशेषः ॥ एकग्रामाधिकृतेजने । चौधरीइतिभाषा ॥ इतिजटाधरः ॥

दण्डविष्कम्भ । पु । कुठरे । मन्थवन्धनकाष्ठे । गर्गरीमुखस्थमन्थदण्डधारककाष्ठे ॥ दण्ड विष्कभ्नाति । स्कम्भुरोधने वीन' । कर्मण्यण् । वे स्कम्नातेर्नित्यमितिषत्वम् ॥

दण्डहस्तक । पु । लुब्धाम् ॥

दण्डव्यूह । पु । दण्डाकृतिव्यूहरचनाविशेषे ॥ यत्राग्रेवलाध्यक्षो मध्येराजा पश्चात् सेनापतिः पार्श्वयोर्हस्तिनस्तत्समीपेघोटकास्ततःपदातयः इत्थंसंकृतरचनोदीर्घःसर्वतः समविन्यासोदण्डव्यूहउच्यते । तेन यातव्यमार्गेसर्वतोभयेसतियायात् ॥

दण्डस्थानम् । न । दमस्थानविशेषेषु ॥ यथा । दमस्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत् । त्रिषु वर्णेषु यानिस्युः रचतो ब्राह्मणोव्रजेत ॥ उपस्थ मुदरं जिह्वा हस्तौ पादौचपञ्चमम् । चक्षुर्नासाच कर्णौच धन देह स्तथैवच ॥ अनुबन्ध परिज्ञाय देशकालौ च तत्त्वतः । सारापराधौचालोक्य दण्ड दण्ड्येषुपातयेदितिमनुः ॥

दण्डहस्तम् । न । तगरपुष्पे ॥

दण्डाजिनम् । न । दम्भे ॥ शाठ्ये ॥

दण्डाजिनिक त्रि । मायाविनि ॥

दण्डादण्डि । अ । दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तमित्यर्थे ॥ अन्ये° दीर्घः । इच्कर्मव्यतिहारे ॥

दण्डार । पु । वाहने ॥ मत्तवारणे ॥ शरयन्त्रे ॥ कुम्भकारस्यचक्रे ॥

दण्डाहतम् । न । घोले । गोरसे ॥ दण्डेन मथा आहतम् विलोडितम् । कर्तृकरणेकृतावहुलमिति समासः ॥ त्रि । दण्डेन ताडिते ॥

दण्डिक । पुं । दण्डिनि ॥ दण्डोस्यास्ति । अतइनिठनाविति ठन् ॥ दण्डधारके

। कुड़िया इतिभाषा ॥ डानिकला- वाच इतिगौडभाषाप्रसिद्धे मत्स्ये ॥

दण्डिका । स्त्री । हारविशेषे ॥

दण्डितः । त्रि । राजादापित्ते । कृतद- ण्डे ॥ दण्ड. सञ्जाते ऽस्य । तारका दित्वादितच् ॥

दण्डी । पु । यमे ॥ द्वाःस्थे । द्वारपाले ॥ मञ्जुघोषे ॥ रवेः पार्श्वगविशेषे ॥ जिनविशेषे ॥ दमनकवृक्षे ॥ चतु- र्थाश्रमिणि ॥ कविविशेषे ॥ यथा । जा ते जगति वाल्मीके कविरित्यभिधी यते । कवी इति ततो व्यासे कवयस्त्व यि दण्डिनीति कालिदास' ॥ त्रि । द ण्डयुक्ते ॥ दण्डोऽस्यास्ति । व्रत इनिठनावितीनिः ॥

दण्डिनी । स्त्री । दण्डवत्याम् ॥ ऋन्ने भ्यो ङीप् ॥

दण्डिमा । पु । दण्डत्वे ॥ दण्डस्य भावः । इमनिच् ॥

दण्डोत्पलक् । न । डानियोला इति डानकुनि इतिच गौडभाषाप्रसिद्धे क्षुपविशेषे ॥ तत्तु पीतरक्तत्वेन पुष्पभेदात् द्विविधम् । पीतस्य पर्या याः । तोयवल्ली । गन्धवल्ली । सहदे वी । ... । इति ॥ रक्तस्य पर्याय. । विश्वदेवा । इति ॥ श्वेतस्य । दण्डो त्पलेतिरत्नमाला ॥

दण्डोत्पला । स्त्री । श्वेतपुष्पे दण्डो त्पले ॥

दण्ड्य' । त्रि । दण्डनीये । दण्डार्हे ॥ द ण्डमर्हति । दण्डादिभ्यो यत् ॥

दत् । पु । दन्ते ॥ दतौ । दत. ॥ इ० अ० र्थ ॥

दत्तः । पुं । दत्तात्रेये ॥ अग्निसिंहनन्द नेन्द्रपविशेषे ॥ वैश्योपपदे ॥ यथा । शर्मा देवश्च विप्रस्य वर्मा त्राता च भू भुजः । भूतिर्दत्तश्च वैश्यस्य दास. शू द्रस्य कारयेदितिस्मृतिः ॥ दत्तिमेपुत्रे ॥ त्रि । कृतदाने । वितीर्णे । विश्रा णिते ॥ अर्पिते ॥ न । शरणागतर क्षणादौ ॥ यथा । शरणागतसंत्राणं भूतानां चाप्यहिंसनम् । बहिर्वे दिच यद्दानं दत्तमित्यभिधीयते ॥ डुदाञ्' । क्त. । दोदद्घो' ॥

दत्तक' । पुं । द्वादशपुत्रान्तर्गतपुत्रविशे षे । दत्तिमे ॥ यथा । दद्यान्माता- पिता वा यं सपुत्रो दत्तको भवेदिति याज्ञवल्क्य' ॥

दत्तात्मा । पु । पुत्रविशेषे ॥ यथा । द त्तात्मातु स्वयंदत्तइति कात्यायनः । अस्यार्थ. । दत्तात्मातुपुत्रो योमाता पितृविहीनः त्यक्तोवा त्वत्काहं पुत्रो भवामीति स्वयंदत्तउपनीत इति ॥

दत्तात्रेयः । पु । विष्णोरंशेऽत्रिपुत्रे योगे

णीश्वरे परमावधूते ॥ विष्णुना आ त्मसदृशममपश्यता ऽऽत्मैवार्पयेद्दत्तः । इत्यस्यासावार्थेयस्य ॥

दत्तानपकर्म्म । न । दत्ताप्रदानिके ॥

दत्ताप्रदानिकम् । न । अष्टादशविवाद पदान्तर्गतविवादपदविशेषे ॥ यथा नारद । दत्त्वाद्रव्य मसम्यग्यः पु नरादातुमिच्छति । दत्ताप्रदानिकं नामतद्व्यवहारपदमुच्यतिति ॥ असम्य कृमविहितमार्गेण । दत्तस्य पुनरादा रूप व्यक्तिम् विवादपदे सत् ॥

दत्तिः । स्त्री । प्रतिपादने । दाने ॥

दत्तेयः । पु । इन्द्रे ॥ इतिचिकाण्डशेषः ॥

दत्त्रिमः । पु । पुत्रविशेषे । दत्तके ॥ मा ता पिता वा दद्यातां यमद्भिः पुत्रमा पदि । सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः ॥

ददत् । त्रि । प्रयच्छति ॥ ददाति । डु दाञ्० । लट. शत्रादेश. । शप श्लु । श्लाविति द्वित्वम् । अभ्यासस्य ह्रस्व । श्नाभ्यस्तयोरात इत्यालोपः । स्वाद्यु- त्पत्तिः । उगित्वात् प्राप्तो नुम् अभ्य स्तत्वान्नभवति ॥

ददनम् । न । प्रतिपादने । दाने ।

दद्रुः । पुं । न । दाद इतिप्रसिद्धे रोगे । दद्रूम् ॥ तल्लक्षणं यथा । सकण्डुरागपिडकं दद्रुमण्डलमुद्गत- मिति ॥ तच्चिकित्सा यथा । कुष्ठकृमि घ्नदद्रुघ्नैनिशासैन्धवसर्षपैः । अम्लपि ष्टैः प्रलेपोऽयं दद्रुकुष्ठनिषूदन इति ॥ अपिच । दूर्वाभयासैन्धवचक्रमर्द कुठेरकाः काञ्जिकतक्रपिष्टाः । चि- भिः प्रलेपैरपिवद्धमूलं दद्रुश्च कुष्ठ श्चविनाशमेतीति ॥ कच्छपे ॥

दद्रुकः । पु । दद्रुरोगे ॥

दद्रुघ्नः । पु । चक्रमर्दके । चकवँड इति कसौंदी इति च भाषा । दद्रुं हन्ति । हन० । हनो ह्रस्व मनुष्यकर्तृकेचे ति टक् । अमनुष्यकर्तृकेति नियमाभावा त्त्वम् ॥

दद्रुघ्नबीजम् । न । चक्राटबीजे । पवाँड का बीज इति चकवँडकीभाजी इति च भाषा ॥ दद्रुघ्न दोषघ्नमम्लवात कफापहम् । कण्डूकासकृमिश्वासद द्रुकुष्ठघ्नबुलघु ॥

दद्रुणः । त्रि । दद्रुरोगिणि ॥ दद्रुरस्या ऽस्ति । पा० न । पामादित्वाद्दद्रुपाह्र स्वत्वञ्च ॥

दद्रुनाशिनी । स्त्री । तैलिनीकीटे ॥

दद्रुरोगी । त्रि । दद्रुणे ॥

दद्रूः । पुं । त्वग्रोगविशेषे । कुष्ठभेदे ॥ दरिद्रातेऽनेनाङ्गम् । दरिद्राददुर्गी तौ । दरिद्रातेर्यालोपश्चेत्यूः । रित्त्वा च्चेतिसमस्तोवर्णोर्या ॥

दधान । त्रि । बिभ्राणे । धारयति ॥ दधाते कर्त्तरि शानच् ॥

दधि । न । क्षीरोत्तरावस्थापन्ने दधि इति प्रसिद्धे गोरसे । क्षीरजे । मङ्गल्ये । शिरले । पयस्ये ॥ अस्य गुणा । दध्युष्ण दीपन स्निग्ध कषायानुरस गुरु । पाके ऽम्लं ग्राहि पित्तास्त्र शोथमेद कफप्रदम् ॥ मूत्रकृच्छ्रे प्रतिश्याये शीतगे विषमज्वरे । अतीसारे ऽरुचौ कार्श्ये शस्यते बलशुक्र कृत् ॥ तद्भेदा पञ्च सम्प्रोक्ता क्रमशो स्तनु वद म्यहम् । आदौमन्द तत. स्व दु स्वाद्वम्ल तत परम् ॥ अम्लचतुर्थं मत्यम्ल पञ्चमदधि पञ्चधा । मन्द दुग्धवदव्यक्तरस किञ्चिद्घन भवेत् ॥ मन्दस्य तु स्वष्टविण्मूत्र दोषत्रयविदाहकृत् । यत् सम्यग्घनतां यात व्यक्त स्वादुरस भवेत् ॥ अव्यक्ताम्लरसतत्तु स्वादुवित्त्वे दाहृतम । स्वादुस्यादत्यभिष्यन्दि वृष्य मेद कफावहम् ॥ वातघ्नं मधुरं पाके रक्तपित्तप्रसादनम् । स्वाद्वम्ल सान्द्र मधुरं कषायानुरस भवेत् ॥ स्वाद्वम्लगुणा ज्ञेया सामान्यदधिवज्जनै ॥ यत्तिरोहितमाधुर्यं व्यक्ताम्लन्च तदम्लकम् । अम्लन्तु दीपन पित्तरक्त श्लेष्मविवर्द्धनम् ॥ तदत्यम्ल दन्तरो

महर्षकण्ठादिदाहकृत् । अत्यम्लं दीपन रक्तपित्तदुष्टिकर परम् ॥ * ॥ गव्य दधि विशेषेण स्वादु बल्य रुचिप्रदम् । पवित्र दीपन स्निग्धं पुष्टिकृत् पवनापहम् ॥ उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम् ॥ * ॥ माहिष दधि सुस्निग्धं श्लेष्मलं वातपित्तनुत् । स्वादुपाकमभिष्यन्दि वृष्य गुर्वस्त्रदूषकम् ॥ * ॥ आजं दध्युत्तम ग्राहि लघु दोषत्रयापहम् । शस्यते श्वासकासार्श. क्षयकार्श्येषु दीपनम् ॥ * ॥ पक्वदुग्धभव रुच्यं दधि स्निग्ध गुणोत्तरम् । पित्तानिलापहं सर्वधात्वग्निबलवर्द्धनम् ॥ * ॥ अथ निस्सारदुग्धस्य दध्नो ख्याते गुणा. स्मृता । असारं दधि सङ्ग्राहि शीत ल वातल लघु । विष्टम्भि दीपनं रुच्य ग्रहणीरोग नाशनम् ॥ * ॥ गालित दधि सुस्निग्ध वातघ्नं कफकृद् गुरु । बलपुष्टिकरं रुच्य मधुरं नातिपित्तकृत् ॥ * ॥ सशर्करं दधि श्रेष्ठ तृष्णापित्तास्रदाहजित् । सगुड वातनुद्वृष्य हृद्य तर्पण गुरु ॥ * ॥ न नक्तं दधि भुञ्जीत न चाप्यघृतशर्करम् । नामुद्गसूप नाक्षौद्रं नोष्णं नामलकै विना ॥ * ॥ शस्यते दधि नो रात्रौ शस्तञ्चाम्बुघृतान्वितम् ।

रक्तपित्तकफोत्थेषु विकारेषु तु तच्च न ॥ * ॥ हेमन्ते शिशिरे चापि वर्षासु दधिशस्यते । शरद्ग्रीष्मवसन्तेषु प्रायश स्तद्विगर्हितम् ॥ * ॥ ज्वरासृक् पित्तवीसर्पकुष्ठपाण्डामय भ्रमान् । प्राप्नुयात् कामलाञ्चोग्रां विधिं हित्वा दधिप्रिय ॥ श्रीवासे ॥ सर्जे ॥ वासे ॥ त्रि । धारके ॥ इति मुग्धबोधम् ॥

दधिकूर्च्चिका । स्त्री । दध्नासहपक्वदुग्धे ॥ दध्नासह पय पक्व यत् तत्स्याद् दधिकूर्चिके त्युक्ते ॥ अर्द्धोदकोष्ण दुग्धे दध्यम्लसंयोगात् जातेतिकेचित् ॥ उष्णदुग्धे दध्यम्लसंयोगात् जाते त्वन्ये । छाना छेना इति राजाराधाकान्त ॥

दधिचार. । पु । मन्थानदण्डे । वैशाखे । तक्राटे । करधर्षणे । रयी इति भाषा ॥

दधिजम् । न । नवनीते ॥

दधित्थः । पु । कपित्थे ॥ दधिवर्णोऽस्त्र स्तिष्ठत्यस्मिन् । स्था° । सुपिस्थ इति क. । पृषोदरादि. ॥

दधित्थाख्य. । पु । सरलद्रवे । लोवान् इति भाषा ॥ इति रत्नमाला ॥

दधिधेनु' । स्त्री । दानार्थं दध्यादिनिर्मितायां धेनौ ॥

दधिपुष्पिका । स्त्री । अपराजितायाम् ॥

दधिपुष्पी । स्त्री । कोलशिम्ब्याम् ॥

दधिपूप' । पु । अपूपप्रभेदे ॥ शालिपिष्ट युत दध्ना मर्दयित्वा घृते पचेत् । वेष्टयेत् पक्वखण्डेन सुदृत्त दधिपूपकम् ॥ दधिपूपो गुरुर्वृष्यो हृद्यो निलपित्तहा । रुच्योग्निजनन श्चैव विशेषाद्वक्त्रविकारक ॥

दधिफल । पु । कपित्थवृक्षे ॥ दधिफले ऽस्य ॥

दधिमण्ड । पु । मस्तुनि ॥

दधिमण्डोद । पु । दधिसमुद्रे ॥

दधिमुख । पु । रामायणप्रसिद्धे वानर विशेषे । सुग्रीवस्य श्वशुरे ॥

दधिशोण । पु । वानरे ॥

दधिसक्तव' । पु । करम्भे ॥ दधिसक्तुश ब्दो नित्यं बहुवचनान्त ॥ दध्नाप सिक्ता' सक्तव: । अन्नेनव्यञ्जनमिति समास: ॥

दधिसारम् । न । नवनीते ॥

दधिस्नेह । पु । दधिसरे । दध्युत्तरगे ॥

दधिस्वेद. । पु । घोले ॥

दधीच । पु । दधीचिमुनौ ॥ इतिश ब्दभेदप्रकाश ॥

दधीचतीर्थम् । न । तीर्थविशेषे ॥

दधीचास्थि । न । वज्रे ॥ हीरके ॥

दधीचिः । पु । मुनिविशेषे । अथर्वमुनेरौरसात् कर्दमकन्यायां शान्तिनाम्न्यां जाते ॥ वृत्रासुरवधाय देवैरस्यास्था वज्रं निर्मितम् ॥

दधीच्यस्थि । न । हीरके ॥ वज्रे ॥

दधृक् । त्रि । धृष्टे ॥ धृष्णोति । ञिधृषाप्रागल्भ्ये । अस्मात् ऋत्विगादिना क्विन् द्वित्वमन्तोदात्तत्वञ्च निपात्यते । कुत्वात् पूर्वं जश्त्वेनड' ग, क' ॥

दध्रः । पु । यमे ॥ इतिशब्दरत्नावली ॥

दध्यङ् । पु । आथर्वणे मुनिविशेषे ॥

दध्याकरः । पु । दधिसमुद्रे ॥

दध्याली । स्त्री । श्रावण्याम् ॥ सुदर्शनायाम् । सुदर्शनगुल्ञ्च इतिगौड भाषा ॥

दध्युत्तरम् । न । कद्वरे । दधिस्नेहे ॥

दध्युत्तरगम् । न । दधिस्नेहे ॥

दध्युद । पु । दधिसमुद्रे॥ दधिउदकं यस्य । उत्तरपदस्य चेत्युदकस्योदादेश ॥

दनु' । पु । दनुवंशजत्वात कबन्धाख्ये असुरे ॥

दनुः । स्त्री । दानवमातरि । दक्षकन्यायाम् । कश्यपपत्न्याम् ॥

दनुजः । पुं । असुरे । दैत्ये ॥ दनोर्दनोर्वा जात' । सप्तम्यांजनेर्डः । प

न्यामजातौ ॥

दनुजदलिनी । स्त्री । दुर्गायाम् ॥

दनुजद्विट् । पु । देवे ॥

दनुसूनु । पु । असुरे ॥ दनोः सूनु ॥

दन्त । पु । अद्रिकटके ॥ कुञ्जे ॥ सानुनि ॥ चर्वणसाधनास्थनि । दशने । रदने । रदे । द्विजे ॥ द्वाचिंशत्संख्यायाम् ॥ पञ्चमात्रप्रभेदे (ऽऽ) ॥ दाम्यति । दमु० । अन्तर्भावितण्यर्थात् बाहुलकात्तन् । हसिमृग्रिण्विति वा तन् ॥

दन्तक । पु । नागदन्ते । खूटी इति भाषा ॥ गिरे प्रदेशात् तिर्यग्वहिर्निर्गते पाषाणे ॥ दन्तेषु प्रसिते ॥ स्वाङ्गेभ्य प्रसिते इतिकन् ॥ दन्ते ॥ स्वार्थेकन् ॥

दन्तकर्षण । पु । जम्बीरे ॥

दन्तकाष्ठम् । न । विकङ्कतवृक्षे ॥ दन्तधावनार्थकाष्ठे ॥ यथा । दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्तताम् । सर्वकण्टकिन पुण्या. क्षीरिणश्चयशस्विन. ॥ ॥ तिक्तं कषायं कटुक सुगन्धि कण्टकान्वितम् । क्षीरिणो वृक्षगुल्माद्या भक्षये द्दन्तधावनम् ॥ इतिमहाभारतम् । परिमाण माह विष्णु. । कनिष्ठाग्रसम स्थूलं सुकूर्चं द्वादशाङ्गुलम् । प्रातर्भुक्त्वाच यतवाक् भक्षये

दन्तधावनम् ॥ विशेषमाह मरीचि। द्वादशाङ्गुलन्तु विप्राणां क्षत्रियाणां नवाङ्गुलम्। अष्टाङ्गुलञ्च वैश्यानां शूद्राणान्तु षडङ्गुलम् ॥ चतुरङ्गुलमानेन नारीणां विधिरुच्यते। अन्तरप्रभवानाञ्च षडङ्गुलमुदाहृतमिति ॥ अथास्य लक्षणम्। तत्प्रयोजनप्रदर्शनम्। वल्लीलतागुल्मतरुप्रभेदैः स्युर्दन्तकाष्ठानि सहस्रशोऽपि। फलानिवाच्यान्यथ तत् प्रसङ्गो मा भूदतो वच्म्यथकामिकानि ॥ १ ॥ परिभाषार्थमाह। अज्ञातपूर्वाणि न दन्तकाष्ठान्यज्ञातपर्णैश्च समन्वितानि। नयुग्मपर्वाणि न पाटितानि नचोर्द्धशुष्काणि विना त्वचा च ॥ २ ॥ प्रविभागेन फलानि ॥ वैकङ्कतश्रीफलकाश्मरीषु ब्राह्मी द्युतिः चैमतरौ सुदारा। वृद्धिर्वटे र्के प्रचुरञ्चतेज पुत्रामधूके सगुणा प्रियत्वम् ॥ लक्ष्मी शिरीषे च तथा करञ्जेप्लक्षेऽर्थसिद्धि समभीप्सिता स्यात्। मान्यत्व माप्नोति जनस्य याश्वा प्राधान्य मश्वत्थतरौ वदन्ति ॥ आरोग्य मायु र्वदरीवृहत्यो रैश्वर्यवृद्धिः खदिरे सबिल्वे। द्रव्याणि चेष्टान्यतिमुक्तकेस्यु प्राप्नोति तान्येव पुनःकदम्बे ॥ नीपे ऽर्थासिः करवीरेणाश्चि भाण्डीरे स्वाद्यमेवं प्रभूतम्। शम्याशत्रून् सोषहन्त्यर्जुने च श्यामायाञ्च श्रियता मेव नाश ॥ साले ऽश्वकर्णे च वदन्ति गौरवं सभद्रदारावपि चाटरूषके। वाञ्छामथाप्नोति जनस्य सर्वत प्रियङ्गवपामार्गसजम्बुदाडिमैः ॥ * ॥ अथविधानम् ॥ उदङ्मुख प्राङ्मुखएववाऽब्दं काम यथेष्ट हृदये निवेश्य। अद्यादनिन्द्यं च सुखोपविष्ट प्रक्षाल्यजह्याच्च शुचौ प्रदेशे ॥ ८॥ * ॥त्यक्तस्य लक्षणम्। अभिमुखपतित प्रशान्तदिक्स्थ शुभमतिशोभन मूर्द्ध संस्थित यत् ॥ अशुभकर मतोऽन्यथा प्रदिष्ट स्थितपतितञ्च करोतिमिष्टमन्नम् ॥ इति ॥

दन्तकाष्ठकम्। न। आहुल्यवृक्षे ॥

दन्तच्छद। पुं। रदनच्छदे। उत्तराधरोष्ठभागे ॥ दन्ताञ्छादयन्तेऽनेन। छदसवरणे। चु०। पुंसीतिघ। छादेर्घइति ह्रस्व ॥

दन्तच्छदोपमा। स्त्री। बिम्ब्याम् ॥

दन्तधावन। पु। खदिरद्रुमे ॥ दन्तान् धावति। धावुगतिशुद्ध्यो। ल्युट् ॥ गुच्छकरञ्जे ॥ वकुले ॥ न। दन्तशुद्धौ ॥ तद्विधि। प्रातर्भुक्त्वा च मृद्वग्र कषायकटुतिक्तकम्। भक्षयेद् दन्तप

वनं दन्तमांसान्यबाधयन् ॥ * ॥ दन्तानूर्द्ध्वमधोदृष्ट्वा प्रातः सिञ्चेज्जलो चने। तोयपूर्णमुखः स्नेनदृष्टि राज्ञु प्रसीदति ॥*॥ अहितो कर्णशूलीच दन्तरोगी नवज्वरी। शोषी कासी च मूर्च्छार्त्तो दन्तकाष्ठं विवर्जयेत् ॥ * ॥ उपवासदिने विप्र पितृश्राद्धदिने तथा। नचतत् फलमाप्नोति दन्तधावनकृन्नरः ॥ प्रभातेमार्ज्जयेद् दन्तान् वाससा रसनां तथा। कुर्यात् द्वादशविप्रेन्द्र कवलानि जलैर्बुध ॥ उपवासे पितृश्राद्धे विधिमानेन जैमिने। दन्तधावनकृन्मर्त्यः सम्पूर्णं लभतेफलमिति ॥ * ॥ स्मृत्याद् दक्षिणास्येन पश्चिमास्येनचामय.। पूर्वास्ये नोत्तरास्येन सम्पदो दन्तधावनादिति विशेषः ॥ अपिच। मध्यमानामिकाभ्याञ्च वृद्धाङ्गुष्ठेन च द्विजः। दन्तानांधावनं कुर्यात् तर्ज्जन्यानकदाचन ॥ नित्यक्रियाफलंप्रेप्सुस्त्वरया दन्तधावनम्। प्रभाते कुरुते प्राज्ञ. सूर्योदयविवर्जिते। सूर्योदयेद्विजश्रेष्ठ कुर्याद् दन्तधावनम्। नित्यक्रियाफलं तस्य सर्वमेव विनश्यति ॥ य स्नानसमये कुर्यात् जैमिने दन्तधावनम्। निराशाःपितरोयान्ति तस्यदेवाःसुरर्षयः॥ दन्तस्य धावनंकुर्याद् योमध्याह्नपराह्णयो। तस्यपुष्पं न गृह्णन्ति देवता पितरोजलम् ॥ स्नानकाले पुष्करिण्यां य कुर्याद्दन्तधावनम्। तावत् स्नेयः सचण्डालो यावद्गङ्गा न पश्यति ॥ भगवत्युदिते सूर्येय कुर्याद् दन्तधावनम्। तद्दन्तकाष्ठीं पितराभुक्त्वा गच्छन्तिदुःखिन ॥ इति पाद्मे क्रियायोगसार ॥

दन्तपत्रम्। न। कुण्डले ॥

दन्तपत्रकम्। न। कुन्दपुष्पे ॥

दन्तपर्य्याय। पु। पत्रमात्रप्रभेदे (।ऽऽ)॥

दन्तपुप्पुटक। पु। दन्तरोगविशेषे ॥ अस्यनिदानं यथा। दन्तयोः त्रिषुवा यस्य श्वयथु र्जायते महान्। दन्तपुप्पुटको नाम स व्याधि. कफरक्तज इति ॥

दन्तपुष्पम्। न। कतकफले ॥ कुन्दे॥

दन्तफलम्। न। कतके ॥ पु। कपित्थे ॥

दन्तफला। स्त्री। पिप्पल्याम् ॥

दन्तभाग। पु। इभाग्रभागे। गजस्य मुखतः स्कन्धपर्यन्तेऽग्रभागे ॥ दन्तस्यभाग। दन्तसम्बन्धीभागोवा। प्राकपार्थिवादि ॥

दन्तमलकम्। न। पुष्पिमायाम्। दन्तमलच्छेदे ॥

दन्तमूलम् । न । दन्तार्बुदाभिधेरोगे॥

दन्तमूलिका । स्त्री । दन्तीवृक्षे ॥

दन्तरोग । पु । रदनामये ॥

दन्तरोगी । त्रि । रदनामयविशिष्टे ॥ फलान्यम्लानि शीताम्बु रूक्षान्नं दन्तधावनम्। तथा तिकठिनभक्ष्यं दन्तरोगीविवर्जयेत् ॥

दन्तवक्र । पु । भारतादिप्रसिद्धे न्वपविशेषे ॥

दन्तवस्त्रम् । न । ओष्ठे ॥

दन्तवास । न । ओष्ठे । अधरौष्ठयो ॥

दन्तवीजक । पु । दाडिमे ॥

दन्तवेष्ट । पु । दन्तरोगविशेषे ॥ यथा । स्रवन्ति पूयरुधिर चलादन्ता भवन्ति च । दन्तवेष्ट स विज्ञेयो दुष्टशोणितसम्भव ॥

दन्तशठ । पु । जम्बीरे ॥ कपित्थे॥ कर्म्मरङ्गके॥ नागरङ्गे॥ शठति । शठ कैतवेच । चात् हिंसासङ्क्लेशनयो । पचाद्यच् ॥अम्लरसे ॥ दन्तानांशठ इवापकारित्वात् ॥

दन्तशठा । स्त्री । चाङ्गेर्याम् ॥ चुद्राम्लिकायाम् ॥ दन्तानां शठेवापकारित्वात् ॥

दन्तशर्क्करा । स्त्री । कफवायुशोषितदन्तगतमले ॥ यथा । मलो दन्तगतो यस्तु कफमारुतशोषितः । शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा ॥

दन्तशाणम् । न । निम्बुकफले । मिस्सी इति भाषाप्रसिद्धे दन्तघर्षणचूर्णे ॥ इति त्रिकाण्डशेष' ॥

दन्तशिरा । स्त्री । मांस्याम् ॥

दन्तशूल । पु । रदनवेदनायाम् ॥ अ स्यौषध यथा । त्रिफलानिम्बयष्ट्याह्व कटुकारग्वधै. शृतम् । पाययेन्मधुनामिश्र दन्तशूलोपशान्तये॥

दन्तशोफ । पु । दन्तार्बुदे ॥

दन्तहर्ष । पु । दन्तरोगविशेषे॥ यथा। शीतरूक्षप्रवाताम्लस्पर्शाना मसहा द्विजा' । पित्तमारुतकोपेन दन्तहर्षं सनामत ॥

दन्तहर्षक । पुं।जम्बीरे॥इतिजटाधरः॥

दन्तहर्षण. । पु । जम्बीरे ॥ इ०त्रि० ॥

दन्ताघात । पु । निम्बूके ॥ रतिक्रीडायां दशनाघाते ॥ तस्यस्थानानि यथा । स्तनयो र्गण्डयो श्चैव ओष्ठे चैव तथाधरे । दन्ताघात प्रकर्त्तव्य कामिनीनां सुखावह. ॥ इतिकामशास्त्रम् ॥

दन्तायुध । पु । शूकरे ॥ दन्तावायुधौ अस्य ॥

दन्तार्बुद. । पु । न । दन्तरोगप्रभेदे । दन्तशोफे । द्विजव्रणे ॥

दन्तालिका । स्त्री । वल्गायाम । लगाम

इतिभाषा॥

दन्तावल। पु। हस्तिनि। गजे॥ अति शयितौ दन्तावस्य। दन्तशिखात स ञ्ज्ञायामितिवलच्। वले इतिदीर्घः॥

दन्तिका। स्त्री। दन्त्योषधौ। मुकूल के॥ दाम्यति दाम्यते वा। दमुउप शमे। हसिमृग्रिण्वा ऽमिदमीत्या दिना तन्। स्वार्थे कन्॥

दन्तिजा। स्त्री। दन्तिकायाम्॥

दन्ती। पु। दन्तावले॥ अतिशयितौ द न्तावस्य। इनि.॥

दन्तिनी। स्त्री। दन्तीवृक्षे॥

दन्तिमद'। पु। हस्तिमदे॥

दन्तिमूलिका। स्त्री। दन्त्योषधौ॥

दन्ती। स्त्री। उदुम्बरपर्ण्यामोषधौ। प्रत्यक्पर्याम्॥ दाम्यति दाम्यते वा। दमु०। तन्। गौ० ङीष्॥ ल घुदीर्घ प्रभेदेन प्रोक्ता दन्तीद्वय बु धै। दन्तीद्वय सरं पाके रसेच क टु दीपनम्॥ गुदाङ्कुराश्मशूला स्रकण्डुकुष्ठविदाहनुत्। तीक्ष्णो ष्णाहन्ति पित्तास्रकफशोथोदरकृ मीन्॥

दन्तीबीजम्। न। जयपाले॥

दन्तुरः। त्रि। उन्नतरदे॥ उन्नताद न्ता' सन्त्यस्य। दन्तउन्नत उरच्॥ उ न्नतनते। विषमे॥ कदाचिद्दन्तुरो मूर्खः कदाचिल्लोमश'सुखी। क दाचित् तुन्दिलोदुःखीकदाचिच्च-ञ्चलासतीति सामुद्रकम्॥ स्त्री। दन्तुरा॥

दन्तुरच्छद। पु। बीजपूरे॥

दन्तोलूखलिकः। पु। } तापसे। वान
दन्तोलूखली। पु। } प्रस्थविशेषे॥
योशीघ्रादीन् दन्तै खण्डयित्वा भ क्षयति स.॥

दन्त्य। त्रि। दन्तोद्भववर्णविशेषे॥ द न्तेषुभव। शरीरावयवाच्चेति यत्॥ दन्तहिते॥ दन्तेभ्योहित। शरीरा वयवाद्यत्॥

दन्दशूकः। पु। राक्षसे॥ सरीसृपे। फणिनि॥ गर्हितं दशति। लुपसदे ति यङ्। यजजपेत्यूक.। जपजभ दहेत्यभ्यासस्यनुक्॥ नरकविशेषे॥

दन्द्रम्यमाण.। त्रि। अत्यर्थं कुटिला-मनेकरूपांगतिमिच्छति॥

दभ्रम्। न। अल्पे॥ दभ्यते। दम्भुद-म्भने। स्फायितञ्चीति रक्॥ पु। समुद्रे॥

दम्। अ। कथने। पत्न्याम्॥

दम। पु। दमथे॥ बाह्येन्द्रियनैश्चल्ये। बाह्येन्द्रियाणां श्रवणादिभ्यातिरिक्त विषयेभ्यो निवर्त्तने। बहिरिन्द्रियाणा मुच्छृङ्खलव्यापारनिरोधे। बाह्येन्द्रि

यसंयमे ॥ निग्रहोवाह्यवृत्तीनां द मइत्यभिधीयते ॥ ऋतुकालाद्यतिरिक्तकाले मैथुनाद्यभावे ॥ उपशमे । विकारहेतुविषयसन्निधानेपि मनसोऽविक्रियत्वे ॥ कुत्सितात्कर्मणो विप्र यच्चचित्तनिवारणम् । स कीर्त्तितो दम प्राज्ञैः समस्तत्त्वदर्शिभि ॥ दण्डे ॥ दण्डकार्ये ॥ कर्दमे ॥ दमने ॥ दमनम् । दमु उपशमे । भावे घञ् । नोदात्तोपदेशेतिवृद्ध्यभाव ॥

दमक । त्रि । शासके । दमनकर्त्तरि ॥ दाम्यति । दमु॰ । ण्वुल् । नोदात्तोपदेशस्येति न वृद्धि ॥

दमघोष । पु । चन्द्रवंशीयेक्षत्रियविशेषे । शिशुपालपितरि ॥

दमघोषसुत । पु । शिशुपाले ॥

दमथ । पु । दण्डे ॥ दमे । तप क्लेशसहे ॥ दमनम् । दमु॰ । शमादिभ्योऽथच् ॥ दाम्यति वा । बाहुलकादथप्रत्यय ॥

दमथु । पु । दण्डे ॥ दमे ॥

दमनम् । न । दण्डे ॥ यथा । अपथुच्छिन्नतश्च दमनमुचितश्च श्रुतोश्रुतम् ॥ पु । दाेना इतिप्रसिद्धे पुष्पे । पुष्पचामरे ॥ दमनस्तुवरस्तिक्तो हृद्यो ह्यष्णः सुगन्धिकः । ग्रहणीविषकुष्ठास्रक्लेदकण्डूत्रिदोषजित् ॥ वीरे ॥ कुन्दवृक्षे ॥ दाम्यति । दमु॰ । न॰ ल्यु ॥

दमनक । पु । दमने । गन्धोत्कटे । दोना इतिप्रसिद्धे पुष्पवृक्षे ॥ दमन एव । स्वा॰क. ॥ न । वर्णवृत्तान्तरे ॥ यथा । द्विगुणनगणमिह विततुहि । दमनकमिति गदतिसुधियिह ॥ यथा । सरभसमिहदृशमुपनय । सुमुखिमदनरुजमयनयेति ॥ त्रिष्टुप्छन्दोभेदेपि ॥ यथा । द्विजवरगणयुग ममल तदनुच कलयकरतलम् । फणिपतिवरपरिगदित दमनकमिदमतिललितम् ॥ यथा । प्रणमत मधुरिपुचरणं भवजलनिधिपरितरणम् । अभिनवकिसलयरुचिर सुरपतिसकलभयहरम ॥

दमनी । स्त्री । अग्निदमनीवृक्षे ॥

दमयन्ती । स्त्री । नलनृपतेर्भार्यायाम् । विदर्भदेशीयभीमराजकन्यायाम् । भैम्याम् ॥ दमयन्तीनलाभ्याञ्च नमस्कारं करोम्यहम् । अविवादो भवत्त्वच कश्चिदोषप्राप्तास्मिद ॥ भद्रमल्लिकायाम् ॥

दमित । त्रि । दान्ते ॥ कृतदमने वृषादै । भारादिसहे ॥ दम्यतेस्म । दमु॰ । क्त । वादान्तेत्यादिना पक्षे

साधुः ॥

दर्मी । चि । दमविशिष्टे ॥

दमुना४ । पु । चित्रभानौ । अग्नौ ॥ दाम्यति । दमु० । अन्तर्भावितण्यर्थोदमेरुनसि । दमुनसौ दमुनस इत्यादि ॥ शुक्राचार्ये ॥

दमूना३ । पु । विभावसौ । वह्नौ । पावके ॥ दाम्यति । दमु० । दमेरुनसि । अन्येषामपिदृश्यतइति पचेदीर्घं । जुष्टोदमुनाः । दमूनसगृहपतिवरेण्यम् । दशपादान्तु रूपएवदीर्घ. पच्यते । तन्मते ह्रस्वोवाहुलकादोध्य ॥

दम्पती । पु । सहोक्त्या जायापत्योः । जम्पत्यो ॥ जायाचपतिश्च । राजदन्तादिगणेपाठाज्जायाया दम्भावो वा निपात्यते । यत्रानुकूल्य दम्पत्योः त्रिवर्ग स्तत्र वर्द्धते ॥

दम्भ । पु । कैतवे ॥ धर्मध्वजित्वे । धार्मिकतयात्मन ख्यापने । अधार्मिकत्वेपि धार्मिकत्वख्यापने । कपटेन धार्मिकत्वादिना स्वोत्कर्षख्यापनेच्छायाम् ॥ लोकवञ्चनाय विहितकर्मानुष्ठाने ॥ दभ्यतेऽनेन । दम्भु दम्भने । घञ् ॥

दम्भनम् । न । दम्भे ॥

दम्भित्वम् । न । लाभपूजाख्यात्यर्थंस्वधर्मप्रकटीकरणे ॥

दम्भोलि । पु । वज्रे ॥ दम्भु रोधने । असुन् । दम्भसि रोधने अलि.समर्थ. । अलभूषणपर्याप्तिवारणेषु । इन् । दम्भोति खेदयति । दम्भु० । औणादिकओलिर्वा ॥

दम्य । पु । प्राप्तदमावस्थेवत्से । वत्सतरे ॥ अनडुहि ॥ चि । दमनीये । शास्ये ॥ दमनार्हे । दमु शमने । अर्हेकृत्यतृचश्चेत्यर्थे पोरदुपधादिति यत् ॥

दय । पुं । करुणायाम् । दयायाम् ॥ इति शब्दरत्नावली ॥

दयमान । त्रि । दयाकर्त्तरि ॥ दयते । दय० । लट शानच् मुक् ॥

दया । स्त्री । कृपायाम् । दुःखितेषु भूतेष्वनुकम्पायाम् । परदुःखासहने ॥ लक्षणयथा । यत्नादपिपरक्लेशं हर्त्तुं या हृदिजायते । इच्छा भूमिसुरश्रेष्ठ सा दया परिकीर्त्तितेति ॥ आत्मवत् सर्वभूतेषु यो हिताय शुभायच । वर्त्तते सतत हृष्ट क्रियाह्येषादयास्मृता ॥ प्राणा यथात्मनोभीष्टा भूतानामपि ते तथा । आत्मौपम्येन सर्वत्र दया कुर्वन्ति साधवः ॥ धर्मस्य पत्नी । यथा । मोहपत्नी दयासाध्वी पूजिताच जगत्प्रिया । सर्वेषां

काश्चसर्वेच निष्फलाश्चयया विना ॥ यत्रमोहोस्तितत्रदयाया' सत्वाद्दया मोक्षपत्नीति देवीभागवते ९ स्कन्धे १ ऽध्याय ॥ अहिंसापरमोधर्मो विप्राणांनात्रसंशय । दया सर्वेच कर्त्तव्या ब्राह्मणेन विजानता ॥ यत्राद न्यत्र विप्रेन्द्र न हिंसायाज्ञिकीमते ति देवीभागवतम् ॥ यत्राद्न्यत्र द याकर्त्तव्या यत्रेतु हिंसैवकर्त्तव्या न सा याज्ञिकी हिंसा हिंसाभवति । अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्य इति श्रुते ॥ या वेदविहिता हिंसानि यतास्मिंश्चराचरे। अहिंसा मेव तां विद्याद्वेदाद्‌ धर्मोहि निर्वभाविति मनुस्मृतेश्च ॥ ह्यषांवाप्यविधानेन च्छे दयेन्नकदाचने तिकुलार्णवोक्तेश्च॥ रसान्तरे॥ दयते रक्षत्यनया। दय दानगतिहिंसारक्षणेषु । भिदाद्य ङ्॥ टाप्॥

दयाकूर्च' । पु । बुद्धे ॥ इति हेमचन्द्र ॥

दयालु । त्रि । हूरते । कारुणिके । दयायुक्ते । परदुःखप्रहाणपरे ॥ अ हो बकीय स्तनकालकूट जिघांसया ऽपायि यदप्यसाध्वी । लेभेगति धात्यु चितां ततोन्यकंवा दयालु शरणं व्रजेम ॥ दयते । दय० । स्पृहिगृही भ्यालुच् ॥ दयालोरसमर्थस्यदुःखा

वैवदयालुता ॥

दयालुक' । त्रि । सदये ॥

दयावान् । त्रि । परदुःखहरणेच्छौ ॥

दयित । पु । पत्यौ ॥ त्रि । प्रिये ॥ दय्यतेस्म । दय० । क्त' ॥

दयिता । स्त्री । भर्यायाम् ॥ प्रियायाम् ॥ रामस्य दयिता भार्यानित्यं प्राण समाहिता ॥ टाप् ॥

दर । अ । मनागर्थे । ईषदर्थे ॥ यथा । दरदलितनीलोत्पलरुचेति ॥

दर । पु । न । साध्वसे । भये । डर इति भाषा ॥ गर्त्ते । गढा इतिभाषा ॥ शङ्खे ॥ यथा । स उच्चकाशे धव लोदरो दरो प्युरुक्रमस्याधरशोण शोणिमेति ॥ दीर्यन्त्यस्मात् । दॄ भ ये । ऋदोरप् ॥ दरणम् दीर्यतेवा । दॄभये । दॄविदारणे वा । अप् । श हदद्रित्यप् वा ॥

दरक. । त्रि । भीरौ । डरपोक इति भाषा ॥ दॄ० । वुआदिभ्यो वुन् ॥

दरकण्टिका । स्त्री । शतावर्य्याम् ॥

दरणि । पु । कूलभङ्गे । कूलखण्डे ॥

दरत्-द । स्त्री । प्रपाते ॥ भये ॥ पर्वते ॥ म्लेच्छजातौ ॥ हृदये ॥ कूले । तीरे ॥ दरणम् दीर्यते वा । दॄ० । शृदृभसोऽदि ॥

दरद । पु । देशविशेषे ॥ भये ॥ म्ले

च्छजातिविशेषे । दरददेशोद्भवे आदौचत्रिये पुनर्विहितक्रियालोपादिना शूद्रतामापन्ने दस्युपदवाच्ये ॥ चि । भयप्रदे ॥ पु । न । हिङ्गुले ॥ दरदस्त्रिविधः प्रोक्तश्चर्मारः शुकतुण्डकः । हंसपादस्तृतीयः स्याद्गुणवानुत्तरोत्तरः ॥ चर्मारः शुक्लवर्णः स्यात् सपीतः शुकतुण्डकः । जपाकुसुमसङ्काशो हंसपादो महोत्तमः ॥ तिक्तं कषायं कटु हिङ्गुलं स्यान्नेत्रामयघ्नं कफपित्तहारि । हृल्लासकुष्ठज्वरकामलाश्च प्लीहामवातौ च गरं निहन्ति ॥ आऊर्द्ध्वपातनयुक्त्यातु जम्भलयन्त्रपाचितम् । हिङ्गुलं तस्य सूतन्तु शुद्धमेव नियोजयेत् ॥

दरवरः । पु । भगवतः श्रीकृष्णस्यशङ्खे ॥ दरेषुवरः ॥

दरि । स्त्री । दर्य्याम् ॥

दरितः । चि । भीते । डरा इति भाषा ॥ दरःसञ्जातोस्य । ता० इतच् ॥

दरिद्रः । दीने । निस्वे । निर्धने ॥ अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च । अदत्त्वा हेम धेनूश्च दरिद्रो जायते नरः ॥ दरिद्राति । दरिद्रा दुर्गतौ । पचाद्यच् ॥ दरिद्रोयस्त्वसन्तुष्टः कृपणोयोऽजितेन्द्रियः ॥

दरिद्रितः । चि । दुर्गते । दारिद्र्ययुक्ते ॥ दरिद्राते:कर्त्तरिक्तः ॥

दरी । स्त्री । कन्दरायाम् । कृष्णिमद्गृहाकारे गिरिविवरे ॥ दृणाति । दृ विदारणे । पचादौ दरडिति पाठात् टिड्ढेतिङीप् ॥

दर्द्दर । पु । पर्वते ॥ चि । ईषद्भग्नभाजने ॥

दर्द्दराम्र । पु । मीनाम्रीणि । साम्रमीनव्यञ्जने ॥ इति शब्दमाला ॥

दर्द्दरीकम् । न । वाद्यप्रभेदे ॥ दीर्य्यते । दृ० । पर्फरीकादयश्चेतीकन् धातोर्द्वित्वमभ्यासस्यरुक्च ॥

दर्द्दुरः । पु । तोयदे ॥ भेके ॥ वाद्यभाण्डविशेषे ॥ अद्रिविशेषे ॥ रत्नाद्यविशेषे ॥ न । ग्रामजाले ॥ इ०मे०॥ दृणातिशब्दे कर्णौ । दृ०। मकुरदर्दुराविति निपातितः ॥

दर्द्दुरा । स्त्री । चण्डिकायाम् । उमायाम् ॥ दृणात्यसुरान् । दृ०। मकुरदर्दुरावित्युरच् धातोर्द्वित्वमभ्यासस्य रुक् टिलोपश्च । टाप् ॥

दर्द्दू । स्त्री । कुष्ठप्रभेदे । दद्रुरोगे ॥ दरिद्रत्यनेनाऽनयाऽऽत्मम् । दरिद्रा० । दरिद्रातेर्य्यालोपश्चेत्यू । रश्चद्वश्च आश्च यौ । तेषांलोपः । अन्त्यभावेऽन्त्यसदेशस्येति द्वितीयरेफलोपः ॥

दर्द्दू. । पु । दद्रुरोगे ॥ दरिद्रते । दरि

दर्पकः | दर्भः

द्रा०। मृगव्याद्यश्चेति कु ॥

दद्रुघ्न। पु। चक्रमर्दे॥ दद्रुंहन्ति। ह न०। हन्तेरमनुष्येतिटक्॥

दद्रुणा। त्रि। दद्रुरोगिणि॥ दद्रूरस्यास्ति। शाकीपलालीदद्र्वाह्रस्वत्वश्चेति पामादिषु पाठान्न॥

दद्रुरोगी। त्रि। दद्रुणे॥ दद्रूश्चासौरोगश्च। इकोह्रस्वोऽङ्य इतिह्रस्व। दद्रुरोगोऽस्यास्ति। द्वन्द्वोपतापेति इनि॥

दद्रू.। पु। दद्रौ॥ दरिद्राति। दरिद्रा०। दरिद्रातेर्यालोपश्चेति इकाराकारलोप ऊप्रत्ययश्च॥

दद्रूणा। त्रि। दद्रुणे॥

दद्रूरोगी। त्रि। दद्रूरोगिणि॥

दर्प्प। पु। कस्तूर्याम्। मृगमदे॥ अहङ्कृतौ। गर्वे॥ परावधीरणाह्रूपो गुर्वन्यपात्यतिक्रमकारणश्चित्तदोषविशेषो दर्प्पः॥ अहङ्कारश्च सर्वेषां पापवीजममङ्गलम्। ब्रह्माण्डेपु च सर्वेषां दर्पपर्यन्तमुन्नति॥ धर्मात्यतिक्रमकारणे। हर्षजन्यमदे॥ दृ छो दृप्यति दृप्तो धर्ममतिक्रामति॥ धर्म्मध्वजित्वेन दम्भ एव दर्प्पः। दर्प्पति। दृप उत्क्लेशे। पचाद्यच्॥

दर्प्पक। पु। कामदेवे। पञ्चशरे॥ दर्पयति। दृप हर्षमोहनयो। ण्वु

लू॥ त्रि। अहङ्कारकारके॥

दर्प्पण। पु। मुकुरे। आदर्शे। रूपदर्शनाधारे॥ दर्पयति। दृप णिच् न्त। दृपसन्दीपने। चु०वा। न०ल्यु॥ न। अक्षिण॥ पर्वतविशेषे॥ नदीविशेषे॥ यथा। तत पूर्वे महाराज दर्प्पणो नामपर्वत। कुबेरो यत्र वसति धनपाले समसदेति॥ यस्मिन्नास्ते मध्यभागे रोहिणो रोहिता कृतिः। यस्मिं ल्लौहादिकं स्पृष्ट स्वर्णता याति तत्क्षणात्॥ तस्मात्दूरं स्रवतिदर्पणोनामवैनद। हिमाद्रिप्रभवो नित्य लौहित्यसदृश फले॥ समुत्पन्नहिलौहित्य सर्वैर्देवगणैर्हरि। सर्वतीर्थोदकै सम्यक्स्नापयामासत सुतम्॥ तस्यस्नानसमुद्भूत पापदर्पस्यपाटन। तेनाय दर्पणो नामपुरा देवगणै कृत॥ तस्मिन् स्नात्वा नदवरेयोऽर्चयेद्दर्पणाचले। कुबेरं प्रतिपत्तिथ्यां कार्त्तिके शुक्लपक्षत॥ सयाति ब्रह्मसदनमिह भुतिभिर्युत इतिकालिकापुराणे ८१ अध्याय॥

दर्प्पारम्भ। पु। अहङ्कारारम्भे। भटस्फटौ॥ इतिजटाधर॥

दर्भ। पु। कुशे॥ काशादिषट्सु॥ यथा। काशा कुशा वल्वजाश्च तथाऽन्ये तीक्ष्णरोमशाः। मौञ्जाश्च शाद

शाखैव षड्दर्भाः परिकीर्त्तिताः ॥ दृभ्यते । दृभीग्रन्थे । घञ् ॥ यद्वा । दृणाति । दृ० । दृदलिभ्यांभः ॥

दर्भट. । पु । न । निभृतगृहे ॥ इति त्रिकाण्डशेषः ॥

दर्भपत्र. । पु । काशे ॥ इतिराजनि० ॥

दर्भमूली । स्त्री । ओषधीभेदे ॥ पाककर्णेतिङीष् ॥

दर्भाह्वय. । पु । मुञ्जे ॥ इति राज० ॥

दर्व । पु । राक्षसे ॥ दृणाति सर्वान् । दृ० । शृगृभृदृभ्योव ॥ ॥

दर्वट । पु । दण्डवादिनि ॥

दर्वि । स्त्री । खजाकायाम् । दर्व्याम् ॥ दृणाति । दृ० । दृदृभ्यांविन् ॥ उक्षमुकदर्विहोमिन इतिविर्वा ॥

दर्विक. । पु । दर्व्याम् । व्यञ्जनादिदारके । कौँचा इतिभाषा ॥

दर्विका । स्त्री । दर्व्याम् । खजाकायाम् ॥ गोजिह्वायाम् । दार्विकायाम् ॥

दर्विहोम । पुं । अप्रकृतिविकृतिहोमे ॥ योनकस्यचित् प्रकृतित्वेन विकृतित्वेन वा वर्त्तते स दर्विहोम इतिव्याख्यातारः ॥

दर्वी । स्त्री । कव्याम् । खजाकायाम् । करछी इतिभाषा ॥ दृणाति । दृ० । वृदृभ्यांविन् । कृदिकारादक्तिनइति ङीष् ॥

दर्वीकर. । पु । उरगे । दीर्घपृष्ठे । सर्पे ॥ रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः । ज्ञेयादर्वीकरा सर्पाः फणिनः शीघ्रगामिनः ॥ दर्व्याकारफणएवकरो यस्य प्रहारसाधनत्वात् । दर्वी फणां करोति । कृञोहेत्विति टः ॥

दर्वीसङ्क्रमणम् । न । तीर्थविशेषे ॥

दर्श । पु । अमावस्यायाम् । सूर्येन्दुसङ्गमे ॥ अवलोकने । दर्शने ॥ अमावास्यायागे ॥ दर्शे अमावास्यायां क्रियमाणत्वात् उपचाराद्दर्शशब्देनोच्यते । सयागत्रयात्मकः । यथा । आग्नेयाष्टाकपालैन्द्रदध्यैन्द्रपयोयागा-स्त्रयोऽमावास्यायां सयावज्जीवकर्त्तव्यः कौण्डपायिकर्त्तव्यो माससाध्यश्चेति ॥ दृश्यते शास्त्रेण । पुंसिसञ्ज्ञायांघः ॥

दर्शक. । त्रि । द्वारपाले । प्रतीहारे ॥ दर्शयितरि ॥ प्रवीणे । निपुणे ॥ पश्यति । दृशिर्० । ण्वुल् ॥

दर्शत. । पु । सोमे ॥ सूर्ये ॥ पश्यति । दृशिर्० । भृमृदृशियजीत्यादिनाऽतच् ॥

दर्शनम् । न । नयने ॥ स्वप्ने ॥ बुद्धौ ॥ ॥ धर्मे ॥ उपलब्धौ ॥ शास्त्रे ॥ दर्पणे ॥ ईक्षणे ॥ षट्दर्शनेषु । वैशेषिकन्या

यमीमांसासाङ्ख्यपातञ्जलवेदान्त रूपेषु ॥ एतानि तत्त्वज्ञानार्थं वेदान्विचार्य कणादगोतमजैमिनिकपिलपतञ्जलिवेदव्यासाख्यै र्मुनिषट्कै कृतानि ॥ अथावकुलार्णवेश्रीसदाशिव । षड्दर्शनानि मेऽङ्गानि पादौ कुक्षि करौशिर । तेषुभेदन्तु य कुर्यान्मदङ्गच्छेदकोहिस ॥ एतान्येव कुलस्यापिषडङ्गानि भवन्तिहि । तस्मान्मदात्मक कौल मत्कौलात्मक प्रिये इति ॥ देव्या पूजायामुक्तानि षड्दर्शनानि यथा । शैवशाक्तवैष्णवगाणेशवैष्णवनास्तिकमतप्रतिपादकानिषड्दर्शनानीति ॥ इज्यायाम् ॥ वर्णे ॥ अनुसन्धाने ॥ ज्ञानैकस्वरूपे ॥ रूपे ॥ दृश्यते ऽनेन अस्मिन् वा । दृशिर्० । करणे अधिकरणे वा ल्युट् ॥

दर्शनीय । त्रि । मनोज्ञे ॥ दर्शनयोग्ये ॥

दर्शयामिनी । स्त्री । तमिस्रायाम् ॥

दर्शयिता । पु । द्वारपाले । प्रतीहारे ॥ त्रि । दर्शके ॥

दर्शविपत् द् । पु । चन्द्रे ॥ इतिहारावली ॥

दर्शित । त्रि । आविष्कृते । प्रकाशिते । दर्शनङ्कारिते ॥

दलम् । न । उत्सेधे ॥ खण्डे ॥ अस्त्रीच्छदे ॥ अपद्रव्ये ॥ पत्रे । पर्णे ॥ तमालपत्रे ॥ पत्रे ॥ अर्द्धे ॥ पु । खण्डने ॥ उत्सेधवद्वस्तुनि ॥ दलति । दलवि दारणे । पचाद्यच् ॥

दलकोष । पु । माघ्ये । कुन्दपुष्पवृक्षे ॥

दलत् । त्रि । विकसिते ॥

दलनिर्मोक । पु । भूर्जपत्रवृक्षे ॥

दलनी । स्त्री । लोष्टे । ढीम इतिढेल इतिच भाषाप्रसिद्धे ॥ त्रि । भेदकर्त्तरि ॥

दलप । पु । स्वर्णे ॥ शास्त्रे ॥ प्रहरणे ॥ दलति दल्यते ऽनेनवा । दल० । उपिकुटिदलिकचिखजिभ्य कपन् ॥

दलपति । पु । दलाध्यक्षे ॥

दलपुष्पा । स्त्री । केतक्याम् ॥

दलसारिणी । स्त्री । केमुके ॥

दलसूचि । पु । कण्टके ॥

दलसा । स्त्री । पत्रशिरायाम् । माच्याम् ॥

दलाढक । पु । अरण्यतिले । स्वयजाततिले ॥ पृश्नग्राम् ॥ गैरिके ॥ फेने ॥ स्नातके ॥ नागकेशरे ॥ मरुत्तरे ॥ कुन्दे ॥ करिकर्णे ॥ शिरीषे ॥ वात्यायाम् ॥

दलाढ्य । पु । पङ्ककर्वटे । रूवयाइति दल् दल् इतिच भाषा ॥ इति त्रिकाण्डशेष ॥

दलामलम् । न । मरुवकवृक्षे ॥ दम

नवृत्ते ॥ मदनवृत्ते ॥

दलाल्लम् । न । चुक्रे ॥

दलि । पु । स्त्री । लोष्टे । ढीम्इति ढे ल इतिच भाषा ॥ स्त्री । दलितेश मीधान्ये । दालिइति दारिइतिच भाषा ॥

दलिकम् । न । काष्ठे । दली इति पर्व तीयभाषा ॥ इतिहेमचन्द्र. ॥

दलितः । त्रि । प्रफुल्ले ॥ खण्डिते ॥ यथा । दलितकुचभराङ्कमङ्कपालिं रचय ममाङ्कमुपेत्य पीवरोरु इति॥

दलेगन्धि । पु । सप्तपर्णवृक्षे ॥

दल्भ. । पु । ऋषिविशेषे ॥ चक्रे ॥ प्रतारणायाम् ॥ पापे ॥ दलति । दल० । दद्लिभ्यांभ ॥

दल्मि । पु । इन्द्रे ॥ वज्रे ॥ दलति । दल० । बाहुलकान्मि' ॥

दल्मिमान् । पु । इन्द्रे ॥ दल्मिरस्यास्ति । मतुप् । यवादित्वान्नवत्वम् ॥

दव. । पु । वनानले ॥ वने ॥ उपतापे ॥ दवति । दुगतौ । पचाद्यच ॥

दवथु । पु । परितापे ॥ नेत्रादिदाहे ॥ दवन दूयतेऽनेनवा । टुदुउपतापे । ट्वितोऽथुच् ॥

दवाग्नि' । पु । दावानले ॥

दविष्ठ. । त्रि । अतिदूरे । सुदूरे ॥ इदमेषा मतिशयेन दूरम् । इष्ठन् । स्थूलदूरेतिसाधु. ॥

दवीयान् । त्रि । दविष्ठे ॥ इदमनयोरतिशयेनदूरम् । ईयसुन् । स्थूलदूरयुवह्रस्वेत्यादिना साधु ॥

दशा. । पुभूम्नि । वस्त्रान्ते । वसनाञ्चले ॥ दशानाभौ प्रयोजये दितिस्मृति ॥ अधोंशुकस्थेत्यर्थ. ॥ दश्यते । दश० । भि० अङ् ॥

दशक । पु । दशति ॥ दशपरिमाणमस्य । सङ्ख्याया इतिकन् ॥

दशकण्ठः । पु । रावणे ॥ दश कण्ठा यस्य स ॥

दशकण्ठजित् । पु । श्रीरामचन्द्रे ॥ दशकण्ठ जयति । जि० । क्विप् तुक् ॥

दशकन्धर । पुं । रावणे ॥ दश कन्धरा. ग्रीवा अस्य ॥

दशग्रीव । पु । रावणे ॥ दश ग्रीवा यस्य स ॥ गरुडपुराणे सप्तग्रीवस्ययथा प्रोक्तो एकादशमन्वन्तरीयसप्तनामकेन्द्रशत्रुविशेषे ॥

दशत् । पु । दशके । वर्गे ॥ दशपरिमाणमस्य । पञ्चद्दशतौ वर्गेवेति निपातनादति प्रत्यय ॥

दशति । स्त्री । शते ॥ इतिमहाभारते दानधर्मे ॥

दशधा । अ । दशप्रकारे ॥ सङ्ख्याया विधार्थेधा ॥

दश । त्रि । सङ्ख्याविशेषे । द्विगुणित पञ्चसु ॥ तत्सङ्ख्या विशिष्टे ॥ दशन्ति दश्यन्ते वा । दश दशने । बाहुलकात् कनिन् ॥

दशन । पु । शिखरे ॥ दन्ते ॥ न । कवचे ॥ दंष्ट्राव्यापारे ॥ दश्यते ऽनेन । दश० । करणेति ल्युट् । दंशदशे तिनिर्देशात् क्वचिद्किंत्यपिनलोप ॥ यद्वा । कर्त्तरि ल्युट् ॥

दशनवासः । न । ओष्ठे । उत्तराधरोष्ठमात्रे ॥ दशनानां वाससीव आवरकत्वात् ॥

दशनाङ्क । पु । दन्तक्षते ॥

दशनाख्या । स्त्री । चुञ्चिकायाम् । व्याङ्गेशाम् ॥

दशनोच्छिष्ट । पु । निश्वासे ॥ अधरे ॥ चुम्बने ॥ त्रि । दन्तक्षते ॥

दशपारमिताध्वर. । पु । बुद्धे ॥

दशपुरम् । न । कुटन्नटे । कैवर्त्तीमुस्तके ॥ मालवदेशैकखण्डे ॥ पुरविशेषे ॥ दशपिपर्त्ति । पृपालनपूरणयो. । मू०क । उत्तम् ॥ दशपुरोऽस्य वा । ऋक्पूरित्य समासान्त ॥

दशपूरम् । न । वानेये । कैवर्त्तीमुस्तके ॥ दशपूरयति । पूरपूर्त्तौ । कर्मण्यण् ॥

दशबल. । पुं । बुद्धमुनौ ॥ दशबलान्यस्य । यदाहु । दानशीलक्षमावीर्य्यध्यानप्रज्ञाबलानि च । उपाय प्रणिधिर्ज्ञान दश बुद्धबलानि वै ॥

दशभुजा । स्त्री । दुर्गायाम ॥ यथा । इतिवृत्तं पुराकल्पे मनो' स्वायम्भुवेन्तरे । प्रादुर्भूता दशभुजादेवी देवहितायवै ॥ इतिकालिकापुराणम् ॥

दशभूमिग । पु । बुद्धे ॥

दशभूमीश । पु । बुद्धे ॥

दशम । त्रि । दशानाम् पूरणे । दसवां इतिभाषा ॥ तस्यपूरणेडट् । नान्तादसङ्ख्यादेर्मट् ॥

दशमी । त्रि । वर्षीयसि । अतिवृद्धे ॥ नवतेरूर्द्धं दशमी ऽवस्थाविशेषो ऽस्यास्ति । वयसि पूरणादितीनि ॥

दशमी । स्त्री । नवत्यधिकावस्थायाम ॥ शताब्दानां दशधाविभागे कृते दशम्यवस्था नवत्यधिका भवति ॥ तिथिविशेषे ॥ साचन्द्रस्य दशमकलाक्रियारूपा तदुपलक्षितकालपरा वा ॥ तत्रजातस्य फलम् । यथा । विद्याविनोदी धनपुत्रयुक्त प्रलम्बकण्ठो मदनाधिकश्री । उदारचित्त सुमना दयालु प्रसूतिकाले दशमी यदि स्यादिति ॥ ङीप् ॥

दशमीस्थ । त्रि । नष्टवीर्य्ये । क्षीणरागे ॥ स्रताशने ॥ नवत्यधिकवयसि

। स्थविरे ॥ स्मृतिहीने ॥ कामव
शान्मरणावस्थां प्राप्तेकामिनि॥ न
यनप्रीति प्रथम चित्तासङ्गस्ततोऽ
थसङ्कल्प । निद्राछेदस्तनुता विष
यनिवृत्ति स्त्रपानाश । उन्मादो
मूर्छामृतिरित्येता स्मरदशादशैव
स्यु ॥दशम्यां कामावस्थायां तिष्ठति
।ष्ठा॰ । सुपिस्थ इति क ॥

दशमुख ।पु ।रावणे॥दशमुखान्यस्य॥
लिङ्गात्मनि॥ दश इन्द्रियाणि मुखा
नि भोगद्वाराणि यस्य स ॥

दशमुखान्तक ।पु। रामे॥दशमुख
स्यान्तक ॥

दशमूत्रकम् ।न ।हस्तिमहिषोष्ट्रगवाऽ
जमेषाश्वगर्दभमानुषमानुषीणांमू-
त्रे॥ इति राजनिर्घण्ट' ॥दशानामू
त्राणां समाहार ॥

दशमूलम्। न ।पाचनविशेषे । पञ्चमू
लद्वये ॥ यथा ।विल्वश्योनाकगम्भा
रीपाटलागणिकारिका । शालप
र्णी पृश्निपर्णी बृहतीद्वयगोक्षुरम् ॥
उभाभ्यां पञ्चमूलाभ्यां दशमूलमुदा
हृतम् ॥ दशमूल त्रिदोषघ्न श्वास
कासशिरोरुज । तन्द्राशोथज्वराना
हपार्श्वपीडारुचीर्हरेत् ॥वातपित्त
हर वृष्यंकनीय पञ्चमूलकम् ॥ उ
भय दशमूलन्तु सन्निपातज्वरापहम्।
कासेश्वासे चतन्द्रायां पार्श्वशूले चश
स्यते ॥ पिप्पलीचूर्णसयुक्त कण्ठह
दृग्रहनाशनमिति ॥

दशयोगभङ्ग । पु। सस्कारकर्मणि न
क्षत्रवेधविशेषे । खर्जूरवेधे ॥

दशरथ । पु । रामताते ॥

दशरथप्रभव । पु। रामे ॥ रामादि
षु ॥ दशरथ प्रभवोयस्ययेषांवा ॥

दशरूपभृत् । पु । विष्णौ ॥

दशवदन । पु। रावणे॥ दशवदनानि
यस्यस ॥

दशवाजी । पु। चन्द्रे ॥दश वाजिनो
रथे यस्यस ॥

दशशतलोचन. । पु ।इन्द्रे॥ दशशता
नि सङ्ख्यायेषु तानिलोचनानि
यस्य ॥

दशहरा । स्त्री। गङ्गाजन्मदिने ॥ यथा
। ज्येष्ठमासि क्षितिसुतदिने शुक्लप
क्षे दशम्यां हस्तेशैलान्निरगमदियं
जाह्नवी मर्त्यलोकम् । पापान्यस्यां
हरतिच तिथौ सा दशेत्याहुरार्या.
पुण्यदद्यादपिशतगुणं वाजिमेधायुत
स्येतिशङ्ख ॥ अपिच । अदत्ता
नामुपादान हिंसाचैवाविधानत. ।
परदारोपसेवाच कायिक त्रिविध-
स्मृतम् ॥ पारुष्यमनृत चैवपैशुन्य
ञ्चापिसर्वश' । असम्बद्धप्रलापश्चवा

ष्टमथ स्याच्चतुर्विधम् ॥ परद्रव्येष्व
भिध्यानं मनसानिष्टचिन्तनम् । वित
थाभिनिवेशश्चमानसं त्रिविधं स्मृत
म् ॥ एतानि दशपापानि हरत्त्वं म
मजाह्नवि । दशपापहरायस्मात्त
स्माद्दशहरास्मृता ॥ ज्येष्ठेमासिसि
तेपक्षेदशम्यांवुधहस्तयोः । गरानन्दे
व्यतीपातेकन्याचन्द्रेवृषेरवो । दश
योगेनरःस्नात्वासर्वपापैः प्रमुच्यते
इति स्कन्दपुराणे काशीखण्डः ॥
अत्रकुजवुधयोः कल्पभेदेन व्यवस्था
ज्ञेया ॥ सेतुबन्धरामेश्वरयोः प्रति
ष्ठादिने ॥ यथोक्तं स्कान्दे सेतुमा
हात्म्ये ॥ ज्येष्ठेमासि सितेपक्षेदश
म्यांबुधहस्तयोः । गरानन्देव्यतीपा
ते कन्याचन्द्रेवृषेरवैा ॥ दशयोगे
सेतुमध्ये लिङ्गरूपधरंहरम् । रामो
वैस्थापयामास शिवलिङ्गमनुत्तम
मिति । अतोऽस्यांतुविशेषेण पूजा
कार्याहितार्थिभिः ॥ * ॥ अत्रसङ्कल्पउ
क्तःस्नानायगारुडे २१५ अध्याये ।
यथा। अत्रहस्तेतु नक्षत्रे दशम्यांज्यै
ष्ठकेसिते। दशपापहरायाच्चशदत्ता
दानकल्मषम् ॥ विरुद्धाचरणं हिंसा
परदारोपसेवनम्। पारुष्यान्तपैशु
न्यमसम्बद्धञ्च भाषणम् ॥ परद्रव्या
भिध्यानञ्च मनसानिष्टचिन्तनम् ।
एतद्दशाघघाताय गङ्गास्नानं करोम्य
हमिति ॥

दशा । स्त्री । अवस्थायाम् ॥ दीपवर्त्त्या
म् ॥ चेतसि ॥ दशति । दंशदशने ।
भू°क । पचाद्यच्तु जपजभदहद
शेतिनिर्द्देशाद्कित्यपिनलोप ॥ य
द्वा । दश्यते गुरोश्चेत्यङ् ॥ कलो
न्दशायंयथोक्तायुष स्यांद्यष्टग्रहभा
ग्याष्टभागविशेषे ॥ इति दैवज्ञा
॥ शरीरस्थदशदशा यथा । गर्भवास.
१। जन्म २। वाल्यम् ३। कैामारम्
४। पैागण्डम् ५। यैावनम् ६। स्था
विर्यम् ७। जरा ८। प्राणरोधः ९।
नाश १० इति ॥ * ॥ कामजदश
दशा यथा। चक्षूरागस्तदनुमनसः स
ङ्गतिर्भावनाच व्यावृत्तिः स्यात् तद
नुविषयग्रामतश्चेतसोपि । निद्राच्छे
दस्तदनुतनुता निस्त्रपत्त्व ततोन्मा
दोमूर्च्छातदनुमरणं स्युर्दशा शङ्क-
मेणेति ॥

दशाकर्ष । पु । प्रदीपे ॥

दशाकर्षी । पु । प्रदीपे ॥

दशाङ्गधूप । पु । त्रिदोषघ्ने अवग्रहग्रि
शाचकादिनाशके धूपविशेषे ॥ यथा
। वासयेद्वादशाङ्गेन त्रिदोषघ्नेन चा
लकम् । नश्यन्तियस्यधूपेन अवग्रह
पिशाचकाः ॥ पञ्चांशगन्धपाषाणा

त् तावन्महिषगुग्गुलुः। चतुरंशच-
न्दनञ्च जटामांसीच तावती॥ त्रि
भाग सर्ज्जकःसार स्तावदेवहिराल
कम्। उशीरन्तु द्विभागंस्यात् हृतभृ
ष्ट नखं समम्॥ कर्पूरो मृगनाभि
श्च एकभागौप्रकीर्त्तितौ। एकोदशाङ्ग
धूपस्तु हरस्यापि मनोहरेदिति॥ पु
ष्पदानोत्तरदेवायदीयमाने धूमवि
शेषे॥ यथा। मधुमुस्त घृत गन्धोगु
ग्गुलगुरुशैलजम्। सरलं सिह्ल
सिद्धार्थं दशाङ्गोधूपउच्यतइति॥
अन्यश्च। कर्पूरं कुष्ठमगुरु गुग्गुलु
र्मलयोद्भवम्। केशरं वालक पथत्व
क् जातीकोषमुत्तमम्॥ सर्वमेतद्
घृतयुत दशाङ्गोधूपईरित इति॥

दशाङ्कुलम्। न। खर्बूजे॥ त्रि। दशा
ङ्कुलमिते॥

दशानन। पु। रावणे॥

दशानिकः। पु। दन्तीवृक्षे॥

दशानीकिनी। स्त्री। सेनाविशेषे॥

दशापविचम्। न। वास खण्डे॥

दशाबला। स्त्री। कैवर्त्तिकायाम्॥

दशार्ण.। पु। देशविशेषे॥ सविन्ध्य
स्यपूर्वदक्षिणस्या दिशि वर्त्तते॥ कू
तिराधाकान्त.॥

दशार्णा। स्त्री। नदीविशेषे॥

दशार्ह.। पु। सुगते। बुद्धे॥ यदुदेशे॥

दशार्हा। पुभूम्नि। दशार्हदेशस्थे॥

दशावतार.। पु। विष्णौ॥ दशअवता
रायस्यस। तेयथा। शेतेस चित्तश
यने मम मीनकूर्मकोलोऽभनसृह
रिवामनजामदग्न्य। योऽभूद्भूव
भरताग्रजकृष्णबुद्ध कल्की सताम्भ
विताप्रहरिष्यतेऽरीनितिवोपदेश.॥

दशाश्व। पु। चन्द्रे॥ दशअश्वारथे य
स्यस.। रथस्त्रिचक्र सोमस्य कुन्दाभा
स्तचवाजिन। वामदक्षिणतोयुक्ता-
दश तेन चरत्यसौ॥

दशाश्वमेधिक'। पु। तीर्थविशेषे॥

दशास्थिति। स्त्री। अवस्थायाम्॥

दशास्य.। पु। दशानने॥ दश आस्या
नि यस्य स॥

दशास्यजित्। पु। श्रीरामचन्द्रे॥ द
शास्य जयति। जि०। क्विप् तुक्॥

दशाह। पु। दशदिनसमुदाये॥ द
शानामह्नां समाहार। तद्धितार्थेति
समास। समाहारस्यैकत्वादेकवच
नम्। राजाह सखिभ्यष्टच्। रात्रा
ह्नाहा पुंसि॥

दशेन्धन। पु। प्रदीपे॥ दशाइन्धन
यस्य॥

दशेर.। पु। हिंस्रे॥ दशति। दश०।
पतिकठिकुठिगडिगुडिदंशिभ्यएरक्
। कनिदित्तामिति नलोप.॥

दशेरक । पु । मरुदेशे ॥ पु भूम्नि । तद्देशस्थे ॥ इति हेमचन्द्र ॥

दशेरुक । पु । मरुदेशे ॥ पु भूम्नि । तद्देशस्थे॥ इतिभूरिप्रयोग ॥

दशैकादशिक । पु । वार्द्धुषिके ॥ एकादशार्थत्वादेकादश वस्तुतोदश ये दशदत्ता एकादश भविष्यन्ति ते दशैकादशा॰ । निपातनात् समासान्तोऽकार॰ । दशैकादशान् प्रयच्छति । कुसीददशैकादशात् ष्ठन्ष्ठचा विति ष्ठच् ॥ स्त्री । ङीषि दशैकादशिकी ॥

दष्ट । त्रि । दंशिते । दंशयुक्ते ॥ दंशे क्त ॥

दस्म । पु । यजमाने ॥ चैारे ॥ हुताशने ॥ खले ॥ दस्यति । दसुउपक्षये । इषियुधीधि दसिश्याधूसूभ्योमक ॥ दर्शनीये ॥

दस्यु॰ । पु । मलिम्लुचे । चैारे ॥ रिपैा ॥ महासाहसिके ॥ दस्यति । दसु॰। यजिमनिशुन्धिदसिजनिभ्योयुच् । वा॰अनादेशाभाव । अनुनासिकयोरित्त्युक्तत्वाद्वा नानादेश. ॥ पैाण्ड्रकाश्चौड्रद्रविडा काम्बोजाजवनाशका. । पारदा. पल्हवा श्चीना.किराता दरदा.खशा ॥ मुखबाहूरुपज्जानां यालोके जातयोबहि: । म्लेच्छवाचश्चार्यवाच सर्वेते दस्यव स्मृता. ॥ ब्राह्मणक्षत्रियवैश्यशूद्राणां क्रियालोपादिना या पैाण्ड्रकाश्चौड्रद्रविडाइत्यादिनोक्ता जातयो बाह्या जाता॰ म्लेच्छभाषायुक्ता आर्यभाषोपेता या तेदस्यव. सर्वेस्मृताइत्यर्थ. ॥

दस्र । पु । खरे ॥ अश्विनीसुते ॥

दस्रो । पु । द्विवचनान्त । नासत्ययो । अश्विनीसुतयो । स्वर्वैद्ययो ॥ दस्यत क्षिपतोरोगान् । दसु॰ । स्फायितञ्चीतिरक् ॥

दस्रदेवता । स्त्री । अश्विनीनक्षत्रे ॥ दस्रौदेवते यस्या ॥

दस्रसू. । स्त्री । सूर्ययोषिति । संज्ञायाम् ॥

दहन । पु । चित्रके ॥ भल्लातके ॥ अग्नौ ॥ कपोते ॥ चतुष्कलप्रभेदे (ऽ।) ॥ न । दाहे । भस्मीकरणे ॥ त्रि । दुष्टचेष्टिते ॥ दहति दह्यते वा । दहभस्मीकरणे । ल्यु. ल्युट् वा ॥

दहनकेतन. । पु । धूमे ॥ दहन केतन यस्य ॥

दहनप्रिया । स्त्री । स्वाहायाम् ॥ दहनस्याग्ने. प्रिया ॥

दहनागुरु । न । दाहागुरुणि ॥

दहनाराति. । पु । जले ॥

दहनीय: । त्रि । दहनार्हे । दाह्ये ॥

दहनोपम । पु । }
दहनोपल । पु । } सूर्यकान्तमणौ ॥

दहनोल्का । स्त्री । अग्निकुक्कुटे ॥

दहर । पु । मूषिकायाम् ॥ स्वल्पे । सूक्ष्मे ॥ भ्रातरि ॥ बालके ॥ हृदयाकाशे ॥ ब्रह्मणि ॥

दहराकाश । पु । चिदाकाशे ॥ ईश्वरे ॥ दहरश्चासावाकाशश्च ॥

दह्रः । पु । दावानले ॥ वह्नौ ॥ दहति । दह० । स्फायितञ्चीति रक् ॥ हृदयाकाशे ॥ जठरे ॥

दा । स्त्री । शोधने ॥ दाने ॥ छेदे ॥ उपतापे ॥ रक्षायाम् ॥ दानम् । डुदाञ्० । सम्पदादित्वात् क्विप् ॥

दाक । पुं । यजमाने ॥ दातरि ॥ ददाति । डुदाञ्० । कृदाधारेति क ॥

दाक्षः । त्रि । दक्षसम्बन्धिनि ॥ दक्षस्यायम् । अण् ॥

दाक्षायणयज्ञ । पुं । आदक्षायुक्ते दर्शपूर्णमासात्मके यज्ञे ॥ दक्षस्येमे दाक्षा । तेषां अयनं आवृत्तिरिति तन्निर्वचनम् ॥

दाक्षायणी । स्त्री । अपर्णायाम् । उमायाम् । सत्याम् ॥ अश्विन्यादिसप्तविंशतिभेषु ॥ रोहिण्याम् ॥ दन्तीवृक्षे ॥ मानवे दक्षहस्तपीठाधिष्ठात्रिदेव्याम् ॥ दक्षस्यापत्यम् । नामधेयस्येति वृद्धसञ्ज्ञायाम् उदीचां वृद्धादगोत्रादिति फिञ् । गौरादित्वान् ङीष् ॥

दाक्षायणीपति । पु । एणतिलके । चन्द्रे ॥ शिवे ॥ दाक्षायण्याः पतिः ॥

दाक्षायणीरमण । पु । चन्द्रे ॥

दाक्षाय्य । पुं । गृध्रे ॥ दक्षते । दक्ष वृद्धौ शीघ्रार्थे च । श्रुदक्षिस्पृहिगृहिभ्य आय्यः । दक्षाय्यस्यायम् । तस्येदमित्यण् ॥

दाक्षि । पुं । दक्षस्यापत्ये ॥ अत इञ् ॥

दाक्षिणम् । न । दक्षिणानां समूहे ॥ भिक्षादिभ्योऽण् ॥

दाक्षिणात्य । पु । नारिकेले ॥ त्रि । दक्षिणादिग्भवे ॥ दक्षिणाभव । दक्षिणापश्चात्पुरसस्त्यक् ॥

दाक्षिणिक । पु । बन्धविशेषे ॥ सम्येष्टापूर्त्तेन भवति । पुरुषतत्त्वानभिज्ञोऽपि इष्टापूर्त्तकारी कामोपहतमना बध्यते ॥

दाक्षिण्यम् । न । आनुकूल्ये ॥ त्रि । दक्षिणार्हे ॥

दाक्षी । स्त्री । पाणिनिमुनेर्मातरि ॥ दक्षस्य गोत्रापत्यं स्त्री । अत इञ् । इतो मनुष्यजातेरिति ङीष् ॥

दाक्षीपुत्रः । पु । पाणिनिमुनौ ॥ दाक्ष्याः पुत्रः ॥

दाचेय: । पु । पाणिनिमुनौ ॥ दाच्या अपत्यम् । स्त्रीभ्योढक् ॥

दाच्यम् । न । कौशले । दच्चतायाम् ॥ सहसा प्रत्युत्पन्नेषु कार्येषु अव्यामोहेन प्रवृत्तौ ॥ दच्चस्य कर्म भावो वा । ष्यञ् ॥

दाघ । पु । दाहे ॥ दह्यतेऽनेन । दहभस्मीकरणे । हलश्चेतिघञ् । न्यङ्कादित्वात् कुत्वम् ॥

दाडक । पु । दन्ते ॥ इति शब्दार्थकल्पतरु ॥

दाडिम । चि । एलायाम् ॥ पु । करके । वृत्तफले । शुकवल्लभे ॥ समौकरकदाडिमाविच्यमर ॥ तत्फलं चिविध स्वादु स्वादम्ल केवलाम्लकम् । तचस्वादुत्रिदोषघ्नतृट्दाहज्वरनाशनम् ॥ हृत्कण्ठमुखरोगघ्न तर्पणं शुक्रलघु । कषायानुरसग्राहि स्निग्ध मेधाबलावहम् ॥ स्वादम्लं दीपन रुच्यकिञ्चित् पित्तकरलघु । अम्लन्तु पित्तजनकमुष्णं वातकफापहमिति भावप्रकाश ॥ * ॥ तापहारिमधुरलघुपथ्यमिति राजनिर्घण्टः ॥ दलन दाल' । दलविशरणे । घञ् । दालेन निर्वृत्तः । भावप्रत्ययान्तादिमप् । डलयोरेकत्वम् ॥

दाडिमपुष्प. । पु । रोहितकद्रुमे ॥ दाडिमस्य पुष्पमिव पुष्पमस्य ॥ न । करकपुष्पे ॥

दाडिमपुष्पक' । पु । रोहितकवृक्षे ॥ दाडिमइव पुष्पाणि यस्य ॥

दाडिमप्रिय: । पु । शुकखगे ॥

दाडिमभक्षण । पु । कीरे ॥

दाडिमादिचूर्णम् । न । चूर्णविशेषे । देपलेदाडिमादष्टौ खण्डाद् व्योष पलत्रयम् । त्रिसुगन्धिपलञ्चैक चूर्णमेकत्रकारयेत् ॥ तच्चूर्णमाचयाभुक्तमरोचकहरं परम् । दीपन पाचनञ्चशात् पीनसज्वरकासजित् ॥

दाडिमी । स्त्री । दाडिमे ॥

दाडिमीरस । पु । व्यञ्जनोपस्करान्तरे ॥ दाडिम घृतसन्तप्ते तत्रपाचे विनि चिपेत् । तत पक्व पटेपूत इति स्याद्दाडिमीरस. ॥

दाडिमीसार । पु । दाडिमे ॥ इति राजनिर्घण्ट. ॥

दाडिम्ब । पु । दाडिमे ॥ इतिचिकाण्डशेष. ॥

दाढा । स्त्री । दंष्ट्रायाम् ॥ अभिलाषायाम् ॥ समूहे ॥ इतिशब्दार्थकल्पतरु ॥

दाढिका । स्त्री । दंष्ट्रिकायाम् ॥

दाण्डपाता । स्त्री । तिथिविशेषे ॥ दण्डपातोस्या वर्त्तते । घञ. सास्यां क्रि

येतिञ' ॥

दाण्डमाथिक । त्रि । दण्डमाथ धावति । माथोत्तरपदेतिठक् ॥

दाण्डा । स्त्री । क्रीडाविशेषे । पटा इतिभाषा ॥ दण्ड प्रहरणमस्यां क्रीडायाम् । तदस्या प्रहरणमितिण ॥

दाण्डाजिनिक । पु । मायाजीविनि । सदम्भे ॥ दण्डाजिनेन दम्भेनार्थान न्विच्छति । अय.शूलदण्डाजिनाभ्यामितिठञ् ॥

दाण्डिनायन । पुं । दण्डिनोगोत्रापत्ये ॥ नडा० फक् । दाण्डिनायनहास्तिनायनेत्यादिना टिलोपाभाव ॥

दात । त्रि । लूने । छिन्ने ॥ दायते स्म । दाप् लवने । क्त ॥ शुद्धे ॥ दायति । दैप् शोधने । कर्त्त.र क्त ॥

दाता । त्रि । दानशीले । अधिरे । दानकर्त्तरि ॥ ददाति । डुदाञ्० । तृच् ॥

दात्यूह । पुं । कालकण्ठके खगे ॥ चातके ॥ जलकाके ॥ मेघे ॥ दाति । दाप्०। क्तिन् । दाति भागं मूहते । ऊह० । अण् ॥ यद्वा । दित्यौहोयम् । अण् । देविकाशिंशपेत्यात्त्वे वाहऊठ शकन्वादि ॥

दात्यौह. । पुं । दात्यूहे ॥ दित्यौहोऽयम् । कृष्णू । देयिकाशिंशपेत्यादि

नात्वे सम्प्रसारणम् । वृद्धि. ॥

दात्रम् । न । छेदनशस्त्रे । लविचे ॥ दायतेऽनेन । दाप्० । दाम्नीत्यादिना ष्ट्रन् ॥ दादिभ्यश्छन्दसीतित्वन्वा ॥

दात्री । स्त्री । दानशीलायाम् ॥ तृजन्तात् ङीप् ॥

दात्व. । पु । दातरि ॥ ददाति । डुदाञ्० । अनिदेत्यादिना ददातेस्त्वन् ॥

दाद । पु । दाने ॥ दद्यते । दददाने । कर्मणि घञ् ॥

दाधिकम् । त्रि । दधिसंस्कृतद्रव्ये ॥ दधिसंस्कृतम् । दध्नष्ठक् ॥ दध्ना संस्कृत वा । प्राग्वहतीयष्ठक् । दध्नाचरति । चरतीतिठक् । दध्ना संसृष्टं वा । संसृष्टेठक् । दध्नोपसिक्त वा । व्यञ्जनैरुपसिक्त इतिठक् ॥

दानम् । न । गजमदे ॥ पालने । रक्षणे ॥ छेदे ॥ शुद्धौ ॥ विश्राणने । त्यागे । परस्वत्वापत्तिपर्यन्तं स्वत्यागे । देशकालेश्रद्धया यथाशक्त्यान्यायार्जितार्थानां सत्पात्रे समर्पणे । स्वस्वत्वास्पदानामन्नादीनां यथाशक्ति शास्त्रोक्तसविभागे । असङ्कोचेनवित्तेषु स्वस्वत्वपरित्यागेन परस्वत्वापादने । सम्प्रदानस्वत्वापादकद्रव्यत्यागे ॥ * ॥ अर्थानामुचिते पात्रेश्रद्धया प्रतिपादनम् । दानमित्यभिनिर्दिष्टव्याख्या

नतस्यवक्ष्यते ॥ दाता प्रतिग्रहीताच
श्रद्धा देयञ्च धर्मयुक्। देशकालौच
दानानामङ्गान्येतानि षड्विदुः ॥ म
नसा पात्रमुद्दिश्य भूमौ तोयं विनि
क्षिपेत्। विद्यते सागरस्यान्तो दान
स्यान्तो न विद्यते ॥ परोक्षे कल्पितं
दानं पात्राभावे कथं भवेत्। गोत्र
जेभ्यस्तथा दद्यात् तदभावे ऽस्यब-
न्धुषु ॥ यदातु न सकुल्य स्यान्नच
सम्बन्धिबान्धवा। दद्यात् स्वजाति
शिष्येभ्य स्तदभावेप्सुनि क्षिपेत् ॥
स्नात्वाशुद्धेसमे देशे गोमयेनोपले-
पिते। वसित्वा वसनशुद्धं दानं दद्या
त् सदक्षिणम् ॥ दानं चतुर्विधं प्रोक्त
मृषिभिर्धर्मकोविदैः। नित्यं नैमि
त्तिकं काम्यं विमलं दानमीरितम् ॥
अहन्यहनि यत्किञ्चिद् दीयते ऽ
नुपकारिणे। अनुद्दिश्यफलं तस्मा
त् ब्राह्मणायतु नित्यकम् ॥ यत्तुपा
पोपशान्त्यैव दीयते विदुषांकरे।
नैमित्तिकं तदुद्दिष्टंदानं सद्भिरनुष्ठि
तम् ॥ अपत्यविजयैश्वर्यस्वर्गार्थं य
त् प्रदीयते। दानं तत्काम्यमाख्या
तमृषिभिर्धर्मचिन्तकैः ॥ ईश्वरप्रीण
नार्थाय ब्रह्मवित्सु प्रदीयते। चेत-
सा सत्त्वयुक्तेन दानं तद्विमलं स्मृत
म् ॥ * ॥ गत्वायद् दीयतेदानं भ
क्त्यापात्रेविधानतः। तदनन्तफलं वि
द्धिश्रद्दस्या चिन्तयेन्नृप ॥ * ॥ तच्च सा
त्त्विकादि भेदात् त्रिविधम्। यथा।
दातव्य मिति यद्दानं दीयते ऽनुप
कारिणे। देशेकालेच पात्रेच तद्दा
नं सात्त्विकं स्मृतम् ॥ यत्तुप्रत्युप
कारार्थं फलमुद्दिश्यवापुनः। दीयत
च परिक्लिष्टं तद्दानं राजसं स्मृतम्
॥ अदेशकालेयद्दानमपात्रेभ्यश्च दी
यते। असत्कृत मवज्ञात तत् ता
मस मुदाहृतम् ॥ * ॥ यदेवहिम
मेदमितिविशेषजानान परस्वत्वाप
त्तयेस्वामी त्यजति परस्वविशेषेण
द्मममेतिस्वत्वप्रत्येतीति व्यवहारे
॥ * ॥ अस्यविधिर्यथा। स्नानसन्ध्याच
मनानिकृत्वा नारायणनवग्रहगुरून्
सम्पूज्य देयद्रव्यं वामहस्तेन धृत्वा
दक्षिणहस्तेन त्रिरभ्यर्च्य तद्द्रव्याधि
पतिदेवतां सम्प्रदानञ्चार्चयित्वा स
ङ्कल्प्यकुशतिलजलत्यागपूर्वकंदद्या
दिति ॥ विवेकज्ञानशुद्धौ ॥ दैप्रशो
धनद्रव्यस्माद्धातोर्ह्यनपद व्युत्पद्यते
। यदाहपतञ्जलि। विवेकख्यातिरवि
प्लवादुःखत्रयस्यहानोपाय इति। अवि
प्लवा शुद्धि। सा च सवासन संशयविपर्य्या
सानापरिहारेण विवेकसाक्षात्कारस्य
स्वच्छप्रवाहे ऽवस्थानम्। सा च न वि

नादरनैरन्तर्यदीर्घकालसेविताभ्या सपरियाकाङ्क्षवतीति । दानेनविवे कख्याख्युपकार्यैशाङ्गेन सोपिसङ्कृची त. । सेय पञ्चमीसिद्धि सदा मुदितमित्युच्यते । दानञ्च सि- द्धिहेतु । धनादिदानेनाराधितोज्ञा नी ज्ञान प्रयच्छति ॥ इति अनेन । दोअवखण्डने । ल्युट् ॥ डुदाञो भावे दीयते इति कर्मणि वा ल्युट् ॥ स्वधनस्यपरेभ्य. प्रतिपादने राज्ञा मुपायविशेषे । उपप्रदाने ॥

दानकम् । न । कुत्सितदाने ॥ दानकु त्सितेइतियावादिषुपाठात्कन् ॥

दानकर्म । न । दानक्रियायाम् ॥

दानतोयम् । न । सदोदके ॥

दानधर्मः । पु । दानस्यफले ॥

दानपति. । पुं । सदाप्रदे । सततदात रि ॥ अक्रूरे ॥

दानपात्रम् । न । विद्यादियुक्ते ॥ विद्या युक्तो धर्मशील. प्रशान्त. क्षान्तो दा न्त. सत्यवादी कृतज्ञ । वृत्तिग्ला नो गोहितो गोशरण्यो दाता यज्वा ब्राह्मण पात्रमाहु. ॥ दानस्यपात्रम् ॥

दानव । पु । असुरे । दनुजे । दक्ष कन्याया दनो गर्भे कश्यपाज्जाते ॥ दनो रपत्यम् । तस्यापत्यमित्यण् ॥

दानयज्ञ. । पुं । वैश्ये ॥ इति पुराणम् ॥

दानवारिः । पुं । सुरे । देवतायाम् ॥ दानवाना मरि । दानवो ऽरिर्य स्य वा ॥

दानशील. । त्रि । वदान्ये । दातरि ॥

दानशौण्ड । त्रि । वदान्ये । बहुप्रदे ॥ दानेशौण्डः । सप्तमीशौण्डैरितिस मासः ॥

दानायोग्य । त्रि । अपात्रे ॥ अव्रताना ममन्त्राणां जातिमात्रोपजीविनाम् । नैषां प्रतिग्रहो देयो न शिलातार येच्छिलाम ॥

दानीय. । त्रि । सम्प्रदाने । दानपात्रे ॥ दीयतेऽस्मै । डुदाञ्० । कृत्यल्यु टोबहुलमिति सम्प्रदाने ऽनीयर् ॥

दातु । त्रि । दातरि ॥ विक्रान्ते ॥ द दाति । डुदाञ० । दाभाभ्यांनु ॥

दान्त. । त्रि । तपक्लेशसहे । जिते न्द्रिये । बहिरिन्द्रियनिग्रहकर्त्तरि ॥ दाम्यतिस्म । दमेर्गत्यर्थेतिक्तः । यस्यविभाषेतिनेट् । अनुनासिकस्ये तिदीर्घः ॥ दमिते । शिक्षितवृषे ॥ दान्तोय बलीवर्द्द युगाग्रकटवा हनयोग्य कृतइतिगम्यते इतिभाष- ती ॥ दम्यतेस्म । दमुउपशमे । णि जन्त । क्त । वादान्तशान्तेतिसाधु. ॥ पुं । दमनकवृक्षे ॥

दान्ति' । स्त्री । तपःक्लेशसहिष्णुतायाम्

।दमथे। दमे॥ दमनम्।दमु॰। स्त्रियांक्तिन्।अनुनासिकस्येतिदीर्घ॥

दापित'।त्रि। साधिते॥ दापयतेस्म ययन्ताद्दाञ क्त॥ दण्डिते॥

दाप्य।त्रि।दापनीये॥

दाम।न।स्त्री। दोहनकाले पशुपादवन्धनरज्जौ।सन्दाने॥ द्यति।दो अवखण्डने।दीयते वा।दीङ् क्षये।मनिन्॥मालायाम्॥रज्जौ॥

दाममपर्व।न। दमनभञ्जनतिथौ। चैत्रशुक्लचतुर्दश्याम्॥

दामनी।स्त्री। तन्त्याम्। पशुवन्धनरज्ज्वाम्॥दामैव।प्र॰ अण्। अन्निति प्रकृतिभाव। टिड्ढेतिङीप्॥

दामलिप्तम्।न।तमोलुकइति प्रसिद्धे तमोलिप्तदेशे॥

दामा।स्त्री।दामनि॥ दो अवखण्डने।दीङ् क्षये वा।मनिन्।मन इति नङीप्।दामानौ दामान इत्यादि।डाबुभाभ्यामन्यतरस्याम् इति डापि तु।दामा दामे दामा, इत्यादि बोध्यम्॥

दामाञ्चनम्।न।अश्वादे, पादवन्धनरज्जौ।पिछाडी इतिभाषा॥ इति हेमचन्द्र॥

दामाञ्चलम्।न। एकशफाङ्घ्रिवन्धे।दामाञ्चने॥ दामाञ्चल पादपाशे इति वैजयन्ती॥

दामिनी।स्त्री।विद्युति॥ दामविद्यते ऽस्या। सञ्ज्ञायां मन्माभ्यामिनीनि॥

दामोदर।पु।श्रीकृष्णे॥ वाल्येचापल्यनिषेधाय यशोदया दाम्नोदरे बद्धत्वात् दाम उदरे यस्येति सप्तम्यन्तस्य वैयधिकरण्येपिसमास।सप्तमीविशेषणे वहुव्रीहाविति ज्ञापकात्॥ तर्वैर्मध्यगत वद्धं दाम्ना गाढ तथोदरे।ततश्च दामोदरतां स ययौ दामवन्धनात्॥ दामानि लोकनामानि तानि यस्योदरान्तरे।तेन दामोदरो देव श्रीधरस्त्व रमाश्रित इतिव्यास॥ दमादिसाधनेन उदारा उत्कृष्टा या गति धूमादिगत्यपेक्षया ऽर्चिरादि स्तयागम्यते इति वा॥ दमाद्दामोदरं विदुरिति भारतोक्ते॥ भूतार्हद्विशेषे॥ नदविशेषे॥

दाम्भिक।त्रि।छद्मनाधर्मकारिणि।वैडालव्रतिकादौ॥दम्भयुक्ते।धर्मध्वजिनि॥पु।वकपक्षिणि॥दम्भेनचरति।ठक्॥

दाय।पु।सोल्लुण्ठभाषणे॥ विभक्तव्यपितृद्रव्ये॥ दाने॥ हरणे। यौतुकादिधने। कन्यादानकाले जामात्रादिभ्यो व्रतभिक्षादौ ब्राह्मणादिभ्यश्च यद्द्रव्य दीयते तदिति भरत.॥ याव

तत्सम्बन्धिधने ॥ क्षये ॥ स्थाने ॥ ख ण्डने ॥ ददाति । डुदाञ्० । श्याद्य घेति ण । आतोयुक् ॥ यद्वा । दीय ते ऽसौ । दोङ् क्षये ।। अकर्त्तरि-चेति चकारस्य सत्ताव्यभिचारार्थत्वा त् घञ् ॥

दायक । त्रि । दातरि ॥ ददाति । डु दाञ्० । ण्वुल् । आतोयुक् ॥

दायबन्धु. । पु । भ्रातरि ॥

दायभाग । पु । दायविभागे । सम्ब न्धिमात्रेण सम्बन्धिधनस्यविभागे । पू र्वद्रव्यस्वामिसम्बन्धाधीनं तत्स्वाम्यु परमे यत्रद्रव्येस्वत्त्वं तत्रनिरूढोदाय शब्दस्तस्यविभागे ॥ एकदेशगतस्यैव भूहिरण्यादावुत्पन्नस्यस्वत्वस्य विनि गमनाप्रमाणाभावेन वैशेषिकव्यवहा रानर्हतया ऽव्यवस्थितस्यगुटिकापा तादिना व्यञ्जने ॥ अथवा विशेषेण भजनं स्वत्वज्ञापनं वा । यत्रचैकदा सीगवादिकं बहुसाधारणं तत्रापित त्काल्विशेषवहनदोहनफलेन स्व त्वव्यज्यते ॥ विभागोर्थस्यपित्र्यस्य पु त्रै र्यत्रप्रकल्प्यते । दायभागइतिप्रो क्तं तद्विवादपदंबुधै ॥ दायस्यभाग ॥

दायविभाग. । पु । दायभागे ॥ श्री सदाशिवउवाच ॥ भूयस्तेकथयाम्या र्ये व्यवहारान्सनातनान् । यान्नच

न् प्रविदन्राजास्वच्छन्दपालयेत् प्र जा ॥ नियमेनविनाराज्ञोमानवाधन लोलुपा । मिथस्तेविवदिष्यन्तिगुरुस्व जनवन्धुभि ॥ व्यतिघ्नंतितदादेवि स्वार्थिनोवित्तहेतवे । पापाश्रयाभवि ष्यतिहिंसयाचजिघांसया ॥ अतस्ते षांहितार्थायनियमोधर्मसम्मत । नियोज्यतेयमाश्रित्यनभ्रश्येयु शुभा नरा ॥ दण्डयेत्पापिनोराजायथा पापानुसारत । तथैवविभजेद्दायान् न्नृणांसम्बन्धभेदत ॥ सम्बन्धोद्वि-विधोज्ञेयोविवाहाज्जन्मनस्तथा । स वैवाहिकसम्बन्धादपरोबलवत्तर ॥ दायेतूद्वहनाज्ज्यायान् सम्बन्धो ऽध स्तन शिवे । अधऊर्द्धक्रमादत्रपुमान् मुख्यतर स्मृत ॥ तत्रापिसन्निकर्षेण सम्बन्धोदायमर्हति । अनेनविधि नाधीराविभजेयु क्रमाद्धनम् ॥ मृत स्यपुत्रपौत्रेषुकन्यासुपितरिस्थिते । भा र्यायामपिदायार्ह' पुत्रएवनचापर ॥ बहवस्तनयायत्रसर्वेतत्रसमांशिन. । ज्येष्ठेराज्याधिकारित्वंतत्सुवानुसा रत. ॥ स्वायत्तपैतृकंतत्रग्नोधयेत्पैतृ कैर्धनै. ॥ तस्मिन् स्थितेविभागार्हं नभवेत्पैतृकंवसु ॥ विभज्ययदिगृह्णी यु र्विभवंपैतृकंनरा. । तेभ्यस्तदृनमा कृत्यपितुर्वादापयेन्नृप' ॥ यथास्वकृत

पापेननिरययात्मिमानवा । कृत्स्नेना
पितथावद्ध स्वयमेवनचापर ॥ साधा
रणधनयच्चस्थावरस्थावरेतरत् । अभि
न.प्राप्तुमर्हन्तिस्वस्वम शविभागत ॥
अभिन्नांसम्मतावेवविभाग परिसिद्ध्य
ति । तेषामसम्मतौराजासमदृष्टया
शमाचरेत् ॥ स्थावरस्यचरस्यापिवि
भागानर्हवस्तुन । मूल्य वा तद्रुपस्व
त्व मभिन्नां विभजेन्नृप ॥ विभक्तेपि
धनेयस्तु स्वीयांश प्रतिपादयेत् । पु
नर्विभज्यतद्द्व्यम प्राप्तांशायदाप
येत् ॥ कृतेविभागेद्रव्याणा मभिन्ना
सम्मतौ भिवे । पुनर्विवादय स्तत्रशा
स्योभवतिभूभृत ॥ स्थितेप्रेतस्यपौत्रे
चभार्य्यायांचपितर्य्यपि । पौत्रएवध
नार्ह. स्यादधस्ताज्जन्मगौरवात् ॥
अपुत्रस्यस्थितेतातेसोदरेच पिताम
हे । जन्मन सन्निकर्षेण पितैवास्यध
नम्हरेत् ॥ विद्यमानासुकन्यासुस
न्निकृष्टास्वपिप्रिये । मृतस्यपौत्रोध
नभाक् यतोमुख्यतर पुमान् ॥ धन
मृतेन पुत्रेणपौत्रं यातिपितामहात्
। अतोचगीयतेलोकै पुत्ररूप स्वय
पिता ॥ औद्वाहिकेपिसम्बन्धे ब्राह्मी
भार्य्यावरीयसी । अपुत्रस्यहरेद्दक्
थं पत्युर्हेषाद्दहारिणी ॥ पतिपुत्र
विहीनातुसप्राप्य स्वामिनोधन । नै

वदातु नविक्रेतु समर्थास्वधन विना
॥ पितृभि श्वशुरैर्वापिदत्त यद्धर्मसम्म
त । स्वकृत्योपार्जित यच्चस्त्रीधन तत्
प्रकीर्त्तित ॥ तस्यांमृताया रिक्थ त
त्पुन.स्वामिपद व्रजेत् । तदासन्त
रोरिक्थमधजद्धक्रमाद्धरेत् ॥ मृते
पत्यौस्वधर्मेण पतिबन्धुवशेस्थिता ।
तदभावेपितृबन्धोस्तिष्ठतीदायमर्ह
ति ॥ शकितव्यभिचारापिनपत्युर्दा
यभागिनी । लभतेजीवनमात्रभर्त्तु
र्विभवहारिणा ॥ वहूव्यश्चेद्वनिता-
स्तस्यस्वर्यातुधर्मतत्परा । भर्त्तुरन्स्वा
मिनोवित्त समांशेनशुचिस्मिते ॥ प
त्युर्धनहरायास्तु मृतौभर्त्तृसुतास्थि-
तौ । पुन स्वामिपद गत्वा धन दुहि
तर व्रजेत् ॥ एवस्थिताया कन्याया
मृक्थ पुत्रवधूगत । तन्मृतेस्वामिन
प्राप्य श्वशुरात्तत्सुतामियात् ॥ तथा
पितामहेसत्वेवित्त मातृगत प्रिये ।
तस्यांमृताया पुत्रेणभर्त्तश्वशुरगम्भ-
वेत् ॥ मृतस्योर्द्धगत वित्त यथा प्रा
प्नोति तत् पिता । जनन्यपितथाप्नो
ति पतिहीना भवेद्यदि ॥ अत स-
त्यांजनन्यांतु विमातानधन हरेत् ।
मृतेजनन्यास्त प्राप्यपित्रागच्छेद्विमा
तर ॥ अधस्तनानांविरहाद्दायरिक्
थनयात्यध । येनैवाधस्तन प्राप्तते

नैवोढ़ॕ तदाव्रजेत् ॥ अत स्थितौपि तृव्यस्यधन स्वस्वगतं चसत् । पत्यौ स्थितेऽनपत्यायाम्तौपितृव्यमाश्र येत् ॥ ऊढ्वाबित्तमध प्राप्यपुमांस मवलम्बते । अत सत्यासोदरायांवै माचेयोधन हरेत् ॥ स्थितायां सोद रायांच विमातु पुत्रसततौ । वैमाचे यगत वित्त वैमाचेयान्वयोभजेत् ॥ म्रतस्यसोदरोभ्राता वैमाचेयस्तथा । श्रिवे। धन पितृगतत्वेन विभजेतां समाश्रितौ॥ कन्यायां जीवितायांच तदपत्य नदायभाक् । यचयत्साधित वित्तत न्मृतावपर व्रजेत् ॥ विभजेयु र्दुहितर पुत्राभावेपितुर्वसु । उद्वाह य त्योऽनूढान्तु पितु साधारणेधने. । क्सत त्यास्तायास्व स्त्रीधन स्वामिन भजेत् । अन्यत्तुद्रविणं यस्मादात तत्पदमाश्रयेत् ॥ मेतस्यश्रयनैश्चा रीविद्ध्या दासपोषण । पुत्रस्तु तदुप स्वत्वेनैयक्ता दानविक्रये॥ पितामहस्नुषा ग्राम्च सत्यांतातविभातरि । पितामहगतंरिक्थतत्पुत्रेषान्नुगा व्रजेत् ॥ पितामह पितृव्येचतथाभ्रा तरिजीवति । अधोभवानांमुख्यत्वा त्भ्रातैवधनभाग्भवेत् ॥ पितृव्यात् सन्निकर्षेन्तुल्यौ भ्रातृपितामहैा । धनंपितृपदंगत्वा प्रयातुभ्रातर व्रजे

त् ॥ स्थितेप्यपत्येदुहितुः प्रेतस्यपि तरिस्थिते । दुहितृपत्यधनभाक् धनं यस्मादधोमुख ॥ स्व प्रशातु स्थिते-ता तेतथामातरिकाद्धिके । पुंसोमु ख्यतत्वेनधनहारी भवेत् पिता ॥ स्थितः स्वपितृसापिण्डोवर्त्तमानेपि मातुले । प्रेतस्यधनहारीस्यात् पितु सम्बन्धगौरवात् ॥ अधस्तादूगमना भावेधनमूर्द्ध्वमथंगतं । तत्रापिपुंसांमु ख्यत्वादित पितृकुलंश्रिये॥ अतोच सन्निकृष्टोपिमातुलोनामुयाद्धनं । अ जीवत् पितृकपौत्र पितृव्यैःसहपा वैति ॥ पितामहस्यद्रविणात् स्वपितु र्दायमर्हति । भ्रातृश्चीनातथापौत्री पितृव्यैः समभागिनी ॥ पितामह-धनसौम्याहरेत्स्वेन्मृतमातृका । सत्यां पौत्र्या. पितामह्यांपौत्र्या. पितृस्व सर्य्यपि ॥ वित्तेपितृगतेदेविपौत्री-तत्राधिकारिणी । अधोगामिषु वित्ते षु पुमान् ज्यायानधस्तन ॥ ऊर्द्धगा मिधनेश्रेष्ठ पुमानूर्द्ध्वाङ्गवोभवेत् ॥ अतःस्नुषायां पौत्र्याञ्चसत्यादुहित रिम्रियै । प्रेतस्यविभवंहर्त्तुंनैवशक्नो तितत्पिता ॥ यदापितृकुलेनस्या-न्मृतस्यधनभाजनं । पूर्वोक्तविधिनारि क्थमातामहकुलभजेत् ॥ मातामह गतंवित्तंमातुलैस्तत्सुतादिभिः । अ

धनं द्वैक्रमेणैव पुमांसत्स्त्रियमाश्रयेत् ॥ भ्रात्रन्वयेविद्यमानेपित्रो सापि राजनेस्थिते। मृतस्यैवीतनयेनापि तुद्दायभाग्भवेत् ॥ अवीपत्नीपतनं पुत्राद्भेरन्धनभागिनः। ग्रासमाच्छादनंभद्रेस्व प्रयातुर्यथाधन॥ अवो दाह प्रकुर्वन्ती श्रवभर्त्तैवपाचयेत्। सौम्याभावेऽधिकारोऽस्या पित्रादीनां धनेप्रिये ॥ अत सत्कुलजांकन्यांशैवेद्दात्त्वयन् पिता। क्रोधाद्वालोभतो वापिसभवेल्लोकगर्हित ॥ अवीतदन्वयाभावेसोदकोब्रह्मदोन्वय। हरे यु क्रमतोवित्तमृतस्यशिवशासनात् ॥ पिण्डदात्सप्तपुरुषाः सपिण्डा कथिताः प्रिये। सोदकाद्यमाता स्युस्तत केवलगोत्रजा ॥ विभक्तद्रविणयश्चसंसृष्टस्वेच्छयातुचेत्। अविभक्तविधानेनभजेरंस्तद्धन पुन ॥ अविभक्तविभक्तावायस्ययाद्दृग्विभागिता। मृतेपितस्यदायादास्ताद्दृग्विभवभागिनः॥ येयस्यधनहर्त्तारोभवेयुर्जीवनावधि। दद्यु. पिण्डतएवास्यशैवभार्य्या सुतविना॥ इतिश्रीमहानिर्वाणतन्त्रे दादशोल्लासे सनातनव्यवहारकथनम् ॥

दायादः। पु। सपिण्डे ॥ तनये। सुते ॥ दायमत्ति। अदभक्षणे। कर्मण्यण् ॥ यथा। आदत्ते। उदाङ्०। आतोनुपसर्गे इतिकः। दायस्यादः। स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्चेतिसूत्रएवनिपातनात्सोपसर्गादप्यादन्तात् कः ॥

दायितः। त्रि। दण्डिते। साधिते ॥ दयतेर्ण्यन्तात् कर्त्तरिक्तः ॥

दाराः। पुभूम्नि। भार्य्यायाम् ॥ दारयन्ति भ्रातॄन्। दृ० णिजन्त। दारजारौकर्त्तरिणिलुक् चेतिघञ् ॥

दारकः। पु। बालके। पुत्रे ॥ ग्राम्यशूकरे ॥ त्रि। भेदके॥ दारयति। दृ०। ण्वुल् ॥

दारकर्म्म। न। विवाहे ॥

दारणम्। न। विदारणे ॥ कतके ॥ दार्यतेऽनेन। दृ०। णयन्ताल्ल्युट् ॥

दारदः। पु। विषभेदे ॥ पारदे ॥ हिङ्गुले ॥ समुद्रे ॥ दरदि देशविशेषेभवः। अण् ॥

दारवलिभुक्। पु। वकपक्षिणि ॥

दारा। स्त्री। भार्य्यायाम्॥ इतिभरत ॥

दारि। स्त्री। विदारके ॥

दारिका। स्त्री। बालिकायाम् ॥

दारित। त्रि। भिन्ने। भेदिते। कृतदारणे ॥ दार्य्यतेस्म। दृ०। णयन्तात् क्तः ॥

दारिद्र्यम्। न। दरिद्रत्वे। निर्द्धनत्वे

॥ भावे ष्यञ् ॥

दारी । स्त्री । क्षुद्ररोगविशेषे । विपादिकायाम् । बिवाई इति भाषा ॥ परिक्रमणशीलस्य वायुरत्यर्थरूक्षयोः । पादयोः कुरुते दारीं सरुजां तलसंश्रिताम् ॥ अस्याश्चिकित्साभावप्रकाशे द्रष्टव्या ॥

दारु । न । पित्तले ॥ काष्ठे ॥ देवदारौ ॥ त्रि । शिल्पिनि ॥ दातरि ॥ दारके ॥ दीर्यते । दृ० । दृसनिजनीति उण् ॥ यद्वा । ददाति । डुदाञ्० । क्वति । दो० । दयते वा । देङ् रक्षणे । तक्षीत्यादि । दाधेट्सिशदसदो रुरिति वा ॥

दारुक । पुं । श्रीकृष्णसारथौ ॥ न । देवदारुणि ॥

दारुकदली । स्त्री । वनकदल्याम् ॥

दारुका । स्त्री । पुत्रिकायाम् । कुरव्याम् । शालभञ्ज्याम् । कठपूतली इति भाषा ॥

दारुगन्धा । स्त्री । चीडानामगन्धद्रव्ये ॥

दारुगर्भा । स्त्री । दारुकायाम् ॥

दारुचीनी । स्त्री । स्वनाम्ना प्रसिद्धे द्रव्ये ॥

दारुचीर्णकम् । न । गुडत्वचि ॥

दारुज' । पु । मर्दले ॥ त्रि । दारुजाते ॥

दारुण । पु । चित्रके ॥ रौद्ररसे । भयानकरसे ॥ न । तीक्ष्णसंप्रकनखनेषु ॥ त्रि । भयावहे । दुःसहे । भीषणे । भयहेतौ ॥ दारयति चित्तम् । दृ भये । कृद्दारिभ्य उनन् ॥

दारुणकम् । न । रूक्षीतिख्याते मस्तकस्थे रोगे ॥ तल्लक्षणं यथा । दारुणा कण्डुरा रूक्षा केशभूमौ प्रजायते । मारुतश्लेष्मकोपेन विद्याद्दारुणकन्तु तत् ॥ दारुणाकर्कशा ॥

दारुणा । स्त्री । रात्रिविशेषे ॥ ॥ यथा । तृतीयाऽऽयसमाया दारुणा सा प्रकीर्त्तितेति ॥ नर्मदायां दक्षिणतीर्थे षष्ठ्यादेव्याम् ॥

दारुनिशा । स्त्री । दारुहरिद्रायाम् ॥

दारुपत्री । स्त्री । हिङ्गुपत्र्याम् ॥

दारुपीता । स्त्री । दारुहरिद्रायाम् ॥

दारुपुत्रिका । स्त्री । दारुकायाम् ॥

दारुमुखाह्वया । स्त्री । } गोधायाम्- दारुमुखाह्वा । स्त्री । } । निहाकायाम् ॥

दारुमूषा । स्त्री । दारुमंसीतिप्रसिद्धौषधौ ॥

दारुसारम् । न । चन्दने ॥ दारुणां दारुषु वा सारः श्रेष्ठम् ॥

दारुसिता । स्त्री । त्वक्स्वाद्याम् । दरुचीनीतिख्यातायाम् ॥ उक्तादारुसिता स्वाद्वी तिक्ता चानिलपित्तहृत् । सुरभि शुक्रला वर्ण्या मुखशोषतृषा

पदा ॥

दारुणी । स्त्री । दारुपुत्रिकायाम् ॥

दारुहरिद्रा । स्त्री । पचम्पचायाम् । पर्जन्याम् । कस्मल इतिपर्वतीयभाषाप्रसिद्धायाम् ॥ दारुणावीऽहरिद्रा च ॥

दारुहस्तक । पु । तद्दीम् । डोई इति भाषा ॥ हस्तइव प्रतिकृति । इवेप्रतिकृताविति कन् । दारुणो हस्तक ॥

दार्ढ्यम् । न । दृढतायाम् ॥ भावे ष्यञ् ॥

दार्तेय । त्रि । दृतिस्थे ॥ दृतौ भवम् । दृतिकुक्षीति ढञ् ॥

दार्दुरम् । न । दक्षिणावर्त्तशङ्खे ॥ दर्दुरधर्मे ॥

दार्दुरिक । पु । कुलाले ॥ दर्दुरो म्रत्पात्रविशेष । तकरोति । शब्ददर्दुरं करोतीति ठक् ॥

दार्वटम् । म । मन्त्रवेश्मनि । चिम्रागृहे ॥

दार्वण्ड । पुं । मयूरे ॥

दार्वाघाट । पु । काष्ठकुट्टखगे । शतपत्रे । खुटकवढव्या इतिभाषा ॥ दारुआहन्तीति विग्रहे दाराघाहनो ऽ न्त्यस्य घट संज्ञायामिति दारुशब्दे उपपदे आङ् पूर्वाद्धन्तेरण् प्रत्ययः टश्चान्तादेशः ॥

दार्वाघात: । पु । दार्वाघाटे ॥ इ० म० ॥

दार्विका । स्त्री । दारुहरिद्राक्वाथतुल्ये काथोद्भवतुत्थे ॥ गोजिह्वौषधौ ॥

दारयति । द्दृ० । उल्कादित्वात्‌साधु, । दार्वी दारुहरिद्रा तद्विकारोपिदार्वी अभेदोपचारात् । स्वार्थेकन् ॥

दार्विपत्रिका । स्त्री । गोजिह्वायाम् ॥

दार्वी । स्त्री । देवदारुणि ॥ हरिद्रायाम् ॥ गोजिह्विकौषधौ ॥ दारुहरिद्रायाम् ॥ दार्वी निम्नागुणा किन्तु नेत्रकर्णास्यरोगनुत् ॥ दीर्यते । द्दृ० । दृसनिजनीतिञ्‌ण् । वोतइति गौरादित्वाद् ङीष् ॥

दार्वीकाथोद्भवम् । न । रसाञ्जने ॥

दार्षद । त्रि । दृषदिपिष्टे चूर्णादौ ॥ दृषदो भवाद्यर्थेपि शेषइत्यण् ॥

दाल. । पु । कोद्रवे ॥ न । मधुविशेषे ॥ सस्नुत्य पतितं पुष्पात् यत्तु पत्रोपरिस्थितम् । मधुराम्लकषायञ्च तद्दार्ल मधुकीर्त्तितम् ॥ दाल मधु लघु प्रोक्त दीपनीयं कफापहम् । कषायानुरसं रूक्ष रुच्य छर्दिप्रमेहजित् ॥ अधिक मधुर स्निग्ध वृंहण गुरुभारिकम् ॥ लघुपाके । गुरुभारिक तुच्चितम् ॥ इन्द्रनीलदलाकारस्तूक्ष्ममक्षिकोत्पन्न इक्षकोटरान्तरभव मक्षिविराजनिर्घर्षट ॥

दाल्‌न. । पु । दन्तरोगविशेषे ॥ दन्तम्

जगतानाख्य. पञ्चमेया यथेरिता'। दीर्घमायोष्विवरुआ यस्टन्तेषुजाय ते। दावनो नाम सत्याधि सदागति निमित्तज. ॥ १२ ॥

दावव: । पु । स्थावरविषभेदे ॥

दावा । स्त्री । महाकाले । किम्पाके ॥

दालि: । स्त्री । दलितेशमीधान्ये । दाल इति भाषा ॥

दालिका । स्त्री । महाकालवतायाम् । किम्पाके ॥

दालिम । पु । दाडिमे ॥ इतिभरत' ॥

दाली । स्त्री । दलिते शमीधान्ये । दाल इतिभाषा ॥ देवदालीलतायाम् ॥

दालभ्य. । पु । मुनिविशेषे ॥ चैकिताय ने ॥ बकाख्यर्षौ ॥ दल्भ्यस्यगोत्रा पत्यम् । गर्गादिभ्योयञ् ॥

दाल्भी । पुं । इन्द्रे ॥ इति त्रिकाण्डशेष' ॥

दाव: । पु । वनानले ॥ वने ॥ उपतापे ॥ दुनोति । टुदुउपतापे । दुन्योर नुपसर्गे इतिण. ॥

दावाग्नि । पुं । वनवह्नौ । दावे ॥ दाव स्यवनस्याग्नि. ॥

दावानल' । पु । दवाग्नौ ॥

दाविक. । त्रि । देविकानद्युद्भवे ॥ देवि कायां भव. । तत्रभवइत्यण् । देवि काशिंशपेत्यचामादे रात्वम् । स्त्रि यां टिड्ढेतिङीपि दाविकी ॥

दाश. । पु । धीवरे ॥ दशति मत्स्यान् । दंशदशने । दंशेश्छन्दसीन आच । दशेश्च ॥ यद्वा । दाश्यते मूल्यमस्मै । दाशृदाने । घञ् ॥

दाशतयी । स्त्री । ऋचां संहितायाम् ॥ दशमण्डलानि अवयवा यस्या' । सङ्ख्याया अवयवेतयप् । ङीप् ॥

दाशपुरम् । न । कैवर्तीमुस्तके । दश पुरे । मोथा इति भाषा ॥ दाशान् कैवर्तान् पिपर्त्ति । पुपालनपूरण यो. । मू०क: । उदोष्ठ्यपूर्वस्येत्यु त्वम् ॥

दाशपूरम् । न । दाशपुरे ॥

दाशफली । स्त्री । ओषधिविशेषे ॥ पा ककर्णेतिङीष् ॥

दाशरथ. । पु । श्रीरामचन्द्रे ॥ दशर थस्यायम् । तस्येदमितिसम्बन्धाऽर्थे ऽण् । सम्बन्धश्चात्र पितापुत्रत्वरूप. ॥ पुरा भरतस्त्वयैमरीचिवसन्निभान् न वाशपुत्रान्सुहृदाश्नृपात्मज । सृजत्य मोघान् विशिखान् वधायते प्रदीय तांदाशरथायमैथिली ॥

दाशरथि. । पु । श्रीरामे ॥ दशरथस्य अपत्यम् । अतइञ् ॥

दाशार्ह: । पु । विष्णौ ॥ यादवे ॥ दा-श्यते इति दाशो दानम् । तदर्हति । अर्हपूजायाम् । अण् ॥ दशार्हकु